भारत सरकार
GOVERNMENT OF INDIA
राष्ट्रीय पुस्तकालय, कलकत्ता
NATIONAL LIBRARY, CALCUTTA

वर्ग संख्या
Class No. 180. Jc. 86. 42
पुस्तक संख्या V. 1
Book No.
रा०पु०/ N.L. 38

MGIPK—11 LNLC/67—3-1-68—1,50,000

१ — ३१ . . . . कार्यब्रह्मस्वरूपपरत्वेन प्रतीतानां वाक्यानां समन्वयः

३२ . . . . अन्तर्यामिस्वरूप "

४३ . . . . उपास्य स्वरूप "

३८ — १३४ प्रकीर्णकार्थ "

२ — ३७

४५

५३

२२ — १५७

३ — २७

४१

६६

५२ — १८६

४ — १९

२१

१६

२२ — ७८

---

५५५ सूत्राणि

१६ पादाः

०४ अध्यायाः

अयनगति वार्षिकी — ०° — ०′ — ५०″ — ९२‴

इदानीमयननिरिक्तराभद्रे पश्चिमा- २२°।३७′

तस्याः कृत्तिकारम्भस्थानाद्यावधि समयः —

३५३४ वर्षाणि

कृत्तिकाप्रथमचरणारम्भस्थानात् ३७७२ वर्षाणि

कृत्तिकाप्रथम-चरणस्य विंशतिकलाभोगगणनायोगः

३५५७

अयनस्य सर्वभगणलभोगः २५८१७

द्वितीयाकृत्तिगणनायोगः — २५८१७

·३५३४

२९३५१

BIBLIOTHECA INDICA;

A

COLLECTION OF ORIENTAL WORKS

PUBLISHED UNDER THE SUPERINTENDENCE OF THE

ASIATIC SOCIETY OF BENGAL.

No. 198.



रत्नप्रभाभासितशाङ्करब्रह्मसूत्रभाष्यं।

THE APHORISMS OF THE VEDÁNTA,

By BÁDARÁYAṆA,

WITH

THE COMMENTARY OF S'ANKARA ÁCHÁRYA AND THE GLOSS OF GOVINDA ÁNANDA.

Edited by Pandita Ráma Náráyana Vidyáratna.

FASCICULUS X.

CALCUTTA:

PRINTED BY C. B. LEWIS, AT THE BAPTIST MISSION PRESS.

1863.

LISTED
NATIONAL LIBRARY
No. 6762
Date. 9-2-76
CALCUTTA.

SANSKRIT WORKS PUBLISHED,

IN THE NEW SERIES.

The Vais'eshika Sútras, with Commentaries, by Pandita Jaya Náráyaṇa Tarkapanchánana. Complete in five Fasc. Nos. 4, 5, 6, 8 and 10.

The Sándilya Sútras with S'wapnes'wara's Commentary. Edited by Dr. J. R. Ballantyne, LL. D. Complete in one Fasc. No. 11.

The Kaushítaki-Bráhmaṇa Upanishad with S'ankaránanda's Commentary, edited with a translation by E. B. Cowell, M. A. Complete in two Fascieuli, Nos. 19 and 20.

A translation of the Súrya Siddhánta and Siddhánta S'iromaṇi, by Pandita Bápú Deva S'ástri, under the superintendence of Archdeacon Pratt. Nos. 1, 13 and 28.

SANSKRIT WORKS IN PROGRESS.

The Das'a Rúpa with the exposition of Dhanika. Edited by F. E. Hall, D. C. L. Fasc. I., II. Nos. 12, and 24.

The Nárada Pancharátra. Edited by Rev. K. M. Banerjea. Fasc. I. II. III., Nos. 17, 25 and 34.

The Kávyádars'a of S'rí Daṇḍin, edited, with a commentary, by Pandita Premachandra Tarkabágísha, Fasc. I. II., III., and IV., Nos. 30, 33, 38 and 39.

The Maitri Upanishad, with the commentary of Rámatírtha, edited, with an English Translation By E. B. Cowell, Esq. M. A. fasc. I. No. 35.

परा वाङ्मूलचक्रस्था पश्यन्ती नाभिसंस्थिता
हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा ॥
वैखर्याहि कृतो नादः परश्रवणगोचरः ॥

ॐ नमो गणेशाय ।

यमिह कारुणिकं शरणं गतोऽप्यरिसहोदर आप महत् पदं ।
तमहमाशु हरिं परमाश्रये जनकजावरमनन्तसुखाकृतिं ॥ १ ॥
श्रीगौर्या सकलार्थदं निजपदाम्भोजेन मुक्तिप्रदं
प्रौढं विघ्नवनं हरन्तमनघं श्रीढुण्ढितुण्डासिना ।
वन्दे चर्म्मकपालिकोपकरणैर्वैराग्यसौख्यात् परं
नास्तीति प्रदिशन्तमन्तविधुरं श्रीकाशिकेशं शिवं ॥ २ ॥
यत्कृपालवमाचेण मूको भवति पण्डितः ।
वेदशास्त्रशरीरान्तां वाणीं वीणाकराम्भजे ॥ ३ ॥
कामाद्दीदत्तदुग्धप्रचुरसुरनुतप्राज्यभोगाधिपूज्य-
श्रीगौरीनायकाभित्प्रकटनशिवरामार्य्यलब्धात्मबोधैः ।
श्रीमद्भोपालगीर्भिः प्रकटितपरमाद्वैतभाषास्मितास्य
श्रीमद्गोविन्दवाणीचरणकमलगो निर्वृतोऽहं यथालिः ॥ ४ ॥
श्रीशङ्करं भाष्यकृतं प्रणम्य व्यासं हरिं सूत्रकृतञ्च वच्मि ।
श्रीभाष्यतीर्थं परहंसतुष्ट्यै वाग्जालबन्धच्छिदमभ्युपायं ॥ ५ ॥
विस्तृतग्रन्थवीक्षायामलसं यस्य मानसं ।
व्याख्या तदर्थमारब्धा भाष्यरत्नप्रभाभिधा ॥ ६ ॥
श्रीमच्छारीरकं भाष्यं प्राप्य वाक् शुद्धिमाप्नुयात् ।
इति श्रमो मे सफलो गङ्गां दृष्ट्वोदकं यथा ॥ ७ ॥
यदज्ञानसमुद्भूतमिन्द्रजालमिदं जगत् ।
सत्यज्ञानसुखानन्तं तदहं ब्रह्म निर्भयं ॥ ८ ॥

इह खलु "स्वाध्यायोऽध्येतव्य" इति नित्याध्ययनविधिनाऽधीतसाङ्गस्वाध्याये "तद्विजिज्ञासस्व" "सोऽन्वेष्टव्यः स विजिज्ञासितव्यः" "आत्मा वा अरे द्रष्टव्यः श्रोतव्य" इति श्रवणविधिरुपलभ्यते। तस्यार्थः। अमृतत्वकामेनाद्वैतात्मविचार एव वेदान्तवाक्यैः कर्त्तव्य इति। तेन काम्येन नियमविधिनाऽर्थादेवा*त्मशास्त्रप्रवृत्तिः वैदिकानां पुराणादिप्राधान्यं वा निरस्यत इति वस्तुगतिः। तत्र कश्चिदिह जन्मनि जन्मान्तरे वानुष्ठितयज्ञादिभिर्निर्तान्तं निर्मलशान्तोऽस्य श्रवणविधेः को विषयः? किं फलं? कोऽधिकारी? कः सम्बन्धः? इति जिज्ञासते। तं जिज्ञासुमुपलभमानो भगवान् बादरायणस्तदनुबन्धचतुष्टयं श्रवणात्मकशास्त्रारम्भप्रयोजकं न्यायेन निर्मेतुमिदं सूत्रं रचयाञ्चकार "अथातो ब्रह्मजिज्ञासा" इति।

नन्वनुबन्धजातं विधिसन्निहितार्थवादवाक्यैरेव ज्ञातुं शक्यं। तद्यथा "इह कर्म्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयत" इति श्रुत्वा "यत् कृतकं तदनित्यं" इति न्यायवत्या "न जायते म्रियते वा विपश्चित्" "यो वै भूमा तदमृतमन्यदार्त्तं" इत्यादिश्रुत्या च भूमात्मा नित्यस्ततोऽन्यदनित्यमिति विवेको लभ्यते। कर्म्मणा क्षुत्पादिना चितः सम्पादितः सस्यादिर्लोको भोग्य इत्यर्थः। विपश्चित् नित्यज्ञानस्वरूपः। "परीक्ष्य लोकान् कर्म्मचितान् ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन" "आत्मनस्तु कामाय सर्व्वं प्रियं भवति" इत्यादिश्रुत्या अनात्मभावे वैराग्यं लभ्यते। परीक्ष्यानित्यत्वेन निश्चित्य। अकृतो मोक्षः कृतेन कर्म्मणा नास्तीति। कर्म्मतत्फलेभ्यः वैराग्यं प्राप्तवानित्यर्थः। "शान्तो दान्त उपरतस्तितिक्षुः समाहितः श्रद्धावित्तो भूत्वात्मन्येवात्मानं पश्येत्" इति श्रुत्या शमादिषट्कं लभ्यते। "समाहितो भूत्वा" इति काण्वपाठः। उपरतिः सन्न्यासः। "न च पुनरावर्त्तत" इति स्वयंज्योतिरानन्दात्मकमोक्षस्य नित्यत्वश्रुत्या मुमुक्षा लभ्यते। तथा च विवेकादिविशेषणवानधिकारीति ज्ञातुं शक्यं। यथा "एता राचीरुपयन्तीति" राचिसत्रविधौ प्रतितिष्ठन्तीत्यर्थवादस्यप्रतिष्ठा कामस्तद्वत्। तथा "श्रोतव्य" इत्यत्र प्रत्ययार्थस्य नियोगस्य प्रकृत्यर्थो विचारो विषयः। विचारस्य वेदान्ता विषय इति शक्यं ज्ञातुं। "आत्मा द्रष्टव्य"

---

* अर्थाद्भिन्ना इति ७३५ संख्याक पुस्तकपाठः।

इत्यद्वैतात्मदर्शनमुद्दिश्य "श्रोतव्य" इति विचारविधानात्। न हि विचारः साक्षादर्शनहेतुः अप्रमाणत्वात् अपि तु प्रमाणविषयत्वेन। प्रमाणञ्चाद्वैतात्मनि वेदान्ता एव। "तन्वौपनिषदं पुरुषं" "वेदान्तविज्ञानसुनिश्चितार्था" इति श्रुतेः। वेदान्तानाञ्च प्रत्यग्ब्रह्मैक्यं विषयः "तत्त्वमसि" "अहं ब्रह्मास्मि" इति श्रुतेः। एवं विचारविधेः फलमपि ज्ञानद्वारा मुक्तिः "तरति शोकमात्मवित्" "ब्रह्मविद् ब्रह्मैव भवति" इत्यादि श्रुतेः। तथा सम्बन्धोऽप्यधिकारिणा विचारस्य कर्त्तव्यतारूपः फलस्य प्राप्यतारूप इति यथायोगं सुबोधः॥ तस्मादिदं सूत्रं व्यर्थमिति चेत्। न। तासामधिकार्य्यादिश्रुतीनां स्वार्थे तात्पर्य्यनिर्णायकन्यायसूत्राभावे किं विवेकादिविशेषणवानधिकारी उतान्यः? किं वेदान्ताः पूर्व्वतन्त्रेण गतार्था अगतार्था वा? किं ब्रह्म प्रत्यगभिन्नं न वा? किं मुक्तिः स्वर्गादिवत् लोकान्तरमात्मस्वरूपा वेति संशयानिवृत्तेः। तस्मादागमवाक्यैरापाततः प्रतिपन्नाधिकार्य्यादिनिर्णयार्थमिदं सूत्रमावश्यकं। तदुक्तं प्रकाशात्मश्रीचरणैः। "अधिकार्य्यादीनामागमिकत्वेऽपि न्यायेन निर्णयार्थमिदं सूत्रं" इति। येषां मते श्रवणे विधिर्नास्ति तेषामविहितश्रवणेऽधिकार्य्यादिनिर्णयानपेक्षणात् सूत्रं व्यर्थमित्यापतति इत्यलं प्रसङ्गेन।

तथा चास्य सूत्रस्य श्रवणविध्यपेक्षिताधिकार्य्यादिश्रुतिभिः स्वार्थनिर्णयायेत्यापितत्वात् हेतुहेतुमद्भावश्रुतिसङ्गतिः। शास्त्रारम्भहेत्वनुबन्धनिर्णायकत्वेनोपोद्घातत्वाच्छास्त्रादौ सङ्गतिः। अधिकार्य्यादिश्रुतीनां स्वार्थे समन्वयोक्तेः समन्वयाध्यायसङ्गतिः। "ऐतदात्म्यमिदं सर्व्वं" "तत् सत्यं" "स आत्मा" "तत्त्वमसि" इत्यादिश्रुतीनां सर्व्वात्मत्वादिस्पष्टब्रह्मलिङ्गानां विषयादौ समन्वयोक्तेः पादसङ्गतिः। एवं सर्व्वसूत्राणां श्रुत्यर्थनिर्णायकत्वात् श्रुतिसङ्गतिः। तत्तदध्याये तत्तत्पादे च समानप्रमेयत्वेन सङ्गतिरूहनीया। प्रमेयञ्च कृत्स्नशास्त्रस्य ब्रह्म, अध्यायानां तु समन्वयाविरोधसाधनफलानि। तत्र प्रथमपादस्य स्पष्टब्रह्मलिङ्गानां समन्वयः प्रमेयः। द्वितीयतृतीयपादयोरस्पष्टब्रह्मलिङ्गानां। चतुर्थपादस्य पदमात्रसमन्वय इति भेदः। अस्याधिकरणस्य प्राथम्यान्नाधिकरणसङ्गतिरपेक्षिता।

अथाधिकरणमारभ्यते। "श्रोतव्य" इति विहितश्रवणात्मकं वेदान्तमीमांसाशास्त्रं विषयः। तत् किमारब्धव्यं न वेति विषयप्रयोजनसम्भ-

वासम्भवाभ्यां संशयः। तत्र "नाहं ब्रह्म" इति भेदग्राहिप्रत्यक्षेण कर्तृत्वाकर्तृत्वादिविरुद्धधर्मवत्त्वलिङ्गकानुमानेन च विरोधेन ब्रह्मात्मनोरैक्यस्य विषयस्यासम्भवात्, सत्यबन्धस्य ज्ञानान्निवृत्तिरूपफलासम्भवान्नारम्भणीयमिति प्राप्ते सिद्धान्तः "अथातो ब्रह्मजिज्ञासा" इति। अत्र अवणविधिसमानार्थत्वाय "कर्त्तव्या" इति पदमध्याहर्त्तव्यं। अध्याहृतस्य भाष्यकृता "ब्रह्मजिज्ञासा कर्त्तव्या" इति। तत्र प्रवृत्तिप्रत्ययार्थयोर्ज्ञानेच्छयोः कर्त्तव्यत्वानन्वयात् प्रवृत्त्या फलीभूतं ज्ञानमजहल्लक्षणयोच्यते। प्रत्ययेनेच्छासाध्यो विचारो जहल्लक्षणया। तथा च "ब्रह्मज्ञानाय विचारः कर्त्तव्य" इति सूत्रस्य श्रौतार्थः सम्पद्यते। तच्च ज्ञानस्य स्वतः फलत्वायोगात् प्रमाढत्वकर्तृत्वभोक्तृत्वात्मकानर्थनिवर्त्तकत्वेनैव फलत्वं वक्तव्यं। तच्चानर्थस्य सत्यत्वे ज्ञानमात्रान्निवृत्त्ययोगादध्यस्तत्वं वक्तव्यमिति बन्धस्याध्यस्तत्वमर्थात् सूचितं। तच्च शास्त्रस्य विषयप्रयोजनवत्त्वसिद्धिहेतुः। तथा हि शास्त्रमारब्धव्यं विषयप्रयोजनवत्त्वाद् भोजनादिवत्। शास्त्रं प्रयोजनवद् बन्धनिवर्त्तकज्ञानहेतुत्वात् "रज्जुरियं" इत्यादिवाक्यवत्। बन्धो ज्ञाननिवर्त्योऽध्यस्तत्वात् रज्जुसर्पवत्, इति प्रयोजनसिद्धिः। एवमर्थाद् ब्रह्मज्ञानाज्जीवगतानर्थभ्रमनिवृत्तिं फलं सूचयन् जीवब्रह्मणोरैक्यं विषयमप्यर्थात् सूचयति। अन्यज्ञानादन्यत्र भ्रमानिवृत्तेः। जीवो ब्रह्माभिन्नः तज्ज्ञाननिवर्त्याध्यासाश्रयत्वात्, यदित्थं तत्तथा यथा शुक्त्यभिन्न इदमंश इति। विषयसिद्धिहेतुरध्यास इत्येवं विषयप्रयोजनवत्त्वाच्छास्त्रमारभणीयमिति। अत्र पूर्वपक्षे बन्धस्य सत्यत्वेन ज्ञानादनिवृत्तेरुपायान्तरसाध्या मुक्तिरिति फलं। सिद्धान्ते ज्ञानादेव मुक्तिरिति विवेकः। इति सर्वं मनसि निधाय ब्रह्मसूत्राणि व्याख्यातुकामो भगवान् भाष्यकारः सूत्रेण विचारकर्त्तव्यतारूपश्रौतार्थान्यथानुपपत्त्याऽर्थात् सूचितं विषयप्रयोजनवत्त्वमुपोद्घातत्वात् तत्सिद्धिहेत्वध्यासाख्येपसमाधानभाष्याभ्यां प्रथमं वर्णयति "युष्मदस्मत्प्रत्ययगोचरयोः" इति। एतेन सूत्रार्थास्पर्शित्वादध्यासग्रन्थो न भाष्यमिति निरस्तं। आर्थिकार्थस्पर्शित्वात्।

यत्तु मङ्गलाचरणाभावादव्याख्येयमिदं भाष्यमिति। तन्न। सुतरामितरेतरभावानुपपत्तिरित्यन्तभाष्यरचनार्थं तदर्थस्य सर्वोपनिबन्धस्थितस्य विज्ञानघनप्रत्यगर्थस्य तत्त्वस्य स्मृतत्वात्। अतो निर्दोषत्वादिदं भाष्यं व्याख्येयं॥

ॐ नमो भगवते वासुदेवाय ॥

युष्मदस्मत्प्रत्ययगोचरयोर्विषयविषयिणोस्तमःप्रकाशवद्वि-

लोके शुक्तौ विदं रजतमिति भ्रमः सत्यरजते इदं रजतमित्यधिष्ठानसामान्यारोप्यविशेषयोरैक्यप्रमाहितसंस्कारजन्यो दृष्ट इति। अत्राप्यात्मन्यनात्माध्यासे पूर्वं प्रमा वाच्या, सा चात्मानात्मनोर्वास्तवैक्यमपेक्षते, न हि तदस्ति। तथा हि आत्मानात्मानावैक्यशून्यौ परस्परैक्यायोग्यत्वात् तमःप्रकाशवदिति मत्वा हेतुभूतं विरोधं वस्तुतः प्रतीतितो व्यवहारतश्च साधयति॥ युष्मदस्मत्प्रत्ययगोचरयोरिति॥ न च "प्रत्ययोत्तरपदयोश्च" इति [पा०७।२।९८] सूत्रेण "प्रत्यये चोत्तरपदे च परतो युष्मदस्मदोर्मपर्यन्तस्य त्वमादेशौ स्त" इति विधानात् "त्वदीयं मदीयं त्वत्पुत्रो मत्पुत्र" इतिवत् "त्वन्मत्प्रत्ययगोचरयोः" इति स्यादिति वाच्यं। "त्वमावेकवचने" [पा० ७।२।९७] इत्येकवचनाधिकारात्। अत्र च युष्मदस्मदोरेकार्थवाचित्वाभावादनात्मनां युष्मदर्थानां बज्ञत्वादस्मदर्थचैतन्यस्याप्युपाधितो बज्ञत्वात्।

नन्वेवं सति कथमत्र भाष्ये विग्रहः? न च "यूयमिति प्रत्ययो युष्मत्प्रत्ययः वयमिति प्रत्ययोऽस्मत्प्रत्ययस्तद्गोचरयोरिति विग्रह" इति वाच्यं। शब्दसाधुत्वेऽप्यर्थासाधुत्वात्। न ह्यहङ्काराद्यनात्मनो यूयमिति प्रत्ययविषयत्वमस्तीति चेत्। न। गोचरपदस्य योग्यतापरत्वात्। चिदात्मा तावदस्मत्प्रत्ययायोग्यः। तत्प्रयुक्तसंशयादिनिवृत्तिफलभाक्त्वात्, न तावदयमेकान्तेनाविषयः, अस्मत्प्रत्ययविषयत्वादिति भाष्योक्तेश्च। यद्यप्यहङ्कारादिरपि तद्योग्यस्तथापि चिदात्मनः सकाशादत्यन्तभेदसिद्ध्यर्थं युष्मत्प्रत्ययायोग्य इत्युच्यते।

आश्रमश्रीचरणास्तु टीकायोजनायामेवमाहुः। "सम्बोध्यचेतनो युष्मत्पदवाच्यः, अहङ्कारादिविशिष्टचेतनोऽस्मत्पदवाच्यः, तथा च युष्मदस्मदोः स्वार्थे प्रयुज्यमानयोरेव त्वमादेशनियमो न लाक्षणिकयोः "युष्मदस्मदोः षष्ठी चतुर्थी द्वितीयास्थयोर्वान्नावावि"ति [पा०८।१।२०] सूत्रासङ्गत्यप्रसङ्गात् अत्र शब्दलक्षकयोरिव चिन्मात्रजडमात्रलक्षकयोरपि न त्वमादेशौ लक्षकत्वाविशेषादिति"। यदि तयोः शब्दबोधकत्वे सत्येव त्वमादेशाभाव इत्यनेन सूत्रेण ज्ञापितं तदाऽस्मिन् भाष्ये

रुद्धस्वभावयोरितरेतरभावानुपपत्तौ सिद्धायां तद्धर्म्माणामपि

युष्मत्पदेन युष्मच्छब्दजन्यप्रत्ययगोचरः परागर्थो लक्ष्यते, अस्मच्छब्दजन्यप्रत्ययगोचरः प्रत्यगात्मा। तथा च लक्षितावच्छेदकतया शब्दोऽपि बोधयत इति न त्वमादेशः। न च पराक्त्वप्रत्यक्त्वयोरेव लक्ष्यतावच्छेदकत्वं न शब्दयोग्यत्वांशस्य गौरवादिति वाच्यं। पराक्प्रतीचोर्विरोधस्फुरणार्थं विरुद्धशब्दयोग्यत्वस्यापि वक्तव्यत्वात्। अत एवेदमस्मत्प्रत्ययगोचरयोरिति वक्तव्येऽपीदंशब्दो ऽस्मदर्थे लोके वेदे च बहुशः "इमे वयमास्महे" "इमे विदेहाः" "अयमहमस्मि" इति च प्रयोगदर्शनात् नास्मच्छब्दविरोधीति मत्वा युष्मच्छब्दः प्रयुक्तः। इदंशब्दप्रयोगे विरोधास्फूर्त्तेः। एतेन चेतनवाचित्वादस्मच्छब्दः पूर्वं प्रयोक्तव्यः "अभ्यर्हितं पूर्वमिति न्यायात्" "त्वदादीनि सर्व्वैर्नित्यमिति" [पा०१।२।७२] सूत्रेण विहित एकशेषश्च स्यादिति निरस्तं। "युष्मदस्मदोरिति" सूत्र इवात्रापि पूर्वनिपातैकशेषयोरप्राप्तेः, एकशेषे विवक्षितविरोधास्फूर्त्तेश्च। वृद्धास्तु "युष्मदर्थादनात्मनो निष्कृष्य शुद्धस्य चिद्धातोरध्यारोपापवादन्यायेन ग्रहणं द्योतयितुमादौ युष्मद्ग्रहणं" इत्याहुः। तच्च युष्मदस्मत्पदार्थाभ्यां प्रत्यक्प्रत्यक्तेनात्मानात्मनोर्वस्तुतो विरोध उक्तः॥

प्रत्ययपदेन प्रतीतितो विरोध उक्तः। प्रतीयत इति प्रत्ययो ऽहङ्कारादिरनात्मा दृश्यतया भाति, आत्मा तु प्रतीतित्वात् प्रत्ययः स्वप्रकाशतया भाति। गोचरपदेन व्यवहारतो विरोध उक्तः। युष्मदर्थः प्रत्यगात्मतिरस्कारेण कर्त्ताहमित्यादिव्यवहारगोचरः, अस्मदर्थस्त्वमात्मप्रविलापेन "अहं ब्रह्मेति" व्यवहारगोचर इति त्रिधा विरोधः स्फुटीकृतः। युष्मच्चास्मच्च युष्मदस्मदौ, ते एव प्रत्ययौ च तौ गोचरौ चेति युष्मदस्मत्प्रत्ययगोचरौ तयोस्त्रिधा विरुद्धस्वभावयोरितरेतरभावो ऽत्यन्ताभेदस्तादात्म्यं वा तदनुपपत्तौ सिद्धायामित्यन्वयः। ऐक्यासम्भवेऽपि शुक्लो घट इतिवत्तादात्म्यं किं न स्यादित्यत आह॥ विषयविषयिणोरिति॥ चिज्जडयोर्विषयविषयित्वाद्दीपघटयोरिव न तादात्म्यमिति भावः। युष्मदस्मदौ पराक्प्रत्यग्वस्तुनौ, ते एव प्रत्ययश्च गोचरश्चेति विग्रहः। अत्र प्रत्ययगोचरपदाभ्यां आत्मानात्मनोः प्रत्यक्परागभावे चिदचित्त्वं हेतुरुक्तः, तत्र हेतुमाह विषयविषयिणोरिति।

सुतरामितरेतरभावानुपपत्तिरित्यतोऽस्मत्प्रत्ययगोचरे विषयिणि

अनात्मनो ग्राह्यत्वादचित्त्वं आत्मनस्तु ग्राहकत्वाच्चित्त्वं वाच्यं। अचित्त्वे स्वस्य स्वेन ग्रहस्य कर्मकर्तृत्वविरोधेनासम्भवादप्रत्यक्षत्वापत्तेरित्यर्थः। यथेष्टं वा हेतुहेतुमद्भावः। नन्वेवमात्मानात्मनोः परोक्षप्रत्यक्षेण चिदचित्त्वेन ग्राह्यग्राहकत्वेन च विरोधात् तमःप्रकाशवदैक्यस्य तादात्म्यस्य वानुपपत्तौ सत्यां तत्प्रमित्यभावेनाध्यासाभावेऽपि तद्धर्म्माणां चैतन्यसुखजाड्यदुःखादीनां विनिमयेनाध्यासोऽस्त्वित्यत आह॥ तद्धर्म्माणामपीति॥ तयोरात्मानात्मनोर्धर्म्मास्तद्धर्म्मास्तेषामपि इतरेतरभावानुपपत्तिः। इतरत्र धर्म्मान्तरे इतरेषां धर्म्माणां भावः संसर्गस्तस्यानुपपत्तिरित्यर्थः। न हि धर्म्मिणोः संसर्गं विना धर्म्माणां विनिमयोऽस्ति। स्फटिके लौहित्यवस्तुसान्निध्यात् लौहित्यधर्म्मसंसर्गः। असङ्गात्मधर्म्मिणः केनाऽप्यसंसर्गाद्धर्म्मिसंसर्गपूर्व्वको धर्म्मसंसर्गः कुतस्य इत्यभिप्रेत्योक्तं॥ सुतरामिति॥ नन्वात्मानात्मनोस्तादात्म्यस्य तद्धर्म्मसंसर्गस्य चाभावेऽप्यध्यासः किं न स्यादित्यत आह॥ इत्यत इति॥ इत्युक्तरीत्या तादात्म्याद्यभावेन तत्प्रमाया अभावादतः प्रमाजन्यसंस्कारस्याध्यासहेतोरभावादध्यासो मिथ्येति भवितुं युक्तमित्यन्वयः। मिथ्याशब्दो ह्यर्थः, अपह्नववचनः अनिर्वचनीयतावचनश्चेति। अत्र चापह्नवार्थः। ननु कुत्र कस्याध्यासोऽपह्नूयते इत्याशङ्क्य आत्मन्यनात्मतद्धर्म्माणां अनात्मन्यात्मतद्धर्म्माणामध्यासो निरस्यत इत्याह॥ अस्मत्प्रत्ययगोचर इत्यादिना॥ अहमितिप्रत्ययविषयत्वं बुद्ध्यादेरप्यस्तीति मत्वा तत आत्मानं विवेचयति॥ विषयिणीति॥ बुद्ध्यादिसाक्षिणीत्यर्थः। साक्षित्वे हेतुः॥ चिदात्मक इति॥ अहमिति भासमाने चिदंशात्मनीत्यर्थः॥ युष्मत्प्रत्ययगोचरस्येति॥ त्वंकारयोग्यस्य इदमर्थस्येति यावत्। नन्वहमिति भासमानबुद्ध्यादेः कथमिदमर्थत्वमित्यत आह॥ विषयस्येति॥ साक्षिभाष्यस्येत्यर्थः। साक्षिभाष्यत्वरूपलक्षणयोगाद् बुद्ध्यादेर्घटादिवदिदमर्थत्वं न प्रतिभासत इति भावः। अथ वा यदात्मनो मुख्यं सर्व्वान्तरत्वरूपं प्रत्यक्त्वं प्रतीतित्वं ब्रह्मास्मीति व्यवहारगोचरत्वं चोक्तं तदसिद्धं, अहमिति प्रतीयमानत्वात् अहङ्कारवदित्याशङ्क्याह॥ अस्मत्प्रत्ययगोचर इति॥ अस्मच्चासौ प्रत्ययश्चासौ गोचरश्च तस्मिन्नित्यर्थः। अहंवृत्तिव्य-

चिदात्मके युष्मत्प्रत्ययगोचरस्य विषयस्य तद्धर्म्माणां चाध्यासः।

ह्यस्फुरणत्वं स्फुरणविषयत्वं वा हेतुः। आद्ये दृष्टान्ते हेत्वसिद्धिः। द्वितीये तु पक्षे तदसिद्धिरित्यात्मनो मुख्यं प्रत्यक्षादि युक्तमिति भावः। ननु यदात्मनो विषयित्वं तदसिद्धं "अनुभवामि" इति शब्दवत्त्वात् अहङ्कारवदित्यत आह॥ विषयिणीति॥ वाच्यत्वं लक्ष्यत्वं वा हेतुः। नाद्यः। पक्षे तदसिद्धेः। नान्त्यः। दृष्टान्ते तदैकल्यादिति भावः। "देहं जानामि" इति देहाहङ्कारयोर्विषयविषयित्वेऽपि मनुष्योऽहमित्यभेदाध्यासवदात्माहङ्कारयोरप्यध्यासः स्यादित्यत आह॥ चिदात्मक इति॥ तयोर्जाड्यास्यत्वाभ्यां सादृश्यादध्यासेऽपि चिदात्मन्यनवच्छिन्ने जंडास्याहङ्कारादेर्नाध्यास इति भावः। "अहं" इति भास्यत्वादात्मवदहङ्कारस्यापि प्रत्यक्षादिकं मुख्यमेव, ततः पूर्व्वोक्तपराक्त्वासिद्धिरित्याशङ्क्याह॥ युष्मदिति॥ अहंवृत्तिभास्यत्वमहङ्कारे नास्ति कर्त्रकर्म्मत्वविरोधात्, चिद्भास्यत्वं चिदात्मनि नास्ति इति हेत्वसिद्धिः। अतो बुद्ध्यादेः प्रतिभासतः प्रत्यक्षेऽपि पराक्त्वादिकं मुख्यमेवेति भावः। युष्मत् पराक् तच्चासौ प्रतीयत इति प्रत्ययश्चासौ कर्त्रत्वादिव्यवहारगोचरश्च तस्येति विग्रहः। तस्य हेयत्वार्थमाह॥ विषयस्येति॥ षिञ् बन्धने। विषिणोति बध्नाति इति विषयस्तस्येत्यर्थः। आत्मन्यनात्मतद्धर्म्माध्यासो मिथ्या भवतु, अनात्मन्यात्मतद्धर्म्माध्यासः किं न स्यात्? "अहं स्फुरामि" "सुखी" इत्याद्यनुभवादित्याशङ्क्याह॥ तद्विपर्य्ययेणेति॥ तस्मादनात्मनो विपर्य्ययो विरुद्धस्वभावश्चैतन्यं, इत्यम्भावे तृतीया। चैतन्यात्मना विषयिणस्तद्धर्म्माणाञ्च योऽहङ्कारादौ विषयेऽध्यासः स मिथ्येति नास्तीति भवितुं युक्तं अध्याससामग्र्यभावात्। न ह्यत्र पूर्व्वप्रमाहितसंस्कारः सादृश्यमज्ञानं वास्ति। निरवयवनिर्गुणस्वप्रकाशात्मनिर्गुणावयवसादृश्यस्य चाज्ञानस्य चायोगात्।

नन्वात्मनो निर्गुणत्वे तद्धर्म्माणामिति भाष्यं कथमिति चेत्। उच्यते। बुद्धिवृत्त्यभिव्यक्तं चैतन्यं ज्ञानं विषयाभेदेनाभिव्यक्तं स्फुरणं। शुभकर्म्मजन्यवृत्तिव्यक्तमानन्द इत्येवं वृत्त्युपाधिकृतभेदात् ज्ञानादीनामात्मधर्म्मत्वव्यपदेशः। तदुक्तं टीकायां "आनन्दो विषयानुभवो नित्यत्वञ्चेति सन्ति धर्म्मा अपृथक्त्वेऽपि चैतन्यात् पृथगिवावभासन्त" इति। अतो

तद्विपर्ययेण विषयिणस्तद्धर्माणाञ्च विषयेऽध्यासो मिथ्येति भवितुं युक्तं। तथाप्यन्योन्यस्मिन्नन्योन्यात्मकतामन्योन्यधर्मांश्चाध्यस्येतरेतरा*विवेकेनात्यन्तविविक्तयोर्धर्मधर्मिणोर्मिथ्याज्ञाननि-

---

निर्गुणब्रह्मात्मत्वमते "अहङ्करोमि" इति प्रतीतेरर्थस्य चाध्यासत्वायोगात् प्रमात्वं। "अहं नर इति सामानाधिकरण्यस्य गौणत्वमिति" मतमास्थेयं। तथा च बन्धस्य सत्यतया ज्ञानान्निवृत्तिरूपफलासम्भवाद् बद्धमुक्तयोर्जीवब्रह्मणोरैक्यायोगेन विषयासम्भवात् शास्त्रं नारम्भणीयमिति पूर्वपक्षभाष्यतात्पर्यं। युक्तंग्रहणात् पूर्वपक्षस्य दुर्बलत्वं सूचयति। तथा हि किमध्यासस्य नास्तित्वमयुक्तत्वादभानाद्वा कारणाभावाद्वा? आद्य इष्ट इत्याह॥ तथापीति॥ एतदनुरोधादादौ यद्यपीति पठितव्यं। अध्यासस्यासङ्कल्पकाशात्मन्ययुक्तत्वमलङ्कार इति भावः। न द्वितीय इत्याह॥ अयमिति॥ "अहः कर्त्ता मनुष्योऽहं" इति प्रत्यक्षानुभवादध्यासस्याभानमसिद्धमित्यर्थः। न चेदं प्रत्यक्षं कर्तृत्वादौ प्रमेति वाच्यं। अपौरुषेयतया निर्दोषेणोपक्रमादिलिङ्गावष्टतात्पर्यगा च "तत्त्वमस्यादि" वाक्येनाकर्तृब्रह्मबोधनेनास्य भ्रमत्वनिश्चयात्। न च ज्येष्ठप्रत्यक्षविरोधादागमज्ञानस्यैव बाध इति वाच्यं देहात्मवादप्रसङ्गात्। "मनुष्योऽहं" इति प्रत्यक्षविरोधेन "अथायमशरीर" इत्यादिश्रुत्या देहान्यात्मासिद्धेः। "तस्मादिदं रजतं" इति वत् सामानाधिकरण्यप्रत्यक्षस्य भ्रमत्वशङ्काकलङ्कितस्य नागमात् प्राबल्यमित्यास्थेयं। किञ्च ज्येष्ठत्वं पूर्वभावित्वं वा? आगमज्ञानं प्रत्युपजीव्यत्वं वा? आद्ये न प्राबल्यं। ज्येष्ठस्यापि रजतभ्रमस्य पश्चाद्भाविना शुक्तिज्ञानेन बाधदर्शनात्। न द्वितीयः। आगमज्ञानोत्पत्तौ प्रत्यक्षादिमूलद्रव्यव्यवहारे च संगतिग्रहद्वारा शब्दोपलब्धिद्वारा च प्रत्यक्षादेर्व्यावहारिकप्रामाण्येनोपजीव्यत्वेऽपि तात्त्विकप्रामाण्येनानपेक्षितत्वादनपेक्षितांशस्यागमेन बाधसंभवादिति।

यत्तु क्षणिकयागस्य श्रुतिबलात् कालान्तरभाविफलहेतुत्ववत् "तथा विद्वान्नामरूपादिमुक्त" इति श्रुतिबलात् सत्यस्यापि ज्ञाना-

---

* विवेकेनात्यन्तविविक्तयोः मु० पु० पाठः।

मित्तः सत्यानृते मिथुनीकृत्याहमिदं ममेदमिति नैसर्गिकोऽयं

निवृत्तिसम्भवादध्यासवचनं व्यर्थमिति तन्न। ज्ञानमात्रनिवर्त्यस्य क्वापि सत्यत्वादर्शनात्, सत्यस्य चात्मनो निवृत्त्यदर्शनाच्च, अयोग्यता-निश्चये सति सत्यबन्धस्य ज्ञानान्निवृत्तिश्रुतेर्बाधकत्वायोगात्। न च सेतुदर्शनात् सत्यस्य पापस्य नाशदर्शनान्नायोग्यतानिश्चय इति वाच्यं। तस्य श्रद्धानियमादिसापेक्षज्ञाननाश्यत्वात्, बन्धस्य च "नान्यः पन्था" इति श्रुत्वा ज्ञानमात्रान्निवृत्तिप्रतीतेः। अतः श्रुतज्ञाननिवर्त्यत्वनिर्वा-हार्थमध्यस्तत्वं वर्णनीयं। किञ्च ज्ञानैकनिवर्त्यस्य किं नाम सत्यत्वं? न तावदज्ञानाजन्यत्वं। "मायान्तु प्रकृतिं" इति श्रुतिविरोधात् मायाविद्ययोरैक्यात्। नापि स्वाधिष्ठाने स्वाभावशून्यत्वं। "अस्थूलं" इत्यादि निषेधश्रुतिविरोधात्। नापि ब्रह्मवद्बाधायोग्यत्वं ज्ञानान्नि-वृत्तिश्रुतिविरोधात्। अथ व्यवहारकाले बाधशून्यत्वं। तर्हि व्याव-हारिकमेव सत्यत्वमित्यागत*मध्यस्तत्वं। तच्च श्रुत्यर्थे योग्यताज्ञानार्थं वर्णनीयमेव यागस्यापूर्वद्वारत्ववत्। न च तदनन्यत्वाधिकरणे तस्य वर्णनात् पौनरुक्त्यं। तत्रोक्ताध्यासस्यैव प्रत्यक्षविषयादिसिद्ध्यर्थमादौ स्मार्यमाणत्वादिति दिक्। अध्यासं द्वेधा दर्शयति॥ लोकव्यवहार इति॥ लोक्यते मनुष्योऽहमित्यभिमन्यत इति लोकोऽर्थाध्यासः तद्विषयो व्यवहारोऽभिमान इति ज्ञानाध्यासो दर्शितः। द्विविधाध्यासस्वरूपल-क्षणमाह॥ अन्योन्यस्मिन्नित्यादिना धर्मधर्मिणोरित्यन्तेन॥ जाड्यचैत-न्यादिधर्माणां धर्मिणावहङ्कारात्मानौ तयोरत्यन्तं भिन्नयोरितरेतर-भेदाग्रहेणान्योन्यस्मिन् अन्योन्यतादात्म्यं अन्योन्यधर्मांश्च व्यत्यासेनाध्यस्य लोकव्यवहार इति योजना। अतः "सोऽयं" इति प्रमाया नाध्यासत्वं तदिदमर्थयोः कालभेदेन कल्पितभेदेऽपि अत्यन्तभेदाभावात्, इति वक्तु-मत्यन्तेत्युक्तं। न च धर्मितादात्म्याध्यासे धर्माध्याससिद्धेः "धर्मांश्चेति" व्यर्थमिति वाच्यं। अन्धत्वादीनामिन्द्रियधर्माणां धर्म्यध्यासास्फुटत्वे ऽप्यन्धोऽहमिति स्फुटोऽध्यास इति ज्ञापनार्थत्वात्। नन्वात्मानात्मनोः परस्पराध्यस्तत्वे शून्यवादः स्यादित्याशङ्क्याह॥ सत्यानृते मिथुनीकृ-त्येति॥ सत्यमनिदं चैतन्यं, तस्यानात्मनि संसर्गमात्राध्यासो न स्वरू-

* सत्यत्वमित्यध्यस्तत्वमिति १६६ सं० पुस्तकपाठः।

पस्य। अन्ततं युष्मदर्थः तस्य स्वरूपतोऽप्यध्यासात् तयोर्मिथुनीकरणमध्यास इति न शून्यतेत्यर्थः।

नन्वध्यासमिथुनीकरणलोकव्यवहारशब्दानामेकार्थत्वेऽथस्य मिथुनीकृत्येति पूर्व्वकालत्ववाचि "त्वा" प्रत्ययादेशस्य ल्यपः कथं प्रयोग इति चेन्न अध्यासव्यक्तिभेदात्। तत्र पूर्व्वपूर्व्वाध्यासस्योत्तरोत्तराध्यासं प्रति संस्कारद्वारा पूर्व्वकालत्वेन हेतुत्वद्योतनार्थं ल्यपः प्रयोगः। तदेव स्पष्टयति॥ नैसर्गिक इति॥ प्रत्यगात्मनि हेतुहेतुमद्भावेनाध्यासप्रवाहोऽनादित्यर्थः। ननु प्रवाहस्यावस्तुत्वादध्यासव्यक्तीनां सादित्वात् कथमनादित्वमिति चेत्? उच्यते। अध्यासत्वावच्छिन्नव्यक्तीनां मध्येऽन्यतमया व्यक्त्या विनाऽनादिकालस्यावर्त्तनं कार्य्यानादित्वमिति, अङ्गीकारात्। एतेन कारणाभावादिति कल्पो निरस्तः संस्कारस्य निमित्तस्य नैसर्गिकपदेनोक्तत्वात्। न च पूर्व्वप्रमाजन्य एव संस्कारो हेतुरिति वाच्यं लाघवेन पूर्व्वानुभवजन्यसंस्कारस्य हेतुत्वात्। अतः पूर्व्वाध्यासजन्यसंस्कारोऽस्तीति सिद्धं। अध्यासस्योपादानमाह॥ मिथ्याज्ञाननिमित्त इति॥ मिथ्या च तदज्ञानञ्च मिथ्याज्ञानं तन्निमित्तमुपादानं यस्य स तन्निमित्तस्तदुपादान इत्यर्थः। अज्ञानस्योपादानत्वेऽपि संस्कुरदात्मतत्त्वावरकतया दोषत्वेनाहङ्काराध्यासकर्त्तुरीश्वरस्योपाधित्वेन संस्कारकालकर्म्मादिनिमित्तपरिणामित्वेन च निमित्तत्वमिति द्योतयितुं निमित्तपदं। स्वप्रकाशात्मन्यसङ्गे कथमविद्यासङ्गः संस्कारादिसामग्र्यभावात्, इति शङ्कानिरासार्थं मिथ्यापदं। प्रचण्डमार्त्तण्डमण्डले प्रेक्षकानुभवसिद्धान्धकारवत् "अहमज्ञ" इत्यनुभवसिद्धमज्ञानं दुरपह्नवं कल्पितस्याधिष्ठानास्पर्शित्वात् नित्यस्वरूपज्ञानस्याविरोधित्वाच्चेति। यद्वा अज्ञानं ज्ञानाभाव इति शङ्कानिरासार्थं मिथ्यापदं। मिथ्यात्वे सति साक्षाज्ज्ञाननिवर्त्त्यत्वमज्ञानस्य लक्षणं मिथ्याज्ञानपदेनोक्तं। ज्ञानेनेच्छाप्रागभावः साक्षान्निवर्त्तत इति वदन्तं प्रति मिथ्यात्वे सतीत्युक्तं। अज्ञाननिवृत्तिद्वारा ज्ञाननिवर्त्त्यबन्धेऽतिव्याप्तिनिरासाय साक्षादिति। अनाद्युपादानत्वे सति मिथ्यात्वं वा लक्षणं। ब्रह्मनिरासार्थं मिथ्यात्वमिति। मृदादिनिरासार्थमनादीति। अविद्यात्मनोः सम्बन्धनिरासार्थमुपादानत्वे सतीति। संप्रति अध्यासं द्रढयितुमभिलपति॥ अहमिदं ममेदमिति॥ आध्यात्मिककार्य्याध्यासेष्वहमिति प्रथमोऽध्यासः। न चाधिष्ठानारोप्यांशद्वयानुपलम्भात् नायमध्यास इति वाच्यं।

लो॰ वचारः। आह कोऽयमध्यासो नामेति ? उच्यते। स्मृति-

"अयोदहति" इतिवत् "अहमुपलभ" इति दृक्दृश्यांशयोरुपलम्भात्। इदंपदेन भोग्यः संघात उच्यते। "अत्राहमिदं" इत्यनेन "मनुष्योऽहं" इति तादात्म्याध्यासो दर्शितः। "ममेदं शरीरं" इति संसर्गाध्यासः॥

ननु देहात्मनोस्तादात्म्यमेव संसर्ग इति चेत्। सत्यं। सत्तैक्ये सति मिथोऽभेदस्तादात्म्यं। तच्च "मनुष्योऽहम्" इत्यैक्यांशभानं "ममेदमिति" भेदांशरूपसंसर्गभानमिति भेदः। एवं सामग्र्योसत्त्वादनुभवसत्त्वाद-ध्यासोऽस्तीत्यतो ब्रह्मात्मैक्ये विरोधाभावेन विषयप्रयोजनयोः सत्त्वात् शास्त्रमारभणीयमिति सिद्धान्तभाष्यतात्पर्यं। एवञ्च सूचेणार्थात् सूचिते विषयप्रयोजने प्रतिपाद्य तद्धेतुमध्यासं लक्षणसम्भावनाप्रमाणैः साधयितुं लक्षणं पृच्छति॥ आहेति॥ किंलक्षणकोऽध्यास इत्याह पूर्व्व-वादीत्यर्थः। अस्य शास्त्रस्य तत्त्वनिर्णयप्रधानत्वेन वादकथात्वद्योतनार्थं आहेति परोक्तिः। "आहेत्यादि" "कथं पुनः प्रत्यगात्मनीत्यन्तं" प्राग-ध्यासलक्षणपरं भाष्यं तदारभ्य संभावनापरं। "तमेतमविद्याख्यं" इत्यारभ्य "सर्व्वलोकप्रत्यक्ष" इत्यन्तं प्रमाणपरमिति विभागः। लक्ष-णमाह॥ उच्यते स्मृतिरूप इति॥ अध्यास इत्यनुषङ्गः। अत्र परत्रा-वभास इत्येव लक्षणं। शिष्टं पदद्वयं तदुपपादनार्थं। तथाहि अव-भास्यत इत्यवभासो रजताद्यर्थः तस्यायोग्यमधिकरणं परत्वपदार्थः। अधिकरणस्यायोग्यत्वमारोप्यात्यन्ताभावत्वं तद्वत्त्वं वा? तथा चैकाव-च्छेदेन स्वसंसृज्यमाने स्वात्यन्ताभाववति अवभास्यत्वमध्यस्तत्वमित्यर्थः। इदञ्च साधनाद्यध्याससाधारणं लक्षणं। संयोगेऽतिव्याप्तिनिरासाय एकावच्छेदेनेति। संयोगस्य स्वसंसृज्यमाने वृक्षे स्वात्यन्ताभाववत्यव-भास्यत्वेऽपि स्वस्वात्यन्ताभावयोर्मूलाग्रावच्छेदकभेदान्नातिव्याप्तिः। पूर्व्वं स्वाभाववति भूतले पश्चादानीतो घटो भातीति घटेऽतिव्याप्तिनिरा-साय स्वसंसृज्यमान इति पदं। तेनावभासकाले प्रतियोगिसंसर्गस्य विद्यमानत्वाच्चोच्यते इति नातिव्याप्तिः। भूत्वावच्छेदेनावभास्यगन्धेऽति-व्याप्तिवारणाय स्वात्यन्ताभाववतीति पदं। शुक्तावित्वावच्छेदेन रज-तसंसर्गकालेऽत्यन्ताभावोऽस्तीति नाव्याप्तिः। नन्वस्य लक्षणस्यासम्भवः शुक्तौ रजतस्य सामग्र्यभावेन संसर्गासत्त्वात्। न च स्मर्य्यमाणसत्वर-

रूपः परत्र पूर्व्वदृष्टावभासः। तं केचिद् "अन्यत्रान्यधर्म. स"

जतस्यैव परत्र शुक्तावबभास्यत्वेनाध्यस्तत्वोक्तिरिति वाच्यं अन्यथाख्यातिप्रसङ्गादित्यत आह॥ स्मृतिरूप इति॥ स्मर्य्यते इति स्मृतिः सत्यरजतादिः तस्य रूपमिव रूपमस्येति स्मृतिरूपः स्मर्य्यमाणसदृश इत्यर्थः। सादृश्योक्त्या स्मर्य्यमाणादारोप्यस्य भेदान्नान्यथाख्यातिरित्युक्तं भवति। सादृश्यमुपपादयति॥ पूर्व्वदृष्टेति॥ दृष्टं दर्शनं संस्कारद्वारा पूर्व्वदर्शनादवभास्यत इति पूर्व्वदृष्टावभासः। तेन संस्कारजन्यज्ञानविषयत्वं स्मर्य्यमाणारोप्ययोः सादृश्यमुक्तं भवति स्मृत्यारोपयोः संस्कारजन्यत्वात्। न च संस्कारजन्यत्वादारोपस्य स्मृतित्वापत्तिरिति वाच्यं दोषसंप्रयोगजन्यत्वस्यापि विवक्षितत्वेन संस्कारमात्रजन्यत्वाभावात्। अत्र संप्रयोगशब्देन अधिष्ठानसामान्यज्ञानमुच्यते। अहङ्काराध्यासे इन्द्रियसंप्रयोगाभावात्। एवञ्च दोषसंप्रयोगसंस्कारबलाच्छुक्त्यादौ रजतमुत्पन्नमस्तीति परत्र परावभास्यत्वलक्षणमुपपन्नमिति स्मृतिरूपपूर्व्वदृष्टपदाभ्यामुपपादितं। अन्ये तु "ताभ्यां दोषादित्रयजन्यत्वं कार्य्याध्यासलक्षणमुक्तं" इत्याहुः। अपरे तु "स्मृतिरूपः स्मर्य्यमाणसदृशः" सादृश्यञ्च प्रमाणाजन्यज्ञानविषयत्वं, स्मृत्यारोपयोः प्रमाणाजन्यत्वात् पूर्व्वदृष्टपदं तज्जातीयपरं, अभिनवरजतादेः पूर्व्वदृष्टत्वाभावात्; तथाच प्रमाणाजन्यज्ञानविषयत्वे सति पूर्व्वदृष्टजातीयत्वं प्रातीतिकाध्यासलक्षणं ताभ्यामुक्तं; परत्रावभासशब्दाभ्यामध्यासमात्रलक्षणं व्याख्यातमेव; तत्र स्मर्य्यमाणगङ्गादावभिनवघटे चातिव्याप्तिनिरासाय प्रमाणेत्यादिपदद्वयं" इत्याहुः। तत्रार्थाध्यासे स्मर्य्यमाणसदृशः परत्र पूर्व्वदर्शनादवभास्यत इति योजना। ज्ञानाध्यासे तु स्मृतिसदृशः परत्र पूर्व्वदर्शनादवभासत इति वाक्यं योजनीयं इति संक्षेपः। ननु अध्यासे वादिविप्रतिपत्तेः कथमुक्तलक्षणसिद्धिरित्याशङ्क्याधिष्ठानारोप्यस्वरूपविवादेऽपि "परत्र परावभास" इति लक्षणे संवादाद्युक्तिभिः सत्याधिष्ठाने मिथ्यार्थावभाससिद्धेः सर्व्वतन्त्रसिद्धान्त इदं लक्षणमिति मत्वा अन्यथात्मख्यातिवादिनोर्म्मतमाह॥ तं केचिदिति॥ केचिदन्यथाख्यातिवादिनोऽन्यत्र शुक्त्यादावन्यधर्म्मस्य स्वावयवधर्म्मस्य देशान्तरस्थरूप्यादेरध्यास इति वदन्ति। आत्मख्यातिवादिनस्तु बाह्यशुक्त्यादौ बुद्धिरूपा-

इति वदन्ति। केचित्तु "यत्र यदध्यासस्तद्विवेकाग्रहनिबन्धनो भ्रम" इति। अन्ये तु "यत्र यदध्यासस्तस्यैव विपरीतधर्मत्वकल्पनामाचक्षत" इति। सर्व्वथापि त्वन्यस्यान्यधर्मावभासतां न व्यभिचरति। तथाच लोकेऽनुभवः "शुक्तिका हि रजतवदवभासते एकश्चन्द्रः सद्वितीयवद्" इति। कथं पुनः प्रत्यगात्मन्यविषयेऽध्यासो विषयधर्म्माणां? सर्व्वो हि पुरोऽवस्थिते विषये विष-

---

त्मनो धर्म्मस्य रजतस्याध्यास आन्तरस्य रजतस्य बहिर्वदवभास इति वदन्तीत्यर्थः। आख्यातिमतमाह॥ केचिदिति॥ यत्र यस्याध्यासो लोकसिद्धस्तयोरर्थयोस्तद्धियोश्च भेदाग्रहे सति तन्मूलो भ्रमः, इदं रूप्यमिति विशिष्टव्यवहार इति वदन्तीत्यर्थः। तैरपि विशिष्टव्यवहारान्यथानुपपत्त्या विशिष्टभ्रान्तेः स्वीकार्य्यत्वात् परत्र परावभाससम्मतिरिति भावः। शून्यमतमाह॥ अन्ये त्विति॥ तस्यैवाधिष्ठानस्य शुक्त्यादेर्विपरीतधर्म्मत्वकल्पनां विपरीतो विरुद्धो धर्म्मो यस्य तद्भावस्तस्य रजतादेरत्यन्तासतः कल्पनामाचक्षत इत्यर्थः। एतेषु मतेषु परत्र परावभासत्वलक्षणसंवादमाह॥ सर्व्वथापि त्विति॥ अन्यथाख्यातित्वादिप्रकारविवादेऽप्यध्यासः परत्र परावभासत्वलक्षणं न जहातीत्यर्थः। शुक्तावपरोक्षस्य रजतस्य देशान्तरे बुद्धौ वा सत्त्वायोगात् शून्यत्वे प्रत्यक्षत्वायोगात् शुक्तौ सत्त्वे बाधायोगान्मिथ्यात्वमेवेति भावः। आरोप्यं मिथ्यात्वेन युक्त्यपेक्षा तस्यानुभवसिद्धत्वादित्याह॥ तथा चेति॥ बाधानन्तरकालीनोऽयमनुभवः। तत्पूर्व्वं शुक्तिकात्वज्ञानायोगात् रजतस्य बाधप्रत्यक्षसिद्धं मिथ्यात्वं च वक्ष्यब्देनोच्यते। आत्मनि निरूपाधिकेऽहङ्काराध्यासे दृष्टान्तमुक्त्वा ब्रह्मजीवान्तरभेदस्याविद्याद्युपाधिकस्याध्यासे दृष्टान्तमाह॥ एक इति॥ द्वितीयचन्द्रसहितवदेक एवाङ्गुल्या द्विधा भातीत्यर्थः। लक्षणप्रकरणोपसंहारार्थ इतिशब्दः। भवत्वध्यासः शुक्त्यादौ, आत्मनि तु न संभवतीत्याक्षिपति॥ कथं पुनरिति॥ यत्रापरोक्षाध्यासाधिष्ठानत्वं तत्रेन्द्रियसंयुक्तत्वं विषयत्वञ्चेति व्याप्तिः शुक्त्यादौ दृष्टा। तत्र व्यापकाभावादात्मनोऽधिष्ठानत्वं न संभवतीत्यभिप्रेत्याह॥

यान्तरमध्यस्यति। युष्मत्प्रत्ययापेतस्य च प्रत्यगात्मनो विषयत्वं ब्रवीषि। उच्यते। न तावदयमेकान्तेनाविषयः। अस्मत्प्रत्ययविषयत्वात्, अपरोक्षत्वाच्च प्रत्यगात्मप्रसिद्धेः। न चायमस्ति नियमः "पुरोऽवस्थित एव विषये विषयान्तरमध्यसितव्यमिति"। अप्रत्यक्षेऽपि ह्याकाशे बालास्तलमलिनताद्यध्यस्य-

---

प्रत्यगात्मनीति ॥ प्रतीचि पुंसि इन्द्रियाग्राह्ये विषयस्याहङ्कारादेस्तद्धर्माणाञ्चाध्यासः कथमित्यर्थः। उक्तयोः माह ॥ सर्व्वो हीति। पुरोऽवस्थितत्वमिन्द्रियसंयुक्तत्वं। नन्वात्मनोऽप्यधिष्ठानत्वार्थं विषयत्वादिकमस्त्वित्यत आह॥ युष्मदिति ॥ इदंप्रत्ययानर्हस्य प्रत्यगात्मनो "न चक्षुषा गृह्यत" इत्यादि श्रुतिमनुसृत्य त्वमविषयत्वं ब्रवीषि। संप्रत्यध्यासलोभेन विषयत्वाङ्गीकारे श्रुतिसिद्धान्तयोर्बाधः स्यादित्यर्थः। आत्मन्यध्याससंभावनां प्रतिजानीते ॥ उच्यते इति ॥ अधिष्ठानारोप्ययोरेकस्मिन् ज्ञाने भासमानत्वमात्रमध्यासव्यापकं, तच्च भानप्रयुक्तसंशयनिश्चयादिफलभाक्त्वं, तदेव भानभिन्नत्वघटितं विषयत्वं, तन्न व्यापकं गौरवादिति मत्वाह॥ न तावदिति ॥ अयमात्मा नियमेनाविषयो न भवति तत्र हेतुमाह ॥ अस्मदिति ॥ अस्मत्प्रत्ययोऽहमित्यध्यासस्तत्र भासमानत्वादित्यर्थः। अस्मदर्थश्चिदात्मा प्रतिबिम्बितत्वेन यत्र प्रतीयते सोऽस्मत्प्रत्ययोऽहङ्कारस्तत्र भासमानत्वादिति वार्थः। न चाध्यासे सति भासमानत्वं, तस्मिन् सति स इति परस्पराश्रय इति वाच्यं अनादित्वात्। पूर्व्वाध्यासे भासमानात्मन उत्तराध्यासाधिष्ठानत्वसम्भवात्।

नन्वहमित्यहङ्कारविषयकभानरूपस्यात्मनो भासमानत्वं कथं? तद्विषयत्वं विना तत्फलभाक्त्वायोगादित्यत आह ॥ अपरोक्षत्वाच्चेति ॥ चशब्दः शङ्कानिरासार्थः। स्वप्रकाशकत्वादित्यर्थः। स्वप्रकाशत्वं साधयति ॥ प्रत्यगिति ॥ आबालपण्डितमात्मनः संशयादिशून्यत्वेन प्रसिद्धेः स्वप्रकाशत्वमित्यर्थः। अतः स्वप्रकाशत्वेन भासमानत्वादात्मनोऽध्यासाधिष्ठानत्वं संभवतीति भावः। यदुक्तमपरोक्षाध्यासाधिष्ठानत्वस्येन्द्रियसंयुक्ततया ग्राह्यत्वव्यापकमिति तत्राह ॥ न चायमिति ॥ तत्र हेतुमाह ॥ अप्रत्यक्षेऽपीति ॥ इन्द्रियाग्राह्येऽपीत्यर्थः। बाला अविवेकिनः

न्ति। एवमविरुद्धः प्रत्यगात्मन्यप्यनात्माध्यासः। तमेतमेवंलक्षणमध्यासं पण्डिता "अविद्या" इति मन्यन्ते, तद्विवेकेन च वस्तुस्वरूपावधारणं "विद्याम्" आहुः। तच्चैवं सति यच्च यदध्यासस्तत्कृतेन दोषेण गुणेन वाऽणुमात्रेणापि स न सम्बध्यते। तमेतमविद्याख्यमात्मानात्मनोरितरेतराध्यासं पुरस्कृत्य सर्वे प्रमा-

---

तलमिन्द्रनीलकटाहकल्पं नभो मलिनं पीतमित्येवमपरोक्षमध्यस्यन्ति। तच्चेन्द्रियग्राह्यत्वं नास्तीति व्यभिचारान्न व्याप्तिः। एतेनात्मानात्मनोः सादृश्याभावान्नाध्यास इत्यपास्तं। नीलनभसोस्तदभावेऽप्यध्यासदर्शनात्। सिद्धान्त आलोकाकारचाक्षुषवृत्तिव्यक्तसाक्षिवेद्यत्वं नभसि इति ह्येयं। संभावनां निगमयति॥ एवमिति॥ ननु ब्रह्मज्ञाननाश्यत्वेन सूचितामविद्यां हित्वा अध्यासः किमिति वर्ण्यत इत्यत आह॥ तमेतमिति॥ आत्मिनं समाहितमुक्तलक्षणलक्षितमध्यासमविद्याकार्य्यत्वादविद्येति मन्यन्त इत्यर्थः। विद्यानिवर्त्यत्वाच्चास्याविद्यात्वमित्याह॥ तद्विवेकेनेति॥ अध्यस्तनिषेधेनाधिष्ठानस्वरूपनिर्द्धारणं विद्यामध्यासनिवर्त्तिकामाहुरित्यर्थः। तथापि कारणाविद्यां त्यक्त्वा कार्य्याविद्या किमिति वर्ण्यते तत्राह॥ तच्चेति॥ तस्मिन्नध्यासे उक्तन्यायेनाविद्यात्मके सतीत्यर्थः। मूलाविद्यायाः सुषुप्तावनर्थत्वादर्शनात् कार्य्यात्मना तस्या अनर्थत्वज्ञापनार्थं तद्दर्शनमिति भावः। अध्यस्तकृतगुणदोषाभ्यां अधिष्ठानं न लिप्यत इत्यत्रार्थः। एवमध्यासस्य लक्षणसंभावने उक्त्वा प्रमाणमाह॥ तमेतमिति॥ तं वर्णितमेतं साक्षिप्रत्यक्षसिद्धं पुरस्कृत्य हेतुं कृत्वा लौकिकाः कर्म्मशास्त्रीयो मोक्षशास्त्रीयश्चेति त्रिविधो व्यवहारः प्रवर्त्तत इत्यर्थः। तत्र विधिनिषेधपराणि कर्म्मशास्त्राण्यृग्वेदादीनि, विधिनिषेधशून्यप्रत्यग्ब्रह्मपराणि मोक्षपराणि वेदान्तवाक्यानीति विभागः। एवं व्यवहारहेतुत्वेनाध्यासे प्रत्यक्षसिद्धेऽपि प्रमाणान्तरं पृच्छति॥ कथं पुनरिति॥ अविद्यावानहमित्यध्यासवानात्मा-प्रमाता सविषय आश्रयो येषां तानि अविद्यावद्विषयाणीति विग्रहः। तत्तत्प्रमेयव्यवहारहेतुभूतायाः प्रमाया अध्यासात्मकप्रमाचाश्रितत्वात् प्रमाणानामविद्यावद्विषयत्वं यद्यपि प्रत्यक्षं तथापि पुनरपि कथं केन

णप्रमेयव्यवहारा लौकिका वैदिकाश्च प्रवृत्ताः। सर्व्वाणि च शास्त्राणि विधिप्रतिषेधमोक्षपराणि। कथं पुनरविद्यावद्विषयाणि प्रत्यक्षादीनि प्रमाणानि शास्त्राणि चेति? उच्यते। देहेन्द्रियादिष्वहं ममाभिमानरहितस्य प्रमातृत्वानुपपत्तौ प्रमाणप्रवृत्त्यनुपपत्तेः। न होन्द्रियाण्युपादाय प्रत्यक्षादिव्यवहारः सम्भवति। न चाधिष्ठानमन्तरेणेन्द्रियाणां व्यापारः*सम्भवति।

प्रमाणेनाविद्यावद्विषयत्वमिति योजना। यदाऽविद्यावद्विषयाणि कथं प्रमाणानि स्युः? आश्रयदोषादप्रामाण्यापत्तेरित्याक्षेपः। तत्र प्रमाणप्रश्ने व्यवहारार्थापत्तिं तल्लिङ्गकानुमानञ्चाह॥"उच्यते"इत्यादिना"तस्मात्" इत्यन्तेन॥ देवदत्तकर्त्रको व्यवहारस्तदीयदेहादिष्वहंममाध्यासमूलस्तदन्वयव्यतिरेकेणानुसारित्वात्, यदित्थं तत्तथा। यथा मन्मूलो घट इति प्रयोगः। तत्र व्यतिरेकं दर्शयति॥ देहेति॥ देवदत्तस्य सुषुप्तावध्यासाभावे व्यवहाराभावो दृष्टः, जाग्रत्स्वप्नयोरध्यासे सति व्यवहार इत्यन्वयः स्फुटत्वान्नोक्तः। अनेन लिङ्गेन कारणतयाध्यासः सिद्ध्यति, व्यवहाररूपकार्य्यानुपपत्त्या वेति भावः। ननु मनुष्यत्वादिजातिमति देहेऽहमित्यभिमानमात्राद्व्यवहारः सिद्ध्यतु किमिन्द्रियादिषु ममाभिमानेत्याशङ्क्याह॥ न हीति॥ इन्द्रियपदं लिङ्गादेरप्युपलक्षणं प्रत्यक्षादीत्यादिपदप्रयोगात्। तथाच प्रत्यक्षलिङ्गादिप्रयुक्तो यो व्यवहारो द्रष्टा अनुमाता श्रोताऽहमित्यादिरूपः स इन्द्रियादीनि ममतास्पदान्यगृहीत्वा न सम्भवतीत्यर्थः। यदा तानि ममत्वेनानुपादाय यो व्यवहारः स नेति योजना। पूर्व्वत्रानुपादानासम्भवक्रिययोरेको व्यवहारः कर्त्ता इति क्त्राप्रत्ययः साधुः। उत्तरत्रानुपादानव्यवहारयोरेकात्मकर्त्रेकत्वात् तत्साधुत्वमिति भेदः। इन्द्रियादिषु ममेत्यध्यासाभावेऽन्धादेरिव द्रष्टृत्वादिव्यवहारो न स्यादिति भावः। इन्द्रियाध्यासेनैव व्यव-

---

* व्यवहारः ८ सं० पु० पाठः।

न चानध्यस्तात्मभावेन देहेन कश्चिद् व्याप्रियते। न चैतस्मिन सर्व्वस्मिन्नसत्यासङ्गस्यात्मनः प्रमातृत्वमुपपद्यते। न च प्रमातृत्वमन्तरेण प्रमाणप्रवृत्तिरस्ति। तस्मादविद्यावद्विषयाण्येव प्रत्यक्षादीनि प्रमाणानि शास्त्राणि चेति। पश्वादिभिश्चाविशेषात्। यथा हि पश्वादयः शब्दादिभिः श्रोत्रादीनां सम्बन्धे सति

हारादस्य देहाध्यासेनेत्यत आह ॥ न चेति ॥ इन्द्रियाणामधिष्ठानं आश्रयः शरीरमित्यर्थः। नन्वस्त्वात्मना संयुक्तं शरीरं तेषामाश्रयः किमध्यासेनेत्यत्राह ॥ न चानध्यस्तात्मभावेनेति ॥ अनध्यस्त आत्मभावः आत्मतादात्म्यं यस्मिन् तेनेत्यर्थः। "असङ्गो हि" इति श्रुतेराध्यासिक एव देहात्मनोः सम्बन्धो न संयोगादिरिति भावः। नन्वात्मनो देहादिभिराध्यासिकसम्बन्धोऽपि मास्तु। ततश्चेतनतयाप्रमातृत्वोपपत्तेः, न च सुषुप्तौ प्रमातृत्वापत्तिः करणोपरमादिति तत्राह ॥ न चैतस्मिन्निति ॥ प्रमाश्रयत्वं हि प्रमातृत्वं। प्रमा यदि नित्यचिन्मात्रं तर्ह्याश्रयत्वायोगः, करणवैयर्थ्यञ्च। यदि वृत्तिमात्रं, जगदान्ध्यप्रसङ्गः वृत्तेर्जडत्वात्, अतो वृत्तीद्धो बोधः प्रमा, तदाश्रयत्वमसङ्गस्यात्मनो वृत्तिमन्मनस्तादात्म्याध्यासं विना न सम्भवतीति भावः। देहाध्यासे, तद्धर्माध्यासे चासतीत्यत्रार्थः, तर्ह्यात्मनः प्रमातृत्वं मास्तु इति वदन्तं प्रत्याह ॥ न चेति ॥ तस्मादात्मनः प्रमातृत्वादिव्यवहारार्थमध्यासोऽङ्गीकर्त्तव्य इत्यनुमानार्थापत्त्योः फलमुपसंहरति ॥ तस्मादिति ॥ प्रमाणसत्त्वादित्यर्थः। यद्वा प्रमाणप्रश्नं समाधायाक्षेपं परिहरति ॥ तस्मादिति ॥ अहमित्यध्यासस्य प्रमात्रन्तर्गतत्वेनादोषत्वादविद्यावदाश्रयाण्यपि प्रमाणान्येवेति योजना। सति प्रमातरि पश्वाद्यवनदोष इत्युच्यते यथा काचादि, अविद्या तु प्रमात्रन्तर्गतत्वान्न दोषः, येन प्रत्यक्षादीनामप्रामाण्यं भवेदिति भावः। ननु यदुक्तमन्वयव्यतिरेकाभ्यां व्यवहारोऽध्यासकार्य्य इति तदयुक्तं विदुषामध्यासाभावेऽपि व्यवहारदर्शनेरित्यत आह ॥ पश्वादिभिश्चेति ॥ "च" शब्दः शङ्कानिरासार्थः। किं विद्वत्त्वं "ब्रह्मास्मीति" साक्षात्कारः? उत यौक्तिकमात्मानात्मभेदज्ञानं? आद्ये "बाधिताध्यासानुवृत्त्या व्यवहार" इति समन्वयसूत्रे वक्ष्यते। द्वितीये परोक्षज्ञानस्यापरोक्षभ्रान्त्यनिवर्त्तक-

शब्दादिविज्ञाने प्रतिकूले जाते ततो निवर्त्तन्ते अनुकूले च प्रवर्त्तन्ते, यथा दण्डोद्यतकरं पुरुषमभिमुखमुपलभ्य मां हन्तुमयमिच्छतीति पलायितुमारभन्ते, हरितत्रणपूर्णपाणिमुपलभ्य तं प्रत्यभिमुखीभवन्ति, एवं पुरुषा अपि व्युत्पन्नचित्ताः क्रूरदृष्टीनाक्रोशतः खड्गोद्यतकरान् बलवत उपलभ्य ततो निवर्त्तन्ते, तद्विपरीतान् प्रति अभिमुखीभवन्ति। अतः समानः पश्वादिभिः पुरुषाणां प्रमाणप्रमेयव्यवहारः। पश्वादीनाञ्च प्रसिद्ध एवाविवेकपूर्व्वकः प्रत्यक्षादिव्यवहारः तत्सामान्यदर्शनाद्व्युत्पत्तिमतामपि पुरुषाणां प्रत्यक्षादिव्यवहारस्तत्कालः समान इति निश्चीयते।

त्वात् विवेकिनामपि व्यवहारकाले पश्वादिभिरविशेषादध्यासवत्त्वेन तुल्यत्वाद्व्यवहारोऽध्यासकार्य्य इति युक्तमित्यर्थः। अत्रायं प्रयोगः विवेकिनोऽध्यासवन्तो व्यवहारत्वात् पश्वादिवदिति। तत्र संग्रहवाक्यं व्याकुर्व्वन् दृष्टान्ते हेतुं स्फुटयति ॥ यथाहीति ॥ विज्ञानस्यानुकूलत्वं प्रतिकूलत्वं चेष्टानिष्टसाधनगोचरत्वं, तदेवोदाहरति ॥ यथेति ॥ अयं दण्डो मदनिष्टसाधनं दण्डत्वात् अनुभूतदण्डवत्। इदं दृश्यं इष्टसाधनं अनुभूतजातीयत्वात् अनुभूतदृश्यवत् इत्यनुमाय व्यवहरन्तीत्यर्थः। अधुना हेतोः पक्षधर्म्मतामाह ॥ एवमिति ॥ व्युत्पन्नचित्ता अपीत्यन्वयः। विवेकिनोऽपीत्यर्थः। फलितमाह ॥ अत इति ॥ अनुभवबलादित्यर्थः ॥ समान इति ॥ अध्यासकार्य्यत्वेन तुल्य इत्यर्थः। नन्वस्माकं प्रवृत्तिरध्यासादिति न पश्वादयो ब्रुवन्ति, नापि परेषामेतत् प्रत्यक्षं; अतः साध्यविकलो दृष्टान्त इति नेत्याह ॥ पश्वादीनाञ्चेति ॥ तेषामात्मानात्मनोर्ज्ञानमात्रमस्ति न विवेकः, उपदेशाभावात्, अतः सामग्रीसत्त्वादध्यासस्तेषां प्रसिद्ध इत्यर्थः। निगमयति ॥ तत्सामान्येति ॥ तैः पश्वादिभिः सामान्यं व्यवहारत्वं तस्य दर्शनाद्विवेकिनामप्ययं व्यवहारः समान इति निश्चीयत इति सम्बन्धः। समानत्वं व्यवहारस्याध्यासकार्य्यत्वेनेत्युक्तं पुरस्तात्। तत्रोक्तान्वयव्यतिरेकौ स्मारयति ॥

शास्त्रीये तु व्यवहारे यद्यपि बुद्धिपूर्व्वकारी नाविदित्वात्मनः परलोकसम्बन्धमधिक्रियते, तथापि न वेदान्तवेद्यमशनायाद्यतीतमपेतब्रह्मत्वादिभेदमसंसार्य्यात्मतत्त्वमधिकारेऽपेक्ष्यते। अनुपयोगादधिकारे विरोधाच्च। प्राक् च तथाभूतात्मविज्ञानात् प्रवर्त्तमानं शास्त्रमविद्यावद्विषयत्वं नातिवर्त्तते। तथा हि ब्राह्मणो यजेतेत्यादीनि शास्त्राणि आत्मनि वर्णाश्रमवयोऽवस्थादिविशेषाध्यासमाश्रित्य प्रवर्त्तन्ते। अध्यासो नाम "अतस्मिंस्तद्बुद्धिरिति" अवोचाम। तद्यथा पुत्रभार्य्यादिषु विकलेषु सकलेषु

तत्काल इति॥ तस्याध्यासस्य काल एव कालो यस्य स तत्कालः। यदा अध्यासस्तदा व्यवहारः। तदभावे सुषुप्तौ तदभाव इत्युक्तान्वयादिमानिति यावत। अतो व्यवहारलिङ्गादविवेकिनामपि देहादिष्वहंममाभिमानोऽस्तीत्यनवद्यं। ननु लौकिकस्य व्यवहारस्याध्यासिकत्वेऽपि ज्योतिष्टोमादिव्यवहारस्य नाध्यासजन्यत्वं, तस्य देहातिरिक्तात्मज्ञानपूर्व्वकत्वादित्याशङ्क्य हेतुमङ्गीकरोति॥ शास्त्रीये त्विति॥ तर्हि कथं वैदिककर्म्मणोऽध्यासजन्यत्वसिद्धिरित्याशङ्क्य किन्तच्च देहान्यात्मधीमात्रमपेक्षितं उत आत्मतत्त्वज्ञानं? आद्ये तस्याध्यासाबाधकत्वात् तत्सिद्धिरित्याह॥ तथापीति॥ न द्वितीय इत्याह॥ न वेदान्त इति॥ क्षुत्पिपासादियुक्तो जातिविशेषवानहं संसारीति ज्ञानं कर्म्मण्यपेक्षितं न तद्विपरीतात्मतत्त्वज्ञानं, अनुपयोगात् प्रवृत्तिबाधाच्चेत्यर्थः। शास्त्रीयकर्म्मणोऽध्यासजन्यत्वं निगमयति॥ प्राक् चेति॥ अध्यासे आगमं प्रमाणयति॥ तथा हीति॥ यथा प्रत्यक्षानुमानार्थापत्तयोऽध्यासे प्रमाणं तथागमोऽपीत्यर्थः। "ब्राह्मणो यजेत" "न ह वै खात्वा भिद्येत" "अष्टवर्षमुपनयीत" "कृष्णकेशोऽग्नीनादधीत" इत्यागमो ब्राह्मणादिपदैरधिकारिणं वर्णाद्यभिमानिनमनुवदन् अध्यासं गमयतीति भावः। एवमध्यासे प्रमाणसिद्धेऽपि कस्य कुत्राध्यास इति जिज्ञासायां तमुदाहर्त्तुं लक्षणं स्मारयति॥ अध्यासो नामेति॥ उदाहरति॥ तद्यथेति॥ तल्लक्षणं यथा

वा अहमेव विकलः सकलो वेति वाह्यधर्म्मानात्मन्यध्यस्यति। तथा देहधर्म्मान् स्थूलोऽहं कृशोऽहं गौरोऽहं *तिष्ठामि गच्छामि लङ्घयामि चेति। तथेन्द्रियधर्म्मान् मूकः क्लीवो बधिरः काणोऽन्धोऽहमिति। तथान्तःकरणधर्म्मान् कामसङ्कल्पविचिकित्साध्यवसायादीन्। एवमहम्प्रत्ययिनमशेषस्यप्रचारसाक्षिणि प्रत्यगात्मन्यध्यस्य तञ्च प्रत्यगात्मानं सर्व्वसाक्षिणं तद्विपर्य्ययेणान्तःकरणादिष्वध्यस्यति। एवमयमनादिरनन्तो नैसर्गिकोऽध्यासो मिथ्या-

---

स्पष्टं भवति तथोदाक्रियत इत्यर्थः। स्वदेहाद्भेदेन प्रत्यक्षाः पुत्रादयो वाह्याः, तद्धर्म्मान् साकल्यादीन् देहविशिष्टात्मन्यध्यस्यति, तद्धर्म्मज्ञानात् स्वस्मिंस्तत्तुल्यधर्म्मानध्यस्यतीत्यर्थः। भेदापरोक्षज्ञाने तद्धर्म्माध्यासायोगात् अन्यथाख्यात्यनङ्गीकाराच्चेति द्रष्टव्यं। देहेन्द्रियधर्म्मात्मनो विशिष्टात्मन्यध्यस्यतीत्याह॥ तथेति॥ कृशत्वादिधर्म्मवतो देहादेरात्मनि तादात्म्येन कल्पितत्वात्तद्धर्म्माः साक्षादात्मन्यध्यस्ता इति मन्तव्यं। अज्ञातप्रत्यगूपे साक्षिणि मनोधर्म्माध्यासमाह॥ तथान्तःकरणेति॥ धर्म्माध्यासमुक्त्वा तद्वदेव धर्म्यध्यासमाह॥ एवमिति॥ अन्तःकरणसाक्षिणभेदेनाध्यस्य तद्धर्म्मान् कामादीन् अध्यस्यतीति मन्तव्यं। स्वप्रचारा मनोवृत्तयः प्रातिलोम्येनासज्जडदुःखात्मकाहङ्कारादिविलक्षणतया सच्चित्सुखात्मकत्वेनाञ्चति प्रकाशत इति प्रत्यक्। एवमात्मन्यनात्मतद्धर्म्माध्यासमुदाहृत्यानात्मन्यात्मनोऽपि संसृष्टत्वेनाध्यासमाह॥ तच्चेति॥ अहमित्यध्यासे चिदात्मनो भानं वाच्यं, अन्यथा जगदान्ध्यापत्तेः। न चानध्यस्ताध्यासे भानमस्ति। तस्माद्रजतादाविदम इवात्मनः संसर्गाध्यास एष्टव्यः। "तद्विपर्य्ययेणेति" तस्याध्यस्तस्य जडस्य विपर्य्ययोऽधिष्ठानत्वं चैतन्यञ्च तदात्मना स्थितमिति यावत्। तच्चाज्ञाने केवलात्मनः संसर्गः, मनस्यज्ञातस्य ज्ञानोपहितस्य देहादौ मनउपहितस्येति विशेषः। एवमात्मनि बुद्ध्याद्यध्यासात् कर्त्तृत्वादिलाभः। बुद्ध्यादौ चात्माध्यासाच्चैतन्यलाभ इति भावः। वर्त्मिताध्यासमुपसंहरति॥ एवमयमिति॥

---

* कृशोहं कृष्णोहं इति मुद्रित पुस्तके पाठः।

प्रत्ययरूपः कर्त्तृत्वभोक्तृत्वप्रवर्त्तकः सर्व्वलोकप्रत्यक्षः। अस्यानर्थहेतोः प्रहाणाय आत्मैकत्वविद्याप्रतिपत्तये सर्व्वे वेदान्ता आरभ्यन्ते। यथा चायमर्थः सर्व्वेषां वेदान्तानां तथाच वयमस्यां

अनाद्यविद्यात्मकतया कार्य्याध्यासस्यानादित्वं अध्यासात् संस्कारस्ततोऽध्यास इति प्रवाहतो नैसर्गिकत्वं॥ एवमुपादानं निमित्तञ्चोक्तं भवति। ज्ञानं विना ध्वंसाभावादानन्त्यं। तदुक्तं भगवद्गीतासु। "न रूपमस्येह तथोपलभ्यते नान्तो न चादिर्न च सम्प्रतिष्ठेति"। हेतुमुक्त्वा स्वरूपमाह॥ मिथ्येति॥ मिथ्या। माया तया प्रतीयते इति प्रत्ययः कार्य्यप्रपञ्चः, तत्प्रतीतिस्थेत्येवं स्वरूपः इत्यर्थः। तस्य कार्य्यमाह॥ कर्त्तृत्वेति॥ प्रमाणं निगमयति॥ सर्व्वेति॥ साक्षिप्रत्यक्षमेवाध्यासधर्म्मिग्राहकं मानं, अनुमानादिकन्तु सम्भावनार्थमित्यभिप्रेत्य प्रत्यक्षोपसंहारः कृतः। एवमध्यासं वर्णयित्वा तत्सार्थ्यं विषयप्रयोजने दर्शयति॥ अस्येति॥ कर्त्तृत्वाद्यनर्थहेतोरध्यासस्य समूलस्यात्यन्तिकनाशो मोक्षः स केनेत्यत आह॥ आत्मेति॥ ब्रह्मात्मैक्यसाक्षात्कारस्य प्रतिपत्तिः श्रवणादिभिरप्रतिबन्धेन लाभस्तस्या इत्यर्थः॥ विद्यायां कारणमाह॥ सर्व्व इति॥ आरभ्यन्ते अधीत्य विचार्य्यन्त इत्यर्थः। विचारितवेदान्तानां ब्रह्मात्मैक्यं विषयो मोक्षः फलमित्युक्तं भवति। अर्थात्तद्विचारात्मकशास्त्रस्यापि ते एव विषयप्रयोजने इति ज्ञेयं। ननु वेदान्तेषु प्राणाद्युपास्तीनां भानादात्मैक्यमेव तेषामर्थ इति कथमित्यत आह॥ यथा चेति॥ शरीरमेव शरीरकं कुत्सितत्वात्तन्निवासी शारीरको जीवस्तस्य ब्रह्मत्वविचारो मीमांसा तस्यामित्यर्थः। उपास्तीनां चित्तैकाग्र्यद्वारात्मैक्यज्ञानार्थत्वात्तद्वाक्यानामपि महातात्पर्य्यमैक्ये इति विवक्ष्यते। एवमध्यासोक्त्या ब्रह्मात्मैक्ये विरोधाभावेन विषयप्रयोजनवत्त्वाच्छास्त्रमारभ्यणीयमिति दर्शितं॥ * ॥ इति प्रथमवर्णकं॥*॥ विचारस्य साक्षाद्विषया वेदान्ताः, तेषां गतार्थत्वागतार्थत्वाभ्यामारम्भसन्देहे कृत्स्नस्य वेदस्य विधिपरत्वाद्विधेश्च "अथातो धर्म्मजिज्ञासा" इत्यादिना पूर्व्वतन्त्रेण विचारितत्वादवगतार्थाः* इत्यव्यवहितविषयाभावान्नारम्भ इति प्राप्ते ब्रूते॥ वेदान्तेति॥ वेदान्तविष-

---

* एव वेदान्ता ८ सङ्ख्याकपुस्तके पाठः।

शारीरकमीमांसायां प्रदर्शयिष्यामः। वेदान्तमीमांसाशास्त्रस्य व्याचिख्यासितस्येदमादिमं सूत्रं।

अथातो ब्रह्मजिज्ञासेति। १।

तत्राथशब्द आनन्तर्य्यार्थः परिगृह्यते नाधिकारार्थः ब्रह्मजिज्ञासाया अनधिकार्य्यत्वात्। मङ्गलस्य च वाक्यार्थे समन्वयाभावात्। अर्थान्तरप्रयुक्त एव हि अथशब्दः श्रुत्या मङ्गल-

---

यकपूजितविचारात्मकशास्त्रस्य व्याख्यातुमिष्टस्य सूत्रसन्दर्भस्येदं प्रथमसूत्रमित्यर्थः। यदि विधिरेव वेदार्थः स्यात्तदा सर्व्वज्ञो बादरायणो ब्रह्मजिज्ञासां न ब्रूयात्, ब्रह्मणि मानाभावात्। अतो ब्रह्मणो जिज्ञास्यत्वोक्त्या केनापि तत्त्वेनानवगतब्रह्मपरवेदान्तविचार आरभणीय इति सूत्रकृद्दर्शयति। तच्च "व्याचिख्यासितस्य" इति पदेन भाष्यकारो बभाषे ॥ * ॥ इति द्वितीयवर्णकं ॥ * ॥ एवं वर्णकद्वयेन वेदान्तविचारस्य कर्त्तव्यतायां विषयप्रयोजनवत्त्वं अगतार्थत्वञ्चेति हेतुद्वयं सूत्रस्यार्थिकार्थं व्याख्यायात्तरव्याख्यामारभमाणः पुनरप्यधिकारिभावाभावाभ्यां शास्त्रारम्भसन्देहे सति अथशब्दस्यानन्तर्य्यार्थकत्वोक्त्या अधिकारिणं साधयति ॥ "तत्राथशब्द" इति ॥ सूत्र इत्यर्थः। "मङ्गलानन्तरारम्भप्रश्नकात्स्न्र्ये ष्वथो अथेति" अथशब्दस्य बहवोऽर्थाः सन्ति। तत्राथ "योगानुशासनं" इत्यत्र सूत्रे यथा अथशब्द आरम्भार्थकः योगशास्त्रमारभ्यत इति तद्वदत्र किं न स्यादित्यत आह ॥ नाधिकारार्थ इति ॥ अयमाशयः। किं जिज्ञासापदं ज्ञानेच्छापरं उत विचारविलक्षकं? आद्येऽथशब्दस्यारम्भार्थत्वे ब्रह्मज्ञानेच्छाऽऽरभ्यत इति सूत्रार्थः स्यात् स चासङ्गतः। तस्यानारभ्यत्वात्। न हि प्रत्यधिकरणं इच्छा क्रियते किन्तु तया विचारः। न द्वितीयः। कर्त्तव्यपदाध्याहारं विना विचारलक्षकत्वायोगात्। अध्याहृते च तेनैवारम्भोक्तेरथशब्दवैयर्थ्यात् किन्वधिकारिसिद्ध्यर्थमानन्तर्य्यार्थतैव युक्तेति। अधुना सम्भावितमर्थान्तरं दूषयति ॥ मङ्गलस्येति ॥ वाक्यार्थो विचारकर्त्तव्यता। न हि तत्र मङ्गलशब्दस्य कर्तृत्वादिनान्वयोऽस्तीत्यर्थः। ननु सूत्रकृता शास्त्रादौ मङ्गलं कार्य्यमिति अथशब्दः

प्रयोजनो भवति। पूर्वप्रकृतापेक्षायाश्च फलत आनन्तर्याव्यतिरेकात्। सति चानन्तर्यार्थत्वे यथा धर्मजिज्ञासापूर्ववृत्तवेदाध्ययनं नियमेनापेक्षते, एवं ब्रह्मजिज्ञासापि यत्पूर्ववृत्तं नियमेनापेक्षते तद्वक्तव्यं। स्वाध्यायानन्तर्यं तु समानं।

प्रयुक्त इति चेत् सत्यं। न तस्यार्थो मङ्गलं किन्तु तच्छ्रवणमुच्चारणञ्च मङ्गलकृत्यं करोति तदर्थस्त्वानन्तर्यमेवेत्याह ॥ अर्थान्तरेति ॥ अर्थान्तरं आनन्तर्यं। अथा अवर्णेन शङ्खवाद्यादिनादश्रवणवदोङ्कारार्थशब्दयोः श्रवणं मङ्गलफलकं।

"ओंकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा।
कण्ठं भित्वाविनिर्यातौ तस्मान्माङ्गलिकावुभौ॥"

इति स्मरणादिति भावः। ननु प्रपञ्चो मिथ्येति प्रकृते सति, अथ मतं। प्रपञ्चः सत्य इत्यत्र पूर्वप्रकृतार्थादुत्तरार्थस्यार्थान्तरत्वार्थोऽथशब्दो दृष्टः। तथात्र किं न स्यादित्यत आह ॥ पूर्वेति ॥ फलतः फलस्येत्यर्थः। ब्रह्मजिज्ञासायाः पूर्वं अर्थविशेषः प्रकृतो नास्ति यस्मात्तस्या अर्थान्तरत्वमथशब्देनोच्येत। यतः कुतश्चिदर्थान्तरं सूचकता न वक्तव्यं, फलाभावात्। यदि फलस्य जिज्ञासापदोक्तकर्त्तव्यविचारस्य हेतुत्वेन यत्पूर्वं प्रकृतं तदपेक्षास्तीति अपेक्षाबलात् प्रकृतहेतुमाक्षिप्य ततोऽर्थान्तरत्वमुच्येत, तदर्थान्तरत्वमानन्तर्यऽन्तर्भवति हेतुफलभावज्ञानायानन्तर्यस्यावश्यं वाच्यत्वात्। तस्मादिदमर्थान्तरमित्युक्ते तस्य हेतुत्वाप्रतीतेः। तस्मादिदमनन्तरमित्युक्ते भवत्येव हेतुत्वप्रतीतिः। न चास्यादनन्तरो गौरित्यत्र हेतुत्वभानापत्तिरिति वाच्यं। तयोर्दैशतः कालतो वा व्यवधानेनानन्तर्यस्यामुख्यत्वात्। अतः सामग्रीफलयोरेव मुख्यमानन्तर्यं, अव्यवधानात्। तस्मिन्नुक्ते सत्यर्थान्तरत्वं न वाच्यं ज्ञातत्वादैफल्याच्चेति भावः। फलस्य विचारस्य पूर्वप्रकृतहेत्वपेक्षाया बलाद्यदर्थान्तरत्वं तस्यानन्तर्याभेदात् न पृथगथशब्दार्थत्वमित्यध्याहृत्य भाष्यं योजनीयं। यद्वा पूर्वप्रकृतेऽर्थेऽपेक्षा यस्या अर्थान्तरतायास्तस्याः फलं ज्ञानं तदाराऽऽनन्तर्याव्यतिरेकात्तज्ज्ञाने तस्याः ज्ञानतोऽन्तर्भावाद्ग्राथशब्दार्थतेत्यर्थः। नन्वानन्तर्यार्थकत्वेऽप्यानन्तर्यस्यावधिः क इत्याशङ्क्याह ॥ सति चेति ॥

नन्विह कर्म्मावबोधानन्त्यं विशेषः। न। धर्म्मजिज्ञासायाः प्राग-
धीतवेदान्तस्य ब्रह्मजिज्ञासोपपत्तेः। यथा च* हृदयाद्यवदा-
नानामानन्त्यनियमः क्रमस्य विवक्षितत्वात्, न तथेह क्रमो

यन्नियमेन पूर्व्वदृत्तं पूर्व्वभावि असाधारणकारणं पुष्कलकारणमिति यावत्, तदेवावधिरिति वक्तव्यमित्यर्थः। नन्वस्तु धर्म्मविचार इव ब्रह्मविचारेऽपि वेदाध्ययनं पुष्कलकारणमित्यत आह॥ स्वाध्यायेति॥ समानं ब्रह्मविचारे साधारणकारणं न पुष्कलकारणमित्यर्थः। ननु संयोगपृथक्त्वन्यायेन "यज्ञेन दानेन" इत्यादिश्रुत्या "यज्ञादिकर्म्माणि ज्ञानाय विधीयन्ते" इति सर्व्वापेक्षाधिकरणे वक्ष्यते। तथा च पूर्व्वतन्त्रेण तदवबोधः पुष्कलकारणमिति शङ्कते॥ नन्विति॥ इह ब्रह्मजिज्ञासायां। विशेषोऽसाधारणं कारणं। "एकस्य तूभयत्वे संयोगपृथक्त्वं" इति जैमिनिसूत्रं। तदर्थस्तु। एकस्य कर्म्मण उभयत्वे ऽनेकफलसम्बन्धे संयोगः, उभयसम्बन्धबोधकं वाक्यं तस्य पृथक्त्वं भेदः सहेतुः। ततश्चापि ज्योतिष्टोमादिकर्म्मणा स्वर्गादिफलकानामपि "यज्ञेन दानेन" इत्यादि वचनात् ज्ञानार्थत्वञ्चेति परिहरति॥ नेत्यादिना॥ अयमाशयः। न तावत् पूर्व्वतन्त्रस्थं न्यायसहस्रं ब्रह्मज्ञाने तद्विचारे वा पुष्कलं कारणं, तस्य धर्म्मनिर्णयमात्रहेतुत्वात्, नापि कर्म्मनिर्णयः, तस्यानुष्ठानहेतुत्वात्। न हि धूमाग्न्योरिव धर्म्मब्रह्मणोर्व्याप्तिरस्ति, यया धर्म्मज्ञानाद् ब्रह्मज्ञानं भवेत्। यद्यपि शुद्धिविवेकादिद्वारा कर्म्माणि हेतवस्तथापि तेषां नाधिकारिविशेषणत्वं, अज्ञातानां तेषां जन्मान्तरज्ञातानामपि फलहेतुत्वात्। अधिकारिविशेषणं ज्ञायमानं प्रवृत्तिपुष्कलकारणमानन्त्यव्यावधित्वेन वक्तव्यं। अतः कर्म्माणि तदवबोधन्यायविचारो वा नावधिरिति न ब्रह्मजिज्ञासाया धर्म्मजिज्ञासानन्त्यमिति। ननु धर्म्मब्रह्मजिज्ञासयोः कार्य्यकारणत्वाभावेऽप्यानन्त्यौक्तिद्वारा क्रमज्ञानार्थोऽथशब्दः। "हृदयस्याग्रेऽवद्यत्यथ जिह्वाया अथ वक्षस" इत्यवदानानां क्रमज्ञानार्थोऽथशब्दवदित्याशङ्क्याह॥ यथेति॥ अवदानानामानन्त्यनियमः क्रमो यथाथशब्दार्थस्तस्य विवक्षितत्वात्

---

* यथेति नं० ट सो० पुस्तकपाठः।

विवक्षितः। शेषशेषित्वेऽधिकृताधिकारे वा प्रमाणाभावाद्धर्म-ब्रह्मजिज्ञासयोः, फलजिज्ञास्यभेदाच्च। अभ्युदयफलं धर्मज्ञानं,

---

न तथेह धर्मब्रह्मजिज्ञासयोः क्रमो विवक्षितः। एककर्तृकत्वाभावेन तयोः क्रमानपेक्षणात्। अतो न क्रमार्थोऽथशब्द इत्यर्थः। ननु तयो-रेककर्तृकत्वं कुतो नास्तीत्यत आह॥ शेषेति॥ येषामेकप्रधानशेषता यथावदानानां प्रयाजादीनाञ्च, ययोश्च शेषशेषित्वं यथा प्रयाजदर्शयोः, यस्य चाधिकृताधिकारत्वं यथा अपां प्रणयनं दर्शपूर्णमासाङ्गमाश्रित्य "गोदोहनेन पशुकामस्य" इति विहितस्य गोदोहनस्य, यथा वा "दर्श-पूर्णमासाभ्यामिष्ट्वा सोमेन यजेत" इति दर्शाद्युत्तरकाले विहितस्य सोमयागस्य दर्शाद्यधिकृताधिकारत्वं, तेषामेककर्तृकत्वं भवति। तत-श्चैकप्रयोगवचनगृहीतानां तेषां युगपदनुष्ठानासम्भवात् क्रमाकाङ्क्षायां श्रुत्यादिभिर्हि क्रमो बोध्यते; नैवं जिज्ञासयो शेषशेषित्वश्रुतिलिङ्गा-दिकं मानमस्ति। ननु "ब्रह्मचर्यं समाप्य गृही भवेद् गृहादनी भूत्वा प्रव्रजेत्" इति श्रुत्वा।

"अधीत्य विधिवद्वेदान् पुत्रानुत्पाद्य धर्मतः।
इष्ट्वा च शक्तितो यज्ञैर्मनो मोक्षे निवेशयेत्"॥

इति स्मृत्वा चाधिकृताधिकारत्वं भातीति। तन्न।
"ब्रह्मचर्यादेव प्रव्रजेत्"।

"आसादयति शुद्धात्मा मोक्षं वै प्रथमाश्रमे"।

इति श्रुतिस्मृतिभ्यां। त्वयोदाहृतश्रुतिस्मृत्योरशुद्धचित्तविषयत्वावगमात् एतदुक्तं भवति "यदि जन्मान्तरकृतकर्मभिः शुद्धं चित्तं तदा ब्रह्मच-र्यादेव सन्न्यस्य ब्रह्म जिज्ञासितव्यं, यदि न शुद्धमिति रागेण ज्ञायते तदा गृही भवेत्, तत्राप्यशुद्धौ वनी भवेत्, तत्राप्यशुद्धौ तथैव काल-माकलयेत्, वने शुद्धौ प्रव्रजेदिति"। तथा च श्रुतिः "यदहरेव विर-जेत् तदहरेव प्रव्रजेत्" इति तस्मान्नानयोरधिकृताधिकारत्वे किञ्चिन्मा-नमिति भावः। ननु मीमांसयोः शेषशेषित्वमधिकृताधिकारत्वञ्च मास्तु। एकमोक्षफलकत्वेनैककर्तृकत्वं स्यादेव। वदन्ति हि "ज्ञानकर्मभ्यां मुक्तिः" इति समुच्चयवादिनः। एवमेकवेदार्थजिज्ञास्यकत्वाच्चैककर्तृकत्वं। तथा चाग्नेयादिषड्यागानामेकस्वर्गफलकानां द्वादशाध्यायानाञ्चैकध-

तच्चानुष्ठानापेक्षं। निश्रेयसफलन्तु ब्रह्मविज्ञानं न चानुष्ठानान्तरापेक्षं। भव्यश्च धर्मो जिज्ञास्यो न ज्ञानकालेऽस्ति, पुरुषव्यापारतन्त्रत्वात्। इह तु भूतं ब्रह्म जिज्ञास्यं नित्यवृत्तत्वात्, न पुरुषव्यापारतन्त्रं,। चोदनाप्रवृत्तिभेदाच्च। या हि चोदना धर्मस्य लक्षणं सा स्वविषये नियुञ्जानैव न पुरुषमवबोधयति। ब्रह्मचोदना तु पुरुषमवबोधयत्येव केवलं, अवबोधस्य चोदनाजन्यत्वान्न पुरुषो

र्मजिज्ञास्यकानां क्रमवत्तयोः क्रमो विवक्षित, इति क्रमार्थोऽथशब्द इत्याशङ्क्याह॥ फलेति॥ फलभेदाज्जिज्ञास्यभेदाच्च न क्रमो विवक्षित इत्यनुषङ्गः। यथा सौर्य्यार्य्यमाप्राजापत्यचरूणां ब्रह्मवर्चसस्वर्गायुःफलभेदात्, यथा वा कामचिकित्सातन्त्रयोर्जिज्ञास्यभेदान्न क्रमापेक्षा तद्वन्मीमांसयोर्न क्रमापेक्षेति भावः, तच्च फलभेदं विवृणोति॥ अभ्युदयेति॥ विषयाभिमुख्येनोदेतीत्यभ्युदयो विषयाधीनं सुखं स्वर्गादिकं तच्च धर्मज्ञानहेतोर्मीमांसायाः फलमित्यर्थः। न केवलं फलस्य स्वरूपतो भेदः किन्तु हेतुतोऽपीत्याह॥ तच्चेति॥ ब्रह्मज्ञानहेतोर्मीमांसायाः फलन्तु तद्विरुद्धमित्याह॥ निश्रेयसेति॥ नित्यं निरपेक्षं श्रेयो निश्रेयसं मोक्षस्तत् फलमित्यर्थः। ब्रह्मज्ञानञ्च स्वोत्पत्तिव्यतिरिक्तमनुष्ठानं नापेक्षत इत्याह॥ न चेति॥ स्वरूपतो हेतुतश्च फलभेदान्न समुच्चय इति भावः। जिज्ञास्यभेदं विवृणोति॥ भव्यश्चेति॥ भवतीति भव्यः साध्य इत्यर्थः। साध्यत्वे हेतुमाह॥ नेति॥ तर्हि तुच्छत्वं नेत्याह॥ पुरुषेति॥ पुरुषव्यापारः प्रयत्नस्तन्त्रं हेतुर्यस्य तत्त्वादित्यर्थः। कृतिसाध्यत्वात् कृतिजनकज्ञानकाले धर्मस्यासत्त्वं न तुच्छत्वादित्यर्थः। ब्रह्मणो धर्मादैलक्षण्यमाह॥ इह त्विति॥ उत्तरमीमांसायामित्यर्थः॥ भूतमसाध्यं। तत्र हेतुः॥ नित्येति॥ सदा सत्त्वादित्यर्थः। साध्यासाध्यत्वेन धर्मब्रह्मणोः स्वरूपभेदमुक्त्वा हेतुतोऽप्याह॥ नेति॥ धर्मवत् कृत्यधीनं नेत्यर्थः। मानतोऽपि भेदमाह॥ चोदनेति॥ अज्ञातज्ञापकं वाक्यमत्र चोदना। तस्याः प्रवृत्तिर्बोधकत्वं तदैलक्षण्याच्च जिज्ञास्यभेद इत्यर्थः। सङ्ग्रहवाक्यं विवृणोति॥ या हीति॥ लक्षणं प्रमाणं "स्वर्गकामो यजेत" इत्यादिवाक्यं हि स्वविषये धर्मे यागादिकरणस्वर्गादिफलकभावनारूपे फलहेतुयागादिगोचर-

ऽवबोधे नियुज्यते। यथा अक्षसन्निकर्षेणार्थावबोधे तद्वत्। तस्मात् किमपि वक्तव्यं यदनन्तरं ब्रह्मजिज्ञासोपदिश्यत इति। उच्यते। नित्यानित्यवस्तुविवेकः, दृष्टादृष्टार्थफलभोगविरागः, शमदमादिसाधनसम्पत्, मुमुक्षुत्वञ्च। तेषु हि सत्सु प्रागपि धर्मजिज्ञासाया ऊर्द्ध्वञ्च शक्यते ब्रह्म जिज्ञासितुं ज्ञातुञ्च, न विपर्य्यये। तस्मादथशब्देन यथोक्तसाधनसम्पत्त्यानन्तर्य्यमुपदिश्यते। अतः-शब्दो हेत्वर्थः। यस्माद्वेद एवाग्निहोत्रादीनां श्रेयःसाधनानाम-

---

नियोगे वा हितसाधने यागादौ वा पुरुषं प्रवर्त्तयदेवावबोधयति। "अयमात्मा ब्रह्म" इत्यादि वाक्यं तु त्वमर्थं केवलमप्रपञ्चं ब्रह्म बोधयत्येव न प्रवर्त्तयति, विषयाभावादित्यर्थः। नन्ववबोध एव विषयस्तत्राह॥ न पुरुष इति॥ ब्रह्मचोदनया पुरुषोऽवबोधे न प्रवर्त्तत इत्यत्र हेतुं पूर्ववाक्येनाह॥ अवबोधस्येति॥ स्वजन्यज्ञाने स्वयं प्रमाणं न प्रवर्त्तकमित्यत्र दृष्टान्तमाह॥ यथेति॥ मानादेव बोधस्य जातत्वात् जाते च विध्ययोगात् न वाक्यार्थज्ञाने पुरुषप्रवृत्तिः। तथा च प्रवर्त्तकमानमेयो धर्मः, उदासीनमानमेयं ब्रह्म, इति जिज्ञास्यभेदात् न तन्मीमांसयोः क्रमार्थोऽथशब्द इति भावः। एवमथशब्दस्यार्थान्तरासम्भवादानन्तर्य्यवाचित्वे सति तदवधित्वेन मुख्यलकारर्थं वक्तव्यमित्याह॥ तस्मादिति॥ उपदिश्यते सूचक्षतेऽत श्रेयः। तत्किमित्यत आह॥ उच्यत इति॥ विवेकादीनामागमिकत्वेन प्रामाणिकत्वं पुरस्तादेवोक्तं। लौकिकव्यापारान्मनस उपरमः शमः। बाह्यकरणानामुपरमो दमः। ज्ञानार्थं विहितनित्यादिकर्म्मसन्न्यास उपरतिः। शीतोष्णादिद्वन्द्वसहनं तितिक्षा। निद्रालस्यप्रमादत्यागेन मनःस्थितिः समाधानं। सर्व्वात्मिकता श्रद्धा। एतत्षट्कप्राप्तिः शमादिसम्पत्। अत्र विवेकादीनामुत्तरोत्तरहेतुत्वेनाधिकारिविशेषणत्वं मन्तव्यं। तेषामन्वयव्यतिरेकाभ्यां ब्रह्मजिज्ञासाहेतुत्वमाह॥ तेष्विति॥ अथ कथञ्चित् कुतूहलितया ब्रह्मविचारप्रवृत्तस्यापि फलपर्य्यन्तं तज्ज्ञानानुदयाद्यतिरेकसिद्धिः। अथशब्दव्याख्यानमुपसंहरति॥ तस्मादिति॥ ननूक्तविवेका-

नित्यफलतां दर्शयति, "तद्यथेह कर्म्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयत इत्यादि" तथा ब्रह्मविज्ञानादपि परं पुरुषार्थं दर्शयति, "ब्रह्मविदाप्नोति परमित्यादि", तस्माद्यथोक्तसाधनसम्पत्त्यनन्तरं ब्रह्मजिज्ञासा कर्त्तव्या। ब्रह्मणो जिज्ञासा ब्रह्मजिज्ञासा। ब्रह्म च वक्ष्यमाणलक्षणं "जन्माद्यस्य

दिकं न सम्भवति। "अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतम्" इत्यादिश्रुत्या कर्म्मफलस्य नित्यत्वेन ततो वैराग्यासिद्धेः। जीवस्य ब्रह्मस्वरूपमोक्षस्वायुक्तः, भेदात्, तस्य लोष्टादिवत् पुरुषार्थत्वायोगाच्च। ततो न मुमुक्षासम्भव इत्यत्रोपपरिहारार्थोऽतःशब्दः, तं व्याचष्टे॥ अतःशब्द इति॥ अथशब्देनानन्तर्य्यवाचिना तदवधित्वेनार्थादविवेकादिचतुष्टयस्य ब्रह्मजिज्ञासाहेतुत्वं यदुक्तं तस्यार्थिकहेतुत्वस्याक्षेपनिरासायानुवादकोऽतःशब्द इत्यर्थः। उक्तं विवृणोति॥ यस्मादिति॥ तस्मादित्युत्तरेण सम्बन्धः। "यदल्पं तन्मर्त्यं यत् क्रतुकं तदनित्यं" इति न्यायवतो "तद्यथेह" इत्यादिश्रुतिः कर्म्मफलाक्षयत्वश्रुतेर्बाधिका। तस्मात् "अतोऽन्यदार्त्तम्" इति श्रुत्या अनात्ममात्रस्यानित्यत्वविवेकादैराग्यलाभ इति भावः। मुमुक्षां सम्भावयति॥ तथेति॥ यथा वेदः कर्म्मफलानित्यत्वं दर्शयति तथा ब्रह्मज्ञानात् प्रशान्तशोकानलमपारं स्वयंज्योतिरानन्दं दर्शयतीत्यर्थः। जीवत्वादेरध्यासोक्त्या ब्रह्मत्वसम्भव उक्त एवेति भावः। एवमथातःशब्दाभ्यां मुख्यकारणवतोऽधिकारिणः समर्थनाच्छास्त्रमारब्धव्यमित्याह॥ तस्मादिति॥ सूत्रवाक्यपूरणार्थमध्याहृतकर्त्तव्यपदान्वयार्थं ब्रह्मजिज्ञासापदेन विचारं लक्षयितुं तस्य स्वाभिमतसमासकथनेनावयवार्थं दर्शयति॥ ब्रह्मण इति॥ ननु "धर्म्माय जिज्ञासा" इतिवत् "ब्रह्मजिज्ञासा" इति चतुर्थीसमासः किं न स्यादिति चेत्। उच्यते। जिज्ञासापदस्य हि मुख्यार्थ इच्छा, तस्याः प्रथमं कर्म्मकारकमपेक्षितं पश्चात् फलं, ततश्चादौ कर्म्मज्ञानार्थं षष्ठीसमासो युक्तः। कर्म्मण्युक्ते सत्यर्थात् फलमुक्तं भवति, इच्छायाः कर्म्मण एव फलत्वात्। यथा "स्वर्गस्येच्छा" इत्युक्ते स्वर्गस्य फलत्वं लभ्यते तद्वत्। अत एव "धर्म्मजिज्ञासा" इत्यत्रापि सा हि तस्य ज्ञातुमिच्छेति

यत इति"। अत एव न ब्रह्मशब्दस्य जात्याद्यर्थान्तरमाशङ्कितव्यं। ब्रह्मण इति कर्मणि षष्ठी न शेषे। जिज्ञास्यापेक्षत्वाज्जिज्ञासायाः, जिज्ञास्यान्तरानिर्देशाच्च। ननु शेषषष्ठीपरिग्रहेऽपि ब्रह्मणो जिज्ञासाकर्मत्वं न विरुद्ध्यते, सम्बन्धसामान्यस्य विशेषनिष्ठत्वात्, एवमपि प्रत्यक्षं ब्रह्मणः कर्मत्वमुत्सृज्य सामान्यद्वारेण परोक्षं कर्मत्वं कल्पयतो व्यर्थः प्रयासः स्यात्, न व्यर्थो ब्रह्माश्रिताशेष-

---

च्छां गृहीत्वा षष्ठीसमासो दर्शितः। विचारलक्षणायान्तु विचारस्य ज्ञानात्मकतया प्रथमं वृत्तिविषयत्वेन प्रतिबिम्बितत्वेन च फलाकाङ्क्षत्वात् धर्माय जिज्ञासेति चतुर्थीसमास उक्तः, तथा वृत्तिकारैः "ब्रह्मणो जिज्ञासा" इत्युक्तत्वेदन्तु ज्ञानत्वेन ब्रह्मणः फलत्वादिति। अधुना ब्रह्मपदार्थमाह॥ ब्रह्म चेति॥ ननु "ब्रह्म क्षत्रमिदं ब्रह्म आयाति ब्रह्म स्वयम्भुर्ब्रह्म प्रजापतिर्" इति श्रुतिः लोके च ब्राह्मणत्वजातौ जीवे वेदे कमलासने च ब्रह्मशब्दः प्रयुज्यत इत्याशङ्क्याह॥ अत एवेति॥ जगत्कारणत्वलक्षणप्रतिपादकसूत्रासाङ्गत्यप्रसङ्गादेवेत्यर्थः। वृत्त्यन्तरे शेषे षष्ठीत्युक्तं दूषयति॥ ब्रह्मण इतीति॥ सम्बन्धसामान्यं शेषः। जिज्ञासेत्यत्र सन्प्रत्ययवाच्याया इच्छाया ज्ञानं कर्म। तस्य ज्ञानस्य ब्रह्म कर्म। तत्र सकर्मकक्रियायाः कर्म ज्ञानं विना ज्ञातुमशक्यत्वात्। इच्छाया विषयज्ञानजन्यत्वाच्च प्रथमापेक्षितं कर्मैव षष्ठ्या वाच्यं न शेष इत्यर्थः। ननु प्रमाणादिकमन्यदेव तत् कर्मास्तु ब्रह्म तु शेषितया सम्बध्यतां तत्राह॥ जिज्ञास्यान्तरेति॥ श्रुतं कर्म त्यक्त्वान्यदश्रुतं कल्पयन् "पिण्डमुत्सृज्य करं लेढि" इति न्यायमनुसरतीति भावः। गूढाभिसन्धिः शङ्कते॥ नन्विति॥ षष्ठीशेषे [पा०२।३।५०] इति विधानात् षष्ठ्या सम्बन्धमात्रं प्रतीतमपि विशेषाकाङ्क्षायां सकर्मकक्रियासन्निधानात् कर्मत्वे पर्य्यवस्यतीत्यर्थः। अभिसन्धिमजानन्निवोत्तरमाह॥ एवमपीति॥ कर्मलाभेऽपि प्रत्यक्षं कर्तृकर्मणोः कृतीति [पा०२।३।६५] सूत्रेण जिज्ञासापदस्याप्त्यर्थान्तत्वेन क्तदन्तस्य योगे विहितं प्रथमापेक्षितं च कर्मत्वं त्यक्त्वा परोक्षमशब्दं कल्पयत इत्यर्थः। शेषवादी स्वाभिस-

विचारप्रतिज्ञानार्थत्वादिति चेत्। न। प्रधानपरिग्रहे तदपेक्षितानामप्यर्थाच्चिप्तत्वात्। ब्रह्म हि ज्ञानेनाप्नुमिष्टतमत्वात् प्रधानं। तस्मिन् प्रधाने जिज्ञासाकर्म्मणि परिगृहीते यैर्जिज्ञासितैर्विना ब्रह्म जिज्ञासितं न भवति तान्यर्थाच्चिप्तान्येवेति न पृथक् सूचयितव्यानि। यथा "राजामात्यो गच्छति" इत्युक्ते सपरिवारस्य राज्ञो गमनमुक्तं भवति तद्वत्। श्रुत्यनुगमाच्च। "यतो वा इमानि भूतानि जायन्त" इत्याद्याः श्रुतयः, "तद्विजिज्ञासस्व तद्ब्रह्म" इति प्रत्यक्षमेव ब्रह्मणो जिज्ञासाकर्म्मत्वं दर्शयन्ति। तच्च कर्म्मणि षष्ठीपरिग्रहे सूत्रेणानुगतं भवति। तस्माद्ब्रह्मण इति कर्म्मणि षष्ठी। ज्ञातुमिच्छा जिज्ञासा। अवगतिपर्य्यन्तं ज्ञानं

न्धिमुद्घाटयति॥ न व्यर्थ इति॥ शेषषष्ठ्यां ब्रह्मसम्बन्धिनी जिज्ञासा प्रतिज्ञाता भवति। तत्र यानि ब्रह्माश्रितानि लक्षणप्रमाणयुक्तिज्ञानसाधनफलानि तेषामपि विचारः प्रतिज्ञातो भवति। तज्जिज्ञासाया अपि ब्रह्मज्ञानार्थत्वेन ब्रह्मसम्बन्धित्वात्। कर्म्मणि षष्ठ्यान्तु ब्रह्मकर्म्मक एव विचारः प्रतिज्ञातो भवतीत्यभिसन्धिना शेषषष्ठीत्युच्यते। अतो मत्वर्थासो न व्यर्थः। ब्रह्मतत्सम्बन्धिनां सर्व्वेषां विचारप्रतिज्ञानमर्थः फलं यस्य तत्त्वादित्यर्थः। तत्प्रयासस्येदं फलं न युक्तं। सूत्रेण मुखतः प्रधानस्य ब्रह्मणो विचारे प्रतिज्ञाते सति तदुपकरणानां विचारस्यार्थिकप्रतिज्ञाया उदितत्वादित्याह सिद्धान्ती॥ न प्रधानेति॥ सङ्गृहीतमर्थं संदृष्टान्तं व्याकरोति॥ ब्रह्म हीत्यादिना॥ "तद्विजिज्ञासस्व" इति मूलश्रुत्यनुसाराच्च कर्म्मणि षष्ठीत्याह॥ श्रुत्यनुगमाच्चेति॥ श्रुतिसूचयोरेकार्थत्वलाभाच्चेत्यर्थः। जिज्ञासापदस्यावयवार्थमाह॥ ज्ञातुमिति॥ नन्वनवगते वस्तुनीच्छाया अदर्शनात्तस्या मूलं विषयज्ञानं वक्तव्यं, ब्रह्मज्ञानन्तु जिज्ञासायाः फलं, तदेव मूलं कथमित्याशङ्क्याह॥ अवगतीति॥ आवरणनिवृत्तिरूपाभिव्यक्तिमच्चैतन्यमवगतिः पर्य्यन्तोऽवधिर्यस्याखण्डसाक्षात्कारवृत्तिज्ञानस्य तदेव जि-

सन्वाच्याया इच्छायाः कर्म्म, फलविषयत्वादिच्छायाः। ज्ञानेन हि प्रमाणेनावगन्तुमिष्टं ब्रह्म। ब्रह्मावगतिर्हि पुरुषार्थः। निःश्रेषसंसारबीजाविद्याद्यनर्थनिवर्हणात्। तस्माद्ब्रह्म जिज्ञासितव्यं॥ तत् पुनर्ब्रह्म प्रसिद्धमप्रसिद्धं वा स्यात्? यदि प्रसिद्धं, न जिज्ञासितव्यं, अथाप्रसिद्धं, नैव शक्यं जिज्ञासितुमिति।

ज्ञासायाः कर्म्म, तदेव फलं। मूलत्वापातज्ञानमित्यधुना वक्ष्यत इति फलमूलज्ञानयोर्भेदान्न जिज्ञासानुपपत्तिरित्यर्थः। ननु गमनस्य ग्रामः कर्म्म, तत्प्राप्तिः फलमिति भेदात कर्म्मैव फलमित्ययुक्तं तत्राह॥ फलेति॥ क्रियान्तरे तयोर्भेदेऽपि इच्छायाः फलविषयत्वात् कर्म्मैव फलमित्यर्थः। ननु ज्ञानावगत्योरैक्याद्भेदोक्तिरयुक्तेत्यत आह॥ ज्ञानेनेति॥ ज्ञानं वृत्तिः अवगतिस्तत्फलं इति भेद इति भावः। अवगन्तुमभिव्यञ्जयितुं। अवगतेः फलत्वं स्फुटयति॥ ब्रह्मेति॥ हिशब्दोक्तं हेतुमाह॥ निःश्रेषेति॥ बीजमविद्या आदिर्यस्यानर्थस्य तन्नाशकत्वादित्यर्थः। अवयवार्थमुक्त्वा सूचवाक्यार्थमाह॥ तस्मादिति॥ अत्र सन्प्रत्ययस्य विचारलक्षकत्वं तव्यप्रत्ययेन सूचयति। अथातःशब्दाभ्यामधिकारिणः साधितत्वात् तेन ब्रह्मज्ञानाय विचारः कर्त्तव्य इत्यर्थः॥ इति तृतीयवर्ष्मकं॥

प्रथमवर्ष्मके बन्धस्याध्यासत्वोक्त्या विषयादिसिद्धावपि ब्रह्मप्रसिद्ध्यप्रसिद्ध्योर्विषयादिसम्भवासम्भवाभ्यां शास्त्रारम्भसन्देहे पूर्व्वपक्षमाह॥ तत् पुनरिति॥ पुनःशब्दो वर्ष्मकान्तरद्योतनार्थः॥ यदि वेदान्तविचारात् प्रागेव ब्रह्मज्ञानं तर्ह्यज्ञातत्वरूपविषयत्वं नास्ति। अज्ञानाभावेन तन्निवृत्तिरूपफलमपि नास्तीति न विचारयितव्यं। अथाज्ञातं केनापि तर्हि तदुद्देश्येन विचारः कर्त्तुं न शक्यते, अज्ञातस्योद्देश्यायोगात्। तथा च बुद्धावनारूढस्य विचारात्मकशास्त्रेण वेदान्तैश्च प्रतिपादनायोगात्। तत्प्रतिपाद्यत्वरूपः सम्बन्धो नास्तीति ज्ञानानुत्पत्तेः फलमपि नास्तीत्यनारभ्यं शास्त्रमित्यर्थः।

आपातप्रसिद्ध्या विषयादिलाभादारम्भणीयमिति सिद्धान्तयति॥

उच्यते। अस्ति तावन्नित्यशुद्धबुद्धमुक्तस्वभावं सर्व्वज्ञं सर्व्वशक्तिसमन्वितं ब्रह्म। ब्रह्मशब्दस्य हि व्युत्पाद्यमानस्य नित्यशुद्धत्वादयोऽर्थाः प्रतीयन्ते, बृहतेर्धातोरर्थानुगमात्, सर्व्वस्यात्मत्वाच्च ब्रह्मास्तित्वप्रसिद्धिः। सर्व्वो हि आत्मास्तित्वं प्रत्येति, न नाहमस्मीति। यदि हि नात्मास्तित्वप्रसिद्धिः स्यात् सर्व्वो

उच्यत इत्यादिना ॥ प्रसिद्धं तावदित्यर्थः। अस्तित्वस्याप्रकृतत्वेनास्तिपदस्य प्रसिद्धिपरत्वात्। ननु केन मानेन ब्रह्मणः प्रसिद्धिः। न च "सत्यं ज्ञानमनन्तं ब्रह्म" इति श्रुत्या सेति वाच्यं। ब्रह्मपदस्य लोके सङ्केतिग्रहाभावेन तद्घटितवाक्यस्यावबोधकत्वादित्याशङ्क्य ब्रह्मपदव्युत्पत्त्या प्रथमं तस्य निर्गुणस्य सगुणस्य च प्रसिद्धिरित्याह ॥ ब्रह्मशब्दस्य हीति ॥ अस्यार्थः। श्रुतौ सूत्रे ब्रह्मशब्दस्य प्रयोगान्यथानुपपत्त्या कश्चिदर्थोऽस्तीति ज्ञायते, प्रमाणवाक्ये निरर्थकशब्दप्रयोगादर्शनात्। स चार्थो "महत्त्वरूप" इति व्याकरणान्निश्चीयते, "बृहि वृद्धाविति" स्मरणात्। सा च वृद्धिर्निरवधिकमहत्त्वमिति सङ्कोचकाभावात् श्रुतावनन्तपदेन सह प्रयोगाच्च ज्ञायते। निरवधिकमहत्त्वञ्चान्तवत्त्वादिदोषवत्त्वे सर्व्वज्ञत्वादिगुणहीनत्वे च न सम्भवति। लोके गुणहीनदोषवतोरल्पत्वप्रसिद्धेः। अतो बृंहणाद् ब्रह्मेति व्युत्पत्त्या देशकालवस्तुतः परिच्छेदाभावरूपं नित्यत्वं प्रतीयते। अविद्यादिदोषशून्यत्वं शुद्धत्वं। जाड्यराहित्यं बुद्धत्वं। बन्धकालेऽपि सतो बन्धाभावो मुक्तत्वञ्च प्रतीयते। एवं सकलदोषशून्यं निर्गुणं प्रसिद्धं। तथा सर्व्वज्ञत्वादिगुणकञ्च तत्पदवाच्यं प्रसिद्धं। क्षेत्रस्य कार्य्यस्य चापरिग्रहेऽल्पत्वप्रसङ्गेन सर्व्वज्ञत्वस्य सर्व्वकार्य्यग्रहणसमत्वस्य च लाभादिति। एवं "तत्पदाप्रसिद्धेरप्रमाणत्वेनापातत्वादज्ञानानिवर्त्तकत्वाज्जिज्ञासोपपत्तिः" इति उक्ता त्वंपदार्थात्मनापि ब्रह्मणः प्रसिद्धा तदुपपत्तिरित्याह ॥ सर्व्वस्येति ॥ सर्व्वस्य लोकस्य योऽयमात्मा तदभेदाद् ब्रह्मणः प्रसिद्धिरित्यर्थः। नन्वात्मनः प्रसिद्धिः केत्यत आह ॥ सर्व्वो हीति ॥ "अहमस्मीति" न "प्रत्येति" इति। न। किन्तु प्रत्येत्येव सैव सच्चिदात्मनः प्रसिद्धिरित्यर्थः।

लोको नाहमस्मीति प्रतीयात्। आत्मा च ब्रह्म। यदि लोके ब्रह्मात्मत्वेन प्रसिद्धमस्ति ततो ज्ञातमेवेत्यजिज्ञास्यत्वं पुनरापन्नं। न। तद्विशेषं प्रति विप्रतिपत्तेः। "देहमात्रं चैतन्यविशिष्टमात्मा" इति प्राकृता जना लोकायतिकाश्च प्रतिपन्नाः। "इन्द्रियाण्येव चेतनान्यात्मा" इत्यपरे। "मन" इत्यन्ये। "विज्ञानमात्रं क्षणिकं" इत्येके। "शून्यं" इत्यपरे। "अस्ति देहादिव्यतिरिक्तः संसारी कर्त्ता भोक्ता" इत्यपरे। "भोक्तैव केवलं न कर्त्ता" इत्येके। "अस्ति तद्व्यतिरिक्त ईश्वरः सर्व्वज्ञः सर्व्वशक्तिः" इति केचित्।

आत्मनः कुतः सत्तेति शून्यमतमाशङ्क्याह॥ यदि हीति॥ आत्मनः शून्यस्य प्रतीतौ "अहं नास्मि" इति लोको जानीयात्। लोकस्तु "अहमस्मि" इति जानाति, तस्मादात्मनोऽस्तित्वप्रसिद्धिरित्यर्थः। आत्मप्रसिद्धावपि ब्रह्मणः किमायातं तत्राह॥ आत्मा चेति॥ "अयमात्मा ब्रह्म" इत्यादि श्रुतेरिति भावः। प्रसिद्धिपक्षोक्तं दोषं पूर्व्वपक्षेण स्मारयति॥ यदीति॥ अज्ञातत्वाभावे न विषयाद्यभावादविचार्य्यत्वं प्राप्तमित्यर्थः। यथा "इदं रजतं" इति वस्तुतः शुक्तिप्रसिद्धिस्तद्वत् "अहमस्मि" इति सा त्वचैतन्यरूपात्वसामान्येन वस्तुतो ब्रह्मणः प्रसिद्धिः, नेयं पूर्णानन्दब्रह्मत्वरूपविशेषगोचरा, वादिनां विवादाभावप्रसङ्गात्। न हि शुक्तित्वविशेषदर्शने सति "रजतं रङ्गमन्यद्वा" इति विप्रतिपत्तिरस्ति। अतो विप्रतिपत्त्यन्यथानुपपत्त्या सामान्यतः प्रसिद्धावपि विशेषस्याज्ञातत्वाद्विषयादिसिद्धिरिति सिद्धान्तयति॥ नेत्यादिना॥ सामान्यविशेषभावः स्वात्मनि सच्चित्पूर्णादिपदवाच्यभेदात् कल्पित इति मन्तव्यं। तच्च स्थूलसूक्ष्मक्रमेण विप्रतिपत्तीरूपन्यस्यति। देहमात्रमित्यादिना॥ प्राक्शास्त्रज्ञानशून्याः प्राकृताः। वेदवाह्यमतान्युक्त्वा तार्किकादिमतमाह॥ अस्तीति॥ साङ्ख्यमतमाह। भोक्तेति॥ किमात्मा देहादिरूपः उत तद्भिन्न इति विप्रतिपत्तिकोटित्वेन देहेन्द्रियमनोबुद्धिशून्यान्युक्त्वा त-

"आत्मा स भोक्तुः" इत्यपरे। एवं बहवो विप्रतिपन्ना युक्तिवाक्यतदाभाससमाश्रयाः सन्तः। तत्राविचार्य यत् किञ्चित् प्रतिपद्यमानो निःश्रेयसात् प्रतिहन्येतानर्थञ्चेयात्। तस्माद्

द्विन्नोऽपि कर्तृत्वादिमान्न वेति विप्रतिपत्तिकोटित्वेन तार्किकसाङ्ख्यपक्षावुपन्यस्याकर्त्तापीश्वराद्विन्नो न वेति विवादकोटित्वेन योगिमतमाह॥ अस्ति तद्व्यतिरिक्त ईश्वर इति॥ निरतिशयसत्वं गृहीत्वा ईश्वरः सर्व्वज्ञत्वादिसम्पन्न इति योगिनो वदन्ति।

भेदकोटिमुक्त्वा सिद्धान्तकोटिमाह॥ आत्मा स भोक्तुरिति॥ भोक्तुर्जीवस्याकर्त्तुः साक्षिणः स ईश्वर आत्मा स्वरूपमिति वेदान्तिनो वदन्तीत्यर्थः॥ विप्रतिपत्तीरुपसंहरति॥ एवं बहव इति॥ विप्रतिपत्तीनां प्रपञ्चो निरासश्च विवरणोपन्यासेन दर्शितः सुखबोधायेतीहोपरम्यते; तत्र युक्तिवाक्याश्रयाः सिद्धान्तिनो "जीवो ब्रह्मैव आत्मत्वाद् ब्रह्मवत्" इत्यादि युक्तेः, "तत्त्वमसि" इत्यादि श्रुतेश्चाबाधितायाः सत्वात्। अन्ये तु देहादिरात्माहंप्रत्ययगोचरत्वाद्व्यतिरेकेण घटादिवदित्यादियुक्त्याभासं, "स वा एष पुरुषोऽन्नरसमयः" इन्द्रियसंवादे "चक्षुरादयः ते ह वाचमूचुः, मन उवाच, योऽयं विज्ञानमयः, असदेवेदमग्र आसीत्, कर्त्ता बोद्धा, अनश्नन्यः आत्मानमन्तरोऽयमग्र" इति वाक्याभासञ्चाश्रिता इति विभागः। "देहादिरनात्मा भौतिकत्वाद्दृश्यत्वात्" इत्यादिन्यायैः "आनन्दमयोऽभ्यासात्" इत्यादिसूत्रैश्चाभासत्वं वक्ष्यते। ननु सन्तु विप्रतिपत्तयस्तथापि यस्य यन्मते श्रद्धा तदाश्रयणात्तस्य स्वार्थः सेत्स्यति किं ब्रह्मविचारारम्भेणेत्यत आह॥ तत्राविचार्येति॥ ब्रह्मात्मैक्यज्ञानादेव मुक्तिरिति वस्तुगतिः। मतान्तराश्रयणे तदभावान्मोक्षासिद्धिः। किञ्चात्मानमन्यथा ज्ञात्वा तत्प्राप्तेन संसारान्धकूपे पतेत्॥

"अन्धं तमः प्रविशन्ति ये के चात्महनो जनाः"

इति श्रुतेः।

"योऽन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते।
किं तेन न कृतं पापं चोरेणात्मापहारिणा"॥

इति वचनाच्चेत्यर्थः। अतः सर्व्वेषां मुमुक्षूणां निःश्रेयसफलाय वदा-

ब्रह्मजिज्ञासोपन्यासमुखेन वेदान्तवाक्यमीमांसा तद्विरोधित-र्कोपकरणा निःश्रेयसप्रयोजना प्रस्तूयते ॥ १ ॥

"ब्रह्म जिज्ञासितव्यम्" इत्युक्तं। किंलक्षणकं पुनस्तद्ब्रह्म? इत्यत आह भगवान् सूत्रकारः।

जन्माद्यस्य यत इति ॥ २ ॥

जन्मोत्पत्तिरादिरस्येति तद्गुणसंविज्ञानो बहुव्रीहिः। जन्म-

न्तविचारः कर्त्तव्य इति सूत्रार्थमुपसंहरति ॥ तस्मादिति ॥ बन्धस्याध्यस्तत्वेन विषयादिसङ्गवादगतार्थत्वादधिकारिलाभादाप्तप्रसिद्ध्या विषयादिसम्भवाच्च वेदान्तविषया मीमांसापूजिता विचारणा वेदान्ताविरोधिनो ये तर्कास्तत्तदन्तरस्यास्तान्युपकरणानि यस्याः सा निःश्रेयसायारभ्यत इत्यर्थः। ननु सूत्रे विचारवाचिपदाभावात्तदारम्भः कथं सूत्रार्थ इत्यत आह॥ ब्रह्मेति॥ ब्रह्मज्ञानेच्छोक्तिद्वारा विचारं लक्षयित्वा तत्कर्त्तव्यतां ब्रवीतीति भावः। एवं प्रथमसूत्रस्य चत्वारोऽर्था व्याख्यानचतुष्टयेन दर्शिताः। सूत्रस्य चानेकार्थत्वं भूषणं। नन्विदं सूत्रं शास्त्राद्बहिः स्थित्वा शास्त्रमारभयति अन्तर्भूत्वा वा? आद्ये तस्य हेयता, शास्त्रासम्बन्धात्। द्वितीये तस्यारम्भकं वाच्यं। न च स्वयमेवारम्भकं स्वस्मात् स्वोत्पत्तेरित्यात्माश्रयात्, न चारम्भकान्तरं मृग्याम इति। उच्यते। अवयविधिना आरब्धमिदं शास्त्रं शास्त्रान्तर्गतमेव शास्त्रारम्भं प्रतिपादयति। यथाऽध्ययनविधिर्वेदान्तर्गत एव स्वतन्त्रवेदस्याध्ययने प्रयुङ्क्ते तद्वदित्यनवद्यं॥ १ ॥ प्रथमसूत्रं समाप्तं ॥

प्रथमसूत्रेण शास्त्रारम्भमुपपाद्य शास्त्रमारभमाणः पूर्वोत्तराधिकरणयोः सङ्गतिं वक्तुं वृत्तं कीर्त्तयति॥ ब्रह्मेति ॥ मुमुक्षुणा ब्रह्मज्ञानाय वेदान्तविचारः कर्त्तव्य इत्युक्तं। ब्रह्मणो विचार्य्यत्वोक्त्या अर्थात् प्रमाणादिविचाराणां प्रतिज्ञातत्वेऽपि ब्रह्मप्रमाणं ब्रह्मयुक्तिरित्यादिविशिष्टविचाराणां विशेषेण ब्रह्मज्ञानं विना कर्त्तुमशक्यत्वात्तत्स्वरूपज्ञानायादौ लक्षणं वक्तव्यं तन्न सम्भवतीत्याक्षिप्य सूत्रकृतं पूजयन्नेव लक्षणसूत्रमवतारयति ॥ किंलक्षणकमिति ॥ किमाक्षेपे, नास्त्येव लक्षणमित्यर्थः।

स्थितिभङ्गं समासार्थः। जन्मनस्त्रादिलं श्रुतिनिर्देशापेक्षं वस्तुवृत्तापेक्षञ्च। श्रुतिनिर्देशस्त्रावत्, "यतो वा इमानि भूतानि जायन्त" इति। अस्मिन् वाक्ये जन्मस्थितिप्रलयानां क्रमदर्शनात्। वस्तुवृत्तमपि, जन्मना लब्धसत्ताकस्य*धर्म्मिणः स्थितिप्रलयसम्भवात्। "अस्य" इति प्रत्यक्षादिसन्निधापितस्य धर्म्मिण

क्षेपेणास्योत्थानादाक्षेपसङ्गतिः। लक्षणद्योतिवेदान्तानां स्पष्टब्रह्मलिङ्गानां लक्ष्ये ब्रह्मणि समन्वयोक्तेः श्रुतिशास्त्राध्यायपादसङ्गतयः। तथा हि। "यतो वा इमानि भूतानि जायन्ते" इत्यादिवाक्यं विषयः॥ तत्किं ब्रह्मणो लक्षणं वक्ति न वेति सन्देहः। तत्र पूर्व्वपक्षे ब्रह्मस्वरूपासिद्धा मुक्त्यसिद्धिः फलं सिद्धान्ते तत्सिद्धिरिति भेदः। यद्यप्याक्षेपसङ्गतौ पूर्व्वाधिकरणफलमेव फलमिति कृत्वा पृथक् न वक्तव्यं। तदुक्तं,

"आक्षेपे चापवादे च प्राप्यां लक्षणकर्म्मणि।
प्रयोजनं न वक्तव्यं यच्च कृत्वा प्रवर्त्तत इति"॥

तथापि स्पष्टार्थमुक्तमिति मन्तव्यं, यत्र पूर्व्वाधिकरणसिद्धान्तेन पूर्व्वपक्षः तत्रापवादिकी सङ्गतिः। प्राप्तिस्तदर्था चिन्ता। तत्र न वक्तीति प्राप्तं। जन्मादेर्जगद्धर्म्मत्वेन ब्रह्मलक्षणत्वायोगात्। न च जगदुपादानत्वे सति कर्त्तृत्वं लक्षणमिति वाच्यं। कर्त्तुरुपादानत्वे दृष्टान्ताभावेनानुमानाप्रवृत्तेः। न च श्रौतस्य ब्रह्मणः श्रुत्यैव लक्षणसिद्धेः किमनुमानेनेति वाच्यं। अनुमानस्य श्रुत्यनुग्राहकत्वेन तदभावे तद्विरोधे वा श्रुत्यर्थासिद्धेः। न च जगत्कर्त्तृत्वमुपादानत्वं वा प्रत्येकं लक्षणमस्तीति वाच्यं। कर्त्तृमात्रस्योपादानाद्भिन्नस्य ब्रह्मत्वायोगात्। वस्तुतः परिच्छेदादिति प्राप्ते पुरुषाभ्यूहमात्रस्यानुमानस्याप्रतिष्ठितस्यातीन्द्रियार्थे स्वातन्त्र्यायोगात्। अपौरुषेयतया निर्दोषश्रुत्युक्तोभयकारणत्वस्य सुखादिदृष्टान्तेन सम्भावयितुं शक्यत्वात्। तदेव लक्षणमिति सिद्धान्तयति॥ जन्माद्यस्य यत इतीति॥ अत्र यद्यपि जगज्जन्मस्थितिलयकारणत्वं लक्षणं प्रतिपाद्यते तथाप्यत्रे"प्रतिज्ञासिद्ध"इत्यधिकरणे तत्पा-

---

* लब्धात्मसत्ताकस्येति मू० मु० यु० पाठः॥

इदमा निर्देशः। षष्ठी जन्मादिधर्मसम्बन्धार्था। "यत इति" कारणनिर्देशः। अस्य जगतो नामरूपाभ्यां व्याकृतस्यानेककर्तृभोक्तृसंयुक्तस्य प्रतिनियतदेशकालनिमित्तक्रियाफलाश्रयस्य मनसाप्यचिन्त्यरचनारूपस्य जन्मस्थितिभङ्गं यतः सर्व्वज्ञात् सर्व्वशक्तेः कारणाद्भवति तद्ब्रह्मेति वाक्यशेषः। अन्येषामपि भाव-

---

रणत्वं न कर्तृत्वमात्रं किन्तु कर्तृत्वोपादानत्वोभयरूपत्वमिति वक्ष्यमाणं सिद्धवत्कृत्योभयकारणत्वं लक्षणमित्युच्यत इति न पौनरुक्त्यं। ननु जिज्ञास्यनिर्गुणब्रह्मणः कारणत्वं कथं लक्षणमिति चेत्। उच्यते। यथा रजतं शुक्तेर्लक्षणं यद्रजतं सा शुक्तिरिति, तथा यज्जगत्कारणं तद् ब्रह्मेति कल्पितं कारणत्वं तटस्थं सदेव ब्रह्मणो लक्षणमित्यनवद्यं। सूत्रं व्याचष्टे ॥ जन्मेत्यादिना ॥ बहुव्रीहौ पदार्थाः सर्व्वे वाक्यार्थस्यान्यपदार्थस्य विशेषणानि। यथा चित्रगोर्देवदत्तस्य चित्रा गावः तद्वदत्रापि जन्मादीति नपुंसकैकवचनद्योतितस्य समाहारस्य जन्मस्थितिभङ्गस्य जन्मविशेषणं, तथा च जन्मनः समासार्थैकदेशस्य गुणत्वेन संविज्ञानं यस्मिन् बहुव्रीहौ स तद्गुणसंविज्ञान इत्यर्थः। तत्र यज्जन्मकारणं तद् ब्रह्मेति ब्रह्मत्वविधानमयुक्तं, स्थितिलयकारणाद्भिन्नत्वे न ज्ञाते ब्रह्मत्वस्य ज्ञातुमशक्यत्वात्। अतो जन्मस्थितिभङ्गैर्निरूपितानि चोभि कारणत्वानि मिलितान्येव लक्षणमिति मत्वा सूत्रे समाहारो द्योतित इति ध्येयं। नन्वादित्वं जन्मनः कथं ज्ञातव्यं संसारस्यानादित्वादित्यत आह ॥ जन्मनश्चेति ॥ मूलश्रुत्या वस्तुगत्या चादित्वं ज्ञात्वा तदपेक्ष्य सूत्रकर्तता जन्मन आदित्वमुक्तमित्यर्थः। इदमः प्रत्यक्षार्थमात्रवाचित्वमाशङ्क्योपस्थितसर्व्वकार्य्यवाचित्वमाह ॥ अस्येतीति ॥ वियदादिजगतो नित्यत्वान्न जन्मादिसम्बन्ध इत्यत आह ॥ षष्ठीति ॥ वियदादेर्महाभूतानां जन्मादिसम्बन्धो वक्ष्यत इति भावः। ननु जगतो जन्मादेर्वा ब्रह्मसम्बन्धाभावान्न लक्षणत्वमित्याशङ्क्य तत्कारणत्वं लक्षणमिति यच्छब्दार्थमाह ॥ यत इतीति ॥ यच्छब्देन सत्यं ज्ञानमनन्तं आनन्दरूपं वस्तूच्यते। "आनन्दाद्ध्येवेति" निर्णीतत्वात्। तथा च स्वरूपलक्षणसिद्धिरिति मन्तव्यं। पदार्थमुक्त्वा पूर्व्वसूत्रस्थब्रह्मपदानुषङ्गेण तच्छब्दा-

विकाराणां चिच्चेवान्तर्भाव इति जन्मस्थितिनाशानामिह ग्रहणं। यास्कपरिपठितानान्तु "जायते अस्ति" इत्यादीनां ग्रहणे तेषां जगतः स्थितिकाले सम्भाव्यमानत्वात् मूलकारणादुत्पत्तिस्थितिनाशा जगतो न गृहीताः स्युरित्याशङ्क्येत तन्मा शङ्किष्टेति योत्पत्तिर्ब्रह्मणस्तत्रैव स्थितिः प्रलयश्च ते गृह्यन्ते। न यथोक्तविशेषणस्य जगतो यथोक्तविशेषणमीश्वरं मुक्त्वा ऽन्यतः प्रधाना-

---

ध्याहारेण च सूत्रवाक्यार्थमाह ॥ अस्येत्यादिना ॥ कारणस्य सर्व्वज्ञत्वादिसम्भावनार्थानि जगतो विशेषणानि। यथा कुम्भकारः प्रथमं कुम्भशब्दाभेदेन विकल्पितं पृथुबुध्नोदराकारस्वरूपं बुद्धावालिख्य तदात्मना कुम्भं व्याकरोति बहिः प्रकटयति, तथा परमकारणमपि स्वेप्सितनामरूपात्मना व्याकरोति इत्यनुमीयत इति मत्वाह ॥ नामरूपाभ्यामिति ॥ इत्यम्भावे तृतीया। आद्यकार्य्यं चेतनजन्यं कार्य्यत्वात् कुम्भवदिति प्रधानशून्ययोर्निरासः। हिरण्यगर्भादिजीवजन्यत्वं निरस्यति ॥ अनेकेति ॥ आद्यवैश्वानरेच्छादौ पितापुत्रयोः कर्तृभोक्तृभेदात् पृथगुक्तिः। "यो ब्रह्माणं विदधाति पूर्व्वं सर्व्वं एत आत्मानो व्युच्चरन्ति" इति श्रुत्या स्थूलसूक्ष्मदेहोपाधिद्वारा जीवानां कार्य्यत्वेन जगन्मध्यपातित्वान्न जगत्कारणत्वमित्यर्थः। कारणस्य सर्व्वज्ञत्वं सम्भावयति ॥ प्रतिनियतेति ॥ प्रतिनियतानि व्यवस्थितानि देशकालनिमित्तानि येषां क्रियाफलानां तदाश्रयस्येत्यर्थः। स्वर्गस्य क्रियाफलस्य मेरुरेकं देशः। देहपातादूर्द्धं काल उत्तरायणमरणादिनिमित्तं प्रतिनियतं। एवं राजसेवाफले ग्रामादेर्देशादिव्यवस्था ज्ञेया। तथा च यथा सेवाफलं देशाद्यभिज्ञदाढ्यं तथा कर्म्मफलं फलत्वादिति सर्व्वज्ञत्वसिद्धिरिति भावः। सर्व्वशक्तित्वं सम्भावयति ॥ मनसापीति ॥ नन्वन्येऽपि विपरिणामादयो भावविकाराः सन्तीति किमिति जन्मादीत्यादिपदेन न गृह्यन्ते तत्राह ॥ अन्येषामिति ॥ वृद्धिपरिणामयोर्जन्मनि अपक्षयस्य नाशेऽन्तर्भाव इति भावः ॥ "देही जायते अस्ति वर्द्धते परिणमते अपक्षीयते नश्यति" इति यास्कमुनिवाक्यं एतत्सूत्रमूलं किं न स्यादत आह ॥

दचेतनादणुभ्यो वाभावाद्वा संसारिणो वोत्पत्त्यादि सम्भावयितुं शक्यं, न च स्वभावतः। विशिष्टदेशकालनिमित्तानामिहोपादानात्। एतदेवानुमानं संसारिव्यतिरिक्तेश्वरास्तित्वादिसाधनं मन्यन्ते ईश्वरकारणिनः। नन्विहापि तदेवोपन्यस्तं जन्मादिसूत्रे। न। वेदान्तवाक्यकुसुमग्रथनार्थत्वात् सूत्राणां। वेदान्तवाक्यानि हि सूत्रैरुद्दाहृत्य विचार्यन्ते। वाक्यार्थविचारणाध्वसाननि-

---

याख्येति ॥ यास्कमुनिः किल महाभूतानामुत्पन्नानां स्थितिकाले भौतिकेषु प्रत्यक्षेण जन्मादिषट्कमुपलभ्य निरुक्तवाक्यमुच्चकार तन्मूलीकृत्य जन्मादिषट्ककारणत्वं लक्षणं सूत्रार्थ इति ग्रहणे सूत्रकृता ब्रह्मलक्षणं न सङ्गृहीतं किन्तु महाभूतानां लक्षणमुक्तमिति शङ्का स्यात् सा मा भूदिति ये श्रुयुक्ता जन्मादयस्त एव ग्रह्यन्त इत्यर्थः। यदि निरुक्तस्यापि श्रुतिर्मूलमिति महाभूतजन्मादिकमर्थस्तर्हि सा श्रुतिरेव सूत्रस्य मूलमस्तु किमन्तर्गडुना निरुक्तेनेति भावः। यदि जगतो ब्रह्मातिरिक्तं कारणं स्यात् तदा ब्रह्मलक्षणस्य तत्रातिव्याप्त्यादिदोषः स्यात्, अतस्तन्निरासाय लक्षणसूत्रेण ब्रह्म विना जगज्जन्मादिकं न सम्भवति कारणान्तरासम्भवादिति युक्तिः सूचिता, सा तर्कपादे विस्तरेण वक्ष्यते; अधुना सङ्क्षेपेण तां दर्शयति ॥ न यथोक्तेत्यादिना ॥ नामरूपाभ्यां व्याकृतस्येत्यादीनाञ्च चतुर्णां जगद्विशेषणानां व्याख्यानावसरे प्रधानशून्ययोः संसारिणश्च निरासो दर्शितः। परमाणूनामचेतनानां स्वतः प्रवृत्त्ययोगाज्जीवान्यस्य ज्ञानशून्यत्वनियमेनानुमानात् सर्व्वज्ञेश्वरासिद्धौ तेषां प्रेरकाभावात् जगदारम्भकत्वासम्भव इति भावः। स्वभावादेव विचित्रं जगदिति लोकायतस्तं प्रत्याह ॥ न चेति ॥ जगत उत्पत्त्यादि सम्भावयितुं न शक्यमित्यन्वयः। किं स्वयमेव स्वस्य हेतुरिति स्वभाव उत कारणानपेक्षत्वं ? नाद्यः, आत्माश्रयात्। न द्वितीय इत्याह ॥ विशिष्टेति ॥ विशिष्टान्यसाधारणानि देशकालनिमित्तानि तेषां कार्य्यार्थिभिरुपादीयमानत्वात् कार्य्यस्य कारणानपेक्षत्वं न युक्तमित्यर्थः। अनपेक्षत्वे धान्यार्थिनां भूविशेषे वर्षादिकाले बीजादिनिमित्ते च प्रवृत्तिर्न स्यादिति भावः। पूर्व्वोक्तसर्व्वज्ञत्वादिविशेषणकमी-

र्वृत्ता हि ब्रह्मावगतिर्नानुमानादिप्रमाणान्तरनिर्वृत्ता। मतु तु वेदान्तवाक्येषु जगतो जन्मादिकारणवादिषु तदर्थग्रहणदार्ढ्यायानुमानमपि वेदान्तवाक्याविरोधि प्रमाणं भवन्न निवार्य्यते। श्रुत्यैव च तर्कस्याप्यभ्युपेतत्वात्। तथाहि "श्रोतव्यो मन्त-

---

स्वरं मुक्त्वा जगत उत्पत्त्यादिकं न सम्भवतीति भाष्येण कर्त्तारं विना कार्य्यं नास्तीति व्यतिरेक उक्तः। तेन "यत् कार्य्यं तत् सकर्तृकमिति" व्याप्तिर्ज्ञायते। एतदेव व्याप्तिज्ञानं जगति पक्षे कर्त्तारं साधयन् सर्व्वज्ञेश्वरं साधयति किं श्रुत्यति तार्किकाणां भ्रान्तिमुपन्यस्यति॥ एतदेवेति॥ एतदेवानुमानमेव साधनं न श्रुतिरिति मन्यन्त इति योजना। अथवा एतद्व्याप्तिज्ञानमेव श्रुत्यनुग्राहकयुक्तिमात्रत्वेनास्मत्सम्मतं सदनुमानं स्वतन्त्रमिति मन्यन्त इत्यर्थः। सर्व्वज्ञत्वमादिशब्दार्थः। यद्वा व्याप्तिज्ञानसहकृतमेतल्लक्षणमेवानुमानं मन्यन्त इत्यर्थः। तत्रायं विभागः। व्याप्तिज्ञानात् जगतः कर्त्तास्त्योत्यस्तित्वसिद्धिः, पश्चात् स कर्त्ता सर्व्वज्ञः जगत्कारणत्वाद्यतिरेकेण कुलालादिवदिति सर्व्वज्ञत्वसिद्धिः, "लक्षणाद्" इत्यत्र "मन्यन्त" इत्यनुमानस्याभासत्वं सूचितं। तथाहि। अङ्कुरादौ तावज्जीवः कर्त्ता न भवति जीवाद्भिन्नस्य घटवदचेतनत्वनियमादन्यः कर्त्ता नास्त्येवेति व्यतिरेकनिश्चयात्, "यत् कार्य्यं तत् सकर्तृकं" इति व्याप्तिज्ञानासिद्धिः। लक्षणलिङ्गकानुमाने तु बाधः, अङ्कुरादेरस्य जन्यज्ञानायोगात्, "यज्ज्ञानं तन्मनोजन्यं" इति व्याप्तिविरोधेन नित्यज्ञानासिद्धेर्ज्ञानाभावनिश्चयात्, तस्मादतीन्द्रियार्थे श्रुतिरेव शरणं। श्रुत्यर्थसम्भावनार्थत्वेनानुमानं युक्तिमात्रं न स्वतन्त्रमिति भावः। नन्विदमयुक्तं, श्रुतेरनुमानान्तर्भावमभिप्रेत्य भवदीयसूत्रकृताऽनुमानस्यैवोपन्यस्तत्वादिति वैशेषिकः शङ्कते॥ नन्विति॥ अतो "मन्यन्त" इत्यनुमानस्याभासोक्तिरयुक्तेति भावः। यदि श्रुतीनां स्वतन्त्रमानत्वं न स्यात्तर्हि "तत्तु समन्वयाद्" इत्यादिना तासां तात्पर्य्यं सूत्रकृन्न विचारयेत्, तस्मादुत्तरसूत्राणां श्रुतिविचारार्थत्वाज्जन्मादिसूत्रेऽपि श्रुतिरेव स्वतन्त्रेण विचार्य्यते नानुमानमिति परिहरति॥ नेति॥ किञ्च मुमुक्षोर्ब्रह्मावगतिरभीष्टा यदर्थमस्य शास्त्रस्यारम्भः, सा च नानुमा-

व्य" इति श्रुतिः, "पण्डितो मेधावी गन्धारानेवोपसम्पद्येत एवमेवेहाचार्यवान् पुरुषो वेद" इति च पुरुषबुद्धिसाहाय्यमात्मनो दर्शयति। न धर्मजिज्ञासायामिव श्रुत्यादय एव प्रमाणं ब्रह्मजिज्ञासायां किन्तु श्रुत्यादयोऽनुभवादयश्च यथासम्भवमिह प्रमाणं, अनुभवावसानत्वात् भूतवस्तुविषयत्वाच्च ब्रह्मविज्ञानस्य। कर्त्तव्ये हि विषये नानुभवापेक्षास्तीति श्रुत्यादीनामेव प्रामाण्यं स्यात्, पुरुषाधीनात्मलाभत्वाच्च कर्त्तव्यस्य। कर्त्तुमकर्त्तुमन्यथा वा कर्त्तुं शक्यं लौकिकं वैदिकञ्च कर्म्म। यथा अश्वेन गच्छति पद्भ्यामन्यथा

नात्, "तत्त्वौपनिषदम्" इति श्रुतेः, अतो नानुमानं विचार्य्यमित्याह॥ वाक्यार्थेति॥ वाक्यस्य तदर्थस्य च विचारादद्वयवसानं तात्पर्य्यनिश्चयः प्रमेयसम्भवनिश्चयश्च तेन जाता ब्रह्मावगतिर्मुक्तये भवतीत्यर्थः। सम्भवो बाधाभावः। ननु किमनुमानमनपेक्षितमेव नेत्याह॥ सत्स्विति॥ विमतमभिन्ननिमित्तोपादानकं विमतं चेतनप्रकृतिकं कार्य्यत्वात् सुखादिवदित्यनुमानं श्रुत्यर्थदार्ढ्यायापेक्षितमित्यर्थः। दार्ढ्यं संशयविपर्य्यासनिवृत्तिः। "मन्तव्य" इति श्रुत्यर्थस्तर्केण सम्भावनीय इत्यर्थः। यथा कश्चिद् गन्धारदेशेभ्यश्चोरैरन्यारण्ये बद्धनेत्र एव त्यक्तः केनचिन्मुक्तबन्धस्तदुक्तमार्गग्रहणसमर्थः पण्डितः स्वयं तर्ककुशलो मेधावी स्वदेशानेव प्राप्नुयात्, एवमेवेहाविद्याकामादिभिः स्वरूपानन्दात् प्रच्याव्यानिष्टारण्ये संसारे क्षिप्तः केनचिद्दयापरवशेनाचार्य्येण "नासि त्वं संसारी" किन्तु "तत्त्वमसि" इत्युपदिष्टस्वरूपः स्वयं तर्ककुशलश्चेत् "स्वरूपं जानीयान्नान्यथा" इति श्रुतेः स्वस्य पुरुषमतिरूपतर्कापेक्षां दर्शयतीत्याह॥ पण्डित इति॥ आत्मनः श्रुतेरित्यर्थः। ननु ब्रह्मणो मननाद्यपेक्षा न युक्ता वेदार्थत्वाद्धर्म्मवत् किन्तु श्रुतिलिङ्गवाक्यादय एवापेक्षिता इत्यत आह॥ नेति॥ जिज्ञास्ये धर्म्म इव जिज्ञास्ये ब्रह्मणि इति व्याख्येयं। अनुभवो ब्रह्मसाक्षात्कारारव्यो विद्वदनुभवः। आदिपदान्मननिदिध्यासनयोर्ग्रहः। तत्र हेतुमाह॥ अनुभवेति॥

वा न गच्छतीति, तथा "अतिरात्रे षोडशिनं गृह्णाति नातिरात्रे षोडशिनं गृह्णाति", "उदिते जुहोति अनुदिते जुहोति" इति विधिप्रतिषेधाश्चार्थवन्तः स्युः विकल्पोत्सर्गापवादाश्च। न तु वस्त्वेवं नैवमस्ति नास्तीति वा विकल्प्यते। विकल्पनास्तु पुरुष-

---

मुक्त्यर्थं ब्रह्मज्ञानस्य श्रुत्यादेः साक्षात्कारावसानत्वापेक्षणात् प्रत्यग्भूतसिद्धब्रह्मगोचरत्वेन साक्षात्कारफलकत्वसम्भवात्तदर्थं मननाद्यपेक्षा युक्ता। धर्म्मे तु नित्यपरोक्षे साध्ये साक्षात्कारस्यानपेक्षितत्वादसम्भवाच्च श्रुत्या निर्णयमात्रमनुष्ठानायापेक्षितं। लिङादयस्तु श्रुत्यन्तर्भूता एव श्रुतिद्वारा निर्णयोपयोगित्वेनापेक्ष्यन्ते न मननादयः, अनुपयोगादित्यर्थः। निरपेक्षः शब्दः श्रुतिः। शब्दस्यार्थप्रकाशनसमर्थं लिङादि पदं। योग्येतरपदाकाङ्क्षं वाक्यं। अङ्गवाक्यमपेक्षं प्रधानवाक्यं प्रकरणं। क्रमपठितानामर्थानां क्रमपठितैर्यथाक्रमं सम्बन्धः स्थानं। यथा ऐन्द्राग्न्यादय इष्टयो दर्शक्रमेण पठिताः, दर्शमन्त्राश्च "इन्द्राग्नीरोचनादिवि इत्याद्याः" तत्र प्रथमेष्टौ प्रथममन्त्रस्य विनियोग इत्याद्यूहनीयं। संज्ञासाम्यं समाख्या। यथाध्वर्यवसञ्ज्ञकानां मन्त्राणामाध्वर्यवसञ्ज्ञके कर्म्मणि विनियोग इति विवेकः, एवं तावद्ब्रह्म मननाद्यपेक्षं वेदार्थत्वात् धर्म्मवदित्यनुमाने साध्यत्वेन धर्म्मस्यानुभवायोग्यत्वं, अनपेक्षितानुभवत्वञ्चोपाधिरित्युक्तं, उपाधिश्चतिरेकाद् ब्रह्मणि मननाद्यपेक्षत्वञ्चोक्तं। तत्र यदि वेदार्थत्वमात्रेण ब्रह्मणो धर्म्मेण साम्यन्त्वयोच्येत तर्हि श्रुतिसाध्यत्वं विधिनिषेधविकल्पोत्सर्गापवादाश्च ब्रह्मणि धर्म्मवत् स्युरिति। विपक्षे बाधकमाह॥ पुरुषेत्यादिना॥ पुरुषश्रुत्यधीना आत्मलाभ उत्पत्तिर्यस्य तद्भावाच्च धर्म्मे श्रुत्यादीनामेव प्रामाण्यमित्यन्वयः। धर्म्मस्य साध्यत्वं लौकिककर्म्मदृष्टान्तेन स्फुटयति॥ कर्त्तुमिति॥ लौकिकवदित्यर्थः। दृष्टान्तं स्फुटयति॥ यथेति॥ दार्ष्टान्तिकमाह॥ तथेति॥ तद्धर्म्मस्य कर्त्तुमकर्त्तुमन्यथाकर्त्तुमशक्यत्वमुक्त्वा अन्यथाकर्त्तुमशक्यत्वमाह॥ उदित इति॥ धर्म्मस्य साध्यत्वमुपपाद्य तत्र विध्यादिवैयर्थ्यतामाह॥ विधीति॥ विधिप्रतिषेधाश्च विकल्पादयश्च धर्म्मे साध्ये येऽर्थवन्तः सावकाशा भवन्ति ते ब्रह्मण्यपि स्युरित्यर्थः। "यजेत न सुरां पिबेत्" इत्यादयो विधिनिषेधाः।

बुद्ध्यपेक्षा, न वस्तुयाथात्म्यज्ञानं पुरुषबुद्ध्यपेक्षं, किन्तर्हि वस्तुतन्त्रमेव तत्। न हि स्थाणावेकस्मिन् स्थाणुर्वा पुरुषोऽन्यो वेति तत्त्वज्ञानं भवति। तच्च पुरुषो वान्यो वेति मिथ्याज्ञानं स्थाणुरेवेति तत्त्वज्ञानं वस्तुतन्त्रत्वात्। एवम्भूतवस्तुविषयाणां प्रामाण्यं वस्तुतन्त्रं। तच्चैवं सति ब्रह्मज्ञानमपि वस्तुतन्त्रमेव भूतवस्तुविषयत्वात्। ननु भूतवस्तुविषयत्वे ब्रह्मणः प्रमाणान्तरविषयत्वमेवेति वेदान्तवाक्यविचारणाऽनर्थिकैव प्र।प्ता,न,इन्द्रियाविषयत्वे सम्बन्धाग्रहणात्। स्वभावतो बहिर्विषयविषयाणि इन्द्रियाणि न ब्रह्मविषयाणि।

ब्रीहिभिर्यवैर्वा यजेतेति सम्भावितो विकल्पः ग्रहणाग्रहणयोरैच्छिकः उदितानुदितहोमयोर्व्यवस्थितविकल्पः। "न हिंस्यात्" इत्युत्सर्गः। "अग्नीषोमीयं पशुमालभेत" इत्यपवादः। तथा "आहवनीये जुहोति" इत्युत्सर्गः, "अक्ष्ण्यदे पदे जुहोति" इत्यपवाद इति विवेकः, एते ब्रह्मणि स्युरित्यनेनापत्तिं वारयति॥ न त्वित्यादिना भूतवस्तुविषयत्वादित्यन्तेन॥ इदं वस्तु एवं नैवं घटः पटो वेति प्रकारविकल्पः। अस्ति नास्ति वेति सत्ताखरूपविकल्पः। ननु वस्तुन्यपि आत्मादौ वादिनामस्ति नास्तीत्यादिविकल्पा दृश्यन्ते तत्राह॥ विकल्पनास्विति॥ अस्तित्वादिकोटिस्मरणं पुरुषबुद्धितन्मूला मनस्यन्दितमात्राः संशयविपर्ययविकल्पा न प्रमारूपा इत्यक्षरार्थः। अयं भावः, "धर्मो हि यथा यथा ज्ञायते तथा तथा कर्तुं शक्यते" इति यथाशास्त्रं पुरुषबुद्ध्यपेक्षा विकल्पाः सर्वे प्रमारूपा एव भवन्ति, तत्साध्ये ब्रह्मण्यपि सर्वे विकल्पा यथार्थाः स्युरिति। तत्राप्येवमिति वदन्तं प्रत्याह॥ नेति॥ यदि सिद्धवस्तुज्ञानमपि साध्यज्ञानवत् पुरुषबुद्धिमपेक्ष्य जायेत तदा सिद्धविकल्पा यथार्थाः स्युः, न सिद्धवस्तुज्ञानं पौरुषं किन्तर्हि प्रमाणवस्तुजन्यं, तथा च वस्तुन एकरूपत्वादेकमेव ज्ञानं प्रमा, अन्ये विकल्पा अयथार्था एवेत्यर्थः। अत्र दृष्टान्तमाह॥ न हि स्थाणाविति॥ स्थाणुरेवेत्यवधारणे सिद्ध सर्वे विकल्पा यथार्था न भवन्तीत्यर्थः। तत्र यद्वस्तुतन्त्रं ज्ञानं तद्यथार्थं यत् पुरुषतन्त्रं तन्मिथ्येति विभजते॥ तत्रेति॥ स्थाणावित्यर्थः।

सति हीन्द्रियविषयत्वे ब्रह्मण इदं ब्रह्मणा सम्बद्धं कार्यमिति गृह्येत। कार्यमात्रमेव गृह्यमाणं किं ब्रह्मणा सम्बद्धं किमन्येन केनचिद्वा सम्बद्धमिति न शक्यं निश्चेतुं। तस्माज्जन्मादिसूत्रं नानुमानोपन्यासार्थं किन्तर्हि वेदान्तवाक्यप्रदर्शनार्थं। किं पुनस्तद्वेदान्तवाक्यं यत् सूत्रेणेह लिलक्षयिषितं। "भृगुर्वै वारुणिर्वरुणं पितरमुपससार अधीहि भगवो ब्रह्मेति" इत्युपक्रम्याह "यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व तद्ब्रह्म" इति। तस्य च निर्णयवाक्यं

स्थाणावुक्तन्यायं घटादिष्वतिदिशति॥ एवमिति॥ प्रकृतमाह॥ तच्चैवं सतीति॥ सिद्धेऽर्थे ज्ञानप्रमात्वस्य वस्त्वधीनत्वे सति ब्रह्मज्ञानमपि वस्तुजन्यमेव यथार्थं न पुरुषतन्त्रं भूतार्थविषयत्वात् स्थाणुज्ञानवदित्यर्थः। अतः साध्येऽर्थे सर्व्वे विकल्पाः पुंस्त्वा न सिद्धार्थ इति वैलक्षण्यात्, न धर्म्मसाम्यं ब्रह्मण इति मननाद्यपेक्षा सिद्धेति भावः। ननु तर्हि ब्रह्म प्रत्यक्षादिगोचरं धर्म्मविलक्षणत्वाद्घटादिवत्। तथा च जन्मादिसूत्रे जगत्कारणानुमानं विचार्यं सिद्धार्थे तस्य मानत्वात् न श्रुतिः, सिद्धार्थे तस्या अमानत्वेन तद्विचारस्य निष्फलत्वादिति शङ्कते॥ नन्विति॥ प्रमाणान्तरविषयत्वमेव प्राप्तमिति कृत्वा प्रमाणान्तरस्यैव विचारप्राप्ताविति शेषः। अत्र पूर्व्वपक्षी प्रष्टव्यः, किं यत् कार्यं तद्ब्रह्मजमित्यनुमानं ब्रह्मसाधकं किं वा यत् कार्यं तत् सकारणमिति? नाद्यः, व्याप्यसिद्धेरित्याह॥ नेति॥ ब्रह्मण इन्द्रियाग्राह्यत्वात् प्रत्यक्षेण व्याप्तिग्रहायोगान्न प्रमाणान्तरविषयत्वमित्यर्थः। इन्द्रियाग्राह्यत्वं कुत इत्यत आह॥ स्वभावत इति॥ "पराञ्चि खानि व्यतृणत् स्वयम्भूः" इति श्रुतेः, ब्रह्मणो रूपादिहीनत्वाच्चेत्यर्थः। इन्द्रियाग्राह्यत्वेऽपि व्याप्तिग्रहः किं न स्यादत आह॥ सति हीति॥ तन्नास्तीति शेषः। इदं कार्यं ब्रह्मजमिति व्याप्तिप्रत्यक्षं ब्रह्मणोऽतीन्द्रियत्वान्न सम्भवतीत्यर्थः। द्वितीये कारणसिद्धावपि कारणस्य ब्रह्मत्वं श्रुतिं विना ज्ञातुमशक्यमित्याह॥ कार्यमात्रमिति॥ सम्बन्धं कृतं यस्मात्, श्रुतिमन्तरेण जगत्कारणं ब्र-

"आनन्दाद्धेव खल्विमानि भूतानि जायन्ते आनन्देन जातानि जीवन्ति आनन्दं प्रयन्त्यभिसंविशन्ति" इति। अन्यान्ययेवंजातीयकानि वाक्यानि नित्यशुद्धबुद्धमुक्तस्वभाव* सर्व्वज्ञस्वरूपकारणविषयाण्युदाहर्त्तव्यानि ॥ २ ॥

जगत्कारणत्वप्रदर्शनेन सर्व्वज्ञं ब्रह्मेत्युपचिप्तं तदेव द्रढयन्नाह।

क्षेति निश्चयलाभस्तस्मात् तल्लाभाय श्रुतिरेव प्राधान्येन विचारणीया, अनुमानं तूपादानत्वादिसामान्यद्वारा मृदादिवद् ब्रह्मणः स्वकार्य्यात्मकत्वादि श्रौतार्थसम्भावनार्थं गुणतया विचार्य्यमित्युपसंहरति ॥ तस्मादिति ॥ एतत्सूत्रस्य विषयवाक्यं पृच्छति ॥ किं पुनरिति ॥ इह ब्रह्मणि लक्षणार्थत्वेन विचारयितुमिष्टं वाक्यं किमित्यर्थः। अत्र हि प्रथमसूत्रे विशिष्टाधिकारिणो ब्रह्मविचारं प्रतिज्ञाय ब्रह्म ज्ञातुकामस्य द्वितीयसूत्रे लक्षणमुच्यते, तथैव श्रुतावपि मुमुक्षोर्ब्रह्म ज्ञातुकामस्य जगत्कारणत्वोपलक्षणानुवादेन ब्रह्म ज्ञाप्यत इति श्रौतार्थक्रमानुसारित्वं सूत्रस्य दर्शयितुं सोपक्रमवाक्यं पठति ॥ भृगुरिति ॥ अधीहि स्मारय उपदिशेत्यर्थः। अत्र येनेत्येकत्वं विवक्षितं, नानात्वे ब्रह्मत्वविधानायोगात्। यज्जगत्कारणं तदेकमित्यवान्तरवाक्यं, यदेकं कारणं तद् ब्रह्मेति वा यत्कारणं तदेकं ब्रह्मेति वा महावाक्यमिति भेदः किन्तर्हि स्वरूपलक्षणमित्याशङ्क्य वाक्यशेषान्निर्णीतो यतःशब्दार्थः सत्यज्ञानानन्द इत्याह ॥ तस्य चेति ॥ "यः सर्व्वज्ञः" "तस्मादेतद् ब्रह्म नामरूपमन्नञ्च जायते" "विज्ञानमानन्दं ब्रह्म" इत्यादि शाखान्तरीयवाक्यान्यप्यस्य विषय इत्याह ॥ अन्यान्ययोति ॥ एवंजातीयकत्वमेवाह ॥ नित्येति ॥ तदेवं सर्व्वासु शाखासु लक्षणद्वयवाक्यानि जिज्ञास्ये ब्रह्मणि समन्वितानि तद्विद्या मुक्तिरिति सिद्धं ॥ २ ॥

यस्य निश्वसितं वेदाः सर्व्वार्थज्ञानशक्तयः।
श्रीरामं सर्व्ववेत्तारं वेदवेद्यमहं भजे ॥

उक्तानुवादेन सङ्गतिं वदन्नुत्तरसूत्रमवतारयति ॥ जगदिति ॥

---

* स्वभावेति पाठो मुद्रितपुस्तके नास्ति।

शास्त्रयोनित्वादिति। ३।

महत ऋग्वेदादेः शास्त्रस्यानेकविद्यास्थानोपबृंहितस्य प्रदीपवत् सर्व्वार्थावद्योतिनः सर्व्वज्ञकल्पस्य योनिः कारणं ब्रह्म। न ह्यीदृशस्य शास्त्रस्य ऋग्वेदादिलक्षणस्य सर्व्वज्ञगुणान्वितस्य सर्व्वज्ञा-

---

चैतन्यस्य ब्रह्मणो जगत्कारणत्वोक्त्या सर्व्वज्ञत्वमर्थात् प्रतिज्ञातं सूचकृता चेतनस्येक्षानपूर्व्वकत्वात्। तथा च ब्रह्म सर्व्वज्ञं सर्व्वकारणकत्वात्, यो यत्कर्त्ता स तज्ज्ञः यथा कुलाल इति स्थितं; तदेवार्थिकं सर्व्वज्ञत्वं प्रधानादिनिरासाय वेदकर्त्तृत्वहेतुना दृढयन्नाहेत्यर्थः। हेतुद्वयस्यैकार्थसाधनत्वादेकविषयत्वमवान्तरसङ्गतिः। यद्वा वेदस्य नित्यत्वाद् ब्रह्मणः सर्व्वहेतुता नास्तीत्याक्षेपसङ्गत्या वेदहेतुत्वमुच्यते "अस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेदोऽथर्व्वाङ्गिरस" इतिवाक्यं विषयः। तत् किं वेदहेतुत्वेन ब्रह्मणः सर्व्वज्ञत्वं साधयति उत न साधयति इति सन्देहः; तत्र व्याकरणादिवद्वेदस्य पौरुषेयत्वे मूलप्रमाणसापेक्षत्वेनाप्रामाण्यापातान्न साधयतीति पूर्व्वपक्षे जगद्धेतोश्चेतनत्वासिद्धिः फलं। सिद्धान्ते तत्सिद्धिः। अस्य वेदान्तवाक्यस्य स्वयं ब्रह्मलिङ्गस्य वेदकर्त्तरि समन्वयोक्तेः श्रुतिशास्त्राध्यायसङ्गतयः। एवमापादं श्रुत्यादिसङ्गतय ऊह्याः। वेदे हि सर्व्वार्थप्रकाशनशक्तिरुपलभ्यते, सा तदुपादानब्रह्मगतशक्तिपूर्व्विका तदूना वा? प्रकाशनशक्तित्वात् कार्य्यगतशक्तित्वाद्वा प्रदीपशक्तिवदिति वेदोपादानत्वेन ब्रह्मणः स्वसम्बद्धार्थप्रकाशनसामर्थ्यरूपं सर्व्वसाक्षित्वं सिद्धति। यद्वा यथा अध्येतारः पूर्व्वक्रमं ज्ञात्वा वेदं कुर्व्वन्ति, तथा विचित्रगुणमायासहायोऽनाद्यनन्तस्वप्रकाशचिन्मात्रः परमेश्वरः स्वं ज्ञतपूर्व्वकक्रीयक्रमसजातीयक्रमवन्तं वेदराशिं तदर्थांश्च युगपज्ज्ञानेनैव करोतीति न वेदस्य पौरुषेयता। यत्र ह्यर्थज्ञानपूर्व्वकं वाक्यज्ञानं वाक्यकृतौ कारणं तत्र पौरुषेयता, अत्र च यौगपद्यान्न सा; अतो वेदकर्त्ता वेदमिव तदर्थमपि स्वसम्बद्धं नान्तरीयकतया जानातीति सर्व्वज्ञ इति सिद्धान्तयति।

शास्त्रेति॥ शास्त्रं प्रति हेतुत्वात् ब्रह्म सर्व्वज्ञं सर्व्वकारणञ्च

दन्यतः सम्भवोऽस्ति। यद्यद्विस्तरार्थं शास्त्रं यस्मात् पुरुषविशेषात् सम्भवति, यथा व्याकरणादि पाणिन्यादेः शेषैकदेशार्थमपि, स ततोऽप्यधिकतरविज्ञान इति प्रसिद्धं लोके, किमु वक्तव्यमनेकशाखाभेदभिन्नस्य देवतिर्यङ्मनुष्यवर्णाश्रमादिप्रविभागहेतोः ऋग्वेदाद्याख्यस्य सर्व्वज्ञानाकरस्याप्रयत्नेनैव लीलान्यायेन पुरुषनिश्वासवद्यस्मान्महतो भूताद्योनेः सम्भवः "अस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेद" इत्यादिश्रुतेस्तस्य महतो भूतस्य निरतिशयं सर्व्वज्ञत्वं सर्व्वशक्तिमत्त्वञ्चेति। अथवा यथोक्तमृग्वेदा-

---

इति सङ्गतिद्वयानुसारेण सूत्रयोजनामभिप्रेत्य पदानि व्याचष्टे॥ महत इति॥ हेतोः सर्व्वज्ञत्वसिद्धये वेदस्य विशेषणानि। तत्र यस्मादेतोऽर्थतत्त्व महत्त्वं, हितशासनात् शास्त्रत्वं। शास्त्रशब्दः शब्दमात्रोपलक्षणार्थ इति मत्वाह॥ अनेकेति॥ "पुराणन्यायमीमांसाधर्म्मशास्त्राणि, शिक्षाकल्पव्याकरणनिरुक्तच्छन्दोज्योतिषाणि षडङ्गानि" इति दशविद्यास्थानानि वेदार्थज्ञानहेतवः तैरुपबृंहितस्येत्यर्थः। अनेन मन्वादिभिः परिगृहीतत्वेन वेदस्य प्रामाण्यं सूचितं। अबोधकत्वाभावादपि प्रामाण्यमित्याह॥ प्रदीपवदिति॥ सर्व्वार्थप्रकाशनशक्तिमत्त्वेऽप्यचेतनत्वात् सर्व्वज्ञकल्पत्वं योनिरुपादानं कर्त्तृ च। ननु सर्व्वज्ञस्य ये गुणाः सर्व्वार्थज्ञानशक्तिमत्त्वं वेदस्य तदन्वितत्वेऽपि तद्योनेः सर्व्वज्ञत्वं कुत इत्यत आह॥ न हीति॥ उपादाने तच्छक्तिं विना कार्य्ये तदयोगाद्देहोपादानस्य सर्व्वज्ञत्वं। अनुमानन्तु पूर्व्वं दर्शितं। न चाविद्यायास्तदापत्तिः। शक्तिमत्त्वेऽप्यचेतनत्वादिति भावः। वेदः स्वविषयादधिकार्थज्ञानवज्ज्ञन्यः, प्रमाणवाक्यत्वात्, व्याकरणरामायणादिवदित्यनुमानान्तरं; तच्च व्याप्तिमाह॥ यद्यदिति॥ विस्तरः शब्दाधिक्यं, अनेनार्थतोऽल्पत्वं वदन् कर्त्तुर्ज्ञानस्यार्थाधिक्यं सूचयति; दृश्यते चार्थवादाधिक्यं वेदे। अत्रैषा योजना यद्यच्छास्त्रं यस्मादाप्तात् सम्भवति स ततः शास्त्रादधिकार्थज्ञान इति प्रसिद्धं यथा शब्दसाधुत्वादिज्ञेयैकदेशोऽर्थो यस्य तदपि व्याकरणादि पाणिन्यादेरधिकार्थज्ञात् सम्भवति। यद्यल्पार्थमपि

दिशास्त्रं योनिः कारणं प्रमाणमस्य ब्रह्मणो यथावत् स्वरूपाधिगमे। शास्त्रादेव प्रमाणात् जगतो जन्मादिकारणं ब्रह्माधिगम्यत इत्यभिप्रायः। तच्छास्त्रमुदाहृतं पूर्वसूत्रे "यतो वा इमानि भूतानि जायन्ते" इत्यादि। किमर्थं तर्हि इदं सूत्रं यावता पूर्व-

---

शास्त्रमधिकार्थज्ञात् सम्भवति तदा "अस्य महतः" इत्यादिश्रुतेर्यस्मान्महतोऽपरिच्छिन्नाद्भूतात् सत्याद्योनेः सकाशादनेकशाखेत्यादिविशिष्टस्य वेदस्य पुरुषनिश्वासवदप्रयत्नेनैव सम्भवः तस्य सर्वज्ञत्वं सर्वशक्तिमत्त्वञ्चेति किमु वक्तव्यमिति, तत्र वेदस्य पौरुषेयत्वशङ्कानिरासार्थं श्रुतिस्मृतिनिश्वसितपदार्थमाह ॥ अप्रयत्नेनेति ॥ प्रमाणान्तरेणार्थज्ञानप्रयासं विना निमेषादिन्यायेनेत्यर्थः। अत्रानुमानेन "यः सर्वज्ञः" इति श्रुत्युक्तसर्वज्ञत्ववदार्ह्याय पाणिन्यादिवद्वेदकर्त्तरि अधिकार्थज्ञानसत्तामात्रं साध्यते न त्वर्थज्ञानस्य वेदहेतुत्वं, निश्वसितश्रुतिविरोधात्, वेदज्ञानमात्रेणाध्येतृवद्वेदकर्तृत्वोपपत्तेश्च। इयान् विशेषः, अध्येता परापेक्षः; ईश्वरस्तु स्वकृतवेदानुपूर्व्वं स्वयमेव स्मृत्वा तथैव कल्पादौ ब्रह्मादिभ्याविर्भावयन्नानादृतत्वात्तदर्थमत्यवर्जनीयतया जानातीति सर्वज्ञ इत्यनवद्यं। अधुना ब्रह्मणो लक्षणान्तरं प्रमाणजिज्ञासायां वर्त्मकान्तरमाह ॥ अथ वेति ॥ लक्षणप्रमाणयोर्ब्रह्मनिर्णयार्थत्वादेकफलकत्वं सङ्गतिः। "तन्त्वौपनिषदं पुरुषं" इति श्रुतिर्ब्रह्मणो वेदैकवेद्यत्वं ब्रूते न वेति संशये, कार्य्यलिङ्गेनैव लाघवात् कर्त्तुरेकस्य सर्वज्ञस्य ब्रह्मणः सिद्धेर्न ब्रूत इति प्राप्ते वेदप्रमाणकत्वात् ब्रह्मणो न प्रमाणान्तरवेद्यत्वमिति सिद्धान्तयति ॥ शास्त्रयोनित्वादिति ॥ तद्व्याचष्टे ॥ यथोक्तमिति ॥ सर्वत्र पूर्वोत्तरपक्षयुक्तिदयं संग्रथवीजं द्रष्टव्यं। अत्र पूर्वपक्षे अनुमानस्यैव विचार्यतासिद्धिः फलं सिद्धान्ते वेदान्तानामिति भेदः। अनुमानादिना ब्रह्मसिद्धिः पूर्वसूत्रे प्रसङ्गान्निरस्ता। किञ्च विचित्रप्रपञ्चस्य प्रासादादिवदेककर्त्रकताबाधान्न लाघवावतारः। न च सर्वज्ञत्वात् कर्त्तुरेकत्वसम्भवः, एकत्वज्ञानात् सर्वज्ञत्वज्ञानं ततस्तदित्यन्योन्याश्रयमभिप्रेत्याह ॥ शास्त्रादेवेति ॥ किं तच्छास्त्रमिति तत्राह ॥ शास्त्रमिति ॥ इयमारम्भमाक्षिपति ॥

सूत्र एवंजातीयकं शास्त्रमुदाहरता शास्त्रयोनित्वं ब्रह्मणो दर्शितं ? उच्यते। तच्च सूत्राक्षरेण स्पष्टं शास्त्रस्यानुपादानात् जगतो*जन्मादि केवलमनुमानमुपन्यस्तमित्याशङ्क्येत, तामाशङ्कां निवर्त्तयितुमिदं सूत्रं प्रवर्त्तते॥ "शास्त्रयोनित्वादिति"॥ कथं पुनर्ब्रह्मणः शास्त्रप्रमाणकत्वमुच्यते ? यावता "आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां" इति क्रियापरत्वं शास्त्रस्य प्रदर्शितं,

---

किमर्थमिति॥ येन हेतुना दर्शितं ततः किमर्थमित्यर्थः। जन्मादिलिङ्गकानुमानस्य स्वातन्त्र्येणोपन्यासशङ्कानिरासार्थं पृथक्सूत्रमित्याह॥ उच्यत इति॥ वेदान्ताः सिद्धब्रह्मपरा उत कार्य्यपरा इति निष्फलत्वसाफल्यत्वयोः प्रसङ्गाप्रसङ्गाभ्यां संशये पूर्वसूत्रे द्वितीयवर्णकेनाक्षेपसङ्गत्या पूर्वपक्षमाह॥ कथं पुनरित्यादिना॥ "सदेव सोम्य" इत्यादीनां सर्वात्मत्वादिस्पष्टब्रह्मलिङ्गानां ब्रह्मणि समन्वयोक्तेः श्रुत्यादिसङ्गतयः पूर्वपक्षे वेदान्तेषु मुमुक्षुप्रवृत्त्यसिद्धिः सिद्धान्ते तत्सिद्धिरिति विवेकः। कथमित्याक्षेपे हेतुः॥ यावतेति॥ यतो जैमिनिसूत्रेण शास्त्रस्य वेदस्य क्रियापरत्वं दर्शितमतोऽक्रियार्थत्वाद्वेदान्तानामानर्थक्यं फलवदर्थशून्यत्वं प्राप्तमित्यन्वयः। सूत्रस्यायमर्थः। प्रथमसूत्रे तावद्वेदस्याध्ययनकारणकभावनाविधिभाव्यस्य फलवदर्थपरत्वमुक्तं। "चोदनालक्षणोऽर्थो धर्म्म" इति द्वितीयसूत्रे धर्म्मे कार्य्ये चोदना प्रमाणमिति वेदप्रामाण्यव्यापकं कार्य्यपरत्वमवसितं। तत्र "वायुर्वै क्षेपिष्ठा" इत्यादयर्थवादानां धर्म्मे प्रामाण्यमस्ति न वेति संशये आम्नायप्रामाण्यस्य क्रियार्थत्वेन व्याप्तत्वादर्थवादेषु धर्म्मस्याप्रतीतेरक्रियार्थानां तेषामानर्थक्यं निष्फलार्थत्वं, न चाध्ययनविध्युपात्तानां निष्फले सिद्धेऽर्थे प्रामाण्यं युक्तं, तस्मादनित्यमेषां प्रामाण्यमुच्यते। व्यापकाभावाद्व्याप्यं प्रामाण्यं नास्त्येवेति यावत्। एवं पूर्वपक्षेऽपि "विधिना त्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्युः" इति सूत्रेण सिद्धान्तमाह॥ क्रियापरत्वमिति॥ अनित्यमिति प्राप्ते

---

* जगत इति पदं मु० पुस्तके नास्ति।

अतो वेदान्तानामानर्थक्यं, अक्रियार्थत्वात्; कर्तृदेवतादिप्रकाशनार्थत्वेन वा क्रियाविधिविशेषत्वमुपासनादिक्रियान्तरविधानार्थत्वं वा? न हि परिनिष्ठितवस्तुस्वरूप*प्रतिपादनं सम्भवति प्रत्यक्षादिविषयत्वात् परिनिष्ठितवस्तुनः। तत्प्रतिपादने च हेयोपादेयरहिते पुरुषार्थाभावात्। अत एव "सोऽरोदीद्"

दर्शितमित्यर्थः। "वायुर्वै क्षेपिष्ठा देवता तद्देवताकं कर्म क्षिप्रमेव फलं दास्यति" इत्येवं विधेयार्थानां स्तुतिरूपार्थेन द्वारेण "वायव्यं श्वेतमालभेत" इत्यादि विधिवाक्येनैकवाक्यत्वादर्थवादाः सफलाः स्युः। स्तुतिलक्षणया सफलकार्थपरत्वात् प्रमाणमर्थवादा इति यावत्। नन्वध्ययनविधिगृहीतानां वेदान्तानामानर्थक्यं न युक्तमित्यत आह॥ कर्त्रेति। न वयं वेदान्तानामानर्थक्यं साधयामः किन्तु लोके सिद्धस्य मानान्तरवेद्यत्वान्निष्फलत्वाच्च सिद्धब्रह्मपरत्वे तेषां मानान्तरसापेक्षत्वनिष्फलत्वयोः प्रसङ्गात्प्रामाण्यापातात् कार्यशेषकर्तृदेवताफलानां प्रकाशनद्वारा कार्यपरत्वं वक्तव्यमिति ब्रूमः। तत्र त्वंतत्पदार्थवाक्यानां कर्तृदेवतास्तावकत्वं विविदिषादिवाक्यानां फलस्तावकत्वं। ननु कर्मविशेषमनारभ्य प्रकरणान्तराधीतानां वेदान्तानां कथं तच्छेषत्वं? मानाभावादित्यरुच्या पक्षान्तरमाह॥ उपासनेति॥ मोक्षकामोऽसद्ब्रह्मभेदमारोप्य "अहं ब्रह्मास्मि" इत्युपासीत इत्युपासनाविधिः। आदिशब्दाच्छ्रवणादयः, तत्कार्यपरत्वं वा वक्तव्यमित्यर्थः। ननु श्रुतब्रह्मविषयाश्रुतकार्यपरत्वं किमर्थं वक्तव्यमिति तत्राह॥ न हीति॥ परितः समन्तान्निश्चयेन स्थितं परिनिष्ठितं ज्ञात्यनापेक्षं सिद्धमिति यावत्। तस्य प्रतिपादनमज्ञातस्य वेदेन ज्ञापनं तन्न सम्भवति, मानान्तरयोग्येऽर्थे वाक्यस्य संवादे सत्यनुवादकत्वाद् "अग्निर्हिमस्य भेषजं" इति वाक्यवत् विसंवादे च बोधकत्वाद् "आदित्यो यूप" इति वाक्यवदित्यर्थः। सिद्धो न वेदार्थः। मानान्तरयोग्यत्वाद् घटवदित्युक्ता निष्फलत्वाच्च तथेत्याह॥ तदिति॥ सिद्धज्ञापने हेयोपादेयागोचरे फलाभावाच्च तन्न सम्भव-

---

*स्वरूपेति पदं मु० पुस्तके नास्ति।

इत्यादीनामानर्थक्यं माभूदिति "विधिनात्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्युः" इति स्तावकत्वेनार्थवत्त्वमुक्तं। मन्त्राणाञ्च "दृषेत्वा" ऽऽदीनां क्रियातत्साधनाभिधायित्वेन कर्म्ममवायित्वमुक्तं। न क्वचिदपि वेदवाक्यानां विधिमंस्पर्शमन्तरेणार्थवत्ता

तीत्यर्थः। फलं हि सुखावाप्तिर्दुःखहानञ्च। तच्च प्रवृत्तिनिवृत्तिभ्यां साध्यं। ते चोपादेयस्य प्रवृत्तिप्रयत्नकार्य्यस्य हेयस्य निवृत्तिप्रयत्नकार्य्यस्य ज्ञानाभ्यां जायेते, न सिद्धज्ञानादिति भावः। तर्हि सिद्धबोधिवेदवादानां सफल्यं कथमित्याशङ्क्य "आम्नायस्य" इत्यादिसङ्गृहवाक्यं विवृणोति॥ अतएवेति॥ "देवैर्निरुद्धः सोऽग्निररोदीद्" इति वाक्यस्याश्रुजत्वेन रजतस्य निन्दाद्वारा "वर्हिषि न देयं" इति सफलनिषेधशेषत्ववद्वेदान्तानां विध्यादिशेषत्वं वाच्यमित्यर्थः। ननु तेषां मन्त्रवत् स्वातन्त्र्यमस्तु नार्थवादवद्विध्येकवाक्यत्वमित्याशङ्क्य दृष्टान्तासिद्धिमाह॥ मन्त्राणाञ्चेति॥ प्रमाणलक्षणेऽर्थवादलक्षणाचिन्तानन्तरं मन्त्रेषु चिन्ता न कृता * "इषत्वा" इति मन्त्रे "छिनद्मि" इत्यध्याहाराच्छाखाच्छेदनक्रियाप्रतीतेः अग्निर्मूर्द्धा, इत्यादौ च क्रियासाधनदेवतादिप्रतीतेर्मन्त्राः श्रुत्यादिभिः क्रतौ विनियुक्ताः, ते किमुच्चारणमात्रेणादृष्टं कुर्व्वन्तः क्रतावुपकुर्व्वन्ति उत दृष्टेनैवार्थस्मरणेनेति सन्देहचिन्तादिनाप्यध्ययनकालावगतमन्त्रार्थस्य स्मृतिसम्भवाददृष्टार्था मन्त्रा इति प्राप्ते सिद्धान्तः। "अविप्रिष्टस्तु वाक्यार्थ" इति लोकवेदयोर्वाक्यार्थस्याविशेषान्मन्त्रवाक्यानां दृष्टेनैव स्वार्थप्रकाशनेन क्रतूपकारकत्वसम्भवात् दृष्टे सम्भवति अदृष्टकल्पनानुपपत्तेः फलवदनुष्ठानापेक्षितेन क्रियातत्साधनस्मरणेन द्वारेण मन्त्राणां कर्म्माङ्गत्वं। "मन्त्रैरेवार्थः स्मर्त्तव्य" इति नियमस्त्वदृष्टार्थ इति। तथा चार्थवादानां स्तुतिपदार्थद्वारा पदैकवाक्यत्वं विधिभिर्मन्त्राणान्तु वाक्यार्थज्ञानद्वारा तैर्वाक्यैरेकवाक्यत्वमिति विभागः। नन्वस्तु कर्म्मप्रकरणस्थवाक्यानां विध्येकवाक्यत्वं वेदान्तानान्तु सिद्धे प्रामाण्यं किं न स्यादिति तत्राह॥ न

---

* चिन्ताक्षतेति ७३५ न० सो० पुस्तकपाठः।

दृष्टा उपपन्ना वा। न च परिनिष्ठिते वस्तुस्वरूपे विधिः सम्भवति, क्रियाविषयत्वाद्विधेः। तस्मात् कर्म्मापेक्षितकर्त्रादेवतादिस्वरूपप्रकाशनेन क्रियाविधिविशेषत्वं वेदान्तानां। अथ प्रकरणान्तरभयान्नैतदभ्युपगम्यते, तथापि स्ववाक्यगतोपासनादिकर्म्मपरत्वं। तस्मान्न ब्रह्मणः शास्त्रयोनित्वमिति प्राप्ते उच्यते॥

तत्तु समन्वयात्॥ ४॥

तुशब्दः पूर्व्वपक्षव्यावृत्त्यर्थः। तद् ब्रह्म सर्व्वज्ञं सर्व्वशक्ति जगदुत्पत्तिस्थितिलयकारणं वेदान्तशास्त्रादवगम्यते। कथं? समन्वयात्। सर्व्वेषु हि वेदान्तेषु वाक्यानि तात्पर्य्येणैव तस्यार्थस्य*

क्वचिदिति॥ वेदान्ता विध्येकवाक्यत्वेनैवार्थवन्तः सिद्धार्थकवेदत्वान्मन्त्रार्थवादादिवदित्यर्थः, अन्यता दृष्टापि वेदान्तेषु कल्प्यतामिति तत्राह॥ उपपन्ना वेति॥ नेत्यनुषङ्गः। सिद्धे फलाभावस्योक्तत्वादिति भावः। तर्हि ब्रह्मण्येव स्वार्थो विधिः कल्प्यतां कृतं वेदान्तानां विध्यन्तरशेषत्वेनेत्यत आह॥ न चेति॥ ननु "दध्ना जुहोति" इति सिद्धे दधनि विधिर्दृष्टस्तत्राह॥ क्रियेति॥ दध्नः क्रियासाधनस्य प्रयुज्यमानतया साध्यत्वादिधेयता, निष्क्रियब्रह्मणः कथमप्यसाध्यत्वान्न विधेयत्वमित्यर्थः॥ भाट्टमतमुपसंहरति॥ तस्मादिति॥ स्वयमेवाशङ्कां वदन् पक्षान्तरमाह॥ अथेति॥ सिद्धान्तसूत्रं याचष्टे॥ तु शब्द इति॥ तद् ब्रह्म वेदान्तप्रमाणकं इति प्रतिज्ञातेऽर्थे हेतुं पृच्छति॥ कथमिति॥ हेतुमाह॥ समिति॥ अन्वयस्तात्पर्य्यविषयत्वं, तस्मादित्येव हेतुः तात्पर्य्यस्य सम्यक्त्वं अखण्डार्थविषयकत्वं सूचयितुं सम्यदं प्रतिज्ञान्तर्गतमेव, तथा चाखण्डं ब्रह्म वेदान्तजप्रमाविषयः, वेदन्ततात्पर्य्यविषयत्वात्। यो यद्वाक्यतात्पर्य्यविषयः स तद्वाक्यप्रमेयः, यथा कर्म्मवाक्यप्रमेयो धर्म्म इति प्रयोगः। वाक्यार्थस्याखण्डत्वं असंसृष्टत्वं, वाक्यस्य

---

* तस्यार्थस्य स्थाने स्वार्थस्येति मु० पुस्तके पाठः।

प्रतिपादकत्वेन समनुगतानि "सदेव सौम्येदमग्र आसीत्"। "एकमेवाद्वितीयं"। "आत्मा वा इदमेक एवाग्र आसीत्"। "तदेतद् ब्रह्मापूर्व्वमनपरमनन्तरमबाह्यमयमात्मा ब्रह्म सर्व्वा-

---

चाखण्डार्थकत्वं, स्वपदोपस्थिता ये पदार्थास्तेषां यः संसर्गः तद्गोचर-प्रमाजनकत्वं। न चेदमप्रसिद्धं। प्रकृष्टप्रकाशश्चन्द्र इत्यादिलक्षणवाक्यानां लोके लक्षणया चन्द्रादिव्यक्तिमात्रप्रमाहेतुत्वात् सर्व्वपदलक्षणा चाविरुद्धा। सर्व्वैरर्थवादपदैरेकस्याः स्तुतेर्लक्ष्यत्वाङ्गीकारात्। तथा सत्यज्ञानादिपदैरखण्डं ब्रह्म भातीति न पक्षासिद्धिः। नापि हेत्वसिद्धिः। उपक्रमादिलिङ्गैर्वेदान्तानामद्वितीयाखण्डब्रह्मणि तात्पर्य्यनिर्णयात् तत्र छान्दोग्यषष्ठे उपक्रमं दर्शयति॥ सदेवेति॥ उद्दालकः पुत्रमुवाच, हे सौम्य प्रियदर्शन इदं सर्व्वं जगद् अग्रे उत्पत्तेः प्राक्काले सदबाधितं ब्रह्मैवासीत्। एवकारेण जगतः पृथक्सत्ता निषिध्यते। सजातीयविजातीयस्वगतभेदनिरासार्थम् "एकमेवाद्वितीयम्" इति पदत्रयं। एवमद्वितीयं ब्रह्मोपक्रम्य "ऐतदात्म्यमिदं सर्व्वम्" इत्युपसंहरति। इदमुपक्रमोपसंहारैकरूप्यं तात्पर्य्यलिङ्गं, तथा "तत्त्वमसि" इति नवकृत्वोऽभ्यासः। रूपादिहीनाद्वितीयब्रह्मणो मानान्तरायोग्यत्वात् अपूर्व्वत्वमुक्तं, "अत्र वाव किल सत् सौम्य न निभालयसे" इति। सद्भावे स्थितं प्रत्यगब्रह्म न जानासीत्यर्थः। "तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ सम्पत्स्ये" इति ब्रह्मज्ञानात् फलमुक्तं विदुषस्तस्य यावत् कालं देहो न विमोक्ष्यते तावदेव देहपातपर्य्यन्तो विलम्बः। अथ देहपातानन्तरं विद्वान् ब्रह्म सम्पत्स्यते विदेहकैवल्यमनुभवतीत्यर्थः। "अनेन जीवेनात्मनानुप्रविश्य" इत्याद्यद्वितीयज्ञानार्थोऽर्थवादः। मृदादिदृष्टान्तैः प्रकृत्यतिरेकेण विकारो नास्तीत्यर्थपत्तिरुक्ता। एवं षड्विधानि तात्पर्य्यलिङ्गानि व्यक्तानि समक्तानि वा प्रतिवेदान्तं दृश्यन्त इत्यैतरेयोपक्रमवाक्यं पठति॥ "आत्मा वै" इति॥ बृहदारण्यकमधुकाण्डोपसंहारवाक्यं सदात्मनो निर्विशेषत्वार्थमाह॥ तदे-

---

* देहतेतिपदं मु० पुस्तके नास्ति।

नुभूः"। "ब्रह्मैवेदममृतं पुरस्ताद्" इत्यादीनि। न च तद्वतानां पदानां ब्रह्मस्वरूपविषये निश्चिते समन्वयेऽवगम्यमाने ऽर्थान्तरकल्पना युक्ता, श्रुतहान्यश्रुतकल्पनाप्रसङ्गात्। न च तेषां कर्त्रादेवतादिस्वरूप*प्रतिपादनपरतावसीयते। "तत् केन कं पश्येद्" इत्यादिक्रियाकारकफलनिराकरणश्रुतेः। न च परिनिष्ठितवस्तुस्वरूपत्वेऽपि प्रत्यक्षादिविषयत्वं। "तत्त्वमसि" इति ब्रह्मात्मभावस्य शास्त्रमन्तरेणानवगम्यमानत्वात्। यत्तु हेयोपादेयरहितत्वादुपदेशानर्थक्यमिति। नैष दोषः। हेयोपादेयशून्यब्रह्मात्मावगमादेव सर्व्वक्लेशप्रहाणात् पुरुषार्थसिद्धेः।

तदिति ॥ मायाभिर्बहुरूपं तद् ब्रह्म। एतदपरोक्षं। अपूर्वं कारणशून्यं। अनपरं कार्य्यरहितं। अनन्तरं जात्यन्तरं अस्य नास्तीत्यनन्तरं, एकरसमित्यर्थः। अबाह्यं अद्वितीयं। तस्यापरोक्षत्वमुपपादयति ॥ अयमिति ॥ सर्व्वमनुभवतीति सर्व्वानुभूः, चिन्मात्रमित्यर्थः। ऋग्यजुःसामवाक्यान्युक्त्वा आथर्व्वणवाक्यमाह ॥ ब्रह्मैवेदमिति ॥ यत् पुरस्तात् पूर्व्वदिग्वस्तुजातमिदं ब्रह्मैवाविदूषां भाति तदमृतं ब्रह्मैव वस्तु इत्यर्थः। आदिपदेन "सत्यं ज्ञानम्" इत्यादिवाक्यानि गृह्यन्ते। नन्वस्तु ब्रह्मणस्तात्पर्य्यविषयत्वं वेदान्तानां कार्य्यमेवार्थः किं न स्यादिति तत्राह ॥ न चेति ॥ वेदान्तानां ब्रह्मणि तात्पर्य्ये निश्चीयमाने कार्य्यार्थत्वं न युक्तं "यत् परः शब्दः स शब्दार्थः" इति न्यायादित्यर्थः। यदुक्तमर्थवादन्यायेन वेदान्तानां कर्त्रादिस्तावकत्वमिति तत्राह ॥ न च तेषामिति ॥ तेषां कर्म्मशेषस्तावकत्वं न भाति किन्तु ज्ञानद्वारा कर्म्म तत्साधननाशकमेव, तत्तन्न विद्याकाले "कः कर्त्ता केन करणेन कं विषयं पश्येद्" इति श्रुतेरित्यर्थः, अर्थवादानान्तु स्वार्थे फलाभावात् स्तुतिलक्षणेति भावः। यदुक्तं सिद्धत्वेन मानान्तरवेद्यं ब्रह्म न वेदार्थ इति तत्राह ॥ न च परीति ॥ "तत्त्वमसि" इति शास्त्रमन्तरेणेति सम्बन्धः। धर्म्मो न वेदार्थः साध्यत्वेन पाकवन्मानान्तरवेद्यत्वात्। यदि वेदं विना धर्म्मस्यानिर्णयान्न मानान्तरवेद्यता तदा ब्रह्मण्यपि तुल्यं।

देवतादिप्रतिपादनस्य तु स्व*वाक्यगतोपासनार्थत्वेऽपि न कश्चिद्विरोधः। ननु तथा ब्रह्मण उपासनाविधिशेषत्वं सम्भवति। एकत्वे हेयोपादेयशून्यतया क्रियाकारकादिद्वैतविज्ञानोपमर्दोपपत्तेः। न हि ब्रह्मैकत्वविज्ञानेनोन्मथितस्य द्वैतविज्ञानस्य पुनः सम्भवोऽस्ति, येनोपासनाविधिशेषत्वं ब्रह्म प्रतिपाद्येत।

यच्चोक्तं निष्फलत्वाद् ब्रह्म न वेदार्थ इति तदनूद्य परिहरति॥ यच्चित्यादिना॥ रहितत्वाद्भिन्नत्वाद् ब्रह्मण इति शेषः। यदप्युक्तं "उपासनापरत्वं वेदान्तानाम्" इति तत्र किं प्राणपञ्चाग्न्यादिवाक्यानामुत सर्वेषामिति? तत्राद्यमङ्गीकरोति॥ देवतादीति॥ श्रेष्ठत्वादिगुणः फलत्वादिशब्दार्थः। न द्वितीयः, विधिशून्यानां "सत्यज्ञानम्" इत्यादीनां स्वार्थे फलवतामुपासनापरत्वकल्पनायोगात्। किञ्च तदर्थस्य ब्रह्मणस्तच्छेषत्वं ज्ञानात् प्रागूर्ध्वं वा? आद्ये, अध्यस्तगुणवतस्तस्य तच्छेषत्वेऽपि न द्वितीय इत्याह॥ ननु तथेति॥ प्राणादिदेवतावदित्यर्थः। "अहं ब्रह्मास्मि" इत्येकत्वे ज्ञाते सति हेयोपादेयशून्यतया ब्रह्मात्मनः फलाभावादुपास्योपासकद्वैतज्ञानस्य कारणस्य नाशाच्च नोपासनाशेषत्वमित्याह॥ एकत्व इति॥ द्वैतज्ञानस्य संस्कारबलात् पुनरुदये विधानमिति नेत्याह॥ न हीति॥ दृढस्येति शेषः। भ्रान्तित्वानिश्चयो दार्ढ्यं, संस्कारोत्थन्तु भ्रान्तित्वेन निश्चितं न विधिनिमित्तं। "यनेति" उपासनायां कारणस्य सत्त्वेनेत्यर्थः। वेदप्रामाण्यस्य व्यापकं क्रियार्थकत्वमनुवदति॥ यद्यपीति॥ कर्मकाण्डेऽर्थवादादीनामित्यर्थः। तथा च व्यापकाभावाद्वेदान्तेषु व्याप्याभावानुमानमिति भावः। वेदान्ता न स्वार्थे मानं अक्रियार्थत्वात्, "सोऽरोदीद्" इत्यादिवदित्यनुमाने निष्फलार्थकत्वमुपाधिरित्याह॥ तथापीति॥ अर्थवादानां निष्फलं स्वार्थामानत्वेऽपीत्यर्थः। तद्विषयस्य तत्कारणस्य स्वार्थे ब्रह्मात्मनीति शेषः। सफलज्ञानकरणत्वेन वेदान्तानां स्वार्थे मानत्वसिद्धेर्न क्रियार्थकत्वं तद्व्यापकमिति भावः। ननु माभूद्वेदप्रामाण्यस्य व्यापकं क्रियार्थकत्वं व्याप्यन्तु भविष्यति तदभावा-

---

* स्ववेदान्तवाक्यगतेतिपाठो मुद्रितमुक्तकेऽस्ति।

यद्यप्यन्यत्र वेदवाक्यानां विधिसंस्पर्शमन्तरेण प्रमाणत्वं न दृष्टं, तथाप्यात्मविज्ञानस्य फलपर्य्यन्तत्वान्न तद्विषयस्य शास्त्रस्य प्रामाण्यं शक्यं प्रत्याख्यातुं। न चानुमानगम्यं शास्त्रप्रामाण्यं येनान्यत्र दृष्टं निदर्शनमपेक्षेत। तस्मात् सिद्धं ब्रह्मणः शास्त्रप्रमाणकत्वं।

अत्रापरे प्रत्यवतिष्ठन्ते "यद्यपि शास्त्रप्रमाणकं ब्रह्म तथापि प्रतिपत्तिविधिविषयतयैव शास्त्रेण ब्रह्म समर्प्यते, यथा यूपाहवनीयादीन्यलौकिकान्यपि विधिशेषतया शास्त्रेण समर्प्यन्ते

वेदान्तानां प्रामाण्यं दुर्ज्ञानमिति नेत्याह ॥ न चेति ॥ येन वेदप्रामाण्यं स्वस्यानुमानगम्यत्वेनान्यत्र क्वचिद् दृष्टान्तमपेक्षेत तदेव नास्तीत्यर्थः। चक्षुरादिवद्वेदस्य स्वतः प्रामाण्यज्ञानान्न तद्व्याप्तिलिङ्गाद्यपेक्षा। प्रामाण्यसंशये तु फलवदज्ञाता बाधितार्थतात्पर्य्यात् प्रामाण्यनिश्चयो न क्रियार्थत्वेन "न कूपे पतेद्" इति वाक्ये व्यभिचारादिति भावः ॥ वर्ष्मकार्थमुपसंहरति ॥ तस्मादिति ॥ समन्वयादित्यर्थः। विधिवाक्यानामपि फलवदज्ञातार्थत्वेन प्रामाण्यं तत्तुल्यं वेदान्तानामपीति स्थितं। एवं पदानां सिद्धेऽर्थे व्युत्पत्तिमिच्छतां ब्रह्मनास्तिकानां मतं ब्रह्मणो मानान्तरायोग्यत्वात् सफलत्वाच्च वेदान्तैकमेयत्वमित्युक्त्या निरस्तं। सम्प्रति सर्व्वेषां पदानां कार्य्यान्वितार्थे शक्तिमिच्छतां विधिशेषत्वेन प्रत्यग्ब्रह्मवेदान्तैर्बाध्यते न स्वातन्त्र्येणेति वदतां वृत्तिकाराणां मतनिरासाय सूत्रस्य वर्ष्मकान्तरमारभ्यते। तत्र वेदान्ताः किमुपासनाविधिशेषत्वेन ब्रह्म बोधयन्ति उत स्वातन्त्र्येण? इति सिद्धे व्युत्पत्त्यभावभावाभ्यां संशये पूर्व्वपक्षमाह ॥ अत्रापर इति ॥ ब्रह्मणो वेदान्तवेद्यत्वोक्तौ वृत्तिकाराः पूर्व्वपक्षयन्तीत्यर्थः। उपासनातो मुक्तिः पूर्व्वपक्षे तत्त्वज्ञानादेवेति सिद्धान्ते फलं विधिर्नियोगः तस्य विषयः प्रतिपत्तिरुपासना। अस्याः को विषयः, इत्याकाङ्क्षायां सत्यादिवाक्यैर्विधिपरैरेव ब्रह्म समर्प्यत इत्याह ॥ प्रतिपत्तीति ॥ विधिविषयप्रतिपत्तिविषयतयेत्यर्थः। विधिपराद्वाक्यात्तच्छेषत्वाभे दृष्टान्तमाह ॥ यथेति ॥ "यूपे पशुं बध्नाति"

तद्वत्। कुत एतत्? प्रवृत्तिनिवृत्तिप्रयोजनत्वाच्छास्त्रस्य; तथा हि शास्त्रतात्पर्य्यविद आहुः, "दृष्टो हि तस्यार्थः कर्म्मावबोधनं नाम" इति * चोदनेति क्रियायाः प्रवर्त्तकं वचनं। तस्य ज्ञानमुपदेशः। "तद्भूतानां क्रियार्थेन समाम्नायः" "आम्नायस्य

"आहवनीये जुहोति" "इन्द्रं यजेत" इति विधिषु के यूपादयः, इत्याकाङ्क्षायां "यूपं तक्षत्यष्टाखीकरोति" इति तक्षणादिसंस्कृतं दारु यूपः। "अग्नीनादधीत" इत्याधानसंस्कृतोऽग्निराहवनीयः। "वज्रहस्तः पुरन्दर" इति विधिपरैरेव वाक्यैः समर्प्यते तद्वद् ब्रह्मेत्यर्थः। विधिपरवाक्यस्यापि अन्यार्थबोधित्वे वाक्यभेदः स्यादिति शङ्कानिरासार्थमपिशब्दः। मानान्तराज्ञातान्यपि शेषतयोच्यन्ते न प्रधानत्वेनेति न वाक्यभेदः, प्रधानार्थभेदस्यैव वाक्यभेदकत्वादिति भावः। ननूक्तषड्विधलिङ्गैस्तात्पर्य्यविषयस्य ब्रह्मणः कुतो विधिविशेषत्वमिति शङ्कते॥ कुत इति॥ वृद्धव्यवहारेण हि शास्त्रतात्पर्य्यनिश्चयः। वृद्धव्यवहारे च श्रोतुः प्रवृत्तिनिवृत्ती उद्दिश्याप्रयोगो दृश्यते। अतः शास्त्रस्यापि ते एव प्रयोजने, ते च कार्य्यज्ञानजन्ये इति कार्य्यपरत्वं शास्त्रस्य ततः कार्य्यशेषत्वं ब्रह्मण इत्याह॥ प्रवृत्तीति॥ शास्त्रस्य नियोगपरत्वे वृद्धसम्मतिमाह॥ तथा हीत्यादिना॥ क्रिया कार्य्यं, नियोगो विधिः, धर्म्मोऽपूर्व्वमित्यनर्थान्तरं। को वेदार्थः, इत्याकाङ्क्षायां भाष्यकृतोक्तं॥ दृष्टो हीति॥ तस्य वेदस्य कार्य्यं वेदार्थः इत्यत्र चोदनासूत्रस्थं भाष्यमाह॥ चोदनेति॥ क्रियाया नियोगस्य ज्ञानद्वारा प्रवर्त्तकं वाक्यं चोदनेत्युच्यत इत्यर्थः। शबरस्वामिसम्मतिमुक्त्वा जैमिनिसम्मतिमाह॥ तस्य ज्ञानमिति॥ तस्य धर्म्मस्य ज्ञापकं अपौरुषेयविधिवाक्यमुपदेशः, तस्य धर्म्मस्यातिरेकादित्यर्थः। पदानां कार्य्यान्वितार्थे शक्तिरित्यत्र सूत्रं पठति॥ तद्भूतानामिति॥ तत्तत्र वेदे भूतानां सिद्धार्थनिष्ठानां पदानां क्रियार्थेन कार्य्यवाचिना लिङादिपदेन समाम्नायः सहोच्चारणं कर्त्तव्यं। पदार्थज्ञानस्य वाक्यार्थरूपकार्य्यधीनिमित्तत्वादित्यर्थः। कार्य्यान्वितार्थे शक्तानि पदानि कार्य्यवाचिपदेन सह पदार्थ-

---

* नामेति मु० पुस्तके पाठो नास्ति।

क्रियार्थत्वादानर्थक्यमतदर्थानामिति" च। अतः पुरुषं क्वचिद्विषयविशेषे प्रवर्त्तयत् कुतश्चिद्विषयविशेषान्निवर्त्तयच्चार्थवच्छास्त्रं, तच्छेषतया चान्यदुपयुक्तं, तत्सामान्याद्वेदान्तानामपि तथैवार्थवत्त्वं स्यात्। सति च विधिपरत्वे यथा स्वर्गादिकामस्याग्निहोत्रादि साधनं विधीयते, एवममृतत्वकामस्य ब्रह्मज्ञानं विधीयते इति युक्तं *। नन्विह जिज्ञास्यवैलक्षण्यमुक्तं। कर्म्मकाण्डे भव्यो धर्म्मो जिज्ञास्यः, इह तु भूतं नित्यनिर्वृत्तं ब्रह्म जिज्ञास्यमिति। † तत्र धर्म्मज्ञानफलादनुष्ठानापेक्षाद्विलक्षणं ब्रह्मज्ञानफलं भवितुमर्हति। नार्हत्येवं भवितुं। कार्य्यविधिप्रयुक्तस्यैव ब्रह्मणः प्रतिपाद्यमानत्वात्। "आत्मा वा अरे द्रष्टव्यः" "य आ-

---

स्मृतिद्वारा कार्य्यमेव वाक्यार्थं बोधयन्तीति भावः। फलितमाह॥ अत इति॥ यतो ब्रह्म एवमाद्यः, अतो विधिनिषेधवाक्यमेव शास्त्रं, अर्थवादादिकं तु तच्छेषतयोपयोगि, तेन कर्म्मशास्त्रेण सामान्यं शास्त्रत्वं, तस्माद्वेदान्तानां कार्य्यपरत्वेनैव अर्थवत्त्वं स्यादित्यर्थः। ननु वेदान्तेषु नियोज्यस्य विधेयस्य चादर्शनात् कथं कार्य्यधीरिति तत्राह॥ सति चेति॥ ननु धर्म्मब्रह्मजिज्ञासासूत्रकाराभ्यामिह काण्डद्वयेऽर्थभेद उक्तः, एककार्य्यार्थत्वे शास्त्रभेदानुपपत्तेः। तत्र काण्डद्वये जिज्ञास्यभेदे सति फलवैलक्षण्यं वाच्यं। तथा च न मुक्तिफलाय ज्ञानस्य विधेयता, मुक्तेर्विधेयक्रियाजन्यत्वे कर्म्मफलादविशेषप्रसङ्गादविशेषे जिज्ञास्यभेदासिद्धेः। अतः कर्म्मफलविलक्षणत्वान्नित्यसिद्धमुक्तेरुक्तद्वयसाधकज्ञानविधिरयुक्त इत्याशङ्क्यते॥ नन्विहेति॥ मुक्तेः कर्म्मफलाद्वैलक्षण्यमसिद्धमिति तदर्थं ज्ञानं विधेयं। न च तर्हि सफलं कार्य्यमेव वेदान्तेष्वपि जिज्ञास्यमिति तद्भेदासिद्धेरिति वाच्यं, इष्टत्वात्। न च ब्रह्मणो

---

* इतियुक्तमिति मु० पुस्तकधृतपाठः।

† अत्रेति टीकासम्मतः पाठः।

त्मापहतपाप्मा सोऽन्वेष्टव्यः स विजिज्ञासितव्यः" "आत्मेत्येवोपासीत""आत्मानमेव लोकमुपासीत""ब्रह्मविद् ब्रह्मैव भवति" इत्यादिषु हि विधानेषु सत्सु "कोऽसावात्मा ब्रह्म" इत्याकाङ्क्षायां तत्स्वरूपसमर्पणेन सर्व्वे वेदान्ता उपयुक्ताः, "नित्यः सर्व्वज्ञः सर्व्वगतो नित्यतृप्तो नित्यशुद्धबुद्धमुक्तस्वभावो विज्ञानमानन्दं ब्रह्म" इत्येवमादयः। तदुपासनाच्च शास्त्रदृष्टोऽदृष्टो मोक्षः फलं भविष्यति। कर्त्तव्यविधननुप्रवेशे तु वस्तुमात्रकथने हानोपादानासम्भवात् "सप्तद्वीपा वसुमती" "राजासौ गच्छति" इत्यादिवाक्यवद्वेदान्तवाक्यानामानर्थक्यमेव स्यात्। ननु वस्तुमात्रकथनेऽपि "रज्जुरियं नायं सर्पः" इत्यादौ भ्रान्तिजनितभीतिनिवर्त्तनेनार्थवत्त्वं दृष्टं। तथेहाप्यसंसार्य्यात्मवस्तुकथनेन संसारित्वभ्रान्तिनिवर्त्तनेनार्थवत्त्वं स्यात्। स्यादेतदेवं यदि रज्जुस्वरूपश्रवण इव सर्पभ्रान्तिः संसारित्वभ्रान्तिर्ब्रह्मस्वरूपश्रवणमात्रेण निवर्त्तेत न तु निवर्त्तते। श्रुतब्रह्मणोऽपि यथापूर्व्वं

जिज्ञास्यत्वसूत्रविरोधः, ज्ञानविधिशेषत्वेन सूत्रकृता ब्रह्मप्रतिपादनादिति परिहरति॥ नेति॥ ब्रह्मणो विधिप्रयुक्तत्वं स्फुटयति॥ आत्मा वा इति॥ "ब्रह्म वेद" इत्यत्र ब्रह्मभावकामो ब्रह्मवेदनं कुर्य्यादिति विधिः परिगम्यत इति द्रष्टव्यं। लोकं ज्ञानस्वरूपं वेदान्तानेवार्थतो दर्शयति॥ नित्य इति॥ ननु किं विधिफलमिति तदाह॥ तदुपासनादिति॥ प्रत्यग्ब्रह्मोपासनाद् "ब्रह्मविदाप्नोति परम्" इति शास्त्रोक्तो मोक्षः स्वर्गवल्लोकाप्रसिद्धः फलमित्यर्थः। ब्रह्मणः कर्त्तव्योपासनाविषयकविधिशेषत्वानङ्गीकारे बाधकमाह॥ कर्त्तव्येति॥ विध्यसम्बद्धसिद्धबोधे प्रवृत्त्यादिफलाभावाद्वेदान्तानां वैफल्यं स्यादित्यर्थः। नन्विति, शङ्का स्पष्टार्था। दृष्टान्तवैषम्येण परिहरति॥ स्यादिति॥

सुखदुःखादिसंसारित्वधर्मदर्शनात्। "श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" इति च श्रवणोत्तरकालयोर्मननिदिध्यासनयोर्दर्शनात्। तस्मात् प्रतिपत्तिविधिविषयतयैव शास्त्रप्रमाणकं ब्रह्माभ्युपगन्तव्यमिति"।

अत्राभिधीयते, न, कर्मब्रह्मविद्याफलयोर्वैलक्षण्यात्। शारीरं वाचिकं मानसञ्च कर्म श्रुतिस्मृतिप्रसिद्धं धर्माख्यं यद्विषया जिज्ञासा, "अथातो धर्मजिज्ञासा" इति सूचिता। अधर्मोऽपि हिंसादिः प्रतिषेधचोदनालक्षणत्वात् जिज्ञास्यः परिहाराय। तयोश्चोदनालक्षणयोरर्थानर्थयोर्धर्माधर्मयोः फले प्रत्यक्षे सुखदुःखे शरीरवाङ्मनोभिरेवोपभुज्यमाने विषयेन्द्रियसंयोगजन्ये ब्रह्मादिस्थावरान्ते प्रसिद्धे। मनुष्यत्वादारभ्य ब्रह्मान्तेषु देह-

---

एतदर्थवत्त्वमेवश्चेत् स्यादित्यर्थः। एवंशब्दार्थमाह॥ यदीति॥ किञ्च, यदि ज्ञानादेव मुक्तिस्तदा श्रवणजन्यज्ञानानन्तरं मननादिविधिर्न स्यात्, तद्विधेश्च कार्य्यसाध्या मुक्तिरित्याह॥ श्रोतव्य इति॥ शब्दानां कार्य्यान्वितशक्तेः प्रवृत्त्यादिफलस्यैव शास्त्रत्वात् सिद्धे फलाभावान्मननादिविधेश्च कार्य्यपरा वेदान्ता इति पूर्वपक्षमुपसंहरति॥ तस्मादिति॥ वेदान्ता न विधिपराः स्वार्थे फलवत्त्वे सति नियोज्यविधुरत्वात्,"नायं स्पर्शः" इति वाक्यवत "सोऽरोदीत्" "स्वर्गकामो यजेत" इति वाक्ययोर्निरासाय हेतौ विशेषणद्वयमिति सिद्धान्तयति॥ अत्रेति॥ यदुक्तं मोक्षकामस्य नियोज्यज्ञानं विधेयमिति तन्नेत्याह॥ नेति॥ मोक्षो न विधिजन्यः कर्मफलविलक्षणत्वादात्मवदित्यर्थः। उक्तहेतुज्ञानाय कर्मतत्फले प्रपञ्चयति॥ शारीरमित्यादिना वर्णितं संसाररूपं अनुवदतीत्यन्तेन॥ अथ वेदाध्ययनानन्तरं। अतो वेदस्य फलवदर्थपरत्वात् धर्मनिर्णयाय कर्मवाक्यविचारः कर्त्तव्य इति सूत्रार्थः। न केवलं धर्माख्यं कर्म किन्तु अधर्मोऽपीत्याह॥ अधर्मोऽपीति॥ निषेधवाक्यप्रमाणत्वादित्यर्थः। कर्मात्मा फलमाह॥ तयो-

वत्सु सुखतारतम्यमनुश्रूयते। ततश्च तद्धेतोर्धर्म्मस्य तारतम्यं गम्यते। धर्म्मतारतम्यादधिकारितारतम्यं। प्रसिद्धश्चार्थित्वसामर्थ्यादिलक्षितमधिकारितारतम्यं। तथा च यागाद्यनुष्ठायिनामेव विद्यासमाधिविशेषादुत्तरेण पथा गमनं। केवलेरिष्टापूर्त्तदत्तसाधनैर्धूमादिक्रमेण दक्षिणेन पथा गमनं। तत्रापि सुखतारतम्यं तत्साधनतारतम्यञ्च शास्त्राद् "यावत् सम्पातमुषित्वा" इत्यस्माद् गम्यते। तथा मनुष्यादिषु नारकस्थावरान्तेषु सुखल-

---

रिति ॥ मोक्षस्तु अतीन्द्रियो विशेषाकः शरीराद्यभोग्यो विषयाद्यजन्योऽनात्मवित् स्वप्रसिद्ध इति वैलक्षण्यज्ञानाय प्रत्यक्षत्वादीनि विशेषणानि। सामान्येन कर्म्मफलमुक्त्वा धर्म्मफलं पृथक् प्रपञ्चयति। मनुष्यत्वादिति ॥ "स एको मानुष आनन्दस्ततः शतगुणो गन्धर्व्वादीनाम्" इति श्रुतेरनुभवानुसारित्वमनुशब्दार्थः। ततश्च सुखतारतम्यादित्यर्थः। मोक्षस्तु निरतिशयस्तत्साधनञ्च तत्त्वज्ञानमेकरूपमिति वैलक्षण्यं। किञ्च साधनचतुष्टयसम्पन्न एकरूप एव मोक्षविद्याधिकारी। कर्म्मणि तु नानाविध इति वैलक्षण्यमाह ॥ धर्म्मेति ॥ गम्यते न केवलं किन्तु प्रसिद्धश्चेत्यर्थः। अर्थित्वं फलकामित्वं। सामर्थ्यं लौकिकं पुत्रादि। आदिपदादिदृक्त्वं शास्त्रानिन्दितत्वञ्च। किञ्च, कर्म्मफलं मार्गप्राप्यं, मोक्षस्तु नित्याप्त इति भेदमाह ॥ तथेति ॥ उपासनायां चित्तस्थैर्य्यप्रकर्षादर्चिरादिमार्गेण ब्रह्मलोकगमनं "तेऽर्चिषम्" इत्यादिना श्रूयत इत्यर्थः।

"अग्निहोत्रं तपः सत्यं वेदानाञ्चानुपालनं।
आतिथ्यं वैश्वदेवञ्च इष्टमित्यभिधीयते" ॥
"वापीकूपतडागादि देवतायतनानि च।
अन्नप्रदानमारामः पूर्त्तमित्यभिधीयते" ॥
"शरणागतसन्त्राणं भूतानाञ्चाप्यहिंसनं।
बर्हिर्वेदि च यद्दानं दत्तमित्यभिधीयते" ॥

तत्रापि ॥ चन्द्रलोकेऽपीत्यर्थः। सम्पतति गच्छति अस्माल्लोकादमुं लोकमनेनेति सम्पातः कर्म्म, यावत् कर्म्म भोक्तव्यं तावत् स्थित्वा पुन-

वस्त्रोदनालक्षणधर्म्मसाध्य एवेति गम्यते तारतम्येन वर्त्तमानः। तथोर्द्ध्वगतेष्वधोगतेषु च देहवत्सु दुःखतारतम्यदर्शनात्तद्धेतोरधर्म्मस्य प्रतिषेधचोदनालक्षणस्य तदनुष्ठायिनाञ्च तारतम्यं गम्यते। एवमविद्यादिदोषवतां धर्म्माधर्म्मतारतम्यनिमित्तं शरीरोपादानपूर्व्वकं सुखदुःखतारतम्यमनित्यं संसाररूपं श्रुतिस्मृतिन्यायप्रसिद्धं। तथा च श्रुतिः "न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति" इति यथा वर्णितं संसाररूपमनुवदति। "अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः" इति प्रियाप्रियस्पर्शनप्रतिषेधाच्चोदनालक्षणधर्म्मकार्य्यत्वं मोक्षाख्यस्याशरीरस्य प्रतिषिद्धत इति गम्यते। धर्म्मकार्य्यत्वे हि प्रियाप्रियस्पर्शनप्रतिषेधो नोपपद्यते। अशरीरत्वमेव धर्म्मकार्य्यमिति चेन्न, तस्य स्वाभाविकत्वात्। "अश-

---

रायान्तीत्यर्थः। मनुष्यत्वादूर्द्ध्वगतेषु सुखस्य तारतम्यमुक्त्वा अधोगतेषु तदाह॥ तथेति॥ इदानीं दुःखतद्धेतुतदनुष्ठायिनां तारतम्यं वदन् अधर्म्मफलं प्रपञ्चयति॥ तथोर्द्ध्वमिति॥ द्विविधं कर्म्मफलं मोक्षस्य तद्वैलक्षण्यज्ञानाय प्रपञ्चितमुपसंहरति॥ एवमिति॥ अस्मिताकामक्रोधभयान्यादिशब्दार्थः। "ते तं भुक्त्वा स्वर्गलोकं विशालम्" इत्याद्या स्मृतिः काष्ठोपचयात् ज्वालोपचयदर्शनात् फलतारतम्येन साधनतारतम्यानुमानं न्यायः। श्रुतिमाह॥ तथा चेति॥ मोक्षो न कर्म्मफलं कर्म्मफलविरुद्धातीन्द्रियत्वविशोकत्वशरीराद्यभोग्यत्वादिधर्म्मवत्त्वात् व्यतिरेकेण स्वर्गादिवदिति न्यायानुग्राह्यां श्रुतिमाह॥ अशरीरमिति॥ वावेत्यवधारणे। तत्त्वतो विदेहं सन्तमात्मानं वैषयिके सुखदुःखे नैव स्पृशत इत्यर्थः। मोक्षस्वेदुपासनारूपधर्म्मफलं तदेव प्रियमस्तीति तन्निषेधायोग इत्याह॥ धर्म्मकार्य्यत्वे हीति॥ ननु प्रियं नाम वैषयिकं सुखं तन्निषिध्यते, मोक्षस्तु धर्म्मफलमेव कर्म्मणां विचित्रदानसामर्थ्यादिति शङ्कते॥ अशरीरत्वमेवेति। आत्मनो देहास-

शरीरं शरीरेषु अनवस्थेष्ववस्थितं। महान्तं विभुमात्मानं मत्वा धीरो न शोचति"। "अप्राणो ह्यमनाः शुभ्रोऽसङ्गो ह्ययं पुरुषः" इत्यादि श्रुतिभ्यः। अतएवानुष्ठेयफलविलक्षणं मोक्षाख्यमशरीरत्वं नित्यमिति सिद्धं। तच्च किञ्चित्परिणामिनित्यं स्याद्यथा* यस्मिन् विक्रियमाणेऽपि तदेवेदमिति बुद्धिर्न विहन्यते। यथा पृथिव्यादिजगन्नित्यत्ववादिनां, यथा च साङ्ख्यानां गुणाः। इदन्तु पारमार्थिकं कूटस्थं नित्यं व्योमवत् सर्व्वव्यापि सर्व्वविक्रियारहितं नित्यदृप्तं निरवयवं स्वयंज्योतिःस्वभावं। यत्र धर्माधर्मौ सह कार्य्येण कालत्रयञ्च नोपावर्त्तते तदशरीरं मोक्षाख्यं। "अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात् कृताकृतात् अन्यत्र भूताच्च भव्याच्च" इत्यादिश्रुतिभ्यः। अतस्तद्ब्रह्म यस्येयं जिज्ञासा

क्षित्वमशरीरत्वं तस्यानादित्वान्न कर्म्मसाध्यतेत्याह॥ नेति॥ अशरीरं स्थूलदेहशून्यं देहेष्वनेकेषु अनित्येषु एकं नित्यमवस्थितं महान्तं व्यापिनं, आपेक्षिकमहत्त्वं वारयति॥ विभुमिति॥ तमात्मानं ज्ञात्वा धीरः सन् शोकोपलक्षितं संसारं नानुभवतीत्यर्थः। सूक्ष्मदेहाभावे श्रुतिमाह॥ अप्राण इति॥ प्राणमनसोः क्रियाज्ञानशक्त्योर्निषेधात्, तदधीनानां कर्म्मज्ञानेन्द्रियाणां निषेधो हि यतः, अतः शुद्ध इत्यर्थः। देहद्वयाभावे श्रुतिः "असङ्गो हि" इति, निर्देहात्मस्वरूपमोक्षस्यानादिभावत्वे सिद्धे फलितमाह॥ अत एवेति॥ नित्यत्वेऽपि परिणामितया धर्म्मकार्य्यत्वं मोक्षस्येत्याशङ्क्य नित्यं द्वेधा विभजते॥ तच्च किञ्चिदिति॥ नित्यवस्तुमध्य इत्यर्थः। परिणामि च तन्नित्यञ्चेति परिणामिनित्यं आत्मा तु कूटस्थनित्य इति न कर्म्मसाध्य इत्याह॥ इदन्त्विति॥ परिणामिनो नित्यत्वं प्रत्यभिज्ञाकल्पितं मिथ्यैव, कूटस्थस्य तु नाशकाभावान्नित्यत्वं पारमार्थिकं कूटस्थत्वसिद्ध्यर्थं परिस्पन्दाभाव-

---

* स्याद्यथेति मु० पुस्तकधृतपाठः।

प्रस्तुता। तद्यदि कर्त्तव्यशेषत्वेनोपदिश्येत तेन च कर्त्तव्येन साध्यस्येष्टोऽभ्युपगम्येत अनित्य एव स्यात्। तत्रैवं सति यथोक्तकर्म्मफलेष्वेव तारतम्यावस्थितेष्वनित्येषु कश्चिदतिशयो मोक्ष इति प्रसज्येत। नित्यश्च मोक्षः सर्व्वैर्मोक्षवादिभिरभ्युपगम्यते। अतो न कर्त्तव्यशेषत्वेन ब्रह्मोपदेशो युक्तः। अपि च "ब्रह्म वेद

माह॥ व्योमवदिति॥ परिणामाभावमाह॥ सर्व्वक्रियारहितमिति॥ फलानपेक्षित्वान्न फलार्थापि क्रियेत्याह॥ नित्यतृप्तमिति॥ तृप्तिरनपेक्षत्वं विशोकं सुखं वा निरवयवत्वान्न क्रिया तस्य भानार्थमपि न क्रिया स्वयंज्योतिष्ट्वात्, अतः कूटस्थत्वान्न कर्म्मसाध्यो मोक्ष इत्युक्तं। कर्म्मतत्कार्य्यासङ्गित्वाच्च तथेत्याह॥ यत्रेति॥ कालानवच्छिन्नत्वाच्चेत्याह॥ कालेति॥ कालत्रयञ्च नेयावर्त्तत इति योग्यतया सम्बन्धनीयं। धर्म्माद्यनवच्छेदे मानमाह॥ अन्यत्रेति॥ अन्यदित्यर्थः। कृतात् कार्य्यात्। अकृताच्च कारणात्। भूताद्भव्याच्च। चकारादवर्त्तमानाच्च। अन्यद्यत् पश्यसि तद्देदेत्यर्थः। ननु उक्ताः श्रुतयो ब्रह्मणः कूटस्थासङ्गित्वं वदन्तु मोक्षस्य नियोगफलत्वं किं न स्यादिति तत्राह॥ अत इति॥ तत् कैवल्यं ब्रह्मैव, कर्म्मफलविलक्षणत्वादित्यर्थः। ब्रह्माभेदान्मोक्षस्य कूटस्थत्वं धर्म्माद्यसङ्गित्वञ्चेति भावः। यद्वा यज्जिज्ञास्यं तद् ब्रह्म अतः पृथक्-जिज्ञास्यत्वात् धर्म्माद्यसृष्टमित्यर्थः। अतः शब्दाभावपाठेऽप्ययमेवार्थः ब्रह्मणो विधिस्पर्शे शास्त्रैपृथक्यं न स्यात्, कार्य्यविलक्षणानधिगतविषयाभात्। न हि ब्रह्मात्मैक्यं भेदप्रमाणे जायति विधिपरवाक्याल्लभ्यं शास्त्रैक्यं न वा तद्विना विधेरनुपपत्तिः योऽधिदग्न्यैक्योपास्तिविधिदर्शनादिति भावः। अथ वा मोक्षस्य नियोगासाध्यत्वे फलितं सूत्रार्थमाह॥ अत इति॥ यदत्र जिज्ञास्यं ब्रह्म तत् स्वतन्त्रमेव वेदान्तैरुपदिश्यते, समन्वयादित्यर्थः। विपक्षे दण्डं पातयति॥ तद्यदीति॥ तत्रैवं सतीति मोक्षे साध्यत्वेनानित्ये सतीत्यर्थः॥ अत इति॥ मुक्तेर्नित्ययोगासाध्यत्वेन नियोज्यालाभात् कर्त्तव्यनियोगाभावादित्यर्थः। प्रदीपात् तमोनिवृत्तिवज्ज्ञानाद्ज्ञाननिवृत्तिरूपमोक्षस्य दृष्टफलत्वाच्च न नियोगसाध्यत्वमित्याह॥ अपि चेति॥ "यो ब्रह्माहं" इति वेद स ब्रह्मैव

ब्रह्मैव भवति" "क्षीयन्ते चास्य कर्म्माणि तस्मिन् दृष्टे परावरे" "आनन्दं ब्रह्मणो विद्वान् बिभेति कुतश्चन" "अभयं वै जनक प्राप्तोऽसि" "तदात्मानमेवावेदहं ब्रह्मास्मीति" तस्मात्तत्सर्व्वमभवत्" "तत्र को मोहः कः शोक एकत्वमनुपश्यत" इत्येवमाद्याः श्रुतयो ब्रह्मविद्यानन्तरं मोक्षं दर्शयन्त्यो मध्ये कार्य्यान्तरं वारयन्ति। तथा "तद्धैतत् पश्यन्नृषिर्वामदेवः प्रतिपेदेऽहं मनुरभवं सूर्य्यश्च" इति ब्रह्मदर्शनसर्व्वात्मभावयोर्मध्ये कर्त्तव्यान्तरवारणायोदाहार्य्यं। यथा तिष्ठन् गायतीति तिष्ठतिगायत्योर्मध्ये तत्कर्त्रर्कं कार्य्यान्तरं नास्तीति गम्यते। "त्वं हि नः पिता योऽस्मा-

---

भवति। परं कारणमवरं कार्य्यं तद्रूपे तदधिष्ठाने तस्मिन् दृष्टे सति अस्य ब्रह्मणः सारब्धफलानि कर्म्माणि नश्यन्ति। ब्रह्मणः स्वरूपमानन्दं विद्वान् निर्भयो भवति द्वितीयाभावात्। "अभयं ब्रह्म प्राप्तोऽसि"। अज्ञानहानात्तच्छब्दवाच्यं ब्रह्म गुरूपदेशादात्मानमेव "अहं ब्रह्मास्मि" इत्यवेत् विदितवत्। तस्मादेदमात्तद्ब्रह्म पूर्ण्णमभवत् परिच्छेदभ्रान्तिहानादेकत्वं, "अहं ब्रह्म" इत्यनुभवः तत्रानुभवकाले मोहशोकौ न स्त इति श्रुतीनामर्थ, तासां तात्पर्य्यमाह॥ ब्रह्मेति॥ विद्यातत्फलयोर्मध्य इत्यर्थः। मोक्षस्य विधिफलत्वे स्वर्गादिवत् कालान्तरभावित्वं स्यात्। तथा च श्रुतिबाध इति भावः। इतश्च मोक्षो वैधो नेत्याह॥ तथेति॥ तद् ब्रह्मैतत् प्रत्यगस्मीति पश्यन् तस्मात् ज्ञानात् वामदेवो मुनीन्द्रः मुख्यं ब्रह्म प्रतिपेदे ह तत्र ज्ञाने तिष्ठन् दृष्टवानात्मानन्तान् स्वस्य सर्व्वात्मत्वप्रकाशकान् "अहं मनुः" इत्यादीन् ददर्शेत्यर्थः। यद्यपि स्थितिर्गानक्रियाया लक्षणं, ब्रह्मदर्शनन्तु ब्रह्मप्रतिपत्तिक्रियाया हेतुरिति वैषम्यमस्ति, तथापि "लक्षणहेत्वोः क्रियायाः" इति [पा०३।२।१२६] सूत्रेण क्रियां प्रति लक्षणहेत्वोरर्थयोर्वर्त्तमानाद्धातोः परस्य लटः। शटशानचावादेशौ भवत इति विहितशटप्रत्ययसामर्थ्यात् तिष्ठन् गायति इत्युक्ते तत्कर्त्रर्कं कार्य्यान्तरं मध्ये न भातीत्येतावता पश्यन् प्रतिपेदे

कर्मविद्याया: परं पारं तारयसि; श्रुतं ह्येव मे भगवद्दृशेभ्य: तरति शोकमात्मविद्" इति। "सोऽहं भगव: शोचामि तन्मा भगवाञ्छोकस्य पारं तारयतु" इति "तस्मै मृदितकषायाय तमस: पारं दर्शयति भगवान् सनत्कुमार:" इति चैवमाद्या: श्रुतयो मोक्षप्रतिबन्धनिवृत्तिमात्रमेवात्मज्ञानस्य फलं दर्शयन्ति। तथा चाचार्यप्रणीतं न्यायोपबृंहितं सूत्रं "दु:खजन्मप्रवृत्ति-दोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्ग:"

इत्यस्य दृष्टान्तमाह ॥ यथेति ॥ किञ्च, ज्ञानाद्ज्ञाननिवृत्तिः श्रूयते, ज्ञानस्य विधेयत्वे कर्म्मत्वादविद्यानिवर्त्तकत्वं न युक्तं, अतो बोधका एव वेदान्ता न विधायका इत्याह ॥ त्वं हीति ॥ भारद्वाजादयः षड् ऋषयः पिप्पलादं गुरुं पादयोः प्रणम्य ऊचिरे त्वं खल्वस्माकं पिता यस्त्वमविद्यामहोदधेः परं पुनरावृत्तिशून्यं पारं ब्रह्मविद्यानवेनास्मां-स्तारयसि प्रापयसि ज्ञानेनाज्ञानं नाशयसीति यावत्। प्रश्नवाक्य-मुक्त्वा छान्दोग्यमाह ॥ श्रुतमिति ॥ अत्र तारयतीत्यन्तमुपक्रमस्थं शेषमुपसंहारस्थमिति भेदः। "आत्मविच्छोकं तरति" इति भगव-त्तुल्येभ्यो मया श्रुतमेव हि न दृष्टं, "सोऽहमज्ञत्वात् हे भगवः शो-चामि तं शोचन्तं मां भगवानेव ज्ञानप्लवेन शोकसागरस्य परं पारं प्रापयतु" इति नारदेनोक्तः सनत्कुमारस्तस्मै तपसा दग्धकिल्बिषाय नारदाय तमसः शोकनिदानाज्ञानस्य ज्ञानेन निरूपं पारं ब्रह्म दर्शि-तवानित्यर्थः "श्रुतयो वेद सो विद्यायग्निं विकिरति" इति वाक्य-मादिशब्दार्थः। एवं श्रुतेस्तत्त्वदृष्टिप्रमा मुक्तिहेतुर्न कर्म्मेत्युक्तं। तत्राक्ष-पादगौतममुनिसम्मतिमाह ॥ तथा चेति ॥ "गौरोऽहम्" इति मिथ्या-ज्ञानस्यापाये रागद्वेषमोहादिदोषाणां नाशः, दोषापायाद्धर्म्माधर्म्मस्व-रूपप्रवृत्तेरपायः, प्रवृत्त्यपायात् पुनर्देहप्राप्तिरूपजन्मापायः, एवं पाठ-क्रमेणोत्तरोत्तरस्य हेतुनाशान्नाशे सति तस्य प्रवृत्तिरूपहेतोरनन्तरस्य कार्य्यस्य जन्मनोऽपायात् दुःखध्वंसरूपापवर्गो भवतीत्यर्थः। ननु पूर्व्वसूत्रे "तत्त्वज्ञानान्निःश्रेयसाधिगम" इत्युक्ते सतीतरपदार्थभिन्ना-

इति। मिथ्याज्ञानापायस्य ब्रह्मात्मैकत्वविज्ञानाद्भवति। न चेदं ब्रह्मात्मैकत्वविज्ञानं सम्यद्रूपं, "यद्यानन्तं वै मनोऽनन्ता विश्वे देवा अनन्तमेव स तेन लोकं जयति" इति। नचाध्यासरूपं यथा "मनो ब्रह्म" इत्युपासीत, "आदित्यो ब्रह्म" इत्यादेश इति च मनआदित्यादिषु ब्रह्मदृष्ट्यध्यासो, नापि विधिष्टक्रियायोगनिमित्तं "वायुर्वाव संवर्गः प्राणो वाव संवर्गः" इतिवत्। नाप्याप्यावेक्षणादिकर्मवत् कर्माङ्गसंस्काररूपं। सम्यदादिरूपे

त्मतत्त्वज्ञानं कथं मोक्षं साधयतीत्याकाङ्क्षायां मिथ्याज्ञाननिवृत्तिद्वारेणेति वक्तुमिदं सूत्रं प्रवृत्तं। तथा च भिन्नात्मज्ञानान्मुक्तिं वदत् सूत्रं सम्मतश्चेत् परमतानुज्ञा स्यादित्यत आह॥ मिथ्येति॥ "तत्त्वज्ञानान्मुक्तिः" इत्यंशे सम्मतिरुक्ता, भेदज्ञानन्तु "यत्र हि द्वैतमिव भवति" इति श्रुत्या भ्रान्तित्वात् "मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति" इति श्रुत्या अनर्थहेतुत्वाच्च न मुक्तिहेतुरिति भावः। ननु ब्रह्मात्मैकत्वविज्ञानमपि भेदज्ञानवन्न प्रमा, सम्यदादिरूपत्वेन भ्रान्तित्वादित्यत आह॥ न चेदमित्यादिना॥ अल्पालम्बनतिरस्कारेणोत्कृष्टवस्त्वभेदध्यानं सम्पद्यथा मनः स्वकृत्यानन्त्यादनन्तं तत उत्कृष्टा विश्वेदेवा अप्यनन्ता इत्यनन्तत्वसाम्याद् "विश्वेदेवा एव मनः" इति सम्पत्तया ऽनन्तफलप्राप्तिर्भवति तथा चेतनत्वसाम्याज्जीवे ब्रह्माभेदः सम्यदिति न चेत्यर्थः। आलम्बनस्य प्राधान्येन ध्यानं, प्रतीकोपास्तिरध्यासः। यथा ब्रह्मदृष्ट्या मनस आदित्यस्य वा। तथा "अहं ब्रह्म" इति ज्ञानमध्यासो नेत्याह॥ नचेति॥ आदेशः उपदेशः क्रियाविशेषो विधिष्टक्रियातया योगो निमित्तं यस्य ध्यानस्य तत्तथा। यथा प्रलयकाले वायुरग्न्यादीन् संहरतीति संहरतीति संवर्गः, व्यापकाले प्राणो रागादीन् संहरतीति संहारक्रियायोगात् संवर्ग इति ध्यानं छान्दोग्ये विहितं तथा दृष्टिक्रियायोगाज्जीवो ब्रह्मेति ज्ञानमिति नेत्याह॥ नापीति॥ यथा "पत्न्यवेक्षितमाज्यं भवति" इति उपांशुयाजाद्यङ्गस्याज्यस्य

हि ब्रह्मात्मैकत्वविज्ञानेऽभ्युपगम्यमाने "तत्त्वमसि" "अहं ब्रह्मास्मि" "अयमात्मा ब्रह्म" इत्येवमादीनां वाक्यानां ब्रह्मात्मैकत्ववस्तुप्रतिपादनपरः पदसमन्वयः पीड्येत। "भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्व्वसंशयाः" इति चैवमादीन्यविद्यानिवृत्तिफलश्रवणान्युपरुध्येरन्। "ब्रह्म वेद ब्रह्मैव भवति" इति चैवमादीनि तद्भावापत्तिवचनानि सम्यदादिपदैर्न सामञ्जस्येनोपपद्येरन्। तस्मान्न सम्यदादिरूपं ब्रह्मात्मैकत्वविज्ञानं। अतो न पुरुषव्यापारतन्त्रा ब्रह्मविद्या किं तर्हि प्रत्यक्षादिप्रमाणविषयवस्तुज्ञानवद्वस्तुतन्त्रैव। एवम्भूतस्य ब्रह्मणस्तज्ज्ञानस्य वा न कयाचिद्युक्त्या शक्यः कार्य्यानुप्रवेशः कल्पयितुं। न च विदिक्रियाकर्म्मत्वेन का-

---

संस्कारकर्मवेद्यत्वं विहितं तथा कर्म्मणि कर्तृत्वेनाङ्गस्यात्मनः संस्कारार्थं ब्रह्मज्ञानं नेत्याह ॥ नाप्याज्येति ॥ प्रतिज्ञाचतुष्टये हेतुमाह ॥ सम्यदादीति ॥ उपक्रमादिलिङ्गैर्ब्रह्मात्मैकत्ववस्तुनि प्रमितिहेतुर्यः समानाधिकरण्यवाक्यानां पदनिष्ठः समन्वयं तात्पर्यं निश्चितं तत्पीड्येत। किञ्च। एकत्वज्ञानादज्ञानिकहृदयस्यान्तःकरणस्य यो रागादिग्रन्थिश्चिन्मनस्तादात्मरूपाहङ्कार्यग्रन्थिर्वा नश्यतीत्यज्ञाननिवृत्तिफलवाक्यबाधः स्यात् सम्यदादिज्ञानस्याप्रमात्वेनाज्ञाननिवर्त्तकत्वात्। किञ्च। जीवस्य ब्रह्मत्वसम्यदा कथं तद्भावः। पूर्व्वरूपे स्थिते नष्टे वान्यस्यान्यात्मतायोगात्। तस्मान्न सम्यदादिरूपमित्यर्थः। सम्यदादिरूपत्वाभावे फलितमाह ॥ अत इति ॥ प्रमात्वान्न श्रुतिसाध्या किं तर्हि नित्यैव न प्रमाणसाध्येत्यर्थः। उक्तरीत्या सिद्धब्रह्मस्वरूपमोक्षस्य कार्य्यसाध्यत्वं तज्ज्ञानस्य नियोगविषयत्वञ्च कल्पयितुमशक्यं कृत्यसाध्यत्वादित्याह ॥ एवम्भूतस्येति ॥ ननु ब्रह्म कार्य्याङ्गं कारकत्वात् पल्यवेद्यकर्म्मकारकाज्यवदिति चेत्, किं ज्ञाने ब्रह्मणः कर्म्मकारकत्वं उतोपासनायां? नाद्य इत्याह ॥ न चेति ॥ शब्दज्ञानं विदिक्रियाशब्दार्थः, विदितं कार्यं अविदितं कारणं तस्मादधि अन्यदित्यर्थः। येना-

र्थानुप्रवेशो ब्रह्मणः।"अन्यदेव तद्विदितादथोऽविदितादधि" इति विदिक्रियाकर्मत्वप्रतिषेधात्। "येनेदं सर्वं विजानाति तं केन विजानीयाद्" इति च। तथोपास्तिक्रियाकर्मत्वप्रतिषेधोऽपि भवति। "यद्वाचानभ्युदितं येन वागभ्युद्यतेदत्यात्मविषयत्वं ब्रह्मण उपन्यस्य, "तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते" इति। अविषयत्वे ब्रह्मणः शास्त्रयोनित्वानुपपत्तिरिति चेन्न, अविद्याकल्पितभेदनिवृत्तिपरत्वाच्छास्त्रस्य। न हि शास्त्रमिदन्तया विषयभूतं ब्रह्म प्रतिपिपादयिषति किं तर्हि प्रत्यगात्मत्वेनाविषयतया प्रतिपादयदविद्याकल्पितं वेद्यवेदितृवेदनादिभेदमपनयति। तथा च शास्त्रं "यस्यामतं तस्य मतं मतं यस्य न वेद सः"। "अविज्ञातं विजानतां विज्ञातमविजानतां" "न

त्मना इदं सर्वं दृश्यं लोको जानाति तं केन करणेन जानीयात्, तस्मादविषय आत्मेत्यर्थः। न द्वितीय इत्याह ॥ तथेति ॥ "यन्मनसा न मनुते" इति श्रुत्वा लोको मनसा यत् ब्रह्म न जानातीत्यविषयत्वमुक्त्वा "तदेव वेद्यं ब्रह्म त्वं विद्धि" यत्तूपाधिविशिष्टं देवतादिकमित्युपासते जनाः नेदं ब्रह्मेत्यर्थः। ब्रह्मणः शास्त्रबोधाविषयत्वे प्रतिज्ञाहानिरिति शङ्कते ॥ अविषयत्व इति ॥ वेदान्तजन्यवृत्तिकृताविद्यानिवृत्तिफलशास्त्रितया शास्त्रप्रमाणकत्वं वृत्तिविषयत्वेऽपि स्वप्रकाशब्रह्मणो वृत्त्यभिव्यक्तस्फुरणाविषयत्वादप्रमेयत्वमिति परिहरति ॥ नेति ॥ परत्वात् फलत्वादित्यर्थः। निवृत्तिरूपब्रह्मतात्पर्यादिति वार्थः। उक्तं विवृणोति ॥ न हीति ॥ चिद्विषयत्वमिदन्त्वं। अविषयतया अनिदन्तया। अदृश्यत्वे श्रुतिमाह ॥ तथा चेति ॥ यस्य ब्रह्मामतं चैतन्याविषय इति निश्चयस्तेन सम्यगवगतं। यस्य त्वज्ञस्य ब्रह्म चैतन्यविषय इति मतं स न वेद। उक्तमेव दार्ढ्यार्थमनुवदति ॥ अविज्ञातमिति ॥ अविषयतया ब्रह्म विजानतामविज्ञातमदृश्यमिति पक्षः। अज्ञानान्तु

दृष्टेर्द्रष्टारं पश्येर्न श्रुतेः श्रोतारं शृणुया न विज्ञातेर्विज्ञातारं विजानीयाः" इति चैवमादि। अतोऽविद्याकल्पितसंसारित्वनिवर्त्तनेन नित्यमुक्तात्मस्वरूपसमर्पणान्न मोक्षस्यानित्यत्वदोषः। यस्य तूत्पाद्यो मोक्षस्य साधनं वाचिकं कायिकं वा कार्यमपेक्षत इति युक्तं। तथा विकार्यत्वे च। तयोः पक्षयोर्मोक्षस्य ध्रुवमनित्यत्वं। न हि दध्यादि विकार्यमुत्पाद्यं वा घटादि नित्यं दृष्टं लोके। न चाप्यत्वेनापि कार्यापेक्षा, स्वात्मस्वरूपत्वे सत्यनाप्यत्वात्। स्वरूपव्यतिरिक्तत्वेऽपि ब्रह्मणो नाप्यत्वं। सर्व्वगतत्वेन नित्याप्तस्वरूपत्वात् सर्व्वेण ब्रह्मण आकाशस्येव। नापि संस्कार्य्यो मोक्षो येन व्यापारमपेक्षेत। संस्कारो हि नाम संस्कार्य्यस्य गुणाधानेन वा स्याद्दोषापनयेन वा? न तावद् गुणाधानेन सम्भवति, अनाधेयातिशयब्रह्मस्वरूपत्वान्मोक्षस्य।

ब्रह्म विज्ञातुं दृश्यमिति पक्ष इत्यर्थः। दृष्टेर्द्रष्टारं चाक्षुषमनोवृत्तेः साक्षिणं अनया दृश्यया दृष्ट्या न पश्येर्विज्ञातेर्बुद्धिवृत्तेर्निश्चयरूपायाः साक्षिणं तथा न विषयीकुर्या इत्याह॥ नेति॥ नन्वविद्यादिनिवर्त्तकत्वेन शास्त्रस्य प्रामाण्येऽपि निवृत्तेरागन्तुकत्वात् मोक्षस्यानित्यत्वं स्यादिति नेत्याह॥ अत इति॥ तत्त्वज्ञानादित्यर्थः। ध्वंसस्य नित्यत्वादात्मरूपत्वाच्च नानित्यत्वप्रसङ्ग इत्यर्थः। उत्पत्तिविकारासंस्कारूपं चतुर्विधमेव क्रियाफलं तद्भिन्नत्वान्मोक्षस्य नोपासनासाध्यत्वमित्याह॥ यस्य त्वित्यादिना तस्मात् ज्ञानमेकं मुक्तेरन्तेन। तथोत्पाद्यवदविकार्यत्वे चापेक्षत इति युक्तमित्यन्वयं दूषयति॥ तयोरिति॥ स्थितस्यावस्थान्तरं विकारः। नन्वनित्यत्वनिरासाय क्रियया स्थितस्यैव ब्रह्मणो यागवदाप्तिरस्तु नेत्याह॥ न चेति॥ ब्रह्म जीवाभिन्नं न वा? उभयथाप्याप्तत्वात् न क्रियापेक्षेत्याह॥ स्वात्मेत्यादिना॥ यथा व्रीहीणां संस्कार्य्यत्वेन प्रोक्षणापेक्षा तथा मोक्षस्य नेत्याह॥ नापीत्यादिना॥

नापि दोषापनयेन, नित्यशुद्धब्रह्मस्वरूपत्वान्मोक्षस्य। स्वात्मधर्म्म एव संसिरोभूतो मोक्षः क्रिययात्मनि संस्क्रियमाणेऽभिव्यज्यते। यथाऽऽदर्शे निघर्षणक्रियया संस्क्रियमाणे भास्वरत्वं धर्म्म इति चेन्न, क्रियाश्रयत्वानुपपत्तेरात्मनः। यदाश्रया हि क्रिया तमविकुर्व्वतो नैवात्मानं लभते। यद्यात्मा क्रियया विक्रियेतानित्यत्वमात्मनः प्रसज्येत। "अविकार्य्योऽयमुच्यते" इति चैवमादीनि वाक्यानि बाध्येरन्। तच्चानिष्टं। तस्मान्न स्वाश्रया क्रियात्मनः सम्भवति। अन्याश्रयायास्तु क्रियाया अविषयत्वान्न तयात्मा संस्क्रियते। ननु देहाश्रयया स्नानाचमनयज्ञोपवीतधारणादिकया क्रियया देही संस्क्रियमाणो दृष्टः। न देहादिसंहतस्यैवाविद्यागृहीतस्यात्मनः संस्क्रियमाणत्वात्। प्रत्यक्षं हि स्नानाचमनादेर्देहसमवायित्वं। तया देहाश्रयया तत्संहत एव कश्चिदविद्ययात्मत्वेन परिगृहीतः संस्क्रियत इति

गुणाधानं व्रीहिषु प्रोक्षणादिना, क्षालनादिना वस्त्रादौ मलापनयः। भङ्क्ते॥ स्वात्मधर्म्म इति॥ ब्रह्मात्मस्वरूप एव मोक्षोऽनाद्यविद्यामलावृतः उपासनया मले नष्टेऽभिव्यज्यते इत्यत्र दृष्टान्तः॥ यथेति॥ संस्कारो मलनाशः, किमात्मनि मलः सत्यः कल्पितो वा? द्वितीये ज्ञानादेव तन्नाशो न क्रियया; आद्ये क्रिया किमात्मनिष्ठा अन्यनिष्ठा वा? नाद्य इत्याह॥ न क्रियेति॥ अनुपपत्तिं स्फुटयति॥ यदीति॥ क्रिया हि स्वाश्रये संयोगादिविकारमकुर्व्वती न क्षायत इत्यर्थः। तच्च वाक्यबाधनं न द्वितीय इत्याह॥ अन्येति॥ अविषयत्वात् क्रियाश्रयद्रव्यासंयोगादिति यावत्। दर्पणस्तु सावयवं क्रियाश्रयेऽवकचूर्णादिद्रव्यसंयोगित्वात् संस्क्रियत इति भावः। अन्यक्रियया अन्यो न संस्क्रियत इत्यत्र व्यभिचारं भङ्क्ते॥ नन्विति॥ आत्मनो मूलाविद्याप्रतिवि-

युक्तं। यथा देहाश्रयचिकित्सानिमित्तेन धातुसाम्येन तत्संहतस्य तदभिमानिन आरोग्यफलं "अहमरोगः" इति यत्र बुद्धिरुत्पद्यते, एवं स्नानाचमनयज्ञोपवीतादिधारणाकया क्रियया "अहं शुद्धः संस्कृतः" इति यत्र बुद्धिरुत्पद्यते स संस्क्रियते, स च देहेन संहत एव। तेनैव ह्यहंकर्त्ताहंप्रत्ययविषयेण प्रत्ययिना सर्व्वाः क्रिया निर्वर्त्तन्ते तत्फलं च स एवाश्नाति। "तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्योऽभिचाकशीति" इति मन्त्रवर्णादौ "आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः" इति च। तथा "एको देवः सर्व्वभूतेषु गूढः सर्व्वव्यापी सर्व्वभूतान्तरात्मा। कर्म्माध्यक्षः सर्व्वभूताधिवासः साक्षी चेता केवलो

म्बितत्वेन गृहीतस्य नरोऽहमिति भ्रान्त्या देहतादात्म्यमापन्नस्य क्रियाश्रयत्वभ्रान्त्या संस्कार्य्यत्वभ्रमान्न व्यभिचार इत्याह ॥ नेति ॥ कस्मिदिति ॥ अनिश्चितब्रह्मस्वरूप इत्यर्थः। यत्रात्मनि विषये आरोग्यबुद्धिरुत्पद्यते तस्य देहसंहतस्यैवारोग्यफलमित्यन्वयः। ननु देहाभिन्नस्य कथं संस्कारः? तस्यामुष्मिकफलभोक्तृत्वायोगादित्यत आह ॥ तेनेति ॥ देहसंहतेनैवान्तःकरणप्रतिबिम्बात्मना कर्त्ताहमिति भासमानेन प्रत्ययाः कामादयो मनस्तादात्म्यादस्य सन्तीति प्रत्ययिना क्रियाफलं भुज्यत इत्यर्थः, मनोविशिष्टस्यामुष्मिकभोक्तुः संस्कारो युक्त इति भावः। विशिष्टस्य भोक्तृत्वं न केवलस्य साक्षिण इत्यत्र मानमाह ॥ तयोरिति ॥ प्रमातृसाक्षिणोर्मध्ये सत्वसंसर्गमात्रेण कल्पितकर्तृत्वादिमान् प्रमाता पिप्पलं कर्म्मफलं भुङ्क्ते, स एव शोधितत्वेनान्यः साक्षितया प्रकाशत इत्यर्थः। आत्मा देहः, देहादियुक्तं प्रमात्रात्मानमित्यर्थः। एवं सोपाधिकस्य चिद्धातोर्मिथ्यासंस्कार्य्यत्वमुक्त्वा निरुपाधिकस्यासंस्कार्य्यत्वे मानमाह ॥ एक इति ॥ सर्व्वभूतेष्वद्वितीय एको देवः स्वप्रकाशः, तथापि मायावृतत्वान्न प्रकाशत इत्याह ॥ गूढ इति ॥ ननु जीवेनासम्बन्धाद्विन्नत्वाद्वा देवस्याभानं न तु मायागूहनादिति नेत्याह ॥

निर्गुणस्य" इति। "स पर्य्यगात् शुक्रमकायमव्रणमस्नाविरं शुद्ध-मपापविद्धं" इति चैतौ मन्त्रावनाधेयातिशयतां नित्यशुद्धतां च ब्रह्मणो दर्शयतः। ब्रह्मभावश्च मोक्षः। तस्मान्न संस्कार्य्योऽपि मोक्षः। अतोऽन्यन्मोक्षं प्रति क्रियानुप्रवेशद्वारं न शक्यं केनचि-द्दर्शयितुं। तस्माज्ज्ञानमेकं मुक्त्वा क्रियाया गन्धमाचस्याप्यनु-प्रवेशं दृष्ट्वा नोपपद्यते। ननु ज्ञानं नाम मानसी क्रिया, न, वैलक्षण्यात्। क्रिया हि नाम सा यत्र वस्तुस्वरूपनिरपेक्षैव चोद्यते पुरुषचित्तव्यापाराधीना च। यथा "यस्यै देवतायै

सर्व्वव्यापी सर्व्वभूतान्तरात्मेति ॥ देवस्य विभुत्वात् सर्व्वप्राणिप्रत्य-क्षाचावरणादेवाभानमित्यर्थः। प्रत्यक्त्वे कर्तृत्वं स्यादिति चेत्। न। कर्म्माध्यक्षः क्रियासाक्षीत्यर्थः। तर्हि साक्ष्यमस्तीति द्वैतापत्तिः। न। सर्व्वभूतानामधिष्ठानं भूत्वा साक्षी भवति, साक्ष्यमधिष्ठाने साक्षिणि कल्पितमिति भावः। साक्षिशब्दार्थमाह ॥ चेता केवल इति ॥ बोद्धृत्वे सति, अकर्त्ता साक्षीति लोकप्रसिद्धं। चकारो दोषाभावसमुच्चयार्थः, निर्गुणत्वान्निर्दोषाच्च। गुणो दोषनाशो वा संस्कारो नेत्यर्थः। स इत्यु-पक्रमात्। शुक्रादिशब्दाः पुंस्त्वेन वाच्याः, स आत्मा परि सर्व्वमगात् व्याप्तः, शुक्रो दीप्तिमान्, अकायो लिङ्गशून्यः, अव्रणोऽक्षतः, अस्ना-विरः शिराविधुरः, अनस्नर इति वा। आभ्यां पदाभ्यां स्थूलदेह-शून्यत्वमुक्तं। शुद्धो रागादिमलशून्यः, अपापविद्धः पुण्यपापाभ्यामसं-स्पृष्ट इत्यर्थः। अत इति। उत्पत्त्याप्तिविकारसंस्कारेभ्योऽन्यत् पञ्चमं क्रियाफलं नास्ति यन्मोक्षस्य क्रियासाध्यत्वे द्वारं भवेदित्यर्थः। ननु मोक्षस्यासाध्यत्वे शास्त्रारम्भो वृथा, न, ज्ञानार्थत्वादित्याह ॥ तस्मा-दिति ॥ द्वाराभावादित्यर्थः। व्याघातं शङ्कते ॥ नन्विति ॥ तथा च मोक्षे क्रियानुप्रवेशो नास्तीति व्याहतमिति भावः। मानसमपि ज्ञानं न विधियोग्या क्रिया वस्तुतन्त्रत्वात् कृत्यसाध्यत्वाच्चेत्याह ॥ नेति ॥ वैलक्षण्यं प्रपञ्चयति ॥ क्रिया हीति ॥ यत्र विषये तदनपेक्षैव या चोद्यते तत्र सा हि क्रियेति योजना विषयवस्त्वनपेक्षा, कृतिसाध्या च

हविर्गृहीतं स्यात् तां ध्यायेद्वषट्करिष्यन्' इति "सन्ध्यां मनसा ध्यायेत्" इति चैवमादिषु। ध्यानं चिन्तनं यद्यपि मानसं तथापि पुरुषेण कर्त्तुमकर्त्तुमन्यथा वा कर्त्तुं शक्यं पुरुषतन्त्रत्वात्। ज्ञानन्तु प्रमाणजन्यं, प्रमाणञ्च यथाभूतवस्तुविषयं, अतो ज्ञानं कर्त्तुमकर्त्तुमन्यथा वा कर्त्तुमशक्यं केवलं वस्तुतन्त्रमेव, तत् न चोदनातन्त्रं नापि पुरुषतन्त्रं, तस्मान्मानसत्वेऽपि ज्ञानस्य महद्वैलक्षण्यं। यथा च "पुरुषो वाव गौतमाग्निर्योषा वाव गौतमाग्निः," इत्यत्र *योषित्पुरुषयोरग्निबुद्धिर्मानसी भवति केवलचोदनाजन्यत्वात्तु क्रियैव सा पुरुषतन्त्रा च। या तु प्रसिद्धेऽग्नावग्निर्बुद्धिः न सा चोदनातन्त्रा, नापि पुरुषतन्त्रा, किं तर्हि, प्रत्यक्षविषयवस्तुतन्त्रैवेति ज्ञानमेव तन्न क्रिया। एवं सर्व्वप्रमाणविषय-

---

क्रियेत्यत्र दृष्टान्तमाह ॥ यथेति ॥ गृहीतमध्वर्युणेति शेषः। "वषट् करिष्यन् होता सन्ध्यां" देवतां इति चैवमादिवाक्येषु यथा यादृशी ध्यानक्रिया वस्त्वनपेक्षा पुरुषतन्त्रा च चोद्यते तादृशी क्रियेत्यर्थः। ध्यानमपि मानसत्वात् ज्ञानवन्न क्रियेत्यत आह ॥ ध्यानमित्यादिना ॥ तथापि क्रियैवेति शेषः। कृत्यसाध्यत्वमुपाधिरिति भावः। ध्यानक्रियामुक्त्वा ततो वैलक्षण्यं ज्ञानस्य स्फुटयति ॥ ज्ञानन्त्विति ॥ अतः प्रमात्वान्न चोदनातन्त्रं न विधेर्विषयः। पुरुषः कृतिद्वारा तन्त्रं हेतुर्यस्य तत्पुरुषतन्त्रं, तस्माद्वस्त्वव्यभिचारादपुंतन्त्रत्वाच्च ध्यानात् ज्ञानस्य महान् भेद इत्यर्थः। भेदमेव दृष्टान्तान्तरमाह ॥ यथा चेति ॥ अभेदासत्वेऽपि विधितो ध्यानं कर्त्तुं शक्यं न ज्ञानमित्यर्थः। ननु प्रत्यक्षज्ञानस्य विषयजन्यतया तत्तन्त्रत्वेऽपि शाब्दबोधस्य तदभावाद्विधेयक्रियात्वमिति नेत्याह ॥ एवं सर्व्वेऽपि ॥ शब्दानुमानाद्यर्थेष्वपि ज्ञानमविधेयक्रियात्वेन ज्ञातव्यं। तत्रापि मानादेव ज्ञानस्य प्राप्तेर्विध्ययोगादित्यर्थः।

---

* योषा वाव गौतमाग्निरिति मु० मुक्तके नास्ति।

वस्तुषु वेदितव्यं। तच्चैवं सति यथाभूतब्रह्मात्मविषयमपि ज्ञानं न चोदनातन्त्रं। अतस्तद्विषया लिङादयः श्रूयमाणा अप्यनियोज्यविषयत्वात् कुण्ठीभवन्त्युपनिषदादिषु प्रयुक्तपुरतैचण्यादिवत्, अहेयानुपादेयवस्तुविषयत्वात्। किमर्थानि तर्हि "आत्मा वा अरे द्रष्टव्यः श्रोतव्यः" इत्यादीनि विधिच्छायानि वचनानि? स्वाभाविकप्रवृत्तिविषयविमुखीकरणार्थानि इति ब्रूमः। यो हि बहिर्मुखः प्रवर्त्तते पुरुष "दृष्टं मे भूयादनिष्टं मे मा भूत्" इति, न च तत्रात्यन्तिकं पुरुषार्थं लभते। तमात्यन्तिकपुरुषार्थवाञ्छिनं स्वाभाविककार्य्यकरणसङ्घातप्रवृत्तिगोचरादिमुखीकृत्य प्रत्यगात्म-

---

तच्चैवं सति लोके ज्ञानस्याविधेयत्वे सतीत्यर्थः। यथाभूतत्वमबाधितत्वं। ननु "आत्मानं पश्येत्" "ब्रह्मत्वं विद्धि" "आत्मा द्रष्टव्यः" इति विज्ञाने लिङ्लोट्तव्यप्रत्यया विधायकाः श्रूयन्ते, अतो ज्ञानं विधेयमित्यत आह॥ तद्विषय इति॥ तस्मिन् ज्ञानरूपविषये विधयः पुरुषं प्रवर्त्तयितुं अशक्ता भवन्ति। अनियोज्यं कृत्यसाध्यं नियोज्यशून्यं वा ज्ञानं तद्विषयकत्वादित्यर्थः। "ममायं नियोगः" इति बोद्धा नियोज्यो विषयश्च विधेर्नास्तीति भावः। तर्हि ज्ञेयं ब्रह्म विधीयतां नेत्याह॥ अहेयेति॥ वस्तुस्वरूपो विषयस्तत्त्वात् ब्रह्मणो निरतिशयस्यासाध्यत्वान्न विधेयत्वमित्यर्थः। उदासीनवस्तुविषयकत्वात् ज्ञानञ्च न विधेयं, प्रवृत्त्यादिफलाभावादित्यर्थः। विधिपदानां गतिं पृच्छति॥ किमर्थानीति॥ विधिच्छायानि प्रसिद्धयागादिविधितुल्यानीत्यर्थः। विधिप्रत्ययैरात्मज्ञानं परमपुरुषार्थसाधनमिति स्तूयते स्तुत्या आत्यन्तिकेऽहेतुत्वभान्त्या या विषयेषु प्रवृत्तिः आत्मश्रवणादिप्रतिबन्धिका तन्निवृत्तिफलानि विधिपदानीत्याह॥ स्वाभाविकेति॥ विवृणोति॥ यो हीत्यादिना॥ तत्र विषयेषु सङ्घातस्य या प्रवृत्तिः तद्गोचराच्छब्दादेरित्यर्थः। स्रोतश्चित्तवृत्तिप्रवाहः। प्रवर्त्तयन्ति ज्ञानसाधनश्रवणादाविति शेषः। श्रवणस्वरूपमाह॥ तस्येति॥ अन्वेषणं ज्ञानं। यदिदं जगत्तत् सर्वं आत्मैवेत्यनात्मबाधेनात्मा बोध्यते। अद्वितीया-

नि स्रोतस्तया प्रवर्त्तयन्ति "आत्मा वा अरे द्रष्टव्यः" इत्यादीनि। तस्मात्मान्वेषणाय प्रवृत्तस्याहेयमनुपादेयं चात्मतत्त्वमुपदिश्यते "इदं सर्व्वं यदयमात्मा" "यत्र त्वस्य सर्व्वमात्मैवाभूत् तत् केन कमपश्येत् केन कं विजानीयात्" "विज्ञातारमरे केन विजानीयादयमात्मा ब्रह्म" इत्येवमादिभिः। यदप्यकर्त्तव्यप्रधानमात्मज्ञानं हानायोपादानाय वा न भवतीति तथैवेत्यभ्युपगम्यते। अलङ्कारो ह्ययमस्माकं यद्ब्रह्मात्मावगतौ सत्यां सर्व्वकर्त्तव्यताहानिः कृतकृत्यता चेति। तथा च श्रुतिः।

"आत्मानं चेद्विजानीयादयमस्मीति पूरुषः।
किमिच्छन् कस्य कामाय शरीरमनुसंज्वरेत्"॥*

इति।

"एतद्बुद्ध्वा बुद्धिमान् स्यात् कृतकृत्यश्च भारत" इति च स्मृतिः। तस्मान्न प्रतिपत्तिविधिविषयतया ब्रह्मणः समर्पणं। यदपि केचिदाहुः "प्रवृत्तिनिवृत्तिविधिनिषेधव्यतिरेकेण केवलवस्तुवादी वेदभागो नास्ति" इति। तन्न। औपनिषदस्य पुरुषस्या-

---

दृश्यात्मबोधे क्व विधिः तपस्वी दैतवनोपजीवनः क्व स्यास्यतीति भावः। आत्मज्ञानिनः कर्त्तव्याभावे मानमाह॥ तथा चेति॥ "अयं स्वयं प्रभानन्दः परमात्माहमस्मि" इति। यदि कश्चित् पुरुष आत्मानं जानीयात्तदा किं फलमिच्छन् कस्य वा भोक्तुः प्रीतये शरीरं तप्यमानमनुसंज्वरेत् तप्येत, भोक्तृभोग्यद्वैताभावात्, कृतकृत्य आत्मविदित्यभिप्रायः। स्मरदौर्लभ्यार्थश्चशब्दः। एतद् गुह्यतमं तत्त्वं वृत्तिकारमतनिरासमुपसंहरति॥ तस्मादिति॥ प्राभाकरोक्तमुपन्यस्यति॥ यदपि केचिदिति॥ कर्त्तात्मा लोकसिद्धत्वान्न वेदान्तार्थः। तदन्यत् ब्रह्म नास्त्येव

---

* संसारमनुसंसरेदित्यपि पाठः।

नन्यशेषत्वात्। योऽसावुपनिषत्स्वेवाधिगतः पुरुषोऽसंसारी ब्रह्मोत्पाद्यादिचतुर्विधद्रव्यविलक्षणः स्वप्रकरणस्थोऽनन्यशेषो नासौ नास्ति नाधिगम्यत इति वा वदितुं शक्यं "स एष नेति नेत्यात्मा" इत्यात्मशब्दात्, आत्मनश्च प्रत्याख्यातुमशक्यत्वात्। नन्वात्माहंप्रत्ययविषयत्वादुपनिषत्स्वेव विज्ञायत इत्यनुपपन्नं। न, तत्साक्षित्वेन प्रत्युक्तत्वात्। न ह्यहंप्रत्ययविषयकर्तृव्यतिरेकेण तत्साक्षी सर्व्वभूतस्थः सम एकः कूटस्थनित्यः पुरुषो विधिकाण्डे तर्कसमये वा केनचिदधिगतः सर्व्वस्यात्मा; अतः स न केनचित्

वेदस्य कार्य्यपरत्वेन मानाभावादित्यर्थः। मानाभावोऽसिद्ध इत्याह॥ नेति॥ अज्ञातस्य फलस्वरूपस्यात्मन उपनिषदेकवेद्यस्याकार्य्यशेषत्वात् कृत्स्नवेदस्य कार्य्यपरत्वमसिद्धं। न च प्रवृत्तिनिवृत्तिलिङ्गाभ्यां श्रोतुस्तद्धेतुकार्थबोधमनुमाय वक्तृवाक्यस्य कार्य्यपरत्वं निश्चित्य वाक्यस्यपदानां कार्य्यान्विते शक्तिग्रहान्न सिद्धस्य पदार्थस्य वाक्यार्थत्वमिति वाच्यं "पुत्रस्ते जातः" इति वाक्यश्रोतुः पितुर्हर्षलिङ्गेनेष्टं पुत्रजन्मानुमाय पुत्रादिपदानां सिद्धे सङ्गतिग्रहात् कार्य्यान्वितापेक्षयान्वितार्थे शक्तिरित्यङ्गीकारे लाघवात् सिद्धस्यापि वाक्यार्थत्वादित्यलं। किञ्च ब्रह्मणो नास्तित्वादेव कृत्स्नवेदस्य कार्य्यपरत्वं उत वेदान्तेषु तस्याभानात् अथ वा कार्य्यशेषत्वात् किंवा लोकसिद्धत्वादाहोस्वित् मानान्तरविरोधात्? तत्राद्यं पक्षत्रयं निराचष्टे॥ योऽसाविति॥ अनन्यशेषत्वार्थमसंसारि इत्यादि विशेषणं नास्तित्वाभावे हेतुं वेदान्तमानसिद्धत्वमुक्त्वा हेत्वन्तरमात्मत्वमाह॥ स एष इति॥ इतिरिदमर्थे "इदं न इदं न" इति सर्व्वदृश्यनिषेधेन य आत्मा उपदिष्टः स एष इत्यर्थः। चतुर्थं शङ्कते॥ नन्वात्माहमिति॥ आत्मनोऽहङ्कारादिसाक्षित्वेनाहंधीविषयत्वस्य निरस्तत्वान्न लोकसिद्धतेत्याह॥ नेति॥ यं तीर्थकरा अपि न जानन्ति तस्यालौकिकत्वं किमु वाच्यमित्याह॥ न हीति॥ समस्ततारतम्यवर्ज्जितः, तत्तन्मते आत्मानधिगतिद्योतकानि विशेषणानि। पञ्चमं निरस्यति॥ अत इति॥ केनचिदादिना प्रमाणेन नेत्यर्थः। अगम्यत्वान्न

प्रत्याख्यातुं शक्यो विधिशेषत्वं वा नेतुं य एव निराकर्त्ता तस्यैवात्मत्वात्। आत्मत्वादेव च सर्व्वेषां न हेयो नाप्युपादेयः। सर्व्वं हि विनश्यद्विकारजातं पुरुषान्तं विनश्यति। पुरुषो हि विनाशहेत्वभावादविनाशी विक्रियाहेत्वभावाच्च कूटस्थनित्योऽत एव नित्यशुद्धमुक्तस्वभावः। तस्मात् "पुरुषात् न परं किञ्चित् सा काष्ठा सा परा गतिः" "तन्त्वौपनिषदं पुरुषं पृच्छामि" इति चौपनिषदत्वविशेषणं पुरुषस्योपनिषत्सु प्राधान्येन प्रकाश्यमानत्वे उपपद्यते। अतो भूत*वस्तुपरो वेदभागो नास्तीति वचनं साहसमात्रं। यदपि शास्त्रतात्पर्य्यविदामनुक्रमणं। दृष्टो हि तस्यार्थः कर्म्मावबोधनमित्येवमादिः तद्धर्म्मजिज्ञासाविषय-

---

मानान्तरविरोध इति भावः॥ साक्षी कर्म्माङ्गचेतनत्वात् कर्त्तृवदिति तत्राह॥ विधीति॥ अज्ञातसाक्षिणोऽनुपयोगाज्ज्ञातस्य व्याघातकत्वान्न कर्म्मशेषत्वमित्यर्थः। साक्षिणः सर्व्वशेषित्वादहेयानुपादेयत्वाच्च न कर्म्मशेषत्वमित्याह॥ आत्मत्वादिति॥ अनित्यत्वेनात्मनो हेयत्वमाशङ्क्याह॥ सर्व्वं हीति॥ परिणामित्वेन हेयतां निराचष्टे॥ विक्रियेति॥ उपादेयत्वं निराचष्टे॥ अत एवेति॥ निर्विकारित्वादित्यर्थः। उपादेयत्वं हि साध्यस्य न त्वात्मनः नित्यसिद्धत्वादित्यर्थः। परप्राप्त्यर्थं आत्मा हेय इत्यत आह॥ तस्मात् पुरुषान्न परं किञ्चिदिति॥ काष्ठा सर्व्वस्यावधिः। एवमात्मनोऽनन्यशेषत्वादबाध्यत्वादपूर्व्वत्वाद्देदान्तेषु स्फुटभानाच्च वेदान्तैकवेद्यत्वमुक्तं॥ तत्र श्रुतिमाह॥ तन्त्वेति॥ तं सकारणसूत्रस्याधिष्ठानं पुरुषं पूर्णं हेयाकल्पत्वाच्चां पृच्छामीत्यर्थः। अत इति। उक्तलिङ्गैः श्रुत्या च वेदान्तानामात्मवस्तुपरत्वनिश्चयादित्यर्थः॥ पूर्व्वोक्तमनुवदति॥ यदपीति॥ वेदस्य नैरर्थक्ये शङ्किते तस्यार्थवत्तापरमिदं भाष्यं॥ दृष्टो हीति॥ तत्र फलवदर्थावबोधनमिति वक्तव्ये धर्म्मविचारप्रक्रमात् कर्म्मावबोधनमित्युक्तं नैतावता वेदान्तानां ब्रह्मपरत्वनि-

---

* भूतेति मु० पुस्तके नास्ति।

त्वाद्विधिप्रतिषेधशास्त्राभिप्रायं द्रष्टव्यं। अपि च "आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्" इत्येतदेकान्तेनाभ्युपगच्छतां भूतोपदेशानर्थक्यप्रसङ्गः प्रवृत्तिनिवृत्तिविधितच्छेष*व्यतिरेकेण भूतस्वेदस्तूपदिश्यति भव्यार्थत्वेन कूटस्थनित्यत्वं भूतं नोपदिश-

---

रासः। अत एवानुपलब्धेऽर्थे "तत्प्रमाणमिति" सूत्रकारो धर्म्मस्य फलवदज्ञातत्वेनैव वेदार्थतां दर्शयति। "तच्चावश्यं ब्रह्मणः" इति हृद्वाक्यैर्विरोध इत्याह ॥ तद्धर्म्मेति ॥ निषेधशास्त्रस्यापि निवृत्तिकार्य्यपरत्वमस्ति, तत् सूत्रभाष्यवाक्यजातं कर्म्मकाण्डस्य कार्य्यपरत्वाभिप्रायमित्यर्थः। वस्तुतस्तु लिङर्थे कर्म्मकाण्डस्य तात्पर्य्यं, लिङर्थश्च लोके प्रवर्त्तकज्ञानगोचरत्वेन क्लिप्तं यागादिक्रियागतमिष्टसाधनत्वमेव न क्रियातोऽतिरिक्तं कार्य्यं तस्य कूर्म्मलोमवदप्रसिद्धत्वादिति तस्यापि पराभिमतकार्य्यविलक्षणे सिद्धे प्रामाण्यं किमुत ज्ञानकाण्डस्येति मन्तव्यं। किञ्च। वेदान्ताः सिद्धवस्तुपराः फलवद्भूतशब्दत्वाद्दध्यादिशब्दवदित्याह ॥ अपि चेति ॥ किमक्रियार्थकशब्दानामानर्थक्यमभिधेयाभावः फलाभावो वा? आद्य आह ॥ आम्नायस्येति ॥ इति न्यायेन एतदभिधेयरहित्यं नियमेनाङ्गीकुर्व्वतां "सोमेन यजेत" "दध्ना जुहोति" इत्यादिवाक्येषु दधिसोमादिशब्दानामर्थशून्यत्वं स्यादित्यर्थः। ननु केनोक्तमभिधेयरहित्यमित्याशङ्क्याह ॥ प्रवृत्तीति ॥ कार्य्यातिरेकेण भव्यार्थत्वेन कार्य्यशेषत्वेन दध्यादिशब्दो भूतं वक्ति चेत्, तर्हि सत्यादिशब्दः कूटस्थं न वक्तीत्यत्र को हेतुः किं कूटस्थस्याक्रियात्वादुताक्रियाशेषत्वादेति प्रश्नः? ननु दध्यादेः कार्य्यान्वयित्वेन कार्य्यत्वादुपदेशः, न कूटस्थस्याकार्य्यत्वादित्याद्यमाशङ्क्य निरस्यति ॥ न हीति ॥ दध्यादेः कार्य्यत्वे कार्य्याभेदे शेषत्वहानिः। अतो भूतस्य कार्य्याद्भिन्नस्य शब्दार्थत्वं लब्धमिति भावः। द्वितीयं शङ्कते ॥ अक्रियात्वेऽपीति ॥ क्रियार्थः कार्य्यशेषपरः कूटस्थस्य त्वकार्य्यशेषत्वान्नोपदेश इति भावः। भूतस्य कार्य्यशेषत्वं शब्दार्थत्वाय फलाय वा? नाद्य इत्याह। नैष दोष इति॥ दध्यादेः कार्य्यशेषत्वे सत्यपि शब्देन वस्तुमात्रमेवोपदिष्टं न कार्य्यान्वयी

---

* तच्छेषव्यतिरेकेणेति मु० पुस्तके नास्ति।

तीति को हेतुः। न हि भूतमुपदिश्यमानं क्रिया भवति। अक्रियात्वेऽपि भूतस्य क्रियासाधनत्वात् क्रियार्थ एव भूतोपदेश इति चेत्, नैष दोषः। क्रियार्थत्वेऽपि क्रियानिर्वर्त्तनशक्तिमद्वस्तूपदिष्टमेव। क्रियार्थत्वन्तु प्रयोजनं तस्य। न चैतावता वस्त्वनुपदिष्टं भवति। यदि नामोपदिष्टं किं तव तेन स्यादिति। उच्यते, अनवगतात्मवस्तूपदेशस्य तथैव भवितुमर्हति; तदवगत्या मिथ्याज्ञानस्य संसारहेतोर्निवृत्तिः प्रयोजनं क्रियत इत्यविशिष्टमर्थवत्त्वं क्रियासाधनवस्तूपदेशेन। अपि च "ब्राह्मणो न हन्तव्यः" इति चैवमाद्यानिवृत्तिरुपदिश्यते। न च सा क्रिया नापि क्रिया-

---

शब्दार्थः। अन्वितार्थमाचे शब्दानां शक्तिग्रहणादित्यर्थः। द्वितीयमङ्गीकरोति॥ क्रियार्थत्वन्विति॥ तस्य भूतविशेषस्य दध्यादेः क्रियाशेषत्वं फलमुद्दिश्याङ्गीक्रियत इत्यर्थः, न तु ब्रह्मण इति तुशब्दार्थः। ननु भूतस्य कार्य्यशेषत्वाङ्गीकारे स्वातन्त्र्येण कथं शब्दार्थतेति तत्राह॥ न चेति॥ फलार्थं शेषत्वाङ्गीकारमात्रेण शब्दार्थत्वभङ्गो नास्तीत्यर्थः। आनर्थक्यं फलाभाव इति पक्षं शङ्कते॥ यदीति॥ यद्यपि दध्यादि स्वतो निष्फलमपि क्रियाद्वारा सफलत्वादुपदिष्टं तथापि कूटस्थब्रह्मवादिनः क्रियाद्वाराभावात् तेन दृष्टान्तेन किं फलं स्यादित्यर्थः। भूतस्य साफल्ये क्रियैव द्वारमिति न नियमः, रज्ज्वज्ञानमात्रेण साफल्यदर्शनादित्याह॥ उच्यत इति॥ तथैव दध्यादिवदेवेत्यर्थः। दध्यादेः क्रियाद्वारा साफल्यं, ब्रह्मणस्तु स्वत इति विशेषे सत्यपि वेदान्तानां सफलभूतार्थकत्वमात्रेण दध्याद्युपदेशसाम्यमित्यनवद्यं। इदानीं वेदान्तानां निषेधवाक्यवत् सिद्धार्थपरत्वमित्याह॥ अपि चेति॥ नञः प्रसज्यार्थेन सम्बन्धात् हननाभावो नञर्थः इष्टसाधनत्वं क्त्वादिप्रत्ययार्थः, इष्टस्य च नरकादुःखाभावः, तत्परिपालको हननाभाव इति निषेधवाक्यार्थः, हननाभावो दुःखाभावहेतुरित्युक्तावर्थाद्धननस्य दुःखसाधनत्वधिया पुरुषो निवर्त्तते, नात्र नियोगः कश्चिदस्ति, तस्य क्रिया तत्सा-

साधनं। अक्रियार्थानामुपदेशोऽनर्थकस्येत् "ब्राह्मणो न हन्तव्यः" इत्यादिनिवृत्त्युपदेशानामानर्थक्यं प्राप्तं, तच्चानिष्टं। न च स्वभावप्राप्तहन्त्यर्थानुरागेण नञः श्रुत्यप्राप्तक्रियार्थत्वं कल्पयितुं हननक्रियानिवृत्त्यौदासीन्यव्यतिरेकेण। नञश्चैष स्वभावो यत्

धनदध्यादिविषयत्वात्। न च हननाभावरूपा नञ्वाच्या निवृत्तिः क्रिया। अभावत्वान्नापि क्रियासाधनं। अभावस्य भावार्थहेतुत्वाद्भावार्थासत्त्वाच्चेत्यर्थः। अतो निषेधशास्त्रस्य सिद्धार्थे प्रामाण्यमिति भावः। विपक्षे दण्डमाह॥ अक्रियेति॥ ननु स्वभावतो रागतः प्राप्तेन हन्त्यर्थेनानुरागेण नञ्सम्बन्धेन हेतुना हननविरोधिनी सङ्कल्पक्रिया बोध्यते, सा च नञर्थरूपा तत्राप्राप्तत्वाद्विधीयते "अहननं कुर्यात्" इति। तथा च कार्यार्थमिदं वाक्यमित्याशङ्क्य निषेधति॥ न चेति॥ औदासीन्यं पुरुषस्य स्वरूपं, तच्च हननक्रियानिवृत्त्युपलक्षितं निवृत्तौदासीन्यं हननभाव इति यावत् तद्व्यतिरेकेण नञः क्रियार्थत्वं कल्पयितुं न च श्रुत्यमिति योजना, मुख्यार्थस्याभावस्य नञर्थत्वसम्भवे तद्विरोधिक्रियालक्षणाया अन्याय्यत्वात् निषेधवाक्यस्यापि कार्यार्थत्वे विधिनिषेधभेदविप्लवापत्तेश्चेति भावः। ननु तदभाववत्तदन्यतद्विरुद्धयोरपि नञः शक्तिः किं न स्यात्, "अब्राह्मणः अधर्म्मः" इति प्रयोगदर्शनादिति चेत्। न। अनेकार्थत्वस्यान्याय्यत्वादित्याह॥ नञश्चेति॥ नञादिशब्दानान्तु अगत्या नानार्थत्वं, स्वर्गेषुवाग्वज्रादीनां श्रुत्यप्रसम्बन्धाभावेन लक्षणानवतारात्। अन्यविरुद्धयोस्तु लक्षणत्वं युक्तं श्रुत्यसम्बन्धात्। ब्राह्मणादन्यस्मिन् क्षत्रियादौ धर्म्मविरुद्धे वा पापे ब्राह्मणाद्यभावस्य नञ् श्रुत्यस्य सम्बन्धात्, प्रकृते च आख्यातयोगात् नञ् प्रसज्यप्रतिषेध एव न पर्य्युदासलक्षक इति मन्तव्यं। यद्वा नञः प्रकृत्या न सम्बन्धः। प्रकृतेः प्रत्ययार्थोपसर्ज्जनत्वात् प्रधानसम्बन्धाच्चाप्रधानानां किन्तु प्रकृत्यर्थनिष्ठेन प्रत्ययार्थनेष्टसाधनत्वेन सम्बन्धो नञः। इष्टञ्च स्वापेक्षया बलवदनिष्टाननुबन्धि यत्तदेव न तात्कालिकसुखमात्रं विषयसंयुक्तत्वान्न भोगस्यापि इष्टत्वापत्तेः, तथा च "न हन्तव्यः" हननं बलवदनिष्टासाधनत्वे सति इष्टसाधनं न भवतीत्यर्थः। अत्र "हन्तव्यः" इति

स्वसम्बन्धिनोऽभावं बोधयति, अभावबुद्धिश्चौदासीन्यकारणं, सा च दग्धेन्धनाग्निवत् स्वयमेवोपशाम्यति, तस्मात् प्रसक्तक्रिया-निवृत्तौदासीन्यमेव "ब्राह्मणो न हन्तव्यः" इत्यादिषु प्रतिषेधार्थं मन्यामहे अन्यच्च प्रजापतिव्रतादिभ्य, तस्मात् पुरुषार्थानुपयो-

---

हनने विशिष्टेऽसाधनत्वं भ्रान्तिप्राप्तमनूद्य नेत्यभावबोधने बलवद-निष्टसाधनं हननमितिबुद्धिर्भवति, हनने तात्कालिकेऽसाधनत्वरूप-विशेषसत्त्वेन विशिष्टाभावबुद्धेर्विशेषाभावपर्य्यवसानात्। विशेषणं बलवदनिष्टासाधनत्वमिति तदभावो बलवदनिष्टसाधनत्वं नञर्थ इति पर्य्यवसन्नं तदुद्धिरौदासीन्यपरिपालिकेत्याह॥ अभावेति॥ चोऽप्यर्थः पक्षान्तरद्योती प्रकृत्यर्थाभावबुद्धिवत् प्रत्ययार्थाभावबुद्धिरपीत्यर्थः। बुद्धेः क्षणिकत्वात्तदभावे सत्यौदासीन्यात् प्रच्युतिरूपा हननादौ प्रवृत्तिः स्यात् इति तत्राह॥ सा चेति॥ यथाग्निरिन्धनं दग्ध्वा शाम्यति एवं सा नञर्थाभावबुद्धिः हननादाविष्टसाधनत्वभ्रान्तिमूलं रागेन्धनं दग्ध्वैव शाम्यतीत्यक्षरार्थः, रागनाशे क्षते प्रच्युतिरिति भावः। यद्वा रागतः प्राप्ता सा क्रिया रागनाशे स्वयमेव शाम्यतीत्यर्थः। परपक्षे तु हननविरोधिक्रिया कार्य्येत्युक्तेऽपि हननस्येष्टसाधनत्वभ्रान्त्यनिरासात् प्रच्युतिर्दुर्व्वारा। तस्मात्तदभाव एव नञर्थ इत्युपसंहरति॥ तस्मादिति॥ भावार्थाभावेन तद्विषयकक्षत्वभावात् कार्य्याभावस्तच्छब्दार्थः। यद्वेत्युक्तपक्षे निवृत्त्युपलक्षितमौदासीन्यं यस्मादिष्टिशाभावापन्नमेवेति व्याख्येयं ततः सिद्धस्यौदासीन्यस्य नञर्थसाध्यत्वोपादानार्थं निवृत्त्युप-लक्षितत्वमिति ध्येयं। तस्य वटोर्व्रतमित्यनुष्ठेयक्रियावाचिव्रतशब्देन कार्य्यमुपक्रम्य "नेक्षेतोद्यन्तमादित्यं" इति प्रजापतिव्रतमुक्तं; अत उप-क्रमबलात्तत्र नञ ईक्षणविरोधिसङ्कल्पक्रियालक्षणाङ्गीकृता एवमगौ-रसुरा अधर्म्म इत्यादौ नाम धात्वर्थयुक्तस्य नञः प्रतिषेधवाचित्वायो-गात् अन्यविरुद्धलक्षकत्वं। एतेभ्यः प्रजापतिव्रतादिभ्योऽन्यत्राभावमेव नञर्थं मन्यामहे इत्यर्थः। दुःखाभावफलके नञर्थे सिद्धे निषेधशा-स्त्रमानत्ववदेदात्मानं ब्रह्मेति मानत्वमिति भावः; तर्हीक्रियार्थानु-मानर्थक्यमिति सूत्रं किंविषयमिति तत्राह॥ तस्मादिति॥ वेदा-

मुपाख्यानादिभूतार्थवादविषयमानर्थक्याभिधानं द्रष्टव्यं। यदपुक्तं कर्त्तव्यविधनुप्रवेशमन्तरेण वस्तुमात्रमुच्यमानमनर्थकं स्यात् सप्तद्वीपा वसुमतीत्यादिवदिति तत् परिहृतं, रज्जुरियं नायं सर्प इति वस्तुमात्रकथनेऽपि प्रयोजनस्य दृष्टत्वात्। ननु श्रुतब्रह्मणोऽपि यथापूर्वं संसारित्वदर्शनात् न रज्जुस्वरूपकथनवदर्थवत्त्वमित्युक्तं। अत्रोच्यते। नावगतब्रह्मात्मभावस्य यथापूर्वं संसारित्वं शक्यं दर्शयितुं *ब्रह्मात्मभावविरोधात्। न हि, शरीराद्यात्माभिमानिनो दुःखभयादिमत्त्वं दृष्टमिति, तस्यैव वेदप्रमाणजनितब्रह्मात्मावगमे तदभिमाननिवृत्तौ तदेव मिथ्याज्ञाननिमित्तं दुःखभयादिमत्त्वं भवतीति शक्यं कल्पयितुं। न हि, धनिनो गृहस्थस्य धनाभिमानिनो धनापहारनिमित्तं दुःखं दृष्टमिति, तस्यैव प्रव्रजितस्य धनाभिमानरहितस्य तदेव धनापहारनिमित्तं दुःखं भवति। न च कुण्डलिनः कुण्डलित्वाभिमाननिमित्तं सुखं दृष्टमिति तस्यैव कुण्डलविमुक्तस्य कुण्डलित्वाभिमानरहितस्य तदेव कुण्डलित्वनिमित्तं सुखं भवति। तदुक्तं श्रुत्या "अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशत" इति। शरीरे पतिते अशरीरत्वं स्यात् न जीवत

न्तानां स्वार्थे फलवत्त्वाद्यर्थक्यविषयं तदित्यर्थः। यदपीत्यादिस्वकार्थं अबाधज्ञानमात्रात् संसारानिवृत्तावपि साक्षात्काराज्जीवत एव मुक्तिदुरपह्नवे सति दृष्टान्तमाह॥ अत्रोच्यत इत्यादिना॥ ब्रह्माहमिति साक्षात्कारे विरोधादित्यर्थः। तत्त्ववित्तो जीवन्मुक्तौ मानमाह॥

---

* वेदप्रमाणजनितेति ८ स० मु० पाठः।

दृति चेत्, न, सशरीरत्वस्य मिथ्याज्ञाननिमित्तत्वात्। न ह्यात्मनः शरीरात्माभिमानलक्षणं मिथ्याज्ञानं मुक्त्वा अन्यतः सशरीरत्वं शक्यं कल्पयितुं। नित्यमशरीरत्वं अकर्म्मनिमित्तत्वादित्यवोचाम। तत्कृतधर्म्माधर्म्मनिमित्तं सशरीरत्वमिति चेत्, न, शरीरसम्बन्धस्यासिद्धत्वाद्धर्म्माधर्म्मयोरात्मकृतत्वासिद्धेः। शरीरसम्बन्धस्य धर्म्माधर्म्मयोस्तत्कृतत्वस्य चेतरेतराश्रयत्वप्रसङ्गादन्धपरम्परैवैषा अनादित्वकल्पना क्रियासमवायाभावाच्चात्मनः कर्त्तृत्वानुपपत्तेः। सन्निधानमात्रेण राजप्रभृतीनां दृष्टं कर्त्तृत्वमिति चेन्न। धन-

---

तदुक्तं श्रुत्येति॥ जीवतोऽशरीरत्वं विरुद्धमिति शङ्कते॥ शरीर इति॥ आत्मनो देहसम्बन्धस्य भ्रान्तिप्रयुक्तत्वादतत्त्वधिया तन्नाशरूपमशरीरत्वं जीवतो युक्तमित्याह॥ नेत्यादिना॥ असङ्गात्मरूपत्वशरीरत्वं तत्त्वधिया जीवतो व्यज्यत इत्याह॥ नित्यमिति॥ देहात्मनोः सम्बन्धः सत्य इति शङ्कते॥ तत्कृतेति॥ तन्नाशार्थं कार्य्यमपेक्षेति भावः। आत्मनः शरीरसम्बन्धे जाते धर्म्माधर्म्मोत्पत्तिः, तस्यां सत्यां सम्बन्धजन्मेत्यन्योन्याश्रयादेकस्यासिद्धा द्वितीयस्यासिद्धिः स्यादिति परिहरति॥ नेत्यादिना॥ नन्वेतद्देहजन्यधर्म्माधर्म्मकर्म्मणा एतद्देहसम्बन्धहेतुत्वे स्यादन्योन्याश्रयः, पूर्व्वदेहकर्म्मणा एतद्देहसम्बन्धोत्पत्तिः, पूर्व्वदेहस्य तत्पूर्व्वदेहकर्म्मणा एतद्देहसम्बन्धोत्पत्तिः, पूर्व्वदेहस्य पूर्व्वदेहकृतकर्म्मणा इति बीजाङ्कुरवदनादित्वान्नायं दोष इत्यत आह॥ अन्येति॥ अप्रामाणिकीत्यर्थः। न हि बीजादङ्कुरः ततो बीजान्तरञ्च यथा प्रत्यक्षेण दृश्यते तद्वदात्मनो देहसम्बन्धः पूर्व्वकर्म्मकृतः प्रत्यक्षः, नाप्यस्ति कश्चिदागमः प्रत्युतासङ्गो ह्येत्यादिः श्रुतिः सर्व्वकर्त्तृत्वं वारयतीति भावः। तत्र युक्तिमाह॥ क्रियेति॥ कूटस्थस्य कृत्ययोगान्न कर्त्तृत्वमित्यर्थः। स्वतो निष्क्रियस्यापि कारकसन्निधिना कर्त्तृत्वमिति शङ्कां दृष्टान्तवैषम्येण निरस्यति॥ नेति॥ राजादीनां स्वक्रीतभृत्यकार्य्ये कर्त्तृत्वं युक्तं नात्मन इत्यर्थः। देहकर्म्मणोरविद्याभूमौ बीजाङ्कुरवदावर्त्तमानयो-

दानाद्युपार्ज्जितभृत्यसम्बन्धित्वात्तेषां कर्तृत्वोपपत्तेर्न त्वात्मनो धनदानादिवच्छरीरादिभिः स्वस्वामिसम्बन्धनिमित्तं किञ्चिच्चकं कल्पयितुं। मिथ्याभिमानस्तु प्रत्यक्षः सम्बन्धहेतुः। एतेन यजमानत्वमात्मनो व्याख्यातं। अत्राऽऽहुः, देहादिव्यतिरिक्तस्यात्मन आत्मीये देहादावभिमानो गौणो न मिथ्येति। न। प्रसिद्धवस्तुभेदस्य गौणत्वमुख्यत्वप्रसिद्धेः। यस्य हि प्रसिद्धो वस्तुभेदो यथा केशरादिमानाकृतिविशेषेऽन्वयव्यतिरेकाभ्यां सिंहशब्दप्रत्ययभाङ्मुख्योऽन्यः प्रसिद्धस्तदन्यः पुरुषः प्रायिकैः क्रौर्य्यशौर्य्यादिभिः सिंहगुणैः सम्पन्नः सिद्धः, तस्य पुरुषे सिंहशब्दप्रत्ययौ गौणौ भवतः नाप्रसिद्धवस्तुभेदस्य तस्य त्वन्यत्वान्यशब्दप्रत्ययौ भ्रान्तिनिमित्तावेव भवतः, न गौणौ। यथा मन्दान्धकारे "स्थाणुरयं" इत्यगृह्यमाणविशेषे पुरुषशब्दप्रत्ययौ स्थाणुविषयौ। यथा वा, शुक्तिकायामकस्मात् "रजतमिदं" इति निश्चितशु-

---

रात्मना सम्बन्धो भ्रान्तिकृत एवेत्याह॥ मिथ्येति॥ ननु "यजेत" इति विध्यनुपपत्त्यात्मनः कर्तृत्वमेवेत्यमिति तत्राह॥ एतेनेति॥ भ्रान्तिकृतेन देहादिसम्बन्धेन यागादिकर्तृत्वमात्मन्यबोधाद्व्याख्यातमित्यर्थः॥ अत्राऽऽहुः॥ प्राभाकरा इत्यर्थः। भ्रान्त्यभावाद्देहसम्बन्धादिकं सत्यमिति भावः भेदज्ञानाभावान्न गौण इत्याह॥ नेति॥ प्रसिद्धो ज्ञातो वस्तुनोर्भेदो येन तस्य गौणमुख्यज्ञानाश्रयत्वप्रसिद्धेरित्यर्थः। यस्य तस्य पुंसो गौणौ भवतः इत्यन्वयः। शौर्य्यादिगुणविषयावित्यर्थः॥ तस्य त्विति॥ भेदज्ञानशून्यस्य पुंस इत्यर्थः शब्दप्रत्ययाविति॥ शब्दः शाब्दबोधश्चेत्यर्थः संशयमूलौ तावुदाहरति॥ यथा मन्देति॥ यदा संशयमूलयोर्न गौणत्वं तदा भ्रान्तिमूलयोः किं वाच्यमित्याह॥ यथा वेति॥ अकस्मादिति॥ अतर्कितादृष्टादिना संस्कारोद्बोधे सतीत्यर्थः। निरुपचारेण गुणज्ञानं विनेत्यर्थः। देहादिव्यतिरिक्तात्मास्तित्ववादिनामिति, देहा-

ब्दप्रत्ययौ तद्देहादिसङ्घातेऽहमिति निरुपचारेण शब्दप्रत्ययावात्मानात्मा*विवेकेनोत्पद्यमानौ कथं गौणौ शक्यौ वदितुं। आत्मानात्मविवेकिनामपि पण्डितानामजाविपालानामिवाविविक्तौ शब्दप्रत्ययौ भवतः। तस्माद्देहादिव्यतिरिक्तात्मास्तित्ववादिनां देहादावहंप्रत्ययो मिथ्यैव न गौणः, तस्मान्मिथ्याप्रत्ययनिमित्तत्वात् सशरीरत्वस्य सिद्धं जीवतोऽपि विदुषोऽशरीरत्वं। तथा च ब्रह्मविद्विषया श्रुतिरुदाहृता "अहिर्निर्ल्वयनी वल्मीके मृतप्रत्यस्ता शयीतैवमेवेदं शरीरं शेते अथायमशरीरोऽमृतः प्राणो ब्रह्मैव तेज एव" इति। "सचक्षुरचक्षुरिव सकर्णोऽकर्ण इव सवाग्वागिव समना अमना इव सप्राणोऽप्राण इव" इति च। स्मृतिरपि च "स्थितप्रज्ञस्य का भाषा" इत्याद्या स्थितप्रज्ञलक्षणान्याचक्षाणा विदुषः सर्वप्रवृत्त्यसम्बन्धं दर्शयति। तस्मान्नावगतब्रह्मात्मभावस्य यथापूर्वं संसारित्वं। यस्य तु यथापूर्वं संसा-

---

त्मवादिनान्तु नेत्यभिमान इति भावः। जीवन्मुक्तौ प्रमाणमाह॥ तथा चेति॥ तच्च जीवन्मुक्तस्य देहे यथा दृष्टान्तः। अहिर्निर्ल्वयनी सर्पत्वक् वल्मीकादौ प्रत्यस्ता निक्षिप्ता मृतसर्पस्य त्वक्त्वाभिमाना वर्त्तते, एवमेवेदं विदुषा त्वक्त्वाभिमानं शरीरं तिष्ठति। अथ तथा त्वचा निर्मुक्तसर्पवदेवायं देहस्थोऽशरीरः, विदुषो देहसर्पस्य त्वचीवाभिमानाभावादशरीरत्वादमृतः प्राणितीति प्राणो जीवन्नपि ब्रह्मैव किं तद्ब्रह्म तेजः स्वयं ज्योतिरानन्द एवेत्यर्थः, वस्तुतोऽचक्षुरपि बाधितचक्षुराद्यनुवृत्त्या सचक्षुरित्येवादि बोध्यं॥ इत्यनवद्यमिति॥ ब्रह्मात्मभावानामुक्तिलाभात् सिद्धं वेदान्तानां प्रामाण्यं हितप्राप्तनाच्छास्त्रत्वञ्च निर्दो-

---

* विवेकिनः इति मु० मु० पाठः।

रित्वं नामावगतब्रह्मात्मभाव इत्यनवद्यं। यत्तु पुनरुक्तं अवणात् पराचीनयोर्मननिदिध्यासनयोर्दर्शनादिविधिशेषत्वं ब्रह्मणो न स्वरूपपर्य्यवसायित्वमिति, न, अवगत्यर्थत्वात् मननिदिध्यासनयोः। यदि ह्यवगतं ब्रह्मान्यत्र विनियुज्येत भवेत् तदा विधिशेषत्वं। न तु तदस्ति, मननिदिध्यासनयोरपि अवणवदवगत्यर्थत्वात्। तस्मान्न प्रतिपत्तिविधिविषयतया शास्त्रप्रमाणकत्वं ब्रह्मणः सम्भवतीत्यतः स्वतन्त्रमेव ब्रह्म शास्त्रप्रमाणकं वेदान्त-

---

यतया स्थितमित्यर्थः। ब्रह्मज्ञानमुद्दिश्य अवणवन्मननिदिध्यासनयोरप्यवान्तरवाक्यभेदेन विधिस्वीकारान्न ब्रह्मणो विधिशेषत्वमुद्दिश्य ज्ञानलभ्यतया प्राधान्यादित्याह॥ नेति॥ अवणं ज्ञानकरणवेदान्तगोचरत्वात् प्रधानं मननिदिध्यासनयोः प्रमेयगोचरत्वात्तदङ्गत्वं नियमादृष्टस्य ज्ञान उपयोगः सर्व्वापेक्षान्यायादिति मन्तव्यं। तर्हि ज्ञाने विधिः किमिति त्यक्तस्तत्राह॥ यदि हीति॥ यदि ज्ञाने विधिमङ्गीकृत्य वेदान्तैरवगतं ब्रह्मविधेयसत्यादिवाक्यैर्लब्धज्ञानेनाज्ञाननिवृत्तिरूपफललाभे सतीत्यर्थः ज्ञाने कर्म्म कारकत्वेन विनियुज्येत तदा विधिशेषत्वं स्यात्। न त्ववगतस्य विनियुक्तत्वमस्ति, प्रमावगत्या फललाभे विध्ययोगादित्यर्थः॥ तस्माद्विध्यसम्भवात्। अतः शेषत्वासम्भवात्॥ सूत्रं योजयति॥ स्वतन्त्रमिति॥ एवञ्च सतीति। चोवधारणे उक्तरीत्या ब्रह्मणः स्वातन्त्र्ये सत्येव भगवतो व्यासस्य पृथक्शास्त्रकृतिर्युक्ता, धर्म्मविलक्षणप्रमेयलाभात् वेदान्तानां कार्य्यपरत्वे तु प्रमेयाभेदान्न युक्तेत्यर्थः। ननु मानसधर्म्मविचारार्थं पृथगारम्भ इत्याशङ्क्याह॥ आरभ्यमाणञ्चेति॥ अथ बाह्यसाधनधर्म्मविचारानन्तरं अतो बाह्यधर्म्मस्य शुद्धिद्वारा मानसोपासना धर्म्महेतुत्वात् परिशिष्टो मानसधर्म्मो जिज्ञास्य इति सूत्रं स्यादित्यत्र दृष्टान्तमाह॥ अथेति॥ तृतीयाध्याये श्रुत्यादिभिः शेषशेषित्वनिर्णयानन्तरं शेषिणाशेषस्य प्रयोगसम्भवात् कः क्रतुशेषः को वा पुरुषशेष इति जिज्ञास्यत इत्यर्थः। एवमारभ्येत नेत्यारब्धं तस्मादवान्तरधर्म्मार्थमारम्भ इत्ययुक्तमिति

वाक्यसमन्वयादिति सिद्धं, एवञ्च सत्यथातो ब्रह्मजिज्ञासेति शास्त्रारम्भ उपपद्यते। प्रतिपत्तिविधिपरत्वे हि अथातो धर्मजिज्ञासेत्येवारभ्यत्वान्न पृथक्शास्त्रमारभ्येत, आरभ्यमानं चैवं आरभ्येत अथातः परिशिष्टधर्मजिज्ञासेत्यथातः क्रत्वर्थपुरुषार्थयोर्जिज्ञासेतिवत् ब्रह्मात्मैक्यावगतिस्वप्रतिज्ञातेति, तदर्थो युक्तः शास्त्रारम्भोऽथातो ब्रह्मजिज्ञासेति। तस्मादहं ब्रह्मास्मीत्येतदवसाना एव सर्वे विधयः सर्व्वाणि चेतराणि प्रमाणानि। न ह्यहेयानुपादेयादैतात्मावगतौ निर्विषयाण्यप्रमाणकाणि प्रमाणानि भवितुमर्हन्तीति। अपि चाऽऽहुः॥

"गौणमित्यात्मनोऽसत्वे पुत्रदेहादिबाधनात्।
सत् ब्रह्मात्माहमित्येवंबोधे कार्य्यं कथं भवेत्॥
अन्वेष्टव्यात्मविज्ञानात् प्राक् प्रमाणत्वमात्मनः।
अन्विष्टः स्यात् प्रमातैव पाप्मदोषादिवर्ज्जितः॥
देहात्मप्रत्ययो यद्वत् प्रमाणत्वेन कल्पितः।
लौकिकं तद्वदेवेदं प्रमाणं त्वात्मनिश्चयात्" इति॥

चतुःसूत्री समाप्ता॥*

भावः। स्वमते सूत्रानुगुण्यमस्तीत्याह॥ ब्रह्मेति॥ जैमिनिना ब्रह्म न विचारितमिति तज्जिज्ञास्यत्वसूचनं युक्तमित्यर्थः। वेदार्थश्चेद्दैतं तर्हि द्वैतसापेक्षविध्यादीनां का गतिरित्याशङ्क्य, ज्ञानात् प्रागेव तेषां प्रामाण्यं न पश्चादित्याह॥ तस्मादिति॥ ज्ञानस्य प्रमेयप्रमाणबाधकत्वादित्यर्थः। ब्रह्म न कार्य्यशेषः तद्बोधात् प्रागेव सर्व्वव्यवहार इत्यत्र ब्रह्मविदां गाथामुदाहरति॥ अपि चेति॥ सदबाधितं ब्रह्म पूर्णमा-

---

* ८ अङ्कपुस्तके चतुःसूत्रीसमाप्तेति पाठो नास्ति।

एवं तावद्वेदान्तवाक्यानां ब्रह्मात्मावगतिप्रयोजनानां ब्रह्मात्मनि* तात्पर्य्येण समन्वितानामन्तरेणापि कार्य्यानुप्रवेशं ब्रह्मणि पर्य्यवसानमुक्तं। ब्रह्म च सर्व्वज्ञं सर्व्वशक्ति जगदुत्पत्तिस्थितिनाशकारणमित्युक्तं। साङ्ख्यादयस्तु परिनिष्ठितं वस्तु प्रमाणान्तर-

---

त्मा विषयानादृत्त इति सर्व्वसाक्ष्यहमित्येवम्बोधे जाते सति पुत्रदेहादेः सत्ताबाधनात् मायामात्रत्वनिश्चयात् पुत्रदारादिभिरहमिति स्वीयदुःखसुखभाक्त्वगुणयोगाद्वौणात्माभिमानस्य "नरोऽहं कर्त्ता मूढः" इति मिथ्यात्माभिमानस्य च सर्व्वव्यवहारहेतोरसत्वे कार्य्यं विधिनिषेधादिव्यवहारः कथं भवेत्, हेत्वभावात् न कथञ्चिद्भवेदित्यर्थः। नन्वहं ब्रह्मेति बोधो बाधितः, अहमर्थस्य प्रमातुः ब्रह्मत्वायोगादित्याशङ्क्य, प्रमातृत्वस्याज्ञानविलसितान्तःकरणतादात्म्यकृतत्वान्न बाध इत्याह॥ अन्वेष्टव्यः इति॥ "य आत्मापहतपाप्मा विरजा विमृत्युर्विशोकः सोऽन्वेष्टव्यः" इति श्रुतेः ज्ञातव्यपरमात्मविज्ञानात् प्रागेवाज्ञानाच्चिद्धातोरात्मनः प्रमातृत्वं, प्रमातैव ज्ञातः सन् पाप्मरागद्वेषमरणविवर्जितः परमात्मा स्यादित्यर्थः। प्रमातृत्वस्य कल्पितत्वे तदाश्रितानां प्रमाणानां प्रामाण्यं कथमित्यत आह॥ देहेति॥ यथा देहात्मप्रत्ययः कल्पितो भ्रमेऽपि व्यवहाराङ्गतया मानत्वेनेष्यते वैदिकैः, तद्वल्लौकिकमध्यक्षादिकमात्मबोधावधिव्यवहारकाले बाधाभावात् व्यावहारिकं प्रामाण्यमिष्यतां, वेदान्तानान्तु कालत्रयाबाध्यबोधितत्वात् तत्त्ववेदकं प्रामाण्यमिति तु प्रत्यर्थः॥ आत्मनिश्चयात्॥ आत्मनिश्चयादित्यादमर्य्यादायां। प्रमातृत्वस्य कल्पितत्वेऽपि विषयाबाधात् प्रामाण्यमिति भावः।

"रामनाम्नि परे धाम्नि कृत्वाम्नायसमन्वयः।
कार्य्यतात्पर्य्यबाधेन साधितः शुद्धबुद्धये"॥

कृत्तमनूद्याक्षेपलक्षणमवान्तरसङ्गतिमाह॥ साङ्ख्यादयश्चेति॥ भवतु सिद्धे वेदान्तानां समन्वयः, तथापि मानान्तरायोग्ये ब्रह्मणि शक्तियहायोगात् कूटस्थत्वेन अविकारित्वेन कारणत्वायोगाच्च न समन्वयः, किन्तु सर्गाद्यं कार्य्यं जडप्रकृतिकं कार्य्यत्वात् घटवत् इत्यनुमानगम्ये

---

* ब्रह्मात्मनीति पाठो मुद्रितपुस्तके नास्ति।

गम्यमेवेति मन्यमानाः प्रधानादीनि कारणान्तराण्यनुमिमानास्तत्परतयैव वेदान्तवाक्यानि योजयन्ति। सर्व्वेष्वेव तु वेदान्तवाक्येषु सृष्टिविषयेषु अनुमानेनैव कार्य्येण कारणं लिलक्षयिषितं। प्रधानपुरुषसंयोगा नित्यानुमेया इति साङ्ख्या मन्यन्ते। काणादास्त्वेतेभ्य एव वाक्येभ्य ईश्वरं निमित्तकारणमनुमिमते, अणूंश्च समवायिकारणं। एवं अन्येऽपि तार्किका वाक्याभासयुक्त्याभासावष्टम्भाः पूर्व्वपक्षवादिन दृहोक्तिष्ठन्ते। तत्र पदवाक्यप्रमाणज्ञेनाचार्य्येण वेदान्तवाक्यानां ब्रह्मावगतिपरत्वप्रदर्शनाय वाक्याभासयुक्त्याभासप्रतिपत्तयः पूर्व्वपक्षीकृत्य निराक्रियन्ते। तत्र साङ्ख्याः प्रधानं त्रिगुणमचेतनं जगतः कारणमिति

त्रिगुणे प्रधाने समन्वय इत्याक्षिपन्तीत्यर्थः। सिद्धं मानान्तरगम्यमेवेत्याग्रहः शक्तिग्रहार्थः, अत एव प्रधानादावनुमानोपस्थिते शक्तिग्रहसम्भवात् तत्परतया वाक्यानि योजयन्तीत्युक्तं। किञ्च "तेजसा सोम्य शुङ्गेन सन्मूलमन्विच्छ" इत्याद्याः श्रुतयः। शुङ्गेन लिङ्गेन कारणस्य खतोऽन्वेषणं दर्शयन्तो मानान्तरसिद्धमेव जगत्कारणं वदन्तीत्याह॥ सर्व्वेष्विति॥ नन्वतीन्द्रियत्वेन प्रधानादेर्व्याप्तिग्रहायोगात् कथमनुमानं तत्राह॥ प्रधानेति॥ यत्कार्य्यं तज्जडप्रकृतिकं यथा घटः, यज्जडं तच्चेतनसंयुक्तं यथा रथादिरिति सामान्यतोदृष्टानुमानगम्याः प्रधानपुरुषसंयोगा इत्यर्थः। अद्वितीयब्रह्मणः कारणत्वविरोधिमतान्तरमाह॥ काणादास्त्विति॥ सृष्टिवाक्येभ्य एव परार्थानुमानरूपेभ्यो यत् कार्य्यं तत् बुद्धिमत्कर्त्तृकमिति। ईश्वरं कर्त्तारं परमाणूंश्च यत् कार्य्यद्रव्यं तत् स्वन्यूनपरिमाणद्रव्यारब्धमित्यनुमिमत इत्यर्थः। अन्येऽपि बौद्धादयः "असद्वा इदमग्र आसीत्" इत्यादिवाक्याभासः। यदस्तु तच्छून्यावसानं यथा दीप इति युक्त्याभासः। एवं वादिविप्रतिपत्तिमुक्त्वा तन्निरासायोत्तरग्रन्थसन्दर्भमवतारयति॥ तत्रेति॥ वादिविवादे सतीत्यर्थः॥ व्याकरणमीमांसान्यायनिधित्वात् पदवाक्यप्रमाणज्ञत्वं यज्जगत्कारणं तच्चे-

मन्यमाना आहुः "यानि वेदान्तवाक्यानि सर्व्वज्ञस्य सर्व्वशक्तेर्ब्रह्मणो जगत्कारणत्वं प्रदर्शयन्ति, इत्यवोचस्तानि प्रधानकारणपक्षेऽपि योजयितुं शक्यन्ते। सर्व्वशक्तित्वं तावत् प्रधानस्यापि स्वविकारविषयमुपपद्यते, एवं सर्व्वज्ञत्वमुपपद्यते। कथं। यत्त्वं ज्ञानं मन्यसे स सत्त्वधर्म्मः "सत्त्वात् सञ्जायते ज्ञानम्" इति स्मृतेः। तेन च सत्त्वधर्म्मेण ज्ञानेन कार्य्यकारणवन्तः पुरुषाः सर्व्वज्ञा योगिनः प्रसिद्धाः, सत्त्वस्य हि निरतिशयोत्कर्षे सर्व्वज्ञत्वं प्रसिद्धं। न च केवलस्याकार्य्यकरणस्य पुरुषस्योपलब्धिमात्रस्य सर्व्वज्ञत्वं किञ्चिज्ज्ञत्वं वा कल्पयितुं शक्यं, त्रिगुणत्वात्तु प्रधानस्य सर्व्वज्ञानकारणभूतं सत्त्वं प्रधानावस्थायामपि विद्यते, इति प्रधानस्याचेतनस्यैव मतः सर्व्वज्ञत्वमुपचर्य्यते वेदान्तवाक्येषु। अवश्यञ्च त्वयापि सर्व्वज्ञं ब्रह्माभ्युपगच्छता सर्व्वज्ञानशक्तिमत्त्वेनैव सर्व्वज्ञत्वमभ्युपगन्तव्यं। न हि सर्व्वविषयं ज्ञानं कुर्व्वदेव ब्रह्म वर्त्तते। तथा हि ज्ञानस्य

तनमचेतनं वेति ईक्षणस्य मुख्यत्वगौणत्वाभ्यां संशये पूर्व्वपक्षमाह॥ तच्च साङ्ख्या इति॥ अपिशब्दावेवकारार्थौ स देवेत्यादिस्थब्रह्मलिङ्गवाक्यानां प्रधानपरत्वनिरासेन ब्रह्मपरत्वोक्तेः श्रुत्यादिसङ्गतयः। पूर्व्वपक्षे जीवस्य प्रधानैक्योपपत्तिः सिद्धान्ते ब्रह्मैक्यज्ञानमिति विवेकः। अचेतनसत्त्वस्यैव सर्व्वज्ञत्वं, न चेतनस्येत्याह॥ तेन चासत्त्वधर्म्मेणेति॥ न केवलस्येति जन्यज्ञानस्य सत्त्वधर्म्मत्वात् नित्योपलब्धेरकार्य्यत्वाच्चिन्मात्रस्य न सर्व्वज्ञानकर्त्तृत्वमित्यर्थः। ननु गुणानां साम्यावस्थायां सत्त्वस्योत्कर्षाभावात् कथं सर्व्वज्ञतेत्याह॥ त्रिगुणत्वादिति॥ त्रयो गुणा एव प्रधानं तस्य साम्यावस्था तदभेदात् प्रधानमित्युच्यते॥ तदवस्थायामपि प्रलये सर्व्वज्ञानशक्तिमत्त्वरूपं सर्व्वज्ञत्वमक्षतमित्यर्थः। ननु मया किमिति शक्तिमत्त्वरूपं गौणं सर्व्वज्ञत्वमङ्गीकार्य्यमिति तत्राह॥ न हीति॥

नित्यत्वे ज्ञानक्रियां प्रति स्वातन्त्र्यं ब्रह्मणो हीयेत। अथानित्यं तदिति ज्ञानक्रियाया उपरमे उपरमेतापि ब्रह्म। तदा सर्व्वज्ञानशक्तिमत्त्वेनैव सर्व्वज्ञत्वमापतति। अपि च प्रागुत्पत्तेः सर्व्वकारकशून्यं ब्रह्मोच्यते त्वया। न च ज्ञानसाधनानां शरीरेन्द्रियादीनामभावे ज्ञानोत्पत्तिः कस्यचिदुपपन्ना। अपि च प्रधानस्यानेकात्मकस्य परिणामसम्भवात् कारणलोपपत्तिः मृदादिवत् नामंहतस्यैकात्मकस्य ब्रह्मणः" इत्येवं प्राप्ते इदं सूत्रमारभते॥

ईक्षतेर्नाशब्दं॥ ५॥

न साङ्ख्यपरिकल्पितमचेतनं प्रधानं जगतः कारणं शक्यं वेदान्तेष्वाश्रयितुं। अशब्दं हि तत्। कथमशब्दं। ईक्षतेः ईक्षित्वश्रवणात् कारणस्य। कथं। एवं हि श्रूयते "सदेव सोम्येदमग्र आसीत्" "एकमेवाद्वितीयं" इत्युपक्रम्य "तदैक्षत बहु स्यां प्रजायेय" इति "तत्तेजोऽसृजत" इति तचेदं शब्दवाच्यं नामरूपव्याकृतं जगत् प्रागुत्पत्तेः सदात्मनावधार्य्य तस्यैव प्रकृतस्य सच्छब्दवाच्यस्येक्षणपूर्व्वकतेजःप्रभृतेः स्रष्टृत्वं दर्शयति। तथाच अन्यच "आत्मा वा इदमेक एवाग्र आसीन्नान्यत् किञ्चनमिषत्

अनित्यज्ञानस्य प्रलये नाशात् शक्तिमत्त्वं वाच्यं कारकाभावाचेत्याह॥ अपि चेति॥ ब्रह्मणः कारणत्वं स्मृतिपादे समर्थ्यते प्रधानादेः कारणत्वं तर्कपादे युक्तिभिर्निरस्यति। अधुना तु श्रुत्या निरस्यति॥ ईक्षतेर्नाशब्दमिति॥ ईक्षणश्रवणात् वेदशब्दावाच्यमशब्दं प्रधानं। अशब्दत्वान्न कारणमिति सूत्रयोजना। तत् सच्छब्दवाच्यं कारणमैक्षत ईक्षणमेवाह॥ बहिति॥ बहुप्रजास्वरूपेण स्थित्यर्थमहमेवोपादानतया

स ऐक्षत लोकान्नु सृजा इति" "स इमाल्लोकानसृजत" इति ईक्षापूर्व्विकामेव सृष्टिमाचष्टे। क्वचिच्च षोडशकलं पुरुषं प्रस्तुत्याह "स ईक्षाञ्चक्रे स प्राणमसृजत" इति। ईक्षतेरिति च धात्वर्थनिर्देशोऽभिप्रेतः यजतेरितिवत् न धातुनिर्देशः। तेन "यः सर्व्वज्ञः सर्व्वविद्यस्य ज्ञानमयं तपः तस्मादेतद्ब्रह्म नामरूपमन्नञ्च जायते" इत्येवमादीन्यपि सर्व्वज्ञेश्वरकारणपराणि वाक्यानि उदाहर्त्तव्यानि। यत्तु उक्तं सत्त्वधर्म्मेण ज्ञानेन सर्व्वज्ञं प्रधानं भविष्यतीति, तन्नोपपद्यते। न हि प्रधानावस्थायां गुणसाम्यात् सत्त्वधर्म्मो ज्ञानं सम्भवति। ननूक्तं सर्व्वज्ञानशक्तिमत्त्वेन सर्व्वज्ञं भविष्यतीति। तदपि नोपपद्यते। यदि गुणसाम्ये सति सत्त्वव्यपाश्रयां ज्ञानशक्तिमाश्रित्य सर्व्वज्ञं प्रधानमुच्येत कामं

कार्य्याभेदाज्जनिष्यामीत्याह॥ प्रेति॥ एवं तत् सदीक्षित्वा आकाशं वायुञ्च सृष्ट्वा तेजः सृष्टवदित्याह॥ तदिति॥ मिश्रचलत् सत्त्वाक्रान्तमिति यावत्। "सजीवाभिन्नः परमात्मा" "प्राणमसृजत प्राणाच्छ्रद्धां खं वायुर्ज्योतिरापः पृथिवीन्द्रियं मनोऽन्नमन्नाद्वीर्य्यं तपो मन्त्राः कर्म्म लोकाः लोकेषु नाम च" इत्युक्ताः षोडशकलाः, ननु इक्षितपौ धातुनिर्देशे इति कात्यायनस्मरणादीक्षतेरिति यदेन तिबन्तेन धातुरुच्यते। तन धात्वर्थ ईक्षणं कथं व्याख्यायत इत्याशङ्क्य लक्षणयेत्याह॥ ईक्षतेरिति चेति॥ इतिकर्त्तव्यताविधेर्यजतेः पूर्व्वत्वमिति जैमिनिसूत्रे यथा यजतिपदेन लक्षणया धात्वर्थो याग उच्यते तद्वदिहापीत्यर्थः सौर्य्यादिविकृतियागस्याङ्गानामविधानात् पूर्व्ववत्त्वं दर्शादिप्रकृतिस्थाङ्गवत्त्वमिति सूत्रार्थः। धात्वर्थनिर्देशेन लाभमाह॥ तेनेति॥ सामान्यतः सर्व्वज्ञो विशेषतः सर्व्वविदिति भेदः ज्ञानमीक्षणमेव तपः। तपस्विनः फलमाह॥ तस्मादिति॥ एतत्कार्य्यं सूत्राख्यं ब्रह्म। केवलसत्त्ववृत्तेर्ज्ञानत्वमङ्गीकृत्य प्रधानस्य सर्व्वज्ञत्वं निरस्तं। सम्प्रति न केवलजडवृत्ति-

रजस्तमोव्यपाश्रयामपि ज्ञानप्रतिबन्धकशक्तिमाश्रित्य किञ्चिज्ज्ञत्वमुच्यते। अपि च नासाक्षिका सत्त्ववृत्तिर्जानाति नाभिधीयते। न चाचेतनस्य प्रधानस्य साक्षित्वमस्ति। तस्मादनुपपन्नं प्रधानस्य सर्व्वज्ञत्वं। योगिनान्तु चेतनत्वात् सर्व्वोत्कर्षनिमित्तं सर्व्वज्ञत्वमुपपन्नमित्यनुदाहरणं। अथ पुनः साक्षिनिमित्तमीक्षितृत्वं प्रधानस्य कल्प्येत यथाग्निनिमित्तमयःपिण्डादेर्दग्धृत्वं। तथा सति यन्निमित्तमीक्षितृत्वं प्रधानस्य तदेव सर्व्वज्ञं मुख्यं ब्रह्म जगतः कारणमिति युक्तं। यत् पुनरुक्तं ब्रह्मणोऽपि न मुख्यं सर्व्वज्ञत्वमुपपद्यते, नित्यज्ञानक्रियत्वे ज्ञानक्रियां प्रति ख्यातच्या सम्भवादित्येवोच्यते। इदं तावद्भवान् प्रष्टव्यः कथं नित्यज्ञानक्रियत्वे सर्व्वज्ञत्वहानिरिति; यस्य हि सर्व्वविषयावभासनक्षमं ज्ञानं नित्यमस्ति सो सर्व्वज्ञ इति विप्रतिषिद्धं; अनित्यत्वे हि ज्ञानस्य कदाचित् जानाति कदाचिन्न जानाति, इत्यसर्व्वज्ञत्वमपि स्यात्, नासौ ज्ञाननित्यत्वे दोषोऽस्ति। ज्ञाननित्यत्वे ज्ञानविषयः ख्यातव्यव्यपदेशो नोपपद्यत इति चेत्, न प्रततोष्णप्रकाशेऽपि सवितरि दहति प्रकाशति, इति ख्यातव्यव्यपदेशदर्शनात्। ननु सवितुर्दाह्यप्रकाश्यसंयोगे सति दहति प्रकाशतीति व्यपदेशः

ज्ञानशब्दार्थः किन्तु साक्षिबोधविशिष्टा वृत्तिर्वृत्तिव्यक्तबोधो वा ज्ञानं। तच्चाज्ञस्य प्रधानस्य नास्तीत्याह ॥ अपि चेति ॥ साक्षित्वमस्ति येनोक्तज्ञानवत्त्वं स्यादिति शेषः। ननु सत्त्ववृत्तिमात्रेण योगिनां सर्व्वज्ञत्वमुक्तमित्यत आह ॥ योगिनान्त्विति ॥ सेश्वरसाङ्ख्यमतमाह ॥ अथेति ॥ सर्व्वज्ञत्वं नाम सर्व्वगोचरज्ञानवत्त्वं न ज्ञानकर्तृत्वं ज्ञानस्य ज्ञेयसाध्यत्वादिति हृदि कृत्वा पृच्छति ॥ इदं तावदिति ॥ सर्व्वं जानातीति

स्यात्, न तु ब्रह्मणः प्रागुत्पत्तेर्ज्ञानकर्म्मसंयोगोऽस्तीति विषमो दृष्टान्तः। नासत्यपि कर्म्मणि सविता प्रकाशत इति कर्तृत्वव्यपदेशदर्शनादेवममत्यपि ज्ञानकर्म्मणि ब्रह्मणस्तदैक्षतेति कर्तृत्वव्यपदेशोपपत्तेर्न वैषम्यं कर्म्मापेक्षायां तु ब्रह्मणि ईक्षितृत्वश्रुतयः सुतरामुपपन्नाः, किं पुनस्तत्कर्म्म यत् प्रागुत्पत्तेरीश्वरज्ञानस्य विषयीभवति इति। तत्त्वान्यत्वाभ्यामनिर्व्वचनीये नामरूपे अव्याकृते व्याचिकीर्षिते इति ब्रूमः, यत् प्रसादाद्धि योगिनामप्यतीतानागतविषयं प्रत्यक्षं ज्ञानमिच्छन्ति योगशास्त्रविदः किमु वक्तव्यं तस्य नित्यशुद्धस्येश्वरस्य सृष्टिस्थितिसंहृतिविषयं नित्यज्ञानं भवतीति। यदप्युक्तं प्रागुत्पत्तेर्ब्रह्मणः शरीरादिसम्बन्धमन्तरेणेक्षितृत्वमनुपपन्नमिति, न तच्चोद्यमवतरति

शब्दसाधुत्वं शङ्कते ॥ ज्ञाननित्यत्व इति ॥ नित्यस्यापि ज्ञानस्य तदर्थोपहितत्वेन ब्रह्मस्वरूपाद्भेदं कल्पयित्वा कार्य्यत्वोपचाराद्ब्रह्मणस्तत्कर्तृत्वव्यपदेशः साधुरिति। दृष्टान्तमाह ॥ न प्रततेति ॥ सन्ततेत्यर्थः। असत्यपि अविवक्षितेऽपि, ननु प्रकाशतेरकर्म्मकत्वात् सविता प्रकाशते इति प्रतियोगेऽपि जानातेः सकर्म्मकत्वात् कर्म्माभावे तदैक्षतेत्ययुक्तं इति तत्राह ॥ कर्म्मापेक्षायान्त्विति ॥ कर्म्माविवक्षायामपि प्रकाशरूपे सवितरि प्रकाशत इति कथञ्चित् प्रकाशक्रियाश्रयत्वेन कर्तृत्वोपचारवच्चिदात्मन्यपि चिद्रूपेण कर्तृत्वोपचारान्न वैषम्यमित्युक्तं पूर्व्वं। अधुना तु कुम्भकारस्य स्वोपाध्यन्तःकरणवृत्तिरूपेच्छावदीश्वरस्यापि स्वोपाध्यविद्यायाः विविधसृष्टिसंस्कारायाः प्रलयावसानेनोद्बुद्धसंस्कारायाः सगान्मुखः कश्चित् परिणामः तस्यां सूक्ष्मरूपेण निलीनसर्व्वकार्य्यविषयकं ईक्षणं तस्य कार्य्यत्वात् कर्म्मसद्भावाच्च तत्कर्तृत्वं मुख्यमिति द्योतयति ॥ सुतरामिति ॥ ननु मायोपाधिकबिम्बचिन्मात्रस्येश्वरस्य कथमीक्षणं प्रति मुख्यं कर्तृत्वं कृत्यभावादिति चेत्। न। कार्य्यानुकूल-

रत्नप्रभाभासितशाङ्करब्रह्मसूत्रभाष्यस्य शुद्धपत्र।

पृष्ठाङ्कः	पंक्त्यङ्कः	अशुद्धं	शुद्धं
१	२	जनकजावरमनन्त-सुखाकृतिं	जनकजाङ्गमनन्त-सुखाकृतिं
१	११	भाषास्मिताऽस्य	भासा स्मितास्य
२	१७	सस्यादि	ग्रस्यादि
२	२८	प्रतिष्ठा काम	प्रतिष्ठाकाम
३	१७	स्वाथ	स्वार्थ
११	२४	लक्षण	लक्षणं
१४	१७	शून्यत्व	शून्यत्वं
१६	१६	व ते	वर्ण्यते
२५	१४	कर्म्मणा	कर्म्मणां
२६	२८	मुक्ति	मुक्तिः
२७	२६	प्रवृत्ति र्वध	प्रवृत्तिर्वाध
२८	११	प्रवर्त्यते	प्रवर्त्तते
३३	१७	व्युत्पत्या	व्युत्पत्त्या
३४	१६	शुक्तित्व	शुक्तित्व
३५	२६	वदा	वेदा
३५	१०	विप्रतित्तीनां	विप्रतिपत्तीनां
४०	१३	पुरूष	पुरुष
४२	२१	शाखासु	शाखासु
४६	२२	ज्ञात्	ज्ञानात्
४८	२७	ज्ञात्	ज्ञानात्
४६	५	र्थत्व	र्थत्वं
५०	२२	दीद्	दीत्
५१	५	त्वाद्	त्वात्
५२	६	दीद्	दीत्

पृष्ठाङ्कः	पंक्त्यङ्कः	अशुद्धं	शुद्धं
५३	७	तद्	तत्
५६	२२	चाख	चाख
५७	७।८	र्प्यते	र्ष्यते
५८	८	ब्रह्मश	ब्रह्मश
७१	६	हननभाव	हननाभाव
६१	२४	युक्त्यावभास	युक्त्याभास
६६	२२	सगान्मुखः	सर्गोन्मुखः

सविदप्रकाशवद्ब्रह्मणो ज्ञानस्वरूपनित्यत्वेन ज्ञानसाधनापेक्षानुपपत्तेः। अपि चाविद्यादिमतः संसारिणः शरीराद्यपेक्षाज्ञानोत्पत्तिः स्यात् न ज्ञानप्रतिबन्धकारणरहितस्येश्वरस्य। मन्त्रौ चेमावीश्वरस्य शरीराद्यनपेक्षतामनावरणज्ञानतां च दर्शयतः।

"न तस्य कार्यं करणं च विद्यते
न तत् समश्चाभ्यधिकश्च दृश्यते।
परास्य शक्तिर्विविधैव श्रूयते
स्वाभाविकी ज्ञानबलक्रिया च" ॥ इति ॥

"अपाणिपादो जवनो ग्रहीता
पश्यत्यचक्षुः स शृणोत्यकर्णः।
स वेत्ति वेद्यं न च तस्य वेत्ता
तमाहुरग्र्यं पुरुषं महान्तं" ॥ इति च ॥

ज्ञानवत एव कर्तृत्वादीश्वरस्यापि ईक्षणानुकूलनित्यज्ञानवत्त्वात्। न च नित्यज्ञानेनैव कर्तृत्वनिर्वाहात् किमीक्षणेनेति वाच्यं। वाय्वादेरेव शब्दवत्त्वसम्भवात् किमाकाशेनेत्यतिप्रसङ्गात्, अतः श्रुतत्वाद्याद्यादिकारणत्वेनाकाशवदैक्षतेत्यागन्तुकत्वेन श्रुतमीक्षणमाकाशादिहेतुत्वेनाङ्गीकार्यमित्यलं। अव्याकृते सूक्ष्मात्मना स्थिते व्याकर्तुं स्थूलीकर्तुमिच्छे इत्यर्थः। अव्याकृतकार्योपरक्तचैतन्यरूपेक्षणस्य कारकानपेक्षत्वेऽपि वृत्तिरूपेक्षणस्य कारकं वाच्यमित्याशङ्क्याह ॥ अपि चाविद्यादिमत इति ॥ यथैकस्य ज्ञानं तथान्यस्यापीति नियमाभावान्मायिनोऽशरीरस्यापि जन्येक्षणकारकत्वमिति भावः। ननु यत् जन्यज्ञानं तत् शरीरसाध्यमिति व्याप्तिरस्तीत्याशङ्क्य श्रुतिबाधमाह ॥ मन्त्रौ चेति ॥ कार्यं शरीरं। करणमिन्द्रियं। अस्येश्वरस्य शक्तिर्माया स्वकार्यापेक्षया परा, विचित्रकार्यकारित्वादिविधा सा त्वैतिह्यमात्रसिद्धा न प्रमाणसिद्धे-

ननु नास्ति तावज्ज्ञानप्रतिबन्धकारणवानीश्वरादन्यः संसारी "नान्योतोऽस्ति द्रष्टा नान्योतोऽस्ति विज्ञाता" इति श्रुतेः। तत्र किमिदमुच्यते संसारिणः शरीराद्यपेक्षा ज्ञानोत्पत्तिर्नेश्वरस्येति? अत्रोच्यते। सत्यं नेश्वरादन्यः संसारी, तथापि देहादिसङ्घातोपाधिसम्बन्ध दृश्यत एव घटकरकगिरिगुहाद्युपाधिसम्बन्ध इव व्योम्नः, तत्कृतस्य शब्दप्रत्ययव्यवहारो लोकस्य दृष्टो घटच्छिद्रं करकादिच्छिद्रमित्यादिराकाशाव्यतिरेकेऽपि, तत्कृता चाकाशे घटाकाशादिभेदमिथ्याबुद्धिर्दृष्टा; तथेहापि देहादिसङ्घातोपाधिसम्बन्धाविवेककृतेश्वरसंसारिभेदमिथ्याबुद्धिः। दृश्यते चात्मन एव सतो देहादिसङ्घाते अनात्मन्यात्मत्वाभिनिवेशो

त्याह॥ श्रूयत इति॥ ज्ञानरूपेण बलेन या स्वक्रियां सा स्वाभाविकी अनादिमायात्मकत्वादित्यर्थः। ज्ञानस्य चैतन्यस्य बलं मायावृत्तिप्रतिबिम्बितत्वेन स्फुटत्वं तस्य क्रियानामविम्बत्वेन ब्रह्मणो जनकता ज्ञाटतापि स्वाभाविकीति वार्थः॥ अपाणिरपि ग्रहीता। अपादोऽपि जवनः॥ ईश्वरस्य स्वकार्ये लौकिकहेत्वपेक्षा नास्तीति भावः। अग्र्यमनादिं पुरुषं अनन्तं महान्तं विभुमित्यर्थः। अपसिद्धान्तं शङ्कते॥ नन्विति॥ ज्ञाने प्रतिबन्धककारणान्यविद्यारागादीनि श्रुतावत ईश्वरादन्यो नास्तीत्यन्वयः। औपाधिकस्य जीवेश्वरभेदस्य मयोक्तत्वान्नापसिद्धान्त इत्याह॥ अत्रोच्यत इति॥ तत्कृत उपाधिसम्बन्धकृतः शब्दतज्जन्यप्रत्ययरूपो व्यवहारः, असङ्कीर्ण इति शेषः। अव्यतिरेके कथमसङ्करस्तत्राह॥ तत्कृता चेति॥ उपाधिसम्बन्धकृतेत्यर्थः, देहादिसम्बन्धस्य हेतुरविवेकोऽनाद्यविद्यातया कृत इत्यर्थः। अविद्यायां हि प्रतिबिम्बो जीवः, बिम्बचैतन्यमीश्वर इतिभेदोऽविद्याधीनसत्ताकः। अनादिभेदस्य कार्यत्वायोगात्। कार्यबुद्ध्यादिकृतप्रमात्रादिभेदस्य कार्य एवेति विवेकः। नन्वसङ्गस्वप्रकाशात्मनि कथमविवेकः तत्राह॥ दृश्यते चेति॥ वस्तुतो

मिथ्याबुद्धिमात्रेण पूर्व्वपूर्व्वेण, मति चैवं संसारित्वे देहाद्यपेक्षमोक्षित्वमुपपन्नं संसारिणः। यदप्युक्तं प्रधानस्यानेकात्मकत्वात् मृदादिवत् कारणत्वोपपत्तिर्नासंहतस्य ब्रह्मण इति, तत् प्रधानस्याशब्दत्वेनैव प्रत्युक्तं। यथा तु तर्केणापि ब्रह्मण एव कारणत्वं निर्व्वोढुं शक्यते न प्रधानादीनां तथा प्रपञ्चयिष्यतेन विलक्षणत्वादस्य इत्येवमादिना। अत्राह। यदुक्तं, नाचेतनं प्रधानं जगत्कारणमोक्षित्वश्रवणादिति, तदन्यथाप्युपपद्यते। अचेतनेऽपि चेतनवदुपचारदर्शनात् प्रत्यासन्नपतनतां कूलस्यालक्ष्य कूलं पिपतिषतीत्यचेतनेऽपि कूले चेतनवदुपचारो दृष्टस्तद्वदचेतनेऽपि प्रधाने प्रत्यासन्नसर्गे चेतनवदुपचारो भविष्यति तदैक्षतेति। यथा लोके कश्चिच्चेतनः स्नात्वा भुक्त्वा चापराह्णे ग्रामं रथेन गमिष्यामीतीक्षित्वा अनन्तरं तथैव नियमेन प्रवर्त्तते,

---

देहादिभिन्नस्वप्रकाशस्यैव सत आत्मनो नरोऽहमिति भ्रमो दृष्ट्वादुरपह्नवः। स च मिथ्याबुद्ध्या मीयत इति मिथ्याबुद्धिमात्रेण भ्रान्तिसिद्धाज्ञानेन कल्पित इति चकारार्थः। यद्वोक्तमिथ्याबुद्धौ लोकानुभवमाह, दृश्यते चेति इत्यं भावे तृतीया। भ्रान्त्यात्मना दृश्यत इत्यर्थः। पूर्व्वपूर्व्वभ्रान्तिमात्रेण दृश्यते न च प्रमेयतयेति वार्थः। कूटस्यस्यापि मायिकं कारणत्वं युक्तमित्याह॥ यथा त्विति॥ यत्त्ववेद्यशब्दशक्तिग्रहायोग इति तन्न। सत्यादिपदानामबाधितार्थेषु लोकावगतशक्तिकानां वाचैकदेशत्वेनोपस्थिताखण्डब्रह्मलक्षकत्वादिति स्थितं। सम्प्रत्युत्तरसूत्रे ब्रह्म निरस्याशब्दत्वमाह॥ अत्राहेति॥ अन्यथापि अचेतनत्वेऽपि। ननु प्रधानस्य चेतनेन किं साम्यं येन गौणमीक्षणमिति। तत्राह॥ यथेति॥ नियतक्रमवत् कार्य्यकारित्वं साम्यमित्यर्थः। उपचारप्राये वचनादिति गौणार्थप्रचुरे प्रकरणे समाम्नातादित्यर्थः। अग्नेर्जोरित्वाचेतने सति गौणी इक्षतिरिति चेत्, न, आत्मशब्दात् सतश्चेतनत्वनिश्चयादिति सूत्रा-

तथा प्रधानमपि महदाद्याकारेण नियमेन प्रवर्त्तते तस्माच्चेतनवदुपचर्य्यते। कस्मात् पुनः कारणात् विहाय मुख्यमौचित्यं तत्वमौपचारिकं कल्प्यते? "तत्तेज ऐक्षत" "ता आप ऐक्षन्त" इति चाचेतनयोरप्यग्नेजसोश्चेतनवदुपचारदर्शनात्। तस्मात् सत्कर्तृकमपीक्षणमौपचारिकमिति गम्यते। उपचारप्राये वचनादित्येवं प्राप्ते इदं सूत्रमारभ्यते॥

गौणश्चेन्नात्मशब्दात् ॥ ६ ॥

यदुक्तं प्रधानमचेतनं सच्छब्दवाच्यं तस्मिन्नौपचारिकी ईक्षतिः अग्नेजसोरिवेति तदसत्। कस्मात्। आत्मशब्दात्। "सदेव सोम्येदमग्र आसीत्" इत्युपक्रम्य "तदैक्षत" "तत्तेजोऽसृजत" इति च तेजोऽवन्नानां सृष्टिमुक्त्वा तदेव प्रकृतं सदीक्षितृ तानि च तेजोऽवन्नानि देवताशब्देन परामृश्याह। "सेयं देवतैक्षत" "हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि" इति। तत्र यदि प्रधानमचेतनं गुणवृत्त्येक्षितृ कल्पेत तदेव प्रकृतत्वात् सेयं देवतेति परामृश्येत, न तदा देवता जीवमात्मशब्देनाभिदध्यात्। जीवो हि नाम चेतनः शरीराध्यक्षः प्राणानां धारयिता*प्रसिद्धेर्निर्वचनाच्च। स कथमचेतनस्य प्रधानस्य आत्मा भवेत्? आत्मा हि नामस्वरूपं, नाचेत-

---

र्थमाह॥ यदुक्तमित्यादिना॥ सा प्रकृता सच्छब्दवाच्या इयमित्तित्रो देवता परोक्षा हन्त इदानीं भूतसृष्ट्यनन्तरं इमाः सृष्टास्तिस्रस्तेजोऽ-

* मुद्रितपुस्तके तत्प्रसिद्धेरिति पाठः।

नस्य प्रधानस्य चेतनो जीवः स्वरूपं भवितुमर्हति; अत्र तु चेतनं ब्रह्म मुख्यमीक्षितृ परिगृह्यते, तस्य जीवविषय आत्मशब्दप्रयोग उपपद्यते। तथा "स य एषोऽणिमैतदात्म्यमिदं सर्व्वं तत् सत्यं स आत्मा तत्त्वमसि श्वेतकेतो" इत्यत्र स आत्मेति प्रकृतं सदणिमानमात्मानमात्मशब्देनोपदिश्य तत्त्वमसि श्वेतकेतो इति चेतनस्य श्वेतकेतोरात्मत्वेनोपदिशति। अग्नेजसोस्तु विषयत्वात् अचेतनत्वं नामरूपव्याकरणादौ च प्रयोज्यत्वेनैव निर्देशात्, न चात्मशब्दवत् किञ्चिन्मुख्यत्वे कारणमस्तीति युक्तं कूलवत् गौणत्वमीक्षितृत्वस्य। तयोरपि च सदधिष्ठितत्वापेक्षमेवेक्षितृत्वं। सतस्त्वात्मशब्दात् न गौणमीक्षितृत्वमित्युक्तं। अथोच्यतेऽचेतनेऽपि

वन्नरूपाः,परोक्षत्वाद्देवता इति द्वितीयावद्भवचनं,अनेन पूर्व्वकल्पानुभूतेन जीवेनात्मना मम स्वरूपेण ता अनुप्रविश्य तासां भोग्यत्वाय नाम च रूपञ्च स्थूलं करिष्यामीत्यैक्षतेत्यन्वयः। लौकिकप्रसिद्धेर्जीवप्राणधारण इति धातोर्ज्जीवति प्राणान् धारयतीति निर्व्वचनाच्चेत्यर्थः। अत्र त्रिति॥ स्वपक्षे तु बिम्बप्रतिबिम्बयोर्लोके भेदस्य कल्पितत्वदर्शनाज्जीवो ब्रह्मणः सत आत्मेति युक्तमित्यर्थः। जीवस्य सच्छब्दार्थं प्रत्यात्मशब्दात् सन्न प्रधानमित्युक्ता सतो जीवं प्रत्यात्मशब्दान्न प्रधानमिति विधान्तरेण हेतुं व्याचष्टे॥ तयेति॥ स यः सदाख्य एषोऽणिमा परमसूक्ष्मः एतदात्मकमिदं सर्व्वं जगत् तत्सदेव सत्यं विकारस्य मिथ्यात्वात्, सत्यदार्थः सर्व्वस्यात्मा हे श्वेतकेतो, त्वञ्च नासि संसारी, किन्तु तदेव सदबाधितं सर्व्वात्मकं ब्रह्मासीति श्रुत्यर्थः॥ इत्यत्रोपदिशति॥ अतश्चेतनात्मकत्वात् सच्चेतनमेवेति वाक्यशेषः। यदुक्तमग्नेजसोरिव सत ईक्षणं गौणमिति तत्राह॥ अग्नेजसोरिति॥ नामरूपयोर्व्याकरणं सृष्टिः।आदिपदान्नियमनं अग्नेजसोर्दृग्विषयत्वात् सृज्यत्वान्नियम्यत्वाच्चाचेतनत्वमीक्षणस्य मुख्यत्वे बाधकमस्ति साधकञ्च नास्तीति हेतोर्युक्तमीक्षणस्य गौणत्वमिति योजना; चेतनवत् कार्य्यकारित्वं गुणः तेज ऐक्षत चेतनवत्

प्रधाने भवत्यात्मशब्दः, आत्मनः सर्व्वार्थकारित्वात् यथा राज्ञः सर्व्वार्थकारिणि भृत्ये भवत्यात्मशब्दो ममात्मा भद्रसेन इति; प्रधानं हि पुरुषात्मनो भोगापवर्गौ कुर्व्वदुपकरोति राज्ञ इव भृत्यः सन्धिविग्रहादिषु वर्त्तमानः। अथवैक एवात्मशब्दश्चेतनाचेतनविषयो भविष्यति भूतात्मेन्द्रियात्मेति च प्रयोगदर्शनात्, यथैक एव ज्योतिःशब्दः क्रतुज्वलनविषयः। तत्र कुत एतदात्मशब्दादीक्षतेरगौणत्वं इत्यत उत्तरं पठति।

तन्निष्ठस्य मोक्षोपदेशात् ॥ ७ ॥

न प्रधानमचेतनमात्मशब्दालम्बनं भवितुमर्हति "स आत्मा" इति प्रकृतं सदणिमानमादाय "तत्त्वमसि श्वेतकेतो" इति चेतनस्य श्वेतकेतोर्मोक्षयितव्यस्य तन्निष्ठामुपदिश्य "आचार्य्यवान् पुरुषो वेद" "तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ सम्पत्स्यते" इति मोक्षोपदेशात्। यदि ह्यचेतनं प्रधानं सच्छब्दवाच्यं तदसीति ग्राहयेत् मुमुक्षुं चेतनं सन्तमचेतनोऽसीति तदा विपरीतवा-

---

कार्य्यकारीत्यर्थः। यद्वा तेजःपदेन तदधिष्ठानं सल्लक्ष्यते तथा च मुख्यमीक्षणमित्याह॥ तयोरिति॥ स्यादेतत् यदि सत ईक्षणं मुख्यं स्यात्तदेव कुत इत्यत आह॥ सतस्त्विति॥ गौणमुख्ययोरतुल्ययोः संशयाभावेन गौणप्रायपाठस्यानिश्चायकत्वादात्मशब्दाच्च सत ईक्षणं मुख्यमित्यर्थः। आत्महितकारित्वगुणयोगादात्मशब्दोऽपि प्रधाने गौण इति प्रकृते॥ अथेत्यादिना॥ आत्मशब्दः प्रधानेऽपि मुख्यो नानार्थकत्वादित्याह॥ अथ वेति॥ नानार्थकत्वे दृष्टान्तः॥ यथेति॥ अथैकज्योतिरिति श्रुत्या सहस्रदक्षिणाके क्रतौ ज्योतिष्टोमे लोकप्रयोगादग्नौ च ज्योतिःशब्दो यथा मुख्यस्तद्वदित्यर्थः। तस्मिन् सत्यदार्थे निष्ठा अभेदज्ञानं यस्य स तन्निष्ठस्तस्य मुक्तिश्रवणादिति सूत्रार्थमाह॥ नेत्यादिना॥ श्रुतिः समन्वयसूत्रे आख्याता। अनर्थायेत्युक्तं प्रपञ्चयति॥ यदि चाऽसेति॥ कश्चित् किल

दिशास्त्रं पुरुषस्यानर्थायेत्यप्रमाणं स्यात्; न तु निर्दोषशास्त्रं अप्रमाणं कल्पयितुं युक्तं। यदि चाज्ञस्य मतो मुमुक्षोरचेतनमनात्मानमात्मेत्युपदिशेत् प्रमाणभूतं शास्त्रं, स अश्रद्धानतयान्धगोलाङ्गूलन्यायेन तदात्मदृष्टिं न परित्यजेत्, तद्व्यतिरिक्तञ्चात्मानं न प्रतिपद्येत, तथा सति पुरुषार्थाद्विहन्येतानर्थञ्च च्छ्केत्। तस्माद्यथा स्वर्गाद्यर्थिनोऽग्निहोत्रादिसाधनं यथाभूतमुपदिशति तथा मुमुक्षोरपि "स आत्मा" "तत्त्वमसि श्वेतकेतो" इति यथाभूतमेवात्मानमुपदिशतीति युक्तं। एवञ्च सति तन्नपरशुग्रहणमोक्षदृष्टान्तेन सत्याभिसन्धस्य मोक्षोपदेश उपपद्यते। अन्यथा हि अमुष्ये सदात्मतत्त्वोपदेशे अहमुक्थमस्मीति विद्यादितिवत् सम्पन्मात्रमिदमनित्यफलं स्यात्। तत्र मोक्षोपदेशो नोपपद्येत; तस्मान्न सदणिमन्यात्मशब्दस्य गौणत्वं, भृत्ये तु स्वामिभृत्यभेदस्य प्रत्यक्षत्वादुपपन्नो गौण आत्मशब्दो ममात्मा भद्रसेन, इति। अपि च क्वचिद्गौणः शब्दो दृष्ट इति

दुष्टात्मा महारण्यमार्गे पतितमन्धं स्वबन्धुनगरं जिगमिषुं बभाषे किमत्रायुष्मता दुःखितेन स्थीयत इति। स चान्धः सुखवार्तामाकर्ण्य तमात्मं मत्वोवाच। अहो महाभागधेयं यदत्र भवान् मां दीनं स्वाभीष्टनगरप्राप्तिसमर्थं भाषत इति। स च विप्रलिप्सु ईक्षणोयुवानमानीय तदीयलाङ्गूलं अन्धं ग्राहयामास, उपदिदेश च एनमन्धं एष गोयुवा त्वां नगरं नेष्यति, मा त्यज लाङ्गूलमिति। स चान्धः श्रद्धालुतया तदत्यजन् स्वाभीष्टमप्राप्यानर्थपरम्परां प्राप्तः, तेन न्यायेनेत्यर्थः॥ तथा सतीति॥ आत्मज्ञानाभावे सति विहन्येत मोक्षं न प्राप्नुयात् प्रत्युतानर्थसंसारञ्च प्राप्नुयादित्यर्थः। ननु जीवस्य प्रधानैक्यसम्पादनार्थमिदं वाक्यमस्तिति तत्राह॥ एवञ्च सतीति॥ अबाधितात्मप्रमायां सत्यामित्यर्थः।

नैतावता शब्दप्रमाणकेऽर्थे गौणीकल्पनाऽन्याय्या सर्व्वत्रानाश्वास-प्रसङ्गात्। यत्तूक्तं चेतनाचेतनयोः साधारन आत्मशब्दः क्रतु-ज्वलनयोरिव ज्योतिःशब्दः इति, तन्न, अनेकार्थत्वस्यान्याय्य-त्वात्। तस्माच्चेतनविषय एव मुख्य आत्मशब्दश्चेतनत्वोपचारा-द्भूतादिषु प्रयुज्यते भूतात्मेन्द्रियात्मेति च, साधारणत्वेऽप्यात्म-शब्दस्य न प्रकरणमुपपदं वा किञ्चिन्निश्चायकमन्तरेणान्यतर-वृत्तिता निर्द्धारयितुं शक्यते। न चाचेतनस्य निश्चायकं किञ्चित् कारणमस्ति प्रकृतन्तु सदीक्षित सन्निहितश्च चेतनः श्वे-तकेतुः, न हि चेतनस्य श्वेतकेतोरचेतन आत्मा सम्भवतीत्यवो-चामः। तस्माच्चेतनविषय दृहात्मशब्द इति निश्चीयते, ज्यो-तिःशब्दोऽपि लौकिकेन प्रयोगेन ज्वलन एव रूढः अर्थवाद-कल्पितेन तु ज्वलनसादृश्येन क्रतौ प्रवृत्त इत्यदृष्टान्तः। अथवा पूर्व्वसूत्र एवात्मशब्दं निरस्तसमस्तगौणत्वसाधारणत्वा-

---

कस्यचिदारोपितचोरत्वस्य सत्येन तमं परशुं ग्रहीतो मोक्षो दृष्टः तदृष्टान्तेन सत्ये ब्रह्मणि अहमित्यभिसन्धिमतः मोक्षो यथा सत्या-भिसन्धः तमपरशुं ग्रहीति स न दह्यते अथ मुच्यत इति श्रुत्योप-दिष्टः स उपदेशः सम्यत्पक्षे न युक्त इत्याह॥ अन्यथेति॥ देहमुत्थाप-यतीत्युक्तं प्राणस्तस्मान्मोक्षोपदेशान्मुख्ये सम्भवति गौणत्वस्यान्याय्य-त्वाच्चात्मशब्दः सति मुख्य इत्याह॥ अपि चेति॥ क्वचिद्भृत्यादौ सर्व्व-त्राहमात्मेत्यत्रापि मुख्य आत्मशब्दो न स्यादित्यर्थः। चेतनत्वोपचारात् भूतादिषु सर्व्वत्र चैतन्यतादात्म्यादित्यर्थः आत्मशब्दश्चेतनस्यैवासाधारण इत्युक्तं। अस्तु वा अव्यापिवस्तूनां साधारणः तथापि तस्याच्च श्रुतौ प्रधा-नपरत्वेऽपि निश्चायकाभावान्न प्रधानवृत्तितेत्याह॥ साधारणत्वेऽपीति॥ चेतनवाचित्वे तु प्रकरणं श्वेतकेतुपदञ्च निश्चायकमस्तीत्याह॥ प्रकृत-न्विति॥ उपपदस्य निश्चायकत्वं स्फुटयति॥ न हीति॥ ततः किन्तत्राह॥

शङ्कतया व्याख्याय ततः स्वतन्त्र एव प्रधानकारणनिराकरण-हेतुर्व्याख्येयः, तन्निष्ठस्य मोक्षोपदेशादिति। तस्मान्नाचेतनं प्रधानं सच्छब्दवाच्यं। कुतश्च न प्रधानं सच्छब्दवाच्यं।

हेयत्वावचनाच्च ॥ ८ ॥

यदि अनात्मैव प्रधानं सच्छब्दवाच्यं "स आत्मा" "तत्त्वमसि" इति दृष्टोपदिष्टं स्यात् स तदुपदेशश्रवणादनात्मज्ञतया तन्निष्ठो मा भूदिति मुख्यमात्मानमुपदिदिक्षुस्तस्य हेयत्वं ब्रूयात्। यथा अरुन्धतीं दिदर्शयिषुः तत्समीपस्थां स्थूलां तारां अमुख्यां प्रथममरुन्धतीति ग्राहयित्वा तां प्रत्याख्याय पश्चाद-रुन्धतीमेव ग्राहयति तद्वन्नायमात्मेति ब्रूयात्। न चैवमवो-

---

तस्मादिति॥ आत्मशब्दो ज्योतिःशब्दवन्नानार्थक इत्युक्तं दृष्टान्तं निरस्यति॥ ज्योतिरिति॥ कथं तर्हि ज्योतिषा यजेतेति ज्योतिष्टोमे प्रयोगस्तत्राह॥ अर्थवादेति॥ "एतानि वाव तानि ज्योतींषि य एतेऽस्य स्तोमाः" इत्यर्थवादेन कल्पितं ज्वलनेन सादृश्यं, "चित्पत्यद्वदशस्त्रिवृत्पञ्चदशस्त्रिवृदेकविंशस्तोमाः" तत्तदर्थप्रकाशकत्वेन गुणेन ज्योतिःपदोक्ता ऋक्सङ्घाः, तथा च ज्योतींषिस्तोमा अस्येति ज्योतिष्टोम इत्यत्र ज्योतिःशब्दो गौण इत्यर्थः। नन्वात्मशब्दादिति पूर्वसूत्र एवात्मशब्दस्य प्रधाने गौणत्वसाधारणत्वशङ्कानिरासः कर्त्तुमुचितः मुख्यार्थस्य लाघवेनोक्तिसम्भवे गौणत्वनानार्थकत्वशङ्काया दुर्बलत्वेन तन्निरासार्थं पृथक्सूत्रायासानपेक्षणात्। तथा च शङ्कोत्तरत्वेन सूत्रव्याख्यानं नातीव शोभते, इत्यतश्चेराह॥ अथवेति॥ निरस्ता समस्ता गौणत्वनानार्थत्वशङ्का यस्यात्मशब्दस्य स तच्छङ्कारहितस्य भावस्तत्ता तया इत्यर्थः॥ तत इति॥ सत आत्मशब्देन जीवाभिन्नत्वादिति हेत्वपेक्षया मोक्षोपदेशः स्वतन्त्र एव प्रधानकारणत्वनिरासे हेतुरित्यर्थः। ननु यथा कथञ्चिदरुन्धती दर्शयितुं निकटस्थां स्थूलां तारां अरुन्धतीत्वेनोपदिशति तद्वदनात्मन एव प्रधानस्य

चत्। सन्मात्रात्मावगतिनिष्ठैव हि षष्ठप्रपाठके परिसमाप्ति-र्दृश्यते। चशब्दः प्रतिज्ञाविरोधाभ्युच्चयप्रदर्शनार्थः। सत्यपि हेयत्ववचने प्रतिज्ञाविरोधः प्रसज्येत, कारणविज्ञानाद्धि सर्वं विज्ञातमिति प्रतिज्ञातं। "उत तमादेशमप्राक्ष्यः, येनाश्रुतं श्रुतं भवति अमतं मतं अविज्ञातं विज्ञातं" इति। "कथं नु भगवः स आदेशो भवति" इति। "यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्यात्, वाचारम्भणं विकारो नामधेयं मृत्ति-केत्येव सत्यं, एवं सोम्य स आदेशो भवति" इति वाक्योपक्रमे

सत्यदार्थस्यात्मत्वोपदेश इति शङ्कते॥ कुतश्चेति॥ प्रधानं सच्छब्दवाच्यं नेति कुत इत्यर्थः। सौम्यस्वकारोऽनुक्तसमुच्चयार्थ इत्याह॥ चशब्द इति॥ विरुणोतीति॥ सत्यपीति॥ अपिशब्दान्नास्त्येवेति सूचयति। वेदानधीत्यागतं रूढ्यं पुत्रं पितोवाच, हे पुत्र उत अपि आदिश्यत इत्यादेशः उपदे-शैकलभ्यः सदात्मा तमप्याक्ष्यः गुरुनिकटे एष्टवानसि यस्य अवणेन मननेन विज्ञानेनान्यस्य अवणादिकं भवतीत्यन्वयः। नन्वनेन ज्ञातेन कथमन्यदज्ञातमपि ज्ञातं स्यादिति पुत्रः शङ्कते॥ कथमिति॥ हे भगवः कथं नु खलु स भवतीत्यर्थः, कार्यस्य कारणान्यत्वं नास्तीत्याह॥ यथेति॥ पिण्डः स्वरूपं तेन विज्ञातेनेति शेषः। तच युक्तिमाह॥ वाचेति॥ वाचा वागिन्द्रियेणारभ्यत इति विकारो वाचारम्भणं। ननु वाचा नामैवारभ्य-ते, न घटादिरित्याशङ्क्य नाममात्रमेव विकार इत्याह॥ नामधेयमिति॥ नामधेयं विकारोऽयं वाचा केवलमुच्यते वस्तुतः कारणाद्भिन्नो नास्ति तस्मान्मृषैव स इति भावः। विकारस्य मिथ्यात्वे तदभिन्नकारणस्यापि मिथ्यात्वमिति नेत्याह॥ मृत्तिकेति॥ कारणं कार्याद्भिन्नसत्ताकं न कार्यं कारणाद्भिन्नं, यतः कारणातिरिक्तस्य कार्यस्वरूपस्याभावात् कारणज्ञानेन तज्ज्ञानं भवतीति स्थिते दार्ष्टान्तिकमाह॥ एवमिति॥ मृदद्वच्चैव सत्यं वियदादिविकारो मृषेति ब्रह्मज्ञाने सति ज्ञेयं किञ्चि-न्नावशिष्यते इत्यर्थः। यद्यपि प्रधाने ज्ञाते तादात्म्यादिकारणां ज्ञानं

अवणात्। न च सच्छब्दवाच्ये प्रधाने भोग्यवर्गकारणे हेयत्वेनाहेयत्वेन वा विज्ञाते भोक्तृवर्गो विज्ञातो भवति अप्रधानविकारत्वाद्भोक्तृवर्गस्य, तस्मान्न प्रधानं सच्छब्दवाच्यं। कुतश्च न प्रधानं सच्छब्दवाच्यं॥

स्वाप्ययात्॥ ९॥

तदेव सच्छब्दवाच्यं कारणं प्रकृत्य श्रूयते "यत्रैतत्पुरुषः स्वपिति नाम सता सोम्य तदा सम्पन्नो भवति स्वमपीतो भवति तस्मादेनं स्वपितीत्याचक्षते स्वं ह्यपीतो भवति" इति एषा श्रुतिः स्वपितीत्येतत्पुरुषस्य लोकप्रसिद्धं नाम निर्ब्रूते। स्वशब्देनेहात्मोच्यते यः प्रकृतः सच्छब्दवाच्यस्वमपीतो भवत्यपि गतो भवतीत्यर्थः। अपि पूर्वस्य एतेर्लयार्थत्वं प्रसिद्धं, प्रभवाप्ययावित्युत्पत्तिप्रलययोः प्रयोगदर्शनात्। मनःप्रचारोपाधिविशेष-

---

भवति न पुरुषाणां, तेषां प्रधानकारणत्वादित्याह॥ न चेति॥ अस्माकं जीवानां सद्रूपत्वात्तज्ज्ञाने ज्ञानमिति भावः॥ कुतश्चेति॥ पुनरपि कस्माद्धेतोरित्यर्थः, सुषुप्तौ जीवस्य सदात्मनि स्वस्मिन् अप्ययश्रवणात् सचेतनमेवेति सूचयोजना। एतत् स्वपनं यथा स्यात्तथा यत्र सुषुप्तौ स्वपितीति नाम भवति तदा पुरुषः सता सम्पन्न एकीभवति सदैक्येऽपि नामप्रवृत्तिः कथं तत्राह॥ स्वमिति॥ तत्र लोकप्रसिद्धिमाह॥ तस्मादिति॥ हि यस्मात् स्वं सदात्मानमपीतो भवतीति तस्मादित्यर्थः॥ श्रुतेस्तात्पर्यमाह॥ एषा इत्यादिना॥ इतेर्धातोर्गत्यर्थस्यापि पूर्वस्य लयार्थत्वेऽपि कथं नित्यस्य जीवस्य लय इत्याशङ्क्य उपाधिलयादिति वक्तुं जाग्रत्स्वप्नयोरुपाधिमाह॥ मन इति॥ ऐन्द्रियकमनोवृत्तय उपाधयः, तैर्घटादिस्थूलार्थविशेषाणां आत्मना सम्बन्धादात्मा तानिन्द्रियार्थान् पश्यन् स्थूलविशेषेण देहेनैक्यभ्रान्तिमापन्नो विश्वसंज्ञो जागर्त्ति जाग्रदा-

सम्बन्धादिन्द्रियार्थान् गृह्णंस्तद्विशेषापन्नो जीवो जागर्त्ति, तदासनाविशिष्टः स्वप्नान् पश्यन् मनःशब्दवाच्यो भवति, स उपाधिद्वयोपरमे सुषुप्त्यवस्थायां उपाधिकृतविशेषाभावात् स्वात्मनि प्रलीन इवेति स्वं ह्यपीतो भवतीत्युच्यते। यथा हृदयशब्दनिर्व्वचनं श्रुत्या दर्शितं "स वा एष आत्मा हृदि तस्यैतदेव निरुक्तं हृदयं" इति, तस्माद्धृदयमिति, यथा वा अग्नायोदन्याग्नशब्दप्रवृत्तिमूलं दर्शयति श्रुतिः "आप एव तदग्नितं नयन्ते तेज एव तत्पीतं नयते" इति च, एवं "स्वमात्मानं सच्छब्दवाच्यमपीतो भवति" इति इममर्थं स्वपितिनामनिर्व्वचनेन दर्शयति। न च चेतन आत्मा अचेतनं प्रधानं स्वरूपत्वेन प्रतिपद्यते। यदि पुनः प्रधानमेवात्मीयत्वात् सच्छब्देनैवोच्येतैवमपि चेतनोऽचेतनमप्येतीति विरुद्धमापद्येत, श्रुत्यन्तरञ्च "प्राज्ञेनात्मना सम्परिष्वक्तो न बाह्यं किञ्च न वेदान्तरं" इति सुषुप्त्यवस्थायां

सनाश्रयमनोविशिष्टः सत्त्वैजससंज्ञः स्वप्ने विचित्रवासनासहकृतमायापरिणामान् पश्यन् "सोम्य तन्मनः" इति श्रुतिस्थमनःशब्दवाच्यो भवति, स आत्मा स्थूलसूक्ष्मोपाधिद्वयोपरमेऽहं नरः कर्त्तेति विशेषाभिमानाभावाल्लीन इत्युपचर्य्यत इत्यर्थः। ननु स्वपितीतिनामनिरुक्तेरर्थवादत्वान्न यथार्थतेत्यत आह॥ यथेति॥ तस्य हृदयशब्दस्यैतन्निर्व्वचनं "तदग्नितमग्नं द्रवीकृत्य नयन्ते जरयन्तीत्यापः एवाग्नायाः पदार्थः तत्पीतं उदकं नयते शोषयति" इति "तेज एवोदन्यं" अत्र दीर्घश्छान्दसः। एवमिदमपि निर्व्वचनं यथार्थमित्याह॥ एवमिति॥ इदञ्च प्रधानपक्षे न युक्तमित्याह॥ न चेति॥ स्वशब्दस्यात्मनीवात्मीयेऽपि शक्तिरस्तीत्याशङ्क्याह॥ यदीति॥ प्राज्ञेन विश्वचैतन्येनेश्वरेण सम्परिष्वक्तो भेदभ्रमाभावेनाभेद इत्यर्थः। तत्तदेदान्तजन्यानामवगतीनां चेतनकारणविषयकत्वेन सामान्यान्नाचेतनं

चेतनेऽयं दर्शयति, अतो यस्मिन्नप्यथः सर्वेषां चेतनानां तच्चेतनं सच्छब्दवाच्यं जगतः कारणं, न प्रधानं। कुतश्च न प्रधानं जगतः कारणं॥

गतिसामान्यात्॥ १०॥

यदि तार्किकसमय इव वेदान्तेष्वपि भिन्ना कारणावगतिरभविष्यत् क्वचिच्चेतनं ब्रह्म जगतः कारणं क्वचिदचेतनं प्रधानं क्वचिदन्यदेवेति ततः कदाचित् प्रधानकारणवादानुरोधेनापीच्छत्यादिश्रवणमकल्पयिष्यत्, न त्वेतदस्ति, समानैव हि सर्वेषु वेदान्तेषु चेतनकारणावगतिः, यथाग्नेर्ज्वलतः सर्वा दिशो विस्फुलिङ्गा विप्रतिष्ठेरन्, एवमेवैतस्मादात्मनः सर्वे प्राणा यथायतनं विप्रतिष्ठन्ते। "प्राणेभ्यो देवा देवेभ्यो लोकाः" इति "तस्माद्वा एतस्मादात्मन आकाशःसम्भूतः" इति "आत्मन एवेदं सर्वं" इति "आत्मन एष प्राणो जायते" इति चात्मनः कारणत्वं दर्शयन्ति सर्वे वेदान्ताः। आत्मशब्दश्च चेतनवचन इत्यवोचाम। महच्च प्रामाण्यकारणमेतद्यद्वेदान्तवाक्यानां चेतनकारणत्वे समानगतित्वं चक्षुरादीनामिव रूपादिषु, अतो गति-

---

जगतः कारणमिति सूत्रार्थं व्यतिरेकमुखेनाह॥ यदि तार्किकेत्यादिना॥ अन्यत् परमाणवादिकं॥ न त्वेतदिति॥ अवगतिवैषम्यमित्यर्थः। विप्रतिष्ठेरन् विविधं नानादिशः प्रतिगच्छेयुः प्राणाश्चक्षुरादयो यथा गोलकं प्रादुर्भवन्ति प्राणेभ्योऽनन्तरं देवाः सूर्यादयस्तनुग्राहकाः, तदनन्तरं लोकयन्त इति लोकविषया इत्यर्थः। ननु वेदान्तानां स्वतः प्रामाण्येन प्रत्येकं स्वार्थनिश्चायकत्वसम्भवात् किं गतिसामान्येनेत्याह॥ महच्चेति॥ एकरूपावगतिहेतुत्वं वेदान्तानां प्रामाण्यसंशयनिवृत्तिहेतुरित्यत्र दृष्टा-

सामान्यात् सर्व्वज्ञं ब्रह्म जगतः कारणं। कुतश्च सर्व्वज्ञं ब्रह्म जगतः कारणं॥

श्रुतत्वाच्च॥ ११॥

स्वशब्देनैव च सर्व्वज्ञ ईश्वरो जगतः कारणमिति श्रूयते श्वेताश्वतराणां मन्त्रोपनिषदि सर्व्वज्ञमीश्वरं प्रकृत्य "स कारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिपः" इति, तस्मात् सर्व्वज्ञं ब्रह्म जगतः कारणं, नाचेतनं प्रधानमन्यद्वेति सिद्धं [जन्माद्यस्य यत इत्यारभ्य श्रुतत्वाच्चेत्येवमन्तैः सूत्रैर्यान्युदाहृतानि वेदान्तवाक्यानि, तेषां सर्व्वज्ञः सर्व्वशक्तिरीश्वरो जगतो जन्मस्थितिलयकारणमित्येतस्यार्थस्य प्रतिपादकत्वं न्यायपूर्व्वकं प्रति-

---

न्तमाह॥ चक्षुरिति॥ यथा सर्व्वेषां चक्षुषां एकरूपावगतिहेतुत्वं अवगानां शब्दावगतिहेतुत्वं घ्राणादीनां गन्धादिषु, एवं ब्रह्मणि वेदान्तानां गतिसामान्यं प्रामाण्यदार्ढ्ये हेतुरित्यर्थः। एवमौत्पत्त्यादिलिङ्गैरचेतने वेदान्तानां समन्वयं निरस्य चेतनवाचकशब्देनापि निरस्यति॥ श्रुतत्वाच्चेति॥ सूत्रं व्याचष्टे॥ स्वशब्देनेति॥ स्वस्य चेतनस्य वाचकः "सर्व्वविच्छब्दज्ञः कालकालो गुणीसर्व्वविद्यः" इति सर्व्वज्ञं परमेश्वरं प्रकृत्य "स सर्व्ववित् कारणं" इति श्रुतत्वान्नाचेतनं कारणमिति सूत्रार्थः। करणाधिपा जीवास्तेषामधिपः, अधिकरणार्थमुपसंहरति॥ तस्मादिति॥ ईक्षणात्मशब्दादिकं परमाण्वादावप्ययुक्तमिति मत्वाह॥ अन्यदेति॥ वृत्तानुवादेनोत्तरसूत्रसन्दर्भमाक्षिपति॥ जन्मादीति॥ प्रथमसूत्रस्य शास्त्रयोनित्वोद्घातत्वात् जन्मादिसूत्रमारभ्येत्युक्तं सर्व्ववेदान्तानां कार्य्ये प्रधानाद्यचेतने च समन्वयनिरासेन ब्रह्मपरत्वं व्याख्यातं, अतः प्रथमाध्यायार्थस्य समाप्तत्वादुत्तरग्रन्थारम्भे किं कारणमित्यर्थः, वेदान्तेषु सगुणनिर्गुणब्रह्मवाक्यानां बहुलमुपलब्धेः। तत्र कस्य वाक्यस्य सगुणोपासनाविधिद्वारा निर्गुणे समन्वयः कस्य वा गुणविवक्षां विना सा-

पादितं। गतिसामान्योपन्यासेन च सर्व्वे वेदान्ताश्चेतनकारणवादिन इति व्याख्यातं,अतः परस्य ग्रन्थस्य किमुत्थानमिति उच्यते,द्विरूपं हि ब्रह्मावगम्यते नामरूपविकारभेदोपाधिविशिष्टं, तद्विपरीतञ्च सर्व्वोपाधिविवर्जितं। "यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति, यत्र त्वस्य सर्व्वमात्मैवाभूत्तत् केन कं पश्येत्, यत्र नान्यत् पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा,अथ यत्रान्यत् पश्यत्यन्यच्छृणोत्यन्यद्विजानाति, तदल्पं, यो वै भूमा, तदमृतं, अथ यदल्पं, तन्मर्त्यं, सर्व्वाणि रूपाणि विचित्य धीरः, नामानि कृत्वाभिवदन् यदास्ते, निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनं, अमृतस्य परं सेतुं दग्धेन्धनमिवानलं, नेति नेति,

---

त्वादेव ब्रह्मणि समन्वय इत्याकाङ्क्षैव कारणमित्याह॥ उच्यत इति॥ सङ्क्षिप्य सगुणनिर्गुणवाक्यार्थमाह॥ द्विरूपं हीति॥ नामरूपात्मको विकारः सर्व्वं जगत् तद्भेदो हिरण्यश्मश्रुत्वादिविशेष इति वाक्यार्थः। वाक्यान्युदाहरति॥ यत्र हीत्यादिना॥ यस्यां खल्वज्ञानावस्थायां द्वैतमिव कल्पितं भवति तत्तदितरः सन्नितरं पश्यतीति दृश्योपाधिकं वस्तु भाति। यत्र ज्ञानकाले विदुषः सर्व्वं जगदात्ममात्रमभूत्तदा तु केन कं पश्येदित्यात्तेपान्निरुपाधिकं तत्त्वं भाति, यत्र भूम्नि निश्चितो विद्वान् द्वितीयं किमपि न वेत्ति सोऽद्वितीयो भूमा परमात्मा निर्गुणः। अथ निर्गुणोक्त्यनन्तरं सगुणमुच्यते, यत्र सगुणे स्थिते द्वितीयं वेत्ति तदल्पं परिच्छिन्नं, यत्तु भूमा तदमृतं नित्यं॥ अथेति॥ पूर्व्ववत् व्याख्येयं। धीरः परमात्मैव सर्व्वाणि रूपाणि विचित्य सृष्ट्वा नामानि च कृत्वा बुद्ध्यादौ प्रविश्य जीवसञ्ज्ञो व्यवहरन् यो वर्त्तते सगुणत्वं निर्गुणत्वेन विद्वानप्यमृतो भवति, निर्गताः कला अंशा यस्मात्तन्निष्कलं, अतो निरंशत्वान्निष्क्रियं, अतः शान्तमपरिणामि निरवद्यं रागादिदोषशून्यं, अञ्जनं मूलतमः सम्बन्धो धर्म्मादिकं वा तच्छून्यं निरञ्जनं, किञ्चामृतस्य मोक्षस्य क्षय-

अस्थूलमनणुमह्रस्वमदीर्घं" इति "न्यूनमन्यत् स्थानं, सम्पूर्णमन्यत्" इति च, एवं सहस्रशो विद्याविद्याविषयभेदेन ब्रह्मणो द्विरूपतां दर्शयन्ति वाक्यानि। तत्राविद्यावस्थायां ब्रह्मण उपास्योपासकादिलक्षणः सर्व्वो व्यवहारः। तत्र कानिचित् ब्रह्मण उपासनान्यभ्युदयार्थानि, कानिचित् क्रममुक्त्यर्थानि, कानिचित् कर्म्मसमृद्ध्यर्थानि, तेषां गुणविशेषोपाधिभेदेन भेदः। एक एव तु परमात्मेश्वरस्तैस्तैर्गुणविशेषैर्विशिष्ट उपास्यो यद्यपि भवति, तथापि यथा गुणोपासनमेव फलानि भिद्यन्ते "तं यथा यथोपासते तदेव भवति" इति श्रुतेः "यथा क्रतुरस्मिन् लोके पुरुषो भवति, तथेतःप्रेत्य भवति" इति च। स्मृतेश्च।

यं यं वापि स्मरन् भावं त्यजत्यन्ते कलेवरं।
तं तमेवैति कौन्तेय सदा तद्भावभावित इति॥

मेव वाक्योत्थवृत्तिस्थत्वेन परमुत्कृष्टं सेतुं लौकिकसेतुवत् प्रापकं यथा दग्धेन्धनोऽनलः शाम्यति तमिवाविद्या तत्त्वं दग्ध्वा प्रशान्तं निर्गुणमात्मानं विद्यादित्यर्थः॥ नेति नेतीति॥ व्याख्यातं। स्थूलादिद्वैतशून्यं। रूपद्वये श्रुतिमाह॥ न्यूनमिति॥ द्वैतस्थानं न्यूनं अल्पं सगुणरूपं निर्गुणादन्यत् तथा सम्पूर्णनिर्गुणं सगुणादन्यदित्यर्थः, एकस्य द्विरूपत्वं विरुद्धमित्यत आह॥ विद्येति॥ विद्याविषयो ज्ञेयं निर्गुणत्वं सत्यं, अविद्याविषय उपास्यं सगुणत्वं कल्पितमित्यविरोधः। तत्राविद्याविषयं विवृणोति॥ तत्रेति॥ निर्गुणज्ञानार्थमारोपितप्रपञ्चमाश्रित्य बाधात् प्राक्काले जडजिङ्किकान्यायेन तत्त्वफलार्थान्युपासनानि विधीयन्ते तेषां चित्तैकाग्र्यद्वारा ज्ञानं मुख्यं फलमिति तदाख्यानामपि महातात्पर्यं ब्रह्मणीति मन्तव्यं, नाम ब्रह्मेत्याद्युपास्तीनां कामचारादिरभ्युदयः फलं, दहराद्युपास्तीनां क्रममुक्तिः उद्गीथादिध्यानस्य कर्म्मसमृद्धिः फलमिति भेदः, ध्यानानां मानसत्वात्, ज्ञानान्तरङ्गत्वाच्च, ज्ञानकाण्डे विधानमिति.

यद्यप्येक एव आत्मा सर्व्वभूतेषु स्थावरजङ्गमेषु गूढस्तथापि चित्तोपाधिविशेषतारतम्यात् आत्मनः कूटस्थनित्यैकरूपस्याप्युत्तरोत्तरमाविष्कृतस्य तारतम्यमैश्वर्य्यशक्तिविशेषैः श्रूयते "तस्य य आत्मानमाविस्तरां वेद" इति। अत्र स्मृतावपि।

यद्यद्विभूतिमत् सत्त्वं श्रीमदूर्ज्जितमेव वा।
तत्तदेवावगच्छ त्वं मम तेजोंशसम्भवं। इति॥

यत्र यत्र विभूत्याद्यतिशयः स ईश्वर इत्युपास्यतया चोद्यते, एवमिहापि आदित्यमण्डले हिरण्मयः पुरुषः सर्व्वपाप्मोदय-

---

भावः॥ ननूपास्यब्रह्मण एकत्वात् कथमुपासनानां भेदस्तत्राह॥ तेषामिति॥ गुणविशेषाः सत्यकामत्वादयो हृदयादिरूपाधिः। अत्र स्वयमेवाशङ्क्य परिहरति॥ एक इति॥ परमात्मस्वरूपाभेदेऽप्युपाधिभेदेनोपहितोपास्यरूपभेदादुपासनानां भेदे सति फलभेद इति भावः। तं परमात्मानं यद्गुणत्वेन लोका राजानमिवोपासते तत्तद्गुणवत्त्वमेव तेषां फलं भवति, क्रतुः सङ्कल्पो ध्यानं इह यादृग्ध्यानवान् भवति मृत्वा तादृग्रोपास्यरूपो भवतीत्यत्रैव भगवद्वाक्यमाह॥ स्मृतेश्चेति॥ ननु सर्व्वभूतेषु निरतिशयात्मन एकत्वादुपास्योपासकयोस्तारतम्यश्रुतयः कथमित्याशङ्क्य परिहरति॥ यद्यप्येक इति॥ उक्तानामुपाधीनां शुद्धितारतम्यादैश्वर्य्यज्ञानसुखरूपशक्तीनां तारतम्यरूपा विशेषा भवन्ति तैरेकरूपस्यात्मन उत्तरोत्तरं मनुष्यादिहिरण्यगर्भान्तेष्वाविर्भावतारतम्यं श्रूयते। तस्यात्मन आत्मानं स्वरूपमाविस्तरां प्रकटतरं यो वेद उपास्ते सोऽश्नुते तदिति तरप्प्रत्ययादित्यर्थः। तथा च निकृष्टोपाधिरात्मैवोपासकः उत्कृष्टोपाधिरीश्वर उपास्य इत्यौपाधिकं तारतम्यमविरुद्धमिति भावः। अत्रार्थे भगवद्गीतामुदाहरति॥ स्मृताविति॥ अत्र सूर्य्यादेरपि न जीवत्वेनोपास्यता किन्त्वीश्वरत्वेनेत्युक्तं भवति। तत्र सूत्रकारसम्मतिमाह॥ एवमिति॥ उदयः असम्बन्धः एवं यस्मिन् वाक्ये उपाधिर्विवक्षितः तद्वाक्यमुपासनापरमिति यस्मुत्तरसूत्रसन्दर्भस्यारम्भ इत्युक्त्वा यत्र

लिङ्गात् पर एवेति वक्ष्यति, एवमाकाशस्तल्लिङ्गादित्यादिषु द्रष्टव्यं, एवं मध्येमुक्तिकारणमप्यात्मज्ञानमुपाधिविशेषद्वारेणोपदिश्यमानमप्यविवक्षितोपाधि*सम्बन्धविशेषं परापरविषयं परापरविषयत्वेन सन्दिह्यमानं वाक्यगतिपर्य्यालोचनया निर्णेतव्यं भवति। यथैव हि तावदानन्दमयोऽभ्यासादिति, एवमेकमपि ब्रह्मापेक्षितोपाधिसम्बन्धं निरस्तोपाधिसम्बन्धञ्चोपास्यत्वेन ज्ञेयत्वेन च वेदान्तेषु उपदिश्यत इति प्रदर्शयितुं परो ग्रन्थ आरभ्यते। यच्च गतिसामान्यादित्यचेतनकारणान्तरनिराकरणमुक्तं तदपि वाक्यान्तराणि ब्रह्मविषयाणि व्याचक्षाणेन ब्रह्म विपरीतकारणनिषेधेन प्रपद्यते॥

आनन्दमयोऽभ्यासात्॥ १२॥

तैत्तिरीयके "अन्नमयं" "प्राणमयं" "मनोमयं" "विज्ञानमयञ्च" अनुक्रम्यामायते "तस्माद्वा एतस्मादिज्ञानमयादन्योऽन्तर आत्मानन्दमयः" इति। तत्र संशयः। किमिह आनन्दमयशब्देन

न विवक्षितः तदाक्यं ज्ञेयब्रह्मपरमिति निर्णयार्थमारम्भ इत्याह॥ एवं सत्य इति॥ अन्नमयादिकोषा उपाधिविशेषाः, वाक्यगतिस्तात्पर्यं। आरम्भसमर्थनमुपसंहरति॥ एवमेकमपीति॥ सिद्धवदुक्तगतिसामान्यस्य साधनार्थमप्युत्तरारम्भ इत्याह॥ यच्चेति॥ अन्नं प्रसिद्धं प्राणमनोबुद्धयः हिरण्यगर्भरूपाः, विम्बचैतन्यमीश्वर आनन्दः "तेषां पञ्चानां विकारा आध्यात्मिका देहप्राणमनोबुद्धिजीवा अन्नमयादयः पञ्चकोशाः" इति श्रुतेः परमार्थः। पूर्वाधिकरणे गौणमुख्येक्षणयोरतुल्यत्वेन संशयाभावादौणप्रायपाठो न निश्चायक इत्युक्तं तर्हि मयटो विकारे प्राचुर्ये

---

* सम्बन्धेति मु० पु० नास्ति॥

परमेव ब्रह्मोच्यत "यत् प्रकृतं सत्यं ज्ञानमनन्तं ब्रह्म" इति, किम्वा अन्नमयादिवत् ब्रह्मणोऽर्थान्तरमिति किं तावत् प्राप्तं ब्रह्मणोऽर्थान्तरममुख्य आत्मा आनन्दमयः स्यात्। कस्मात्, अन्नमयाद्यमुख्यात्मप्रवाहपतितत्वात्। अथापि स्यात् सर्व्वान्तरत्वादानन्दमयो मुख्य एवात्मेति न स्यात् प्रियाद्यवयवयोगात्, शारीरत्वश्रवणाच्च। मुख्यस्येदात्मा स्यान्न प्रियादिसंस्पर्शः स्यात्, इह तु "तस्य प्रियमेव शिरः" इत्यादि श्रूयते, शारीरत्वञ्च श्रूयते "तस्यैष एव शारीर आत्मा यः पूर्व्वस्य" इति तस्य पूर्व्वस्य विज्ञानमयस्यैष एव शारीर आत्मा य एष आनन्दमय इत्यर्थः। न च शरीरस्य सतः प्रियाप्रियसंस्पर्शो वारयितुं शक्यः, तस्मात् संसार्य्येवानन्दमय आत्मा इत्येवं प्राप्ते इदमुच्यते, आनन्दमयोऽभ्यासात्, परमात्मानन्दमयो भवितुमर्हति। कुतोऽभ्यासात्। परस्मिन्नेव ह्यात्मन्यानन्दशब्दो बहुशस्त्वेऽभ्यस्यते आनन्दमयं

च मुख्यत्वात् संशये विकारप्रायपाठादानन्दविकारो जीव आनन्दमय इति निश्चयेऽस्तीति प्रत्युदाहरणसङ्गत्या पूर्व्वपक्षमाह॥ कस्मादिति॥ आकाङ्क्षापूर्व्वकं अन्नमयादीति श्रुत्यादिसङ्गतयः स्फुटा एव, पूर्व्वपक्षे वृत्तिकारमते जीवोपास्या प्रियादिप्राप्तिः फलं, सिद्धान्ते तु ब्रह्मोपास्तीति भेदः, शङ्कते॥ अथापीति॥ परिहरति॥ न स्यादिति॥ संग्रहीतं विवृणोति॥ मुख्य इति॥ परमात्मेत्यर्थः, शरीरत्वेऽपीश्वरत्वं किं न स्यादित्यत आह॥ न चेति॥ जीवत्वं दुर्व्वारमित्यर्थः। नन्वानन्दपदाभ्यासेऽप्यानन्दमयस्य ब्रह्मत्वं कथमित्याशङ्क्य ज्योतिष्टोमाधिकारे ज्योतिःपदस्य ज्योतिष्टोमपरत्ववदानन्दमयप्रकरणस्यानन्दमयपदस्यानन्दमयपरत्वात् तदभ्यासस्तस्य ब्रह्मत्वसाधक इत्यभिप्रेत्याह॥ आनन्दमयं प्रस्तुत्येति॥ रसः सार आनन्द इत्यर्थः। अयं लोकः यत् यदि एष आकाशः पूर्णः आ-

प्रस्तुत्य "रसो वै सः" इति तस्यैव रसत्वमुक्त्वोच्यते। "रसं ह्येवायं लब्ध्वानन्दी भवतीति को ह्येवान्यात् कः प्राण्याद्यदेष आकाश आनन्दो न स्यात्, एष ह्येवानन्दयाति, सैषानन्दस्य मीमांसा भवति" एतमानन्दमयात्मानमुपसंक्रामति। "आनन्दं ब्रह्मणो विद्वान्न बिभेति कुतश्चन" इति। "आनन्दो ब्रह्मेति व्यजानात्" इति च। श्रुत्यन्तरे च "विज्ञानमानन्दं ब्रह्म" इति ब्रह्मण्येव आनन्दशब्दो दृष्टः, एवमानन्दशब्दस्य बहुकृत्वो ब्रह्मणोभ्यासात् आनन्दमय आत्मा ब्रह्मेति गम्यते। यत्तूक्तं अन्नमयाद्यमुख्यात्मप्रवाहपतितत्वादानन्दमयस्याप्यमुख्यात्मत्वमिति, नासौ दोषः, आनन्दमयस्य सर्व्वान्तरत्वात्। मुख्यमेव ह्यात्मानं उपदिदिक्षुणाक्तं लोकबुद्धिमनुसरत् अन्नमयं शरीरमनात्मानमत्यन्तमूढानामात्मत्वेन प्रसिद्धमनूद्य मूषानिषिक्तद्रुतताम्रादिप्रतिमावत् ततोऽन्तरं ततोऽन्तरमित्येवं पूर्व्वेण पूर्व्वेण समानमुत्तरमुत्तरमनात्मानमात्मा इति ग्राहयत् प्रतिपत्तिसौकर्य्यापेक्षया

नन्दः साक्षिप्रेरको न स्यात् तदा को वान्याच्चलेत् को वा विशिष्य प्राण्याद्जीवेत् तस्मादेष एवानन्दयाति, आनन्दयतीत्यर्थः। "युवा स्यात् साधुयुवा" इत्यादिना वक्ष्यमाणामनुष्ययुवानन्दमारभ्य ब्रह्मानन्दावसाना एषा सन्निहिता आनन्दस्य तारतम्यमीमांसा भवति, उपसंक्रामति "विद्वान् प्राप्नोति" इत्येकदेशिनामर्थः। मुख्यसिद्धान्ते तूपसंक्रमणं विदुषः कोषाणां प्रत्यङ्मात्रत्वेन विलापनमिति ज्ञेयं शिष्टमुक्तार्थं। आनन्दशब्दाद्ब्रह्मावगतिः सर्व्वत्र समानेति गतिसामान्यार्थमाह॥ श्रुत्यन्तरे चेति॥ लिङ्गादमुख्यात्मसन्निधेर्बाध इति मत्वाह॥ नासाविति॥ सर्व्वान्तरत्वं न श्रुतमित्याशङ्क्य तत्तोऽन्यस्यानुक्तेस्तस्य सर्व्वान्तरत्वमिति विहसोति॥ मुख्यमिति॥ लोकबुद्धिमिति॥ तस्याः स्थूलग्राहितामनुसरदित्यर्थः।

सर्व्वान्तरं मुख्यमानन्दमयमात्मानमुपदिदेशेति श्लिष्टतरं। यथा-रुन्धतीनिदर्शने बङ्कीष्वपि तारास्वमुख्यास्वरुन्धतीषु दर्शितासु या अन्या प्रदर्श्यते सा मुख्यैवारुन्धती भवति, एवमिहाप्यानन्दमयस्य सर्व्वान्तरत्वान्मुख्यमात्मत्वं। यत्तु ब्रूषे प्रियादीनां शिरस्त्वादिकल्पना अनुपपन्ना मुख्यस्यात्मनः इत्यतीतानन्तरोपाधिजनिता सा न स्वाभाविकीत्यदोषः। शारीरत्वमप्यानन्दमयस्यान्नमयादिशरीरपरम्परया प्रदर्श्यमानत्वात् न पुनः साक्षादेव शारीरत्वं संसारिवत्, तस्मादानन्दमयः पर एवात्मा ॥

विकारशब्दान्नेति चेन्न प्राचुर्य्यात् ॥ १३ ॥

अत्राह नानन्दमयः परमात्मा भवितुमर्हति। कस्मात्। विकारशब्दात्, प्रकृतवचनादयमन्यः शब्दो विकारवचनः समधिगत आनन्दमय इति मयटो विकारार्थत्वात्,तस्मादन्नमयादिशब्दवत् विकारविषय एवायमानन्दमयशब्द इति चेत्, न, प्राचुर्य्यार्थेऽपि मयटः स्मरणात्तत्प्रकृतवचने मयडिति हि प्रचु-

---

तामस्य मूषाकारत्ववत् प्राणस्य देहाकारत्वं देहेन सामान्यं तथा मनः प्राणाकारं तेन समभित्याह ॥ पूर्व्वेणेति ॥ अतीतो योऽनन्तर उपाधिर्विज्ञानकोशस्तत्कृता सावयवत्वकल्पना शरीरेण ज्ञेयत्वाच्छारीरत्वमिति लिङ्गद्वयं दुर्ब्बलं, अतः सहायाभावादभ्याससर्व्वान्तरत्वाभ्यां विकारसन्निधेर्बाध इति भावः। विकारार्थकमयट्श्रुतिसहाय इत्याशङ्क्य मयटः प्राचुर्य्येऽपि विधानाच्चैवमित्याह ॥ विकारेत्यादिना ॥ तत्प्रकृतवचने मयडिति तदिति प्रथमासमर्थाच्छब्दात् प्राचुर्य्यविशिष्टस्य प्रस्तुतस्य वचनेऽभिधाने गम्यमाने मयट्प्रत्ययो भवतीति सूत्रार्थः। अत्र वचनग्रहणात् प्रकृतस्य प्राचुर्य्यवैशिष्ट्यसिद्धिः, तादृशस्य

रतायामपि मयट् स्मर्यते, यथान्नमयो यज्ञ इति अन्नप्रचुर उच्यते, एवमानन्दप्रचुरं ब्रह्मानन्दमय उच्यते। आनन्दप्रचुरत्वञ्च ब्रह्मणो मनुष्यत्वादारभ्योत्तरस्मिन् उत्तरस्मिन् स्थाने शतगुण आनन्द इत्युक्ता ब्रह्मानन्दस्य निरतिशयत्वावधारणात्, तस्मात् प्राचुर्य्यार्थे मयट्॥

तद्धेतुव्यपदेशाच्च ॥ १४ ॥

इतश्च प्राचुर्य्यार्थे मयट् यस्मादानन्दहेतुत्वं ब्रह्मणो व्यपदिशति श्रुतिः "एष ह्येवानन्दयाति" इति आनन्दयतीत्यर्थः; यो ह्यन्यानानन्दयति स प्रचुरानन्द इति प्रसिद्धं भवति। यथा लोके योऽन्येषां धनिकत्वमापादयति स प्रचुरधन इति गम्यते तद्वत्, तस्मात् प्राचुर्य्यार्थेऽपि मयटः सम्भवादानन्दमयः पर एव आत्मा॥

मान्त्रवर्णिकमेव च गीयते ॥ १५ ॥

इतश्चानन्दमयः पर एवात्मा यस्मात् "ब्रह्मविदाप्नोति परं" इत्युपक्रम्य "सत्यं ज्ञानमनन्तं ब्रह्म" इति अस्मिन्मन्त्रे यत् ब्रह्म प्रकृतं सत्यज्ञानानन्तविशेषणैर्निर्धारितं, यस्मादाकाशादिक्रमेण स्थावरजङ्गमानि भूतान्यजायन्त, यच्च भूतानि सृष्ट्वा ता-

---

लोके मयटोऽभिधानाद्यथा अन्नमयो यज्ञ इति, अत्र ह्यन्नं प्रचुरमस्मिन्नित्यन्नशब्दः प्रथमाविभक्तिश्रुतस्तस्मान्मयट् यज्ञस्य प्रकृत्यर्थान्नप्राचुर्यवाचि दृश्यते न तु तद्धितवचन इति ध्येयं। सूत्रस्थचशब्दोऽनुक्तसमुच्चयार्थ इति मत्वा व्याचष्टे॥ इतश्चेति॥ तच्चानुक्तं ब्रह्मानन्दस्य निरतिशयत्वावधारणं पूर्व्वमुक्तं। आनन्दमयस्य ब्रह्मत्वे लिङ्गमुक्ता प्रकरण-

न्यनुप्रविश्य गुहायामवस्थितं सर्व्वान्तरं, यस्य विज्ञानायान्योन्तर आत्मेति प्रक्रान्तं तस्मान्मन्त्रवर्णिकमेव ब्रह्मेह गीयते योऽन्योन्तर आत्मानन्दमय इति। मन्त्रब्राह्मणयोस्त्वैकार्थ्यं युक्तं अविरोधात्; अन्यथा हि प्रकृतहानाप्रकृतप्रक्रिये स्यातां, न चान्नमयादिभ्य इवानन्दमयादन्योन्तर आत्माऽभिधीयते। "एतस्मिन्नेव च "सैषा भार्गवी वारुणीविद्या। आनन्दो ब्रह्मेति व्यजानात्" इति तस्मादानन्दमयः पर एवात्मा ॥

नेतरोऽनुपपत्तेः ॥ १९ ॥

इतश्चानन्दमयः पर एवात्मा नेतरः। इतर ईश्वरादन्यः संसारी जीव इत्यर्थः। न जीव आनन्दमयशब्देनाभिधीयते। कस्मात्, अनुपपत्तेः। आनन्दमयं हि प्रकृत्य श्रूयते "सोऽकामयत बहु स्यां प्रजायेय" इति "स तपो तप्यत स तपस्तप्त्वा इदं सर्व्वमसृजत यदिदं किञ्च" इति। तच्च प्राक् शरीराद्युत्पत्तेरभि-

---

माह ॥ मन्त्रेति ॥ यस्मादेवं कृतं तस्मान्मान्त्रवर्णिकमेव ब्रह्मानन्दमय इति वाक्ये गीयत इति योजना। ननु मन्त्रोक्तमेवात्र ग्राह्यमिति को निर्बन्धस्तत्राह ॥ मन्त्रेति ॥ ब्राह्मणस्य मन्त्रव्याख्यानत्वादुपायत्वमस्ति मन्त्रस्तूपेयः तदिदमुक्तं ॥ अविरोधादिति ॥ तथारूपायोपेयभावादित्यर्थः। तर्ह्यन्नमयादीनामपि मान्त्रवर्णिकब्रह्मत्वं स्यादित्यत आह ॥ न चेति ॥ भृगवे प्रोक्ता वरुणेनोपदिष्टा भृगुवल्लीपञ्चमपर्य्यायस्यानन्दे प्रतिष्ठिता तत्र स्थानन्यायेन तदेकार्थब्रह्मवल्ल्या आनन्दमये निष्ठेत्याह ॥ एतस्मिन्नेवेति ॥ स ईश्वरः तपः दृष्ट्वा लोचनमतप्यत कृतवानित्यर्थः, अभिध्यानं कामना, बहु स्यामित्यवतिरेकाधिकारे स प्रकरणे आनन्दमयो रसः। ननु लब्धृलब्धव्यभावेऽप्यभेदः किं न स्यादत आह ॥ न हि लब्धैवेति ॥ ननु लब्धृलब्धयोर्भेदस्यावश्यकत्वे श्रुतिस्मृत्योर्बाधः स्यादित्याशङ्क्यते ॥ कथमिति ॥

ध्यानं सृज्यमानानां विकाराणां स्रष्टुरव्यतिरेकः सर्व्वविकार-सृष्टिश्च न परस्मादात्मनोऽन्यत्रोपपद्यते ॥

भेदव्यपदेशाच्च ॥ १७ ॥

इतश्च नानन्दमयः संसारी यस्मादानन्दमयाधिकारे "रसो वै सः, रसं ह्येवायं लब्ध्वानन्दी भवति" इति जीवानन्द-मयौ भेदेन व्यपदिशति। न हि लब्धैव लब्धव्यो भवति। कथं तर्ह्यात्माऽन्वेष्टव्यः "आत्मलाभान्न परं विद्यते" इति च श्रुतिस्मृती यावता न लब्धैव लब्धव्यो भवतीत्युक्तं ॥ वाढं ॥ तयाप्यात्मनो ऽप्रच्युतात्मभावस्यैव सतस्तत्त्वानवबोधनिमित्तो देहादिष्वना-त्मस्वात्मत्वनिश्चयो लौकिको दृष्टः, तेन देहादिभूतस्यात्मनो ऽप्यात्माऽनन्विष्टोऽन्वेष्टव्योऽलब्धो लब्धव्योऽश्रुतः श्रोतव्योऽमतो मन्तव्योऽविज्ञातो विज्ञातव्य इत्यादिभेदव्यपदेश उपपद्यते। प्रतिषिद्धत एव तु परमार्थतः सर्व्वज्ञात् परमेश्वरादन्यो द्रष्टा श्रोता वा "नान्योतोऽस्ति द्रष्टा" इत्यादिना परमेश्वरस्याविद्या-कल्पिताच्छारीरात् कर्त्तृभोक्तृर्व्विज्ञानात्माख्यादन्यः, यथा मा-याविनश्चर्म्मखड्गधरात् सूत्रेणाकाशमधिरोहतः स एव मायावी

यावता यतस्त्वयेत्युक्तं अतः श्रुतिस्मृती कथमित्यन्वयः उक्तां शङ्कामङ्गीक-रोति॥ वाढमिति॥ तर्ह्यात्मन एवात्मना लभ्यत्वोक्तिबाधः अभेदादि-त्याशङ्क्य कल्पितभेदान्न बाध इत्याह॥ तथापीति॥ अभेदेपीत्यर्थः लौकिकभ्रमः आत्मनः स्वाज्ञानजन्यमेण देहाद्यभिन्नस्य भेदभ्रान्त्या पर-मात्मनो ज्ञेयत्वाद्युक्तिरित्यर्थः। अन्वेष्टव्यो देहादिव्यतिरिक्ततया ज्ञेयः विवेकज्ञानेन लभ्यः साक्षात्कर्त्तव्यः तदर्थं श्रोतव्यः विज्ञानं निदि-ध्यासनं साक्षात्कारो वा श्रुत्यन्तरस्यार्थानुवादपीनरुक्त्यं। ननु भेदः

परमार्थरूपो भूमिष्ठोऽन्यः। यथा वा घटाकाशादुपाधिपरिच्छिन्नादनुपाधिपरिच्छिन्न आकाशोऽन्यः। ईदृशश्च विज्ञानात्मपरमात्मभेदमाश्रित्य नेतरोऽनुपपत्तेर्भेदव्यपदेशाच्चेत्युक्तं ॥

कामाच्च नानुमानापेक्षा ॥ १८ ॥

आनन्दमयाधिकारे च "सोऽकामयत बहु स्यां प्रजायेय" इति कामयितृत्वनिर्देशान्नानुमानिकमपि सांख्यपरिकल्पितमचेतनं प्रधानमानन्दमयत्वेन कारणत्वेन चापेक्षितव्यं। ईक्षतेर्नाशब्दमिति निराकृतमपि प्रधानं पूर्वसूत्रोदाहृतां कामयितृत्वश्रुतिं आश्रित्य प्रसङ्गात् पुनर्निराक्रियते गतिसामान्यप्रपञ्चनाय ॥

अस्मिन्नस्य च तद्योगं शास्ति ॥ १९ ॥

इतश्च न प्रधाने जीवे वाऽऽनन्दमयशब्दः, यस्मादस्मिन्नानन्दमये प्रकृते आत्मनि प्रतिबुद्धस्यास्य जीवस्य। तद्योगं शास्ति

सत्य एवास्तु तत्राह ॥ प्रतिषिद्धत इति ॥ अत ईश्वरात् द्रष्टा जीवोऽन्यो नास्तीति चेत् जीवाभेदादीश्वरस्यापि मिथ्यात्वं स्यादत आह ॥ परमेश्वर इति ॥ अविद्याप्रतिबिम्बत्वेन कल्पिताज्जीवाच्चिन्मात्र ईश्वरः पृथगस्तीति न मिथ्यात्वं। कल्पितस्याधिष्ठानाभेदेऽप्यधिष्ठानस्य ततो भेद इत्यत्र दृष्टान्तमाह ॥ यथेति ॥ सूत्रारूढः खतोऽपि मिथ्या न जीव इत्यस्या भेदमात्रमिथ्यात्वे दृष्टान्तमाह ॥ यथा वेति ॥ ननु सूत्रबलाद्भेदः सत्य इत्यत आह ॥ ईदृशश्चेति ॥ कल्पितमेवेत्यर्थः। सूत्रे भेदः सत्य इति पदाभावात्तदनन्यत्वादिसूत्रणाच्छ्रुत्यनुसाराच्चेति भावः। नन्वानन्दात्मकसत्त्वप्रचुरं प्रधानमानन्दमयमस्तु। तत्राह ॥ कामाच्चेति ॥ अनुमानगम्यमानुमानिकं। पुनरुक्तिमाशङ्क्याह ॥ ईक्षतेरिति ॥ अस्मिन्निति ॥ विषयसप्तमी, आनन्दमयविषयप्रबोधवतो जीवस्य तद्योगं

तदात्मना योगस्तद्योगस्तद्भावापत्तिः, मुक्तिरित्यर्थः। तद्योगं शास्ति शास्त्रं।"यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयने ऽभयं प्रतिष्ठां विन्दते, अथ सोऽभयं गतो भवति; यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते, अथ तस्य भयं भवति" इति। एतदुक्तं भवति यदि तस्मिन्नानन्दमयेऽल्पमप्यन्तरं अतादात्म्यरूपं पश्यति तदा संसारभयान्न निवर्त्तते। यदा त्वेतस्मिन्नानन्दमये निरन्तरं तादात्म्येन प्रतितिष्ठति तदा संसारभयान्निवर्त्तते इति; तच्च परमात्मपरिग्रहे घटते न प्रधानपरिग्रहे जीवपरिग्रहे वा, तस्मादानन्दमयः परमात्मेति सिद्धं। इदन्त्विह वक्तव्यं"स वा एष पुरुषोऽन्नरसमयः","तस्माद्वा एतस्मादन्नरसमयात्,अन्योऽन्तरात्मा प्राणमयः","तस्मादन्योऽन्तरात्मा मनोमयः","तस्मादन्योऽन्तरात्मा विज्ञानमयः" इति च विकारार्थे मयट्प्रवाहे मत्यानन्दमय एवाकस्मादर्द्धजरतीयन्यायेन कथमिव मयटः प्राचुर्य्यार्थत्वं ब्रह्मविषयत्वं वा आश्रीयते इति। मान्त्ववर्णिकब्रह्माधिका-

---

यस्माच्छास्ति तस्मान्न प्रधानमिति योजना। जीवस्य प्रधानयोगोऽप्यस्तीत्यत आह ॥ तदात्मेति ॥ जीवस्य ब्रह्माभेदोऽस्तीत्यत आह ॥ मुक्तिरिति॥ अदृश्ये स्थूलप्रपञ्चशून्ये आत्मसम्बन्धमात्र्यं लिङ्गशरीरं तद्रहिते। निरुक्तं शब्दशक्यं तद्भिन्ने। निःशेषलयस्थानं निलयनं माया तच्छून्ये। ब्रह्मण्यभयं यथा स्यात्तथा यदैवं प्रतिष्ठां मनसः प्रकृष्टां वृत्तिमेष विद्वान्भजते अथ तदैवाभयं ब्रह्म प्राप्नोतीत्यर्थः। उत् अपि अरमल्पमल्पमप्यन्तरं भेदं यदैवैष नरः पश्यति अथ तदा तस्य भयमिति योजना इति। वृत्तिकारमतं दूषयति ॥ इदन्त्विति ॥ इह परव्याख्यायां विकारार्थके मयटि बुद्धिस्थे सत्यकस्मात् कारणं विना एकप्रकरणस्थस्य मयटः पूर्व्वं विकारार्थकत्वं, अन्ते प्राचुर्य्यार्थकत्वमित्यर्द्धजरतीयं कथमिव केन

रादिति चेत्, अन्नमयादीनामपि तर्हि ब्रह्मत्वप्रसङ्गः। अत्राह युक्तमन्नमयादीनामब्रह्मत्वं तस्मात्तस्मादन्तरस्यान्तरस्यान्यस्यान्यस्यात्मन उच्यमानत्वात्, आनन्दमयात्तु न कश्चिदन्योऽन्तर आत्मोच्यते। तेनानन्दमयस्य ब्रह्मत्वं, अन्यथा प्रकृतहानाऽप्रकृतप्रक्रियाप्रसङ्गादिति। अत्रोच्यते, यद्यप्यन्नमयादिभ्य इवानन्दमयादन्योऽन्तर आत्मेति न श्रूयते तथापि नानन्दमयस्य ब्रह्मत्वं, यत आनन्दमयं प्रकृत्य श्रूयते "तस्य प्रियमेव शिरः, मोदो दक्षिणः पक्षः, प्रमोद उत्तरः पक्षः, आनन्द आत्मा, ब्रह्म पुच्छं प्रतिष्ठा" इति। तत्र यद्ब्रह्मेह मन्त्रवर्णे प्रकृतं "सत्यं ज्ञानमनन्तं ब्रह्म" इति तदिह ब्रह्म पुच्छं प्रतिष्ठेत्युच्यते तद्विजिज्ञापयिषयैवान्नमयादय आनन्दमयपर्यन्ताः पञ्चकोशाः कल्प्यन्ते,तत्र कुतः प्रकृतहानाप्रकृतप्रक्रियाप्रसङ्गः। नन्वानन्दमयस्यावयवत्वेन ब्रह्म पुच्छं प्रति-

---

दृष्टान्तेन आश्रीयत इति इदं वक्तव्यमित्यन्वयः। प्रश्नं प्रत्याशङ्कते॥ मान्त्रेति॥ स्फुटमुत्तरं। किमान्तर इति न श्रूयते किं वा वस्तुतोऽप्यान्तरं ब्रह्म न श्रूयत इति विकल्प्य आद्यमङ्गीकरोति॥ अत्रोच्यते यद्यपीति॥ विकारप्रायपाठानुगृहीतमयटश्रुतेः सावयवलिङ्गाच्चेत्याह॥ तथापीति॥ इष्टार्थस्य दृष्ट्या जातं सुखं प्रियं, स्मृत्याऽऽमोदः, स चाभ्यासात् प्रकृष्टः प्रमोदः, आनन्दस्तु कारणं। बिम्बचैतन्यमात्मा, शिरः पुच्छयोर्मध्यकायः ब्रह्म शुद्धमिति श्रुत्यर्थः। द्वितीयं प्रत्याह॥ तत्र यदिति॥ यन्मन्त्रे प्रकृतं गुहानिहितत्वेन सर्वान्तरं ब्रह्म तदिह पुच्छवाक्ये ब्रह्मशब्दात् प्रत्यभिज्ञायते तस्यैव विज्ञापनेच्छया पञ्चकोशरूपा गुहा प्रपञ्चिता, तत्र तात्पर्यं नास्तीति वक्तुं कल्प्यन्त इत्युक्तं। एवं पुच्छवाक्ये प्रकृतस्वप्रधानब्रह्मपरे सति न प्रकृतहान्यादिदोष इत्यर्थः। ब्रह्मणः प्रधानत्वं पुच्छश्रुतिविरुद्धमिति शङ्कते॥ नन्विति॥ अत्र ब्रह्मशब्दात् प्रकृतस्वप्रधानब्रह्मप्रत्यभिज्ञाने सति पुच्छशब्दविरोधप्राप्तावेकस्मिन् वाक्ये प्रथम-

ष्टेत्युच्यते। अन्नमयादीनामिवेदं पुच्छं प्रतिष्ठेत्यादि, तत्र कथं ब्रह्मणः स्वप्रधानत्वं शक्यं विज्ञातुं, प्रकृतत्वादिति ब्रूमः। नन्वानन्दमयावयवत्वेनापि ब्रह्मणि विज्ञायमाने न प्रकृतत्वं हीयते आनन्दमयस्य ब्रह्मत्वादिति। अत्रोच्यते तथा सति तदेव ब्रह्मानन्दमय आत्मावयवी तदेव च ब्रह्म पुच्छं प्रतिष्ठावयव इत्यसामञ्जस्यं स्यात्। अन्यतरपरिग्रहे तु युक्तं ब्रह्म पुच्छं प्रतिष्टेत्यत्रैव ब्रह्मनिर्देश आश्रयितुं ब्रह्मशब्दसंयोगान्नानन्दमयवाक्ये ब्रह्मशब्दसंयोगाभावादिति। अपि च ब्रह्म पुच्छं प्रतिष्ठेति उक्तेदमुच्यते "तदप्येषश्लोको भवति, असन्नेव स भवति, असद्ब्रह्मेति वेद चेत्, अस्ति ब्रह्मेति चेद्वेद, सन्तमेनन्ततो विदुः" इति। अस्मिंश्च श्लोकेऽननुक्त्यानन्दमयं ब्रह्मण एव भावाभाववेदनयोर्गुणदोषाभिधानाद्गम्यते ब्रह्म पुच्छं प्रतिष्ठेत्यत्र ब्रह्मण एव स्वप्रधानत्वमिति। न चानन्दमयस्यात्मनो भावाभावशङ्का युक्ता प्रियमोदादिविशेषस्यानन्दमयस्य सर्व्वलोकप्रसिद्धत्वात् कथं पुनः स्वप्रधानं सद्ब्रह्मा-

---

चरमश्रुतशब्दयोरादस्यानुषसङ्गातविरोधिनो बलीयस्त्वात् पुच्छशब्देन प्राप्तगुणत्वस्य बाध इति मत्वाह ॥ प्रकृतत्वादिति ॥ प्रकरणस्यान्यथासिद्धिमाह ॥ नन्विति ॥ एकस्यैव गुणत्वं प्रधानत्वञ्च विरुद्धमित्याह ॥ अत्रोच्यत इति ॥ तत्र विरोधनिरासायान्यतरस्मिन् वाक्ये ब्रह्मस्वीकारे पुच्छवाक्ये ब्रह्म स्वीकार्य्यमित्याह ॥ अन्यतरेति ॥ वाक्यशेषाच्चैवमित्याह ॥ अपि चेति ॥ तत्र ब्रह्मणि श्लोकोऽपीत्यर्थः। पुच्छशब्दस्य गतिं दर्शयति ॥ कथं पुनरिति ॥ त्वयापि पुच्छशब्दस्य मुख्यार्थो वक्तुमशक्यः ब्रह्मण आनन्दमयलाङ्गुलत्वाभावात् पुच्छदृष्टिलक्षणायाश्चाधारलक्षणा युक्ता प्रतिष्ठापदयोगात्, ब्रह्मशब्दस्य मुख्यार्थलाभाच्च। त्वत्पक्षे ब्रह्मपदस्याप्यवयवलक्षकत्वादित्याह ॥ नैष दोष इति ॥ पुच्छमित्याधारत्वमात्र-

नन्दमयस्य पुच्छत्वेन निर्दिश्यते ब्रह्म पुच्छं प्रतिष्ठेति। नैष दोषः पुच्छवत् पुच्छं प्रतिष्ठापरायणमेकनीडं लौकिकस्यानन्दजातस्य ब्रह्मानन्द इत्येतदनेन विवक्ष्यते नावयवत्वं। "एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति" इति श्रुत्यन्तरात्। अपि चानन्दमयस्य ब्रह्मत्वे प्रियाद्यवयवत्वेन सविशेषं ब्रह्माभ्युपगन्तव्यं। निर्विशेषन्तु ब्रह्मवाक्यशेषे श्रूयते वाङ्मनसयोरगोचरत्वाभिधानात्, "यतो वाचो निवर्त्तन्ते, अप्राप्य मनसा सह", "आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन" इति। अपि चानन्दप्रचुर इत्युक्ते दुःखास्तित्वमपि गम्यते प्राचुर्यस्य लोके प्रतियोग्यल्पत्वापेक्षत्वात्। तथाच सति "यत्र नान्यत् पश्यति, नान्यच्छृणोति, नान्यद्विजानाति, स भूमा" इति भूम्नि ब्रह्मणि तद्व्यतिरिक्ताभावश्रुतिरुपरुद्ध्येत। प्रतिशरीरञ्च प्रियादिभेदादानन्दमयस्यापि

मुक्तं प्रतिष्ठेत्येकनीडत्वं एकं मुख्यं नीडं अधिष्ठानं सोपादानस्य जगत इत्यर्थः। ननु वृत्तिकारैरपि तैत्तिरीयवाक्यं ब्रह्मणि समन्वितं इष्टं, तत्र किमुदाहरणभेदेनेत्याशङ्क्याह ॥ अपि चेति ॥ यत्र सविशेषत्वं तत्र वाङ्मनसगोचरत्वमिति व्याप्तेरत्र व्यापकाभावोक्त्या निर्विशेषमुच्यत इत्याह ॥ निर्विशेषमिति ॥ निवर्त्तन्ते अप्राप्ता इत्यर्थः। सविशेषस्य मृषात्वादभयत्वायुक्तं, अतो निर्विशेषज्ञानार्थं पुच्छवाक्यमेवोदाहरणमिति भावः। प्राचुर्यार्थकमयटा सविशेषोक्तौ निर्विशेषश्रुतिबाध उक्तः। दोषान्तरमाह ॥ अपि चेति ॥ प्रत्ययार्थत्वेन प्रधानस्य प्राचुर्यस्य प्रकृत्यर्थो विशेषणं, विशेषणस्य यः प्रतियोगी विरोधीति तस्याल्पत्वमपेक्षते यथा विप्रमयो ग्राम इति श्रुताल्पत्वं। अस्तु को दोषस्तत्राह ॥ तथा चेति ॥ प्रकृत्यर्थप्राधान्ये त्वयं दोषो नास्ति, प्रचुरप्रकाशः सवितेत्यत्र तमसोऽल्पस्याप्यभानात् परत्वानन्दमयपदस्य प्रचुरानन्दे लक्षणादोषः

भिन्नत्वं, ब्रह्म तु न प्रतिशरीरं भिद्यते "सत्यं ज्ञानमनन्तं ब्रह्म" इत्यानन्त्यश्रुतेः, "एको देवः सर्व्वभूतेषु गूढः सर्व्वव्यापी सर्व्वभूतान्तरात्मा" इति च श्रुत्यन्तरात्। न चानन्दमयाभ्यासः श्रूयते, प्रातिपदिकार्थमात्रमेव हि सर्व्वत्राभ्यस्यते "रसो वै सः, रसं ह्येवायं लब्ध्वाऽऽनन्दी भवति, को ह्येवान्यात्कः प्राण्यात्, यदेष आकाश आनन्दो न स्यात्, एष ह्येवानन्दयाति, सैषानन्दस्य मीमांसा भवति" "आनन्दं ब्रह्मणो विद्वान्न बिभेति कुतश्चन", आनन्दो ब्रह्मेति व्यजानात्" इति च। यदि चानन्दमयशब्दस्य ब्रह्मविषयत्वं निश्चितं भवेत् तत उत्तरेष्वानन्दमात्रप्रयोगेष्वप्यानन्दमयाभ्यासः कल्प्येत, न त्वानन्दमयस्य ब्रह्मत्वमस्ति प्रियशिरस्त्वादिभिर्हेतुभिरित्यवोचाम। तस्माच्छ्रुत्यन्तरे "विज्ञानमानन्दं" ब्रह्म इति आनन्दप्रातिपदिकस्य ब्रह्मणि प्रयोगदर्शनात् "यदेष आकाश आनन्दो न स्यात्" इत्यादि ब्रह्मविषयः प्रयोगो न त्वानन्दमयाभ्यास इत्यवगन्तव्यं। यस्त्वयं मयडन्तस्यैवानन्दशब्दस्याभ्यास एतमानन्दमयमात्मानमुपसङ्क्रामतीति न तस्य ब्रह्मविषयत्वमस्ति

स्यादिति मन्तव्यं। किञ्च भिन्नत्वाद्घटवन्न ब्रह्मते त्याह ॥ प्रतिशरीरमिति॥ नन्वभ्यस्यमानानन्दपदं लक्षणयानन्दमयपरं इत्यभ्यासासिद्धिरित्यत आह ॥ यदि चेति ॥ आनन्दमयस्य ब्रह्मत्वे निर्णीते सत्यानन्दपदस्य तत्परत्वज्ञानादभ्यासासिद्धिः, तत्सिद्धौ तन्निर्णय इति परस्पराश्रय इति भावः। अयमभ्यासः पुच्छब्रह्मण इत्याह ॥ तस्मादिति ॥ उपसंक्रमणं बाधः॥ननु स एवंविदिति ब्रह्मविदं प्रकम्योपसंक्रमणवाक्येन फलं निर्दिश्यते तत्तस्याब्रह्मत्वेन सिद्ध्यतीति प्रश्नते ॥ नन्विति ॥ उपसंक्रमणं प्राप्तिरित्यङ्गीकृत्य विशिष्टप्राप्त्युक्त्या विशेषणप्राप्तिफलमुक्तमित्याह ॥ नैष इति ॥ ज्ञानेनाकाशानां बाधस्तदिति सिद्धान्ते बाधावधिप्रत्यगानन्दता-

विकारात्मनामेवान्नमयादीनामनात्मनामुपसङ्क्रमितव्यानां प्रवाहे पतितत्वात्। नन्वानन्दमयस्योपसङ्क्रमितव्यस्यान्नमयादिवद्ब्रह्मत्वे सति नैव विदुषो ब्रह्मप्राप्तिफलं निर्दिष्टं भवेत्। नैष दोषः। आनन्दमयोपसङ्क्रमणनिर्देशेनैव विदुषःपुच्छप्रतिष्ठाभूतब्रह्मप्राप्तेः फलस्य निर्दिष्टत्वात् "तदप्येष श्लोको भवति, यतो वाचो निवर्त्तन्ते" इत्यादिना प्रपञ्च्यमानत्वात्।*यत्त्वानन्दमयसन्निधाने "सोऽकामयत,बहु स्यां प्रजायेय"इतीयं श्रुतिरुदाहृता सा"ब्रह्म पुच्छं प्रतिष्ठा" इत्यनेन सन्निहिततरेण ब्रह्मणा सम्बध्यमानानानन्दमयस्य ब्रह्मतां प्रतिबोधयति, तदपेक्षत्वाच्चोत्तरस्य ग्रन्थस्य "रसो वै सः" इत्यादेर्नानन्दमयविषयता। ननु सोऽकामयत इति ब्रह्मणि पुंलिङ्गनिर्देशो नोपपद्यते। नायं दोषः। "तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः" इत्यत्र पुंलिङ्गेनाप्यात्मशब्देन ब्रह्मणः प्रकृतत्वात्। या तु भार्गवी वारुणी विद्या "आनन्दो ब्रह्मेति व्यजानात्" इति तस्यां मयडश्रवणात् प्रियशिरस्त्वाद्यश्रवणाच्च युक्तमानन्दस्य ब्रह्मत्वं। तस्मादणुमात्रमपि विशेषमनाश्रित्य न खत एव प्रियशिरस्त्वादि ब्रह्मण उपपद्यते, न चेह सविशेषं

भोऽर्थादुक्त उत्तरश्लोकेन स्फुटीकृत इत्याह ॥ तदपीति ॥ तदपेक्षत्वादिति कामयितृपुच्छब्रह्मविषयत्वादित्यर्थः। यदुक्तं पञ्चमस्थानस्थत्वादानन्दमये ब्रह्मवल्ली समाप्ता भृगुवल्लीवदिति तत्राह ॥ यत्त्विति ॥ या त्वित्यर्थः। मयट्श्रुत्या सावयवत्वादिलिङ्गेन च स्थानं बाध्यमिति भावः। गोचरातिक्रमो गोचरत्वाभावः। पूर्वमोक्षतेः संशयाभावात् इति युक्त्या प्रायपाठो न निश्चायक इत्युक्तं। तर्हि अत्र पुच्छपदस्याधारावयवयोर्लक्षणासाम्यात्

* यत्रेति पाठान्तरं।

ब्रह्म प्रतिपिपादयिषितं वाङ्मनसगोचरातिक्रमश्रुतेः। तस्मादन्नमयादिष्विवानन्दमयेऽपि विकारार्थ एव मयट्विज्ञेयो न प्राचुर्यार्थः। सूत्राणि त्वेवं व्याख्येयानि ब्रह्म पुच्छं प्रतिष्ठेत्यत्र किमानन्दमयस्यावयवत्वेन ब्रह्म विवक्ष्यते, उत स्वप्रधानत्वेनेति। पुच्छशब्दादवयवत्वेनेति प्राप्त उच्यते। आनन्दमयोऽभ्यासात्। आनन्दमय आत्मेत्यत्र ब्रह्म पुच्छं प्रतिष्ठेति स्वप्रधानमेव ब्रह्मोपदिश्यते ऽभ्यासात्। असन्नेव स भवति, इत्यस्मिन्निगमनश्लोके ब्रह्मण एव केवलस्याभ्यस्यमानत्वात्। विकारशब्दान्नेति चेन्न प्राचुर्यात्। विकारशब्दोऽवयवशब्दोऽभिप्रेतः, पुच्छमित्यवयवशब्दान्न स्वप्रधानत्वं ब्रह्मण इति यदुक्तं तस्य परिहारो वक्तव्यः। अत्रोच्यते नायं दोषः प्राचुर्यादप्यवयवशब्दोपपत्तेः। प्राचुर्यं प्रायापत्तिरवयवप्रायवचनमित्यर्थः। अन्नमयादीनां हि शिर आदिषु अवयवेषूक्तेष्वानन्दमयस्यापि शिर आदीन्यवयवान्तराण्युक्तावयवप्रायापत्त्या ब्रह्म पुच्छं प्रतिष्ठेत्याह नावयवविवक्षया यत्कारणमभ्यासादिति स्वप्रधानत्वं ब्रह्मणः समर्थितं। तद्धेतुव्यपदेशाच्च।

संशयोऽस्तीत्यवयवप्रायपाठो निश्चायक इति पूर्वाधिकरणसिद्धान्तयुक्त्यभावेन पूर्वपक्षयति ॥ पुच्छशब्दादिति ॥ तथा च प्रत्युदाहरणासङ्गतिः पूर्वपक्षे सगुणोपास्तिः सिद्धान्ते निर्गुणप्रमितिः फलं वेदान्तवाक्यसमन्वयोक्तेः श्रुत्यादिसङ्गतयः स्फुटा एव, सूत्रस्थानन्दमयपदेन तदाक्ष्यं ब्रह्मपदं लक्ष्यते। विक्रियतेऽनेनेति विकारोऽवयवः प्रायापत्तिरिति अवयवक्रमस्य बुद्धौ प्राप्तिरित्यर्थः। अत्र हि प्रकृतस्य ब्रह्मणो ज्ञानार्थकोक्तयः प्रक्रियेन कल्प्यन्ते नात्र तात्पर्यमस्ति, तत्रानन्दमयस्यापि अवयवान्तरोक्त्यनन्तरं कस्मिंश्चित् पुच्छे वक्तव्ये प्रकृतं ब्रह्म पुच्छपदेनोक्तं तस्यानन्दमयाधारत्वेनावश्यंवक्तव्यत्वादित्यर्थः ॥ तद्धेतुव्यपदेशाच्च ॥ तस्य

सर्व्वस्य विकारजातस्य सानन्दमयस्य कारणत्वेण ब्रह्म व्यपदिश्यते "इदं सर्व्वमसृजत यदिदं किञ्च" इति, न च कारणं सद्ब्रह्म स्वविकारस्यानन्दमयस्य मुख्यया वृत्त्याऽवयव उपपद्यते। अपराण्यपि सूत्राणि यथासम्भवं पुच्छवाक्यनिर्दिष्टस्यैव ब्रह्मण उपपादकानि द्रष्टव्यानि ॥

अन्तस्तद्धर्म्मोपदेशात् ॥ २० ॥

इदमाम्नायते "अथ य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्यकेश आप्रणखात् सर्व्व एव सुवर्णः। तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी, तस्योदिति नाम, स

ब्रह्मणः सर्व्वकार्य्यहेतुत्वव्यपदेशात् प्रियादिविशिष्टत्वाकारेणानन्दमयस्य जीवस्य कार्य्यत्वात्तं प्रति प्रेषत्वं ब्रह्मणो न युक्तमित्यर्थः। मान्त्रवर्णिकमेव च गीयते ब्रह्मविदाप्नोति परमिति, यस्य ज्ञानान्मुक्तिरुक्ता यत् सत्यं ज्ञानमिति मन्त्रोक्तं ब्रह्म तदत्रैव पुच्छवाक्ये गीयते ब्रह्मपदसंयोगात्, नानन्दमयवाक्य इत्यर्थः। नेतरोऽनुपपत्तेः। इतर आनन्दमयो जीवोऽत्र न प्रतिपाद्यः सर्व्वसृष्टित्वाद्यनुपपत्तेरित्यर्थः। भेदव्यपदेशाच्च। अयमानन्दमयो ब्रह्मरसं लब्ध्वानन्दीभवतीति, भेदोक्तेश्च तस्याप्रतिपाद्यतेत्यर्थः। आनन्दमयो ब्रह्म तैत्तिरीयकपञ्चमस्थानस्थत्वात्। आनन्दवदित्याशङ्क्याह। कामाच्च नानुमानापेक्षा काम्यत इति काम आनन्दः तस्य भृगुवल्ल्यां पञ्चमस्य ब्रह्मत्वदृष्टेरानन्दमयस्यापि ब्रह्मत्वानुमानापेक्षा न कार्य्या, विकारार्थकमयट्प्रतिरोधादित्यर्थः। भेदव्यपदेशश्चेत् सगुणब्रह्मापि वेद्यं स्यादित्याशङ्क्याह। अस्मिन्नस्य च तद्योगं शास्ति। गुहानिहितत्वेन प्रतीचि स एक इत्युपसंहृते पुच्छवाक्योक्ते ब्रह्मण्यहमेव परं ब्रह्मेति प्रबोधवत आनन्दमयस्य यदा ह्येति शास्त्रे ब्रह्मभावं शास्ति, अतो निर्गुणब्रह्मैक्यज्ञानार्थं जीवभेदानुवाद इत्यभिप्रेत्याह ॥ अपराण्यपीति ॥ अन्तस्तद्धर्म्मोपदेशात्। छान्दोग्यवाक्यमुदाहरति॥ अथ य इति॥ अथेत्युपाप्तिप्रारम्भार्थः। हिरण्मयो ज्योतिर्विकारः, पुरुषः पूर्णोऽपि मूर्त्तिमानुपासकैर्दृश्यते। मूर्त्तिमाह॥ हिरण्येति॥ प्रश्मश्रो

एष सर्व्वेभ्यः पाप्मभ्य उदित, उदेति ह वै सर्व्वेभ्यः पाप्मभ्यो य एवं वेद" इत्यधिदैवतं। अथाध्यात्ममप्यथ "य एषोऽन्तरक्षिणि पुरुषो दृश्यते" इत्यादि। तत्र संशयः। किं विद्याकर्म्मातिशयवशात् प्राप्नोत्कर्षः कश्चित् संसारी सूर्य्यमण्डले चक्षुषि चोपास्यत्वेन श्रूयते, किं वा नित्यसिद्धः परमेश्वर इति। किन्तावत् प्राप्तं संसारीति, कुतः, रूपवत्त्वश्रवणात्। आदित्यपुरुषे तावद्धिरण्मश्मश्रुरित्यादिरूपमुदाहृतं, अक्षिपुरुषेऽपि तदेवातिदेशेन प्राप्यते तस्यैतस्य तदेव रूपं यदमुष्य रूपमिति। न च परमेश्वरस्य रूपवत्त्वं युक्तं "अशब्दमस्पर्शमरूपमव्ययं" इति श्रुतेः। आधारश्रवणाच्च "य एषोऽन्तरादित्ये य एषोऽन्तरक्षिणि" इति। न ह्यनाधारस्य स्वमहिमप्रतिष्ठस्य सर्व्वव्यापिनः परमेश्वरस्याधार उपदिश्येत "स भगवः कस्मिन् प्रतिष्ठित इति स्वे महिम्नि" इति "आकाशवत्सर्व्वगतश्च नित्यः" इति च श्रुतौ भवतः। ऐश्वर्य्यमर्य्यादाश्रुतेश्च "स एष ये

नखाग्रं तेन सहेत्यभिविधावाङ्। नेत्रयोर्विशेषमाह॥ तस्येति॥ कपेर्मर्कटस्य आसः पुच्छभागोऽत्यन्ततेजस्वी तत्तुल्यं पुण्डरीकं यथा,दीप्तिमदेवं तस्य पुरुषस्याक्षिणी सद्योविकसितरक्ताम्भोजनयन इत्यर्थः। उपासनार्थमादित्यमण्डलं स्थानं रूपञ्चोक्ता नाम करोति॥ तस्योदिति॥ उन्नाम निर्वक्ति॥ स इति॥ उदित उद्गतः सर्व्वपाप्मास्पृष्ट इत्यर्थः। नामज्ञानफलमाह॥ उदेति हेति॥ देवतास्थानं आदित्यमधिकृत्योपास्युक्त्वनन्तरमात्मानं देहमधिकृत्यापि तदुक्तिरित्याह॥ अथेति॥ पूर्व्वत्र ब्रह्मपदमानन्दमयपदमानन्दपदाभ्यासस्थेति मुख्यचितयादिवज्रप्रमाणवशान्निर्गुणनिर्णयवद्रूपवत्त्वादिवज्रप्रमाणवशाज्जीवो हिरण्मय इति पूर्व्वसिद्धान्तदृष्टान्तसङ्गत्या पूर्व्वमुत्सर्गतः सिद्धनिर्गुणसमन्वयस्यापवादार्थं पूर्व्वपक्षयति॥ संसारीति॥ अत्र पूर्व्वोत्तरपक्षयोर्जीवब्रह्मणोरुपास्तिः फलं, अक्षिणीत्याधारश्रवणाच्च संसारीति सम्बन्धः। श्रुतिमाह॥ स एष इति॥

चामुष्मात् पराञ्चो लोकास्तेषां चेष्टे देवकामानाञ्च" इत्यादित्य-पुरुषस्यैश्वर्यमर्य्यादा "स एष ये चैतस्मादर्व्वाञ्चो लोकास्तेषाञ्चेष्टे मनुष्यकामानाञ्च" इत्यक्षिपुरुषस्य। न च परमेश्वरस्य मर्य्यादावदैश्वर्यं युक्तं "एष सर्व्वेश्वर एष भूताधिपतिरेष भूतपाल एष सेतुर्विधरण एषां लोकानामसम्भेदाय" इत्यविशेषश्रुतेः। तस्मान्नाक्ष्यादित्ययोरन्तः परमेश्वर इत्येवं प्राप्ते ब्रूमः, अन्तस्तद्धर्म्मोपदेशात्, इति "य एषोऽन्तरादित्ये य एषोऽन्तरक्षिणि" इति च श्रूयमाणः पुरुषः परमेश्वर एव न संसारी। कुतः। तद्धर्म्मोपदेशात्। तस्य हि परमेश्वरस्य धर्म्मा दृहोपदिष्टास्तद्यथा "तस्यादिति नाम" इति श्रावयित्वा "अस्यादित्यपुरुषस्य नाम स एष सर्व्वेभ्यः पाप्मभ्य उदितः" इति सर्व्वपाप्मापगमेन निर्व्वक्ति, तदेव च कृतनिर्व्वचनं नामाक्षिपुरुषस्याप्यतिदिशति "यन्नाम तन्नाम" इति। सर्व्वपाप्मापगमश्च परमात्मन एव श्रूयते "य आत्मा अपहतपाप्मा" इत्यादौ।

आदित्यस्थः पुरुषः, अमुष्मादादित्यादूर्द्ध्वगा ये केचन लोकास्तेषामीश्वरो देवभोगानाञ्चेत्यर्थः। स एषोऽक्षिस्थः पुरुष एतस्मादक्ष्णोऽधस्तना ये लोका ये च मनुष्यकामा भोगास्तेषामीश्वर इति मर्य्यादा श्रूयते। अतः श्रुतेश्च संसारीत्यर्थः। एष सर्व्वेश्वर इत्यविशेषश्रुतेरिति सम्बन्धः। भूताधिपतिर्यमः, भूतपाल इन्द्रादिश्च एष एव। किञ्च जलानामसङ्कराय लोके विधारको यथा सेतुरेवमेषां लोकानां वर्णाश्रमादीनां मर्य्यादाहेतुत्वात् सेतुरेष एव, अतः सर्व्वेश्वर इत्यर्थः। सूत्रं व्याचष्टे ॥ य एष इति ॥ यद्यप्येकस्मिन् वाक्ये प्रथमश्रुतानुसारेण चरमं नेयं, तथाप्यत्र प्रथमं श्रुतं रूपवत्त्वं निष्फलं ध्यानार्थमीश्वरे नेतुं शक्यञ्च सर्व्वपापासङ्गित्वं सर्व्वात्मैकत्वन्तु सफलं जीवे नेतुमशक्यञ्चेति प्रबलं। न च "न ह वै देवान् पापं गच्छति" इति श्रुतेरादित्यजीवस्यापि पाप्मास्पर्शितत्वमिति वाच्यं। श्रुतेरधुना कर्म्मानधिकारिणां देवानां क्रियमाणपाप्मासम्बन्धे तत्फला-

तथा "चाक्षुषे पुरुषे चैव ऋक् तत् साम तदुक्थं तद्यजुस्तद्ब्रह्म" इत्यृक्सामाद्यात्मकतां निर्द्धारयति, सा च परमेश्वरस्योपपद्यते सर्व्वकारणत्वात् सर्व्वात्मकत्वोपपत्तेः। पृथिव्यग्न्याद्यात्मके चाधिदैवतमृक्सामे वाक्प्राणाद्यात्मके चाध्यात्ममनुक्रम्याह तस्यर्क्च साम च गेष्णा इत्यधिदैवतं तथाध्यात्ममपि "यावमुष्य गेष्णौ तौ गेष्णौ" इति। तच्च सर्व्वात्मकत्वे सत्येवोपपद्यते "तच्च इमे वीणायां गायन्त्येतत्त्वेव ते गायन्ति तस्मात्ते धनसनयः" इति च लौकिकेष्वपि गानेष्वस्यैव गीयमानत्वं दर्शयति। तच्च परमेश्वरपरिग्रहे घटते॥

यद् यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा।
तत्तदेवावगच्छ त्वं मम तेजोंऽशसम्भवं।

स्वर्गे वा तात्पर्य्यात् तेषां सञ्चितपापाभावे क्षीणे पुण्ये मर्त्यलोकं विशन्तीति अयोगादित्यभिप्रेत्याह॥ सर्व्वपाप्मापगमश्च परमात्मन एवेति॥ सार्व्वात्म्यमाह॥ तयेति॥ अत्र तच्छब्दैस्त्वाक्षुषः पुरुष उच्यते ऋगाद्यपेक्षया लिङ्गव्यत्ययः॥ उक्थं ग्रस्त्वविशेषः। तत्राहचर्य्यात् सामस्तोत्रं उक्थादन्यच्छस्त्रमुच्यते, यजुर्वेदो यजुः, ब्रह्म त्रयो वेदा इत्यर्थः॥ पृथिव्यग्न्याद्यात्मक इति॥ आधिदैवतमृक् पृथिव्यन्तरीक्षद्युनक्षत्रादित्यगतशुक्लभा रूपा पञ्चविधा श्रुत्युक्ता, साम चाग्निवाय्वादित्यचन्द्रादित्यगतातिकृष्णारूपमुक्तं पञ्चविधं। अध्यात्मन्तु ऋक् वाक् चक्षुः श्रोत्रात्तिस्यशुक्लभा रूपा चतुर्व्विधा, साम च प्राणाच्छायात्ममनोऽत्तिगतातिनीलरूपं चतुर्व्विधमुक्तं। एवं क्रमेण ऋक्सामे अनुक्रम्याह श्रुतिः॥ तस्येति॥ यौ सर्व्वात्मकऋक्सामात्मकौ गेष्णावमुष्यादित्यस्य तावेवात्तिस्यस्य गेष्णौ पर्व्वणोत्यर्थः॥ तच्चेति॥ ऋक्सामगेष्णात्वमित्यर्थः। सर्व्वगानगेयत्वं लिङ्गान्तरमाह॥ तच्च इति॥ तत्तच्च लोके धनस्य सनिर्लाभो येषां ते धनसनयो विभूतिमन्त इत्यर्थः। ननु लोके राजानो गीयन्ते नेश्वर इत्यत आह॥ यद्यदिति॥ पशुवित्तादिर्विभूतिः, श्रीः कान्तिः। ऊर्ज्जितत्वं बलं, तद्युक्तं सत्त्वं राजादिकं मदंश एवेति त-

इति भगवद्गीतादर्शनात् लोककामेशित्वमपि निरङ्कुशं श्रूयमाणं परमेश्वरं गमयति। यत्तूक्तं हिरण्यश्मश्रुरित्यादिरूपश्रवणं परमेश्वरे नोपपद्येत इत्यत्र ब्रूमः, स्यात् परमेश्वरस्यापीच्छावशान्मायामयं रूपं साधकानुग्रहार्थं।

माया ह्येषा मया सृष्टा यन्मां पश्यसि नारद।
सर्वभूतगुणैर्युक्तं न त्वं मां द्रष्टुमर्हसि॥

इति स्मरणात्। अपि च यत्र निरस्तसर्वविशेषं पारमेश्वरं रूपमुपदिश्यते भवति तत्र शास्त्रं "अशब्दमस्पर्शमरूपमव्ययं" इत्यादि। सर्वकारणत्वात्तु विकारधर्मैरपि कैश्चिद्विशिष्टः परमेश्वर उपास्यत्वेन निर्दिश्यते "सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः" इत्यादिना, तथा हिरण्यश्मश्रुत्वादिनिर्देशोऽपि भविष्यति। यदप्याधारश्रवणान्न परमेश्वर इत्युच्यते स्वमहिमप्रतिष्ठस्यापि आधारविशेषोपदेश उपासनार्थो भविष्यति सर्वगतत्वाद्ब्रह्मणो व्योमवत् सर्वात्मान्तरत्वोपपत्तेः। ऐश्वर्यमर्यादाश्रवणमप्याध्यात्माधिदैवतविभागापेक्षमुपासनार्थमेव, तस्मात्परमेश्वर एवाक्ष्यादित्ययोरन्तरुपदिश्यते॥

दृगानमीश्वरस्यैवेत्यर्थः। निरङ्कुशमनन्याधीनं, एषा विचित्ररूपा मूर्तिर्माया विकृतित्वान्माया मया सृष्टेत्यर्थः। यदुक्तमशब्दमित्यादिवाक्यं तत् ज्ञेयपरमित्याह॥ अपि चेति॥ तर्हि रूपं कुतस्तत्राह॥ सर्वेति॥ यत्र तूपास्यत्वेनोच्यते तत्रेत्यध्याहृत्य सर्वकारणत्वात् प्राप्तरूपत्वं सर्वकर्मेत्यादिश्रुत्यानिर्दिश्यत इति योजना। मर्यादावदैश्वर्यमीश्वरस्य नेत्युक्तं निराकरोति॥ ऐश्वर्येति॥ अध्यात्माधिदैवध्यानयोर्विभागः पृथक्प्रयोगः, तदपेक्षमेव न त्वैश्वर्यस्य परिच्छेदार्थमित्यर्थः। ननु उपा-

भेदव्यपदेशाच्चान्यः ॥ २१ ॥

अस्ति च आदित्यादिशरीराभिमानिभ्यो जीवेभ्योऽन्य ईश्वरोऽन्तर्यामी "य आदित्ये तिष्ठन्नादित्यादन्तरो यमादित्यो न वेद यस्यादित्यः शरीरं य आदित्यमन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः" इति श्रुत्यन्तरे भेदव्यपदेशात्। तच्च ह्यादित्यादन्तरोऽयं आदित्यो न वेदेति वेदितुरादित्यात् विज्ञानात्मनोऽन्योऽन्तर्यामीति स्पष्टं निर्दिश्यते स एवेहापन्तरादित्ये पुरुषो भवितुमर्हति श्रुतिसामान्यात्। तस्मात् परमेश्वर एवेहोपदिश्यत इति सिद्धं ॥

आकाशस्तल्लिङ्गात् ॥ २२ ॥

छान्दोग्ये इदमामनन्ति "अस्य लोकस्य का गतिरित्याकाश इति होवाच सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्य-

---

स्योद्देशेनोपात्तिविधेर्विधेयक्रियाकर्मणोव्रीह्यादिवदन्यतः सिद्धिर्वाच्येत्याशङ्क्याह॥ भेदेति॥ आदित्यजीवादीश्वरस्य भेदोक्तेः श्रुत्यन्तरे जीवादन्य ईश्वरः सिद्ध इति सूत्रार्थमाह॥ अस्तीति॥ आदित्ये स्थितरश्मिनिराशार्थमादित्यादन्तर इति जीवं निरस्यति॥ यमिति॥ अशरीरस्य कथं नियन्तृत्वं तत्राह॥ यस्येति॥ अन्तर्यामिपदार्थमाह॥ य इति॥ तस्यानात्मत्वनिरासायाह॥ एष त इति॥ ते तव स्वरूपमित्यर्थः। आदित्यान्तरत्वश्रुतेः समानत्वादित्यर्थः। तस्मात् पर एवादित्यादिस्थानक उद्गीथे उपास्य इति सिद्धं। भवतु रूपवत्त्वादिदुर्बललिङ्गानां पापास्पर्शित्वाद्यभिचारिब्रह्मलिङ्गैरन्यथानयनं, इह त्वाकाशपदश्रुतिः लिङ्गाद्बलीयसीति प्रत्युदाहरणेन प्राप्ते प्राह॥ आकाशस्तल्लिङ्गादिति॥ छान्दोग्यवाक्यमुदाहरति॥ इदमिति॥ शालावत्यो ब्राह्मणा जैवलिं राजानं पृच्छति, अस्य पृथ्वीलोकस्यान्यस्य च क आधार इति।

द्यन्त इत्याकाशं प्रत्यस्तं यन्त्याकाशो ह्येवेभ्यो ज्यायानाकाशः परायणं" इति। तत्र संशयः। किमाकाशशब्देन परं ब्रह्माभिधीयते, उत भूताकाशमिति। कुतः संशय। उभयत्र प्रयोगदर्शनात्। भूतविशेषे तावत् सुप्रसिद्धो लोकवेदयोराकाशशब्दो ब्रह्मण्यपि क्वचित् प्रयुज्यमानो दृश्यते, यत्र वाक्यशेषवशादसाधारणगुणश्रवणाद्वा निर्द्धारितं ब्रह्म भवति यथा "यदेष आकाश आनन्दो न स्यात्" इति, "आकाशो वै नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म" इति चैवमादौ, अतः संशयः। किं पुनरत्र युक्तं भूताकाशमिति, कुतः, तद्धि प्रसिद्धतरेण प्रयोगेण शीघ्रं बुद्धिमारोहति। न चायमाकाशशब्द उभयोः साधारणः शक्यो विज्ञातुं, अनेकार्थत्वप्रसङ्गात्। तस्माद्ब्रह्मणि गौण आकाशशब्दो भवितुमर्हति। विभुत्वादिभिर्हि बहुभिर्धर्म्मैः सदृशमाकाशेन ब्रह्म भवति, न च मुख्यसम्भवे गौणार्थग्रहणमर्हति, सम्भवति चेह मुख्यस्यैवाकाशस्य ग्रहणं। ननु भूताकाशपरिग्रहे वाक्यशेषो नोपपद्यते "सर्व्वाणि ह वा इमानि भूतानि आकाशादेव समुत्पद्यन्ते" इत्यादिः। नैष दोषो भूताकाशस्यापि वाय्वादिक्रमेण कारणत्वोपपत्तेः। विज्ञायते हि "तस्माद्वा एत-

---

राजा ब्रूते आकाश इतिहेति॥ यदेष आकाश इत्यानन्दत्वस्यासाधारणस्य श्रवणादाकाशो ब्रह्मेत्यवधारितं। आकाशो वै नामेत्यत्र तद्ब्रह्मेति वाक्यशेषादिति विभागः। निर्वहिता उत्पत्तिस्थितिहेतुः, ते नामरूपे, यदन्तरा यस्माद्भिन्ने यत्र कल्पितत्वेन मध्ये स्त इति वार्थः। अत्र पूर्व्वपक्षे भूताकाशात्मनोद्दीपोपास्तिः, सिद्धान्ते ब्रह्मात्मना इति फलं। उपास्ये

स्मादात्मन आकाशः सम्भूतः आकाशाद्वायुः वायोरग्निः" इत्यादि। ज्यायस्त्वपरायणत्वेऽपि भूतान्तरापेक्षयोपपद्यते भूताकाशस्यापि, तस्मादाकाशशब्देन भूताकाशस्य ग्रहणमित्येवं प्राप्ते ब्रूमः, आकाशस्तल्लिङ्गात्। आकाशशब्देनेह ब्रह्मणो ग्रहणं युक्तं। कुतः। तल्लिङ्गात्। परस्य हि ब्रह्मण इदं लिङ्गं "सर्व्वाणि ह वा इमानि भूतानि आकाशादेव समुत्पद्यन्ते" इति। परस्माद्धि ब्रह्मणो भूतानामुत्पत्तिरिति वेदान्तेषु मर्य्यादा। ननु भूताकाशस्यापि वाय्वादिक्रमेण कारणत्वं दर्शितं। सत्यं दर्शितं। तथापि मूलकारस्य ब्रह्मणोऽपरिग्रहादाकाशादेवेत्यवधारणं सर्व्वाणीति च भूतविशेषणं नानुकूलं स्यात्। तथा "आकाशं प्रत्यस्तं यन्ति" इति ब्रह्मलिङ्गं "आकाशो ह्येवैभ्यो ज्यायानाकाशः परायणं" इति च ज्यायस्त्वं ह्यनापेक्षिकं परमात्मन्येवैकस्मिन्नाम्नातं "ज्यायान् पृथिव्या ज्यायानन्तरिक्षात् ज्यायान् दिवो ज्यायानेभ्यो लोकेभ्यः" इति, तथापरायणत्वमपि परमकारणत्वात् परमात्मन्येवोपपन्नतरं। श्रुतिश्च भवति "विज्ञानमानन्दं ब्रह्म रातेर्दातुः परायणं" इति। अपि चान्यवत्तदोषेण शालावत्यस्य पद्यं निन्दित्वानन्तं

स्पष्टब्रह्मलिङ्गवाक्यसमन्वयोक्तेरापादं श्रुत्यादिसङ्गतयः। स्पष्टमत्र भाष्यं। तेजःप्रभृतिषु वाय्वादेरपि कारणत्वात् एवकारश्रुतिबाधः। सर्व्वश्रुतेश्चाकाशातिरिक्तविषयत्वेन सङ्कोचः स्यादित्याह॥ सत्यं दर्शितमिति॥ ब्रह्मणस्तु सर्व्वात्मकत्वात्तस्मादेव सर्व्वमिति श्रुतिर्युक्तेति भावः। तथा सर्व्वलयाधारत्वं निरतिशयमहत्त्वं स्थितावपि परमाश्रयत्वमित्येतानि स्पष्टानि ब्रह्मलिङ्गानीत्याह॥ तथा आकाशमित्यादिना॥ रातेर्दानस्य दातुः। रातिरिति पाठे बन्धुरित्यर्थः। लिङ्गान्तरमाह॥ अपि चेति॥

किञ्चिद्वक्तुकामेन जैवलिनाऽऽकाशः परिगृहीतः, तञ्चाकाशमुद्गीथे सम्पाद्योपसंहरति "स एष परो वरीयानुद्गीथः स एषोऽनन्तः" इति, तच्चानन्त्यं ब्रह्मलिङ्गं। यत् पुनरुक्तं भूताकाशं प्रसिद्धिबलेन प्रथमतरं प्रतीयत इति, अत्र ब्रूमः, प्रथमतरं प्रतीतमपि तदाकाशेषगतान् ब्रह्मगुणान् दृष्ट्वा न परिगृह्यते। दर्शितश्च ब्रह्मण्याकाशशब्दः "आकाशो वै नामरूपयोर्निर्व्वहिता" इत्यादौ। तथाकाशपर्य्यायवाचिनामपि ब्रह्मणि प्रयोगो दृश्यते

दाल्भ्यशालावत्यौ ब्राह्मणौ राजा चेति त्रय उद्गीथविद्याकुशला विचारयामासुः किमुद्गीथस्य परायणमिति। तत्र स्वर्गादागताभिरद्भिर्जीवितेन प्राणेन क्रियमाणोद्गीथस्य स्वर्ग एव परायणमिति दाल्भ्यपक्षमप्रतिष्ठादोषेण शालावत्यो निन्दित्वा स्वर्गस्यापि कर्म्मद्वारा हेतुरयं लोकः प्रतिष्ठेत्युवाच। तं शालावत्यस्य पक्षमनन्तत्वहेतुं किल शालावत्यसामेति राजा निन्दित्वानन्तमेवाकाशं वक्ति भूताकाशोक्तावन्तवत्त्वदोषतादवस्थ्यादित्यर्थः। नन्वाकाशोऽनन्त इति न श्रुतं इत्याशङ्क्याह ॥ तच्चेति ॥ उद्गीथ आकाश एवेति सम्पादनात् उद्गीथस्यानन्तत्वादिकं न खत इति भावः। स उद्गीथावयव ॐकार एष आकाशात्मकः। परः रसतमत्वादिगुणैरुत्कृष्टः। अतोऽन्तरान्तरेभ्यो वरीयान् श्रेष्ठ इत्यर्थः॥ पर इति अव्ययं सकारान्तं वा, परः क्रान्तमिति प्रयोगात्। परश्चासौ वरेभ्योऽतिशयेन वरः परो वरीयान् इत्यर्थः। प्राथम्यात् श्रुतित्वाच्चाकाशशब्दो बलीयानित्युक्तं स्मारयति॥ यत् पुनरिति॥ एवकारसर्व्वशब्दानुगृहीतानन्त्यादिबह्वलिङ्गानामनुग्रहाय "त्यजेदेकं कुलस्यार्थे" इति न्यायेनैकस्याः श्रुतेर्बाधो युक्त इत्याह॥ अत्र ब्रूम इति॥ आकाशपदाद्भूतस्यैव प्रथमप्रतीतिरिति नियमो नास्तीत्यपिशब्देन द्योतितं। तत्र युक्तिमाह॥ दर्शितश्चेति॥ आकाशपदादौणार्थस्य ब्रह्मणोऽपि प्रथमप्रतीतिरस्ति तस्य तत्पर्य्यायाणाञ्च ब्रह्मणि प्रयोगप्राचुर्य्यादिति भावः। अक्षरे कूटस्थे व्योमन् व्योम्नि ऋचो वेदाः सन्ति प्रमाणत्वेन यस्मिन्नक्षरे विश्वे देवा अधिष्ठिता इत्यर्थः। ॐकारः कं सुखं ब्रह्म खं व्यापकमित्युपासीत

"ऋचोऽक्षरे परमे व्योमन् यस्मिन् देवा अधि विश्वे निषेदुः" "सैषा भार्गवी वारुणी विद्या परमे व्योमन् प्रतिष्ठिता" "ॐ कं ब्रह्म खं ब्रह्म खं पुराणं" इति चैवमादौ। वाक्योपक्रमेऽपि वर्त्तमानस्याकाशशब्दस्य वाक्यशेषवशाद्युक्ता ब्रह्मविषयत्वावधारणा। "अग्निरधीतेऽनुवाकं" इति हि वाक्योपक्रमगतोऽप्यग्निशब्दो माणवकविषयो दृश्यते। तस्मादाकाशशब्दं ब्रह्मेति प्रसिद्धं॥

अतएव प्राणः ॥ २३ ॥

"उद्गीथे प्रस्तोतर्या देवता प्रस्तावमन्वायत्ता" इत्युपक्रम्य श्रूयते "कतमा सा देवतेति प्राण इति होवाच सर्व्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशन्ति प्राणमभ्युज्जिहते सैषा देवता प्रस्तावमन्वायत्ता" इति। तत्र संशयनिर्णयौ पूर्व्ववदेव द्रष्टव्यौ, "प्राणबन्धनं हि सोम्य मनः प्राणस्य प्राणं" इति चैवमादौ

श्रुत्यन्तरप्रयोगमाह ॥ खं पुराणमिति ॥ व्याप्तनादि ब्रह्मेत्यर्थः। कं ब्रह्म खं ब्रह्मेति छान्दोग्यं, ॐ खं ब्रह्म खं पुराणमिति बृहदारण्यकमिति भेदः। किञ्च तत्रैव प्रथमानुसारेणोत्तरं नेयं यत्र तन्नेतुं शक्यं, यत्र त्वशक्यं तत्रोत्तरानुसारेण प्रथमं नेयमित्याह ॥ वाक्येति ॥ तस्मादुपास्ये ब्रह्मणि वाक्यं समन्वितमित्युपसंहरति ॥ तस्मादिति ॥ आकाशवाक्योक्तन्यायं तदुत्तरवाक्येऽतिदिशति ॥ अत एव प्राणः ॥ उद्गीथप्रकरणमिति ज्ञापनार्थमुद्गीथ इति भाष्यपदं उद्गीथप्रकरणे श्रूयते इत्यन्वयः। कश्चिदृषिश्चाक्रायणः प्रस्तोतारमुवाच, हे प्रस्तोतः या देवता प्रस्तावं सामभक्तिमनुगताध्यानार्थं तान्वेदज्ञात्वा मम विदुषो निकटे प्रस्तोष्यसि मूर्द्धा ते पतिष्यतीति। ततो भीतः सन् पप्रच्छ कतमा सा देवतेति उत्तरं॥ प्राण इति ॥ प्राणमभिलक्ष्य सम्यक् विशन्ति लीयन्ते तमभिलक्ष्योज्जिहते उत्पद्यन्त इत्यर्थः। अतिदेशत्वात् पूर्व्ववत् संशयादि द्रष्टव्यमित्युक्तं विवृणोति ॥ प्राणेति ॥ मनउपाधिको जीवः,

ब्रह्मविषयः प्राणशब्दो दृश्यते, वायुविकारे तु प्रसिद्धतरो लोकवेदयोरत इह प्राणशब्देन कतरस्योपादानं युक्तमिति भवति संशयः। किं पुनरत्र युक्तं वायुविकारस्य पञ्चवृत्तेः प्राणस्योपादानं युक्तं। तत्र हि प्रसिद्धतरः प्राणशब्द इत्यवोचाम। ननु पूर्ववदिहापि तल्लिङ्गात् ब्रह्मण एव ग्रहणं युक्तमिहापि हि वाक्यशेषे भूतानां संवेशनोद्गमनं परमेश्वरं कर्म्म प्रतीयते। न मुख्येऽपि प्राणे भूतसंवेशनोद्गमनस्य दर्शनात्। एवं ह्याम्नायते "यदा वै पुरुषः स्वपिति प्राणं तर्हि वागप्येति प्राणं चक्षुः प्राणं श्रोत्रं प्राणं मनः स यदा प्रबुध्यते प्राणादेवाधि पुनर्ज्जायन्ते" इति। प्रत्यक्षञ्च तत् स्वापकाले प्राणवृत्तावपरिलुप्यमानायामिन्द्रियवृत्तयः परिलुप्यन्ते, प्रबोधकाले च पुनः प्रादुर्भवन्तीति। इन्द्रियसारत्वाच्च भूतानामविरुद्धो मुख्ये प्राणेऽपि भूतसंवेशनोद्गमनवादो वाक्यशेषः। अपि चादित्योऽन्नञ्चोद्गीथप्रतिहारयो-

---

प्राणेन ब्रह्मणा बध्यते सुषुप्तावेकीभवति प्राणस्य वायोः प्राणं प्रेरकं तस्य सत्तास्फूर्त्तिप्रदमात्मानं ये विदुस्ते ब्रह्मविद इत्यर्थः। पूर्वेण गतार्थत्वात् पृथक्सूत्रं व्यर्थमिति शङ्कते॥ ननु पूर्ववदिति॥ अधिकाशङ्कानिरासार्थमतिदेशसूत्रमिति मत्वा शङ्कामाह॥ न मुख्येऽपीति॥ तर्हि तदा चक्षुरप्येतीति एवमकारेण सर्व्वत्र सम्बन्धः। नन्वत्रेन्द्रियाणां प्राणे लयोदयौ श्रूयेते तावता महाभूतलयादिप्रतिवाक्यशेषोपपत्तिः कथमित्यत आह॥ इन्द्रियसारत्वादिति॥ त्वस्य ह्येष रसः इति श्रुतेः इन्द्रियाणि लिङ्गात्मरूपाणि अपञ्चीकृतभूतानां सारांशा तेषां लयाद्यन्वया भूतानामपि प्राणे लयादितिसिद्धेः वाक्यशेषोपपत्तिरित्यर्थः। अब्रह्मसहपाठाच्च प्राणो न ब्रह्मेत्याह॥ अपि चेति॥ उद्गीथप्रतिहर्त्तृभ्यामुद्गीथे प्रतिहारे च का देवतेति एतेनचाम्नायेनादित्योऽन्नञ्च निर्द्दिश्यते आदित्य इति ह्येवाच अन्नमिति ह्येवाचेति श्रुतावित्यर्थः। सा-

दैवते प्रस्तावदेवतायाः प्राणस्यानन्तरं निर्दिश्येते, न च तयोर्ब्रह्मत्वमस्ति, तत्सामान्याच्च प्राणस्यापि न ब्रह्मत्वमित्येवं प्राप्ते सूत्रकार आह। अतएव प्राण इति। तल्लिङ्गादिति पूर्वसूत्रे निर्दिष्टमत एव तल्लिङ्गात् प्राणशब्दमपि परं ब्रह्म भवितुमर्हति, प्राणस्यापि हि ब्रह्मलिङ्गसम्बन्धः श्रूयते "सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशन्ति प्राणमभ्युज्जिहते" इति प्राणनिमित्तौ सर्वेषां भूतानामुत्पत्तिप्रलयावुच्यमानौ। प्राणस्य ब्रह्मतां गमयतः। ननूक्तं मुख्यप्राणपरिग्रहेऽपि संवेशोद्गममविरुद्धं स्वापप्रबोधयोर्दर्शनादिति। अत्रोच्यते। स्वापप्रबोधयोरिन्द्रियाणामेव केवलानां प्राणाश्रयं संवेशनोद्गमनं दृश्यते, न सर्वेषां भूतानां, इह तु सर्वेन्द्रियाणां सशरीराणाञ्च जीवाविष्टानां भूतानां "सर्वाणि ह वा इमानि भूतानि" इति श्रुतेः। यद्यपि भूतश्रुतिः महाभूतविषया परिगृह्यते तदापि ब्रह्मलिङ्गत्वमविरुद्धं। ननु महापि विषयैरिन्द्रियाणां स्वापप्रबोधयोः प्राणेऽयं प्राणाच्च प्रभवं शृणुमः "यदा सुप्तः स्वप्नं न

मान्यं सन्निधानं। सन्निधानुगृहीतप्रथमश्रुतप्राणश्रुत्या मुख्यप्राणनिर्णये तत् दृष्ट्या प्रस्तावोपात्तिरिति पूर्वपक्षफलं, सिद्धान्ते ब्रह्मदृष्टिरूपोपात्तिः। अस्याधिकरणस्यातिदेशत्वमेव पूर्वेण सङ्गतिरिति विभागः भवन्तीति भूतानीति व्युत्पत्त्या यत्किञ्चिद्भुवनधर्मकं कार्यमात्रं तस्य, जयादया वायुविकारे प्राणेन युक्ताविति युक्ता भूतशब्दस्य रूढ्यर्थग्रहेऽपि जयादेर्ब्रह्मनिर्णायकत्वमित्याह ॥ यदापीति ॥ भौतिकप्राणस्य भूतयोनित्वं योगादित्यर्थः। तस्य तद्योनित्वं श्रुत्याशङ्कते ॥ नन्विति ॥ अथ यदा सुषुप्तौ जीवः प्राणे ब्रह्मण्येकीभवति तदा एनं प्राणं सविषयवागादयोऽपि यन्तीत्यर्थः। अत्र जीवाभिन्नत्वे सर्वलयाधारत्वलिङ्गान्न

कञ्चन पश्यत्यथास्मिन् प्राण एवैकधा भवति तदैनं वाक् सर्व्वैर्नामभिः सहाप्येति" इत्यत्र तत्रापि तस्मिन्लिङ्गात् प्राणशब्दं ब्रह्मैव। यत् पुनरत्रादित्यसन्निधानात् प्राणशब्दस्याब्रह्मत्वमिति तदयुक्तं वाक्यशेषबलेन प्राणशब्दस्य ब्रह्मविषयतायां प्रतीयमानायां सन्निधानस्याकिञ्चित् करत्वात्। यत् पुनः प्राणशब्दस्य पञ्चवृत्तौ प्रसिद्धतरत्वं तदाकाशशब्दस्यैव* प्रतिविधेयं। तस्मात् सिद्धं प्रस्तावदेवताया: प्राणस्य ब्रह्मत्वं। अत्र केचिदुदाहरन्ति "प्राणस्य प्राणं प्राणबन्धनं हि सोम्य मन" इति च तदप्ययुक्तं शब्दभेदात् प्रकरणाच्च संशयानुपपत्तेः। यथा पितुःपितेति प्रयोगे अन्यः पिता षष्ठीनिर्दिष्टोऽन्यः प्रथमानिर्दिष्टं पितुः पितेति गम्यते, तद्वत् प्राणस्य प्राणमिति शब्दभेदात् प्रसिद्धात् प्राणादन्यः प्राणस्य प्राणं इति निश्चीयते। न हि स एव तस्येति भेदनिर्द्देशार्हो भवति। यस्य च प्रकरणे यो निर्द्दिश्यते नामान्तरेणापि स एव तत्र प्रकरणनिर्द्दिष्ट इति गम्यते। यथा ज्योतिष्टोमाधिकारे "वसन्ते वसन्ते ज्योतिषा यजेत" इत्यत्र ज्योतिःशब्दो ज्योतिष्टोमविषयो भवति तथापरस्य ब्रह्मणः प्रकरणे "प्राणब-

---

मुख्यः प्राण इत्याह ॥ तत्रापीति ॥ वाक्यान्तरसन्निधमपेक्षया स्ववाक्यगतं लिङ्गं बलीय इत्याह ॥ तदयुक्तमिति ॥ एकवाक्यत्वं वाक्यशेषः तस्य बलं तद्गतं लिङ्गं तेनेत्यर्थः। प्राणमेवेत्यवधारणेन सर्व्वभूतप्रकृतित्वलिङ्गेन च प्राणपदेन तत्कारणं ब्रह्मलक्ष्यमित्याह ॥ तदाकाशशब्दस्येवेति ॥ वृत्तिज्ञतामुदाहरणं संशयाभावेनायुक्तमित्याह ॥ अत्रेत्यादिना ॥ शब्दभेदमुक्त्वा प्रकरणं प्रपञ्चयति ॥ यस्य चेति ॥ ज्यो-

---

* मु० पु० शब्देति नास्ति।

न्नं हि सोम्य मन" इति श्रुतेः प्राणशब्दो वायुविकारमात्रं कथमवगमयेदतः संशयाविषयत्वान्नैतदुदाहरणं युक्तं। प्रस्ताव-देवतायान्तु प्राणे संशयपूर्व्वपक्षनिर्णया उपपादिताः॥

ज्योतिश्चरणाभिधानात्॥ २४॥

इदमामनन्ति "अथ यदतःपरो दिवो ज्योतिर्दीप्यते विश्वतः पृष्ठेषु सर्व्वतः पृष्ठेष्वनुत्तमेषूत्तमेषु लोकेष्विदं वाव तद्यदिदमस्मिन्नन्तःपुरुष ज्योतिः" इति। तत्र संशयः। किमिह ज्योतिःशब्देनादित्यादिकं ज्योतिरभिधीयते किम्वा पर आत्मेति अर्थान्तरविषयस्यापि शब्दस्य तल्लिङ्गाद्ब्रह्मविषयत्वमुक्तं, इह तल्लिङ्गमेवास्ति नास्तीति विचार्य्यते। किं तावत् प्राप्तं। आदित्यादिकमेव ज्योतिःशब्देन परिगृह्यते इति। कुतः। प्रसिद्धेः तमो ज्योतिरिति ह्येतौ शब्दौ परस्परप्रतिद्वन्द्विविषयौ प्रसिद्धौ। चक्षुर्वृत्तेर्निरोधकं शार्व्वरादिकं तम उच्यते तस्या एवानुग्राहक-

---

तिश्चरणाभिधानात्। छान्दोग्यमेवोदाहरति॥ इदमिति॥ गायत्र्युपाधिकब्रह्मोपास्त्यानन्तर्यार्थोऽथशब्दः। अतो दिवो द्युलोकात् परः परस्ताद्यत् ज्योतिर्दीप्यते तदिदमिति जाठरान्नावधूयते। कुत्र दीप्यते तत्राह॥ विश्वत इति॥ विश्वस्मात् प्राणिवर्गादुपरि सर्व्वस्मात् भूरादिलोकादुपरि ये लोकास्तेष्वुत्तमेषु न विद्यन्ते उत्तमा येभ्य इत्यनुत्तमेषु सर्व्वसंसारमण्डलातीतं परं ज्योतिरिदमेव यदेहस्थमित्यर्थः। अस्य पूर्व्वेणागतार्थत्वं वदन् प्रत्युदाहरणासङ्गतिमाह॥ अर्थान्तरेति॥ अत्र खवाक्ये स्पष्टब्रह्मलिङ्गाभावेऽपि पादोऽस्येति पूर्व्ववाक्ये भूतपादत्वलिङ्गमस्तीति पादसङ्गतिः। पूर्व्वोत्तरपक्षयोर्जडब्रह्मज्योतिषोरुपात्तिः फलमिति भेदः। नन्वज्ञानतमोविरोधित्वात् ब्रह्मापि ज्योतिः पदमुख्यतया प्रसिद्धमस्ति नेत्याह॥ चक्षुरिति॥ शार्व्वर्यां रात्रौ भवं शार्व्वरं तीव्र-

[illegible]

शुद्धिपत्रं ।

पृष्ठाङ्कः	पंक्त्यङ्कः	अशुद्धं	एवं
९९	५	प्रपञ्चयिष्यतेर्न	प्रपञ्चयिष्यते न
	११	ज्ञात्वा	ज्ञात्वा
१०१	१०	वन्न	वन्न
१०२	२२	ज्योतिष्टोमे	ज्योतिष्टोमे
१०३	१८	विप्रलिप्सुर्इष्ट	विप्रलिप्सुरिष्ट
११५	१३	बञ्ज्ञत्वो	बञ्ज्ञत्वो
११९	२२	आनन्दमयो	आनन्दमयो
१२५	९	वाङ्मनस	वाङ्मनस
१४७	५	मर्य्यादत्वं	मर्य्यादात्वं
	१४	श्रुत उपासीत	इत्युपासीत
१४८	८	ग्रहीतव्यं	ग्रहीतव्यं
१५९	१९	कारस्यं	कारणं
१९०	१३	रागादिभि	वागादिभिः
१९५	२७	प्रत्यक्ब्रह्म	प्रत्यग्ब्रह्म
१९३	११	पुगरयं	पुनरयं
१७९	९	तत्वमस्यहं	तत्त्वमस्यहं
१८०	१८	पिवत्	पिवत्
१८३	१०	द्रष्टय	द्रष्टव्य
१९७	७	द्रष्टा	द्रष्टा
२०५	७	दिवो	दिव्यो
२१९	२२	नेतव्यमित्याह	नेतव्यमित्याह

[illegible]

तमू	माध्व
द्वैतम्	शाङ्कर
द्वैताद्वैतम्	वल्लभ
द्वैताद्वैतम्	निम्बार्क
५ विशिष्टाद्वैतम्	रामानुज -

१ अख्याति:
२ असत्ख्याति
३ अन्यथाख्याति
४ सत्ख्यातिरनिर्वचनीयाख्याति
५ आत्मख्याति:

३ स्मर्यमाणं सत्यरजतमेवात्र शुक्तौ भासते इत्यन्यथाख्याति:।
४ बालशुक्त्यादौ बुद्धिरूपान्नो धर्मस्य रजतस्याध्यास:। अतोऽत्र स्मर्यं रजतस्य बहिर्विदवभास:। इत्यात्मख्याति:॥
१ यत्र यस्याध्यासो लोकसिद्ध:। तयोरर्थयो स्तद्धियोश्च भेदाग्रहे सति तन्मूलो भ्रम:। इदं रजतमिति विशिष्टव्यवहार: अख्याति:॥

मादित्यादिकं ज्योतिस्तथा दीप्यते, इतीयमपि श्रुतिरादित्यादिविषया प्रसिद्धा। न हि रूपादिहीनं ब्रह्म दीप्यत इति मुख्यां श्रुतिमर्हति। किञ्च द्युमर्य्यादत्वश्रुतेश्च। न हि चराचरबीजस्य ब्रह्मणः सर्व्वात्मकस्य द्यौर्मर्य्यादा युक्ता, कार्य्यस्य तु ज्योतिषः परिच्छिन्नस्य द्यौर्मर्य्यादा स्यात् परो दिवो ज्योतिरिति च ब्राह्मणं। ननु कार्य्यस्यापि ज्योतिषः सर्व्वत्र गम्यमानत्वात् द्युमर्य्यादावत्त्वमसमञ्जसं, अस्तु तर्ह्यचिरुत्कृतं तेजः प्रथमजं। न। अचिरुत्कृतस्य तेजसः प्रयोजनाभावादिति। इदमेव प्रयोजनं यदुपास्यत्वमिति चेत्, न, प्रयोजनान्तरप्रयुक्तस्यैवादित्यादेरुपास्यत्वदर्शनात्। "तासां चिरुतं चिरुतमेकैकां करवाणि" इति चाविशेषश्रुतेः। न चाचिरुत्कृतस्यापि तेजसो द्युमर्य्यादत्वं प्रसिद्धं

मितियावत्, अनेनावरकत्वाद्रूपवत्त्वाच्च कुड्यवद्भावरूपं तम इत्यर्थादुक्तं भवति। ज्योतिः श्रुतेरनुग्राहकलिङ्गान्याह॥ तथेत्यादिना॥ भास्वरूपात्मिका दीप्तिस्तेजस एव लिङ्गमित्याह॥ न हीति॥ मास्तु मर्य्यादेत्याशङ्क्य श्रुतत्वान्नैवमित्याह॥ परो दिव इति॥ मर्य्यादां ब्रूत इति शेषः। ब्रह्मवत् कार्य्यस्यापि मर्य्यादायोगान्निरर्थकं ब्राह्मणमिति कश्चिदाक्षिपति॥ नन्विति॥ एकदेशी ब्रूते॥ अस्तिति॥ स्वर्गादौ जातं किञ्चिदतीन्द्रियं तेजो दिवः परस्तादस्ति श्रुतिप्रामाण्यादित्यर्थ। अध्ययनविधुपात्तश्रुतेर्नष्फलं वस्तुतोऽर्थ इत्याक्षिप्य ब्रूते॥ नेति॥ ध्यानं फलमित्याशङ्क्य निष्फलस्य क्वापि ध्यानं नास्तीत्याह॥ इदमेवेत्यादिना॥ प्रयोजनान्तरं तमोनाशादिकं। अचिरुत्कृतं तेजोऽङ्गीकृत्याफलत्वमुक्त्वा तदेव नास्तीत्याह॥ तासामिति॥ तेजोऽवयवानां देवतानामेकैकं द्विधा विभज्य पुनस्त्रैकैकं भागं त्रेधा कृत्वा स्वभागादितरभागयोर्निक्षिप्य तत्त्रिगुणरज्जुवत्त्रिकृतं करवाणीत्यविशेषोक्तेर्नास्त्यचिरुत्कृतं किञ्चिदित्यर्थः। किञ्चात्र यदतः पर इति यच्छब्देनान्यतः प्रसिद्धं द्युमर्य्यादत्वं ध्यानायानूद्यते। न चाचिरुत्कृतस्य तत्क्वचित् प्रसिद्धमित्याह॥ न चेति॥ एकदेशिमते निरस्ते साक्षात् पूर्व-

अस्तु तर्हि चित्कृत्स्नतमेव तत्तेजो ज्योतिःशब्दं। ननूक्तमर्वागपि दिवोऽवगम्यतेऽग्न्यादिकं ज्योतिरिति, नैष दोषः सर्व्वत्रापि गम्यमानस्य ज्योतिषः परो दिव इति उपासनार्थः प्रदेशविशेषपरिग्रहो न विरुध्यते, न तु निष्प्रदेशस्यापि ब्रह्मणः प्रदेशविशेषकल्पना भागिनी। "सर्व्वतः पृष्ठेष्वनुत्तमेषूत्तमेषु लोकेषु" इति चाधारबहुत्वश्रुतिः कार्य्ये ज्योतिषि उपपद्यतेतरां "इदं वाव तद्यदिदमस्मिन्नन्तःपुरुषे ज्योतिः" इति च कौक्षेये ज्योतिषि परं ज्योतिरध्यस्यमानं दृश्यते। सारूप्यनिमित्ताश्चाध्यासा भवन्ति यथा "तस्य भूरिति शिर एकं शिर एकमेतदक्षर" इति। कौक्षेयस्य तु ज्योतिषः प्रसिद्धमब्रह्मत्वं "तस्यैषा दृष्टिस्तस्यैषा श्रुतिः" इति चौष्ण्यघोषविशिष्टत्वश्रवणात् "तदेतत् दृष्टञ्च श्रुतञ्चेत्युपासीत" इति च श्रुतेश्चक्षुष्यश्च श्रुतो भवतीति य एवं वेदेति चाल्पफलश्रवणाद्ब्रह्मत्वं, महते हि फलाय ब्रह्मोपासनमिष्यते। न चान्यदपि किञ्चित् स्ववाक्ये प्राणाकाशवज्ज्योतिषोऽस्ति ब्रह्मलिङ्गं। न च पूर्व्वस्मिन्नपि वाक्ये ब्रह्मनिर्द्दिष्टमस्ति "गायत्री वा इदं सर्व्वं भूतं" इति छन्दोनिर्द्देशात्। अथापि कथञ्चित्

पक्षी व्रत॥ अस्तु तर्हीति॥ प्रदेशविशेषः दिवः परस्ताद्देदीप्यमानः सूर्य्यादितेजोऽवयवविशेषः तस्य परिग्रह उपासनार्थो न विरुध्यत इत्यन्वयः। स एव कौक्षेयज्योतिषि उपास्यते तस्यापि तेजस्त्वादिति भावः। ब्रह्मणोऽपि ध्यानार्थं प्रदेशस्थत्वं कथ्यतां नेत्याह॥ न त्विति॥ निष्प्रदेशस्य निरवयवस्य विशेषेऽपि दिवः परस्ताद्देदीप्यमानब्रह्मावयवकल्पनाभागिनी युक्ता न त्वित्यन्वयः। अप्रामाणिकगौरवापातादिति भावः। ततः किं तत्राह॥ सारूप्येति॥ यथा रत्नसाम्याद्भूरिति शब्दतो प्रजायतेः

पूर्व्वस्मिन् वाक्ये ब्रह्म निर्दिष्टं स्यात्, एवमपि न तस्येह प्रत्यभिज्ञानमस्ति, तच्च हि त्रिपादस्यामृतं दिवि इति द्यौरधिकरणत्वेन श्रूयते, अत्र पुनः "परेण दिवं ज्योतिः" इति द्यौर्मर्य्यादात्वेन। तस्मात् प्राकृतं ज्योतिरिह ग्राह्यमित्येवं प्राप्ते ब्रूमः ज्योतिरिह ब्रह्म ग्राह्यं। कुतः। चरणाभिधानात्, पादाभिधानादित्यर्थः। पूर्व्वस्मिन् हि वाक्ये चतुष्पाद्ब्रह्म निर्दिष्टं "तावानस्य महिमा ततो ज्यायांश्च पुरुषः पादोऽस्य सर्व्वा भूतानि त्रिपादस्यामृतं दिवि"

ग्निरोदृष्टिः श्रुता तथा जाठरामावब्रह्मत्वं घोषादिश्रुत्या प्रसिद्धमिति जडज्योतिष्ट्वं साम्यं वाच्यमित्यर्थः। यद्देहस्पर्शनेनौष्ण्यज्ञानं प्रसिद्धं सैषा तस्य जाठराग्नेर्दृष्टिः, यत् कर्णपिधानेन घोषश्रवणं, सैषा तस्य श्रुतिरित्यर्थः। ज्योतिषो जडत्वे लिङ्गान्तरमाह ॥ तदेतदिति ॥ ज्योतिरित्यर्थः। चक्षुष्यश्चक्षुर्हितः सुन्दरः, श्रुतो विख्यातः। न चान्यदर्थीति ब्रह्मलिङ्गमपि किञ्चिदन्यन्नास्तीत्यन्वयः। ननु त्रिपादस्यामृतं दिवीति पूर्व्ववाक्योक्तं ब्रह्मात्र ज्योतिःपदेन ग्रह्यतामित्याशङ्क्याह ॥ न चेति ॥ ननु सर्व्वात्मकत्वामृतत्वाभ्यां ब्रह्मोक्तमित्यत आह ॥ अथार्थीति ॥ कथञ्चिच्छन्दोद्वारेत्यर्थः। दिवि दिव इति विभक्तिभेदान्न प्रत्यभिज्ञेत्यर्थः। प्रकृतेर्ज्जातं प्राकृतं कार्य्यमित्यर्थः। आचारं निरस्यति ॥ पादेति ॥ गायत्री वा इदं सर्व्वं भूतं वाग्वै गायत्री येयं पृथिवी यदिदं शरीरं यदस्मिन् पुरुषे हृदयमिमे प्राणा इति भूतवाक्पृथिवीशरीरहृदयप्राणात्मिका षड्विधा षड्भिरक्षरैश्चतुष्पदा गायत्रीति। यदुक्तं तावत् तत्परिमाणः सर्व्वः प्रपञ्चोऽस्य गायत्र्यनुगतस्य ब्रह्मणो महिमा विभूतिः, पुरुषस्तु पूर्णब्रह्मरूपः, अतः प्रपञ्चाज्ज्यायानधिकः। आधिक्यमेवाह ॥ पाद इति ॥ सर्व्वं जगदेकः पादोऽंशः "विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्" इति स्मृतेः। अस्य पुरुषस्य दिवि स्वप्रकाशब्रह्मरूपे त्रिपादमृतरूपमस्ति, दिवि सूर्य्यमण्डले वा ध्यानार्थमस्ति, कल्पिताच्चगतो ब्रह्मणोऽमृतमनन्तमस्तीत्यर्थः। यथा लोके पादात् पादत्रयमधिकं तथेदमधिकमिति बोधनार्थं त्रिपादमृतमित्युक्तं लोके न त्रिपात्त्वं विवक्षितमिति मन्तव्यं। यदतः पर इति यच्छब्दस्य

इत्यनेन मन्त्रेण। तच्च यच्चतुष्पदो ब्रह्मणस्त्रिपादमृतं द्युसम्बन्धिरूपं निर्दिष्टं तदेवेह द्युसम्बन्धात् निर्दिष्टमिति प्रत्यभिज्ञायते। तत् परित्यज्य प्राकृतं ज्योतिः कल्प्यतः प्रकृतहानाप्रकृतप्रक्रिये प्रसज्येयातां। न केवलं ज्योतिर्वाक्य एव ब्रह्मानुवृत्तिः, परस्यामपि हि शाण्डिल्यविद्यायामनुवर्त्तिष्यते ब्रह्म। तस्मादिह ज्योतिरिति ब्रह्म प्रतिपत्तव्यं। यत्तूक्तं "ज्योतिर्दीप्यत" इति च एतौ शब्दौ कार्य्ये*ज्योतिषि प्रसिद्धाविति, नायं दोषः, प्रकरणात्+ ब्रह्मावगमे सत्यनयोः शब्दयोरविशेषकत्वात् दीप्यमानकार्य्यज्योतिरुपलक्षिते ब्रह्मण्यपि प्रयोगसम्भवात्। "येन सूर्य्यस्तपति तेजसेद्धः" इति च मन्त्रवर्णात्। यदा नायं ज्योतिःशब्दश्चतुर्वृत्तेरेवानुग्राहके तेजसि वर्त्तते। अन्यत्रापि प्रयोगदर्शनात्"वाचैवायं ज्योतिषास्ते मनोज्योतिर्जुषतां" इति च। तस्माद्यद्यत् कस्यचिदव-

---

प्रसिद्धार्थवाचित्वात् पूर्ब्ववाक्यप्रसिद्धं ब्रह्म ग्राह्यमित्याह॥ तच्चेति॥ ननु यदाग्नेयोऽष्टाकपाल इत्यत्र यत्पदस्याप्रकृतार्थकत्वं दृष्टमित्यत आह॥ तत् परित्यज्येति॥ तत्र यागस्यान्यतः प्रसिद्धेरभावेनापूर्ब्वत्वादगत्या पदोऽप्रसिद्धार्थत्वमाश्रितं, इह तु पूर्ब्ववाक्यप्रसिद्धस्य ब्रह्मणो द्युसम्बन्धेन प्रत्यभिज्ञातस्य यदर्थत्वनिश्चयाद्यत्पदैकार्थकज्योतिःपदस्यापि स एवार्थ इत्यर्थः। सन्दंशन्यायादप्येवमित्याह॥ न केवलमिति॥ सर्व्वं खल्विदं ब्रह्मेत्युत्तरत्र ब्रह्मानुवृत्तेर्मध्यस्थं ज्योतिर्वाक्यं ब्रह्मपरमित्यर्थः॥ प्रकरणादिति॥ प्रकृतापेक्षयत्पदश्रुत्या द्युसम्बन्धभूतपादत्वादिलिङ्गैश्चेत्यर्थः। अतः प्रकरणाज्ज्योतिःश्रुतिबोधो न युक्त इति निरस्तं अविशेषत्वादिति ब्रह्मव्यावर्त्तकत्वाभावादित्यर्थः। येन तेजसा चैतन्येनेद्धः प्रकाशितः सूर्य्यस्तपति प्रकाशयति तं बृहन्तमवेदविन्न मनुत इत्यर्थः। ज्योतिः शब्दस्य

---

* कार्ये इति मु० पु० पाठः।

भासकं तत्तज्ज्योतिःशब्देनाभिधीयते। तथा सति ब्रह्मणोऽपि चैतन्यरूपस्य समस्तजगदवभासहेतुत्वादुपपन्नो ज्योतिःशब्दः। "तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति" "तद्देवा ज्योतिषां ज्योतिरायुर्होपासते अमृतं" इत्यादिश्रुतिभ्यश्च। यदप्युक्तं द्युमर्ष्यादत्वं सर्वगतस्य ब्रह्मणो नोपपद्यत इति, अत्रोच्यते, सर्वगतस्यापि ब्रह्मण उपासनार्थः प्रदेशविशेषपरिग्रहो न विरुद्ध्यते। ननूक्तं निष्प्रदेशस्य ब्रह्मणः प्रदेशविशेषकल्पना नोपपद्यत इति। नायं दोषः, निष्प्रदेशस्यापि ब्रह्मण उपाधिविशेषसम्बन्धात् प्रदेशविशेषकल्पनोपपत्तेः। तथा ह्यादित्ये चक्षुषि हृदये इति प्रदेशविशेषसम्बन्धीनि ब्रह्मण उपासनानि श्रूयन्ते, एतेन विश्वतःपृष्ठेष्वित्याधारबहुत्वमुपपादितं। यदप्येतदुक्तं श्रौष्यघोषाभ्यामनुमिते कौक्षेये कार्ये ज्योतिष्यध्यस्यमानत्वात् परमपि दिवः कार्यं ज्योतिरेवेति तदप्ययुक्तं, परस्यापि ब्रह्मणो नामादिप्रतीकवत् कौक्षेयज्योतिःप्रतीकत्वोपपत्तेः। दृष्टश्च श्रुतश्च "अत उपासीत" इति तु प्रतीकद्वारकं दृष्टत्वं श्रुतत्वञ्च भविष्यति।

कार्यज्योतिष्येव शक्तिरित्यङ्गीकृत्य कारणब्रह्मलक्षकत्वमुक्त्वा ब्रह्मण्यपि शक्तिमाह॥ यदेति॥ गाढान्धकारे वाचैव ज्योतिषा लोक आसनादिव्यवहारं करोतीत्यर्थः। "आज्यं जुषतां पिबतां मनोज्योतिःप्रकाशकं भवति" इत्याज्यस्तुतिः। गच्छन्तमनुगच्छतः स्वस्यापि गतिरस्ति तथा सर्वस्य स्वनिष्ठं भानं स्यादित्यत आह॥ तस्य भासेति॥ तत्कालावच्छिन्नं ब्रह्मसूर्यादिज्योतिषां साक्षिभूतमायुरमृतमिति च देवा उपासत इत्यर्थः। ज्योतिषोऽग्नित्ववत् द्युमर्ष्यादत्वादिकं ध्यानार्थं कल्पितं ब्रह्मणो मुक्तमित्याह॥ अत्रोच्यते इत्यादिना॥ दिवः परमित्यन्वयः, आरोप्यस्य ध्येयस्यालम्बनस्य च सादृश्यनियमो नास्तीत्याह॥ परस्यापीति॥ भवि-

यद्यप्यफलश्रवणात् ब्रह्मेति तदप्यनुपपन्नं। न हि दृश्यते फलाय ब्रह्मात्मत्वमियते नेति नियमे हेतुरस्ति। यत्र हि निरस्तसर्व्वविशेषसम्बन्धं परं ब्रह्मात्मत्वेनोपदिश्यते, तत्रैकरूपमेव फलं मोक्ष इत्यवगम्यते। यत्र तु गुणविशेषसम्बन्धं प्रतीकविशेषसम्बन्धं वा ब्रह्मोपदिश्यते, तत्र संसारगोचराण्येवोच्चावचानि फलानि दृश्यन्ते "अन्नादो वसुदानो विन्दते वसु य एवं वेद" इत्याद्यासु श्रुतिषु। यद्यपि न स्ववाक्ये किञ्चिज्ज्योतिषो ब्रह्मलिङ्गमस्ति तथापि पूर्व्वस्मिन् वाक्ये दृश्यमानं गृहीतव्यं भवति। तदुक्तं सूत्रकारेण ज्योतिश्चरणाभिधानादिति। कथं पुनः वाक्यान्तरगतेन ब्रह्मसन्निधानेन ज्योतिःश्रुतिः स्वविषयात् प्रत्याय्य शक्या व्यावर्त्तयितुं। नैष दोषः। "यदतःपरो दिवो ज्योतिः" इति प्रथमतरपठितेन यच्छब्देन सर्व्वनाम्ना द्युसम्बन्धात् प्रत्यभिज्ञायमाने पूर्व्ववाक्यनिर्द्दिष्टे ब्रह्मणि स्वसामर्थ्येन परामृष्टे सति अर्थाज्ज्योतिःशब्दस्यापि ब्रह्मविषयत्वोपपत्तेः। तस्मादिह ज्योतिरिति ब्रह्म प्रतिपत्तव्यं॥

ष्यति ब्रह्म ज्योतिष इति शेषः। तं यथा यथोपासते तथा फलं भवतीति श्रुतेरित्याह॥ न हीयत इति॥ ज्ञानफलवदुपास्तिफलमेकरूपं किं न स्यादत आह॥ यत्र हीति॥ ज्ञेयैकत्वादित्यर्थः। ध्येयन्तु नानेनेत्याह॥ यत्र त्विति॥ ईश्वरो जीवरूपेणान्नमत्तीत्यन्नादः, अन्नस्यासमन्ताद्दाता वा। वसु हिरण्यं ददातीति वसुदान इति गुणविशेषसम्बन्धं यो वेद स धनं विन्दते दीप्तामिश्च भवति नास्मो वागुत्तमा मनो वा प्रतीकं वाचो भूय इति प्रतीकविशेषध्यानश्रुतिसंग्रहार्थमाद्यपदं सन्निधेः श्रुतिर्बलीयसीति शङ्कते॥ कथं पुनरिति॥ प्रथमश्रुत्यनुसारेण चरमश्रुतिर्नीयत इत्याह॥ नैष इति॥ सर्व्वनाम्ना स्वसामर्थ्येन स्वस्य

छन्दोऽभिधानान्नेति चेन्न तथा चेतोऽर्पणनिगदात्तथाहि दर्शनं॥ २५॥

अथ यदुक्तं पूर्व्वस्मिन्नपि वाक्ये न ब्रह्माभिहितमस्ति "गायत्री वा इदं सर्व्वं भूतं यदिदं किञ्च" इति गायत्र्याख्यस्य छन्दसोऽभिहितत्वादिति तत् परिहर्त्तव्यं। कथं पुनश्छन्दोऽभिधानान्न ब्रह्माभिहितमिति शक्यते वक्तुं, यावता "तावानस्य महिमा" इत्येतस्मात्तु चतुष्पाद्ब्रह्म दर्शितं। नैतदस्ति। "गायत्री वा इदं सर्व्वं" इति गायत्रीमुपक्रम्य तामेव भूतपृथिवीशरीरहृदयवाक्प्राणप्रभेदैर्व्याख्याय "सैषा चतुष्पदा षड्विधा गायत्री" तदेतदृचाभ्यनूक्तं "तावानस्य महिमा" इति तस्यामेव व्याख्यातरूपायां गायत्र्यामुदाहृतो मन्त्रः कथमकस्माद्ब्रह्मचतुष्पाद्भिदध्यात्। योऽपि तत्र "यदै तत् ब्रह्म" इति ब्रह्मशब्दः, सोऽपि छन्दसः प्रकृतत्वात् छन्दोविषय एव। "य एतामेवं ब्रह्मोपनिषदं वेद" इत्यत्र हि वेदोपनिषदमिति व्याचक्षते। तस्माच्छन्दोऽभिधानान्न ब्रह्मणः प्रकृतत्वमिति चेत्। नैष दोषः। तथा चेतोऽर्पणनिगदात्, तथा गायत्र्याख्यछन्दोद्वारेण तदनुगते ब्रह्मणि चेतसोऽर्पणं चित्तसमाधानमनेन ब्राह्मणवाक्येन निग-

---

सर्व्वनाम्नः सामर्थ्यं सन्निहितवाचित्वं तद्बलेन परामृष्टे सतीति योजना। अर्थाद्यत्पदसामानाधिकरण्यादित्यर्थः। छन्दोऽभिधानाद्ब्रह्म प्रकृतं नास्तीत्यत्रामेकदेशी दूषयति ॥ कथमिति ॥ शङ्कां साधयति ॥ नैतदित्यादिना ॥ चतुष्पदत्वादिकं पूर्व्वमेव व्याख्यातं ॥ य एतामेवमिति॥ वेदरहस्यभूतां मधुविद्यामेवमुक्तरीत्या यः कश्चिद्वेद तस्योदयास्तमयरहितब्रह्मप्राप्तिर्भवतीत्यर्थः। तथाच वेदत्वात् गायत्र्यां ब्रह्मशब्दो

श्रुते "गायत्री वा इदं सर्व्वं" इति। न ह्यक्षरसन्निवेशमात्राया गायत्र्याः सर्व्वात्मकत्वं सम्भवति। तस्माद्गायत्र्याख्यविकारेऽनुगतं जगत्कारणं ब्रह्म निर्दिष्टं, "तदिदं सर्व्वं" इत्युच्यते। यथा "सर्व्वं खल्विदं ब्रह्म" इति। कार्य्यञ्च कारणादव्यतिरिक्तमिति वक्ष्यामः। तदनन्यत्वमारम्भणशब्दादिभ्य इत्यत्र तथान्यत्रापि विकारद्वारेण ब्रह्मण उपासनं दृश्यते "एतं ह्येव बह्वृचा महत्युक्थे मीमांसन्ते, एतमग्नावध्वर्यव एतं महाव्रते छन्दोगाः" इति। तस्मादस्मिं छन्दोऽभिधानेऽपि पूर्व्वस्मिन् वाक्ये ब्रह्म निर्दिष्टं, तदेवं ज्योतिर्वाक्येऽपि परामृश्यते, उपासनान्तरविधानाय। अपर आह साक्षादेव गायत्रीशब्देन ब्रह्म प्रतिपाद्यते संख्यासामान्यात् यथा गायत्रीचतुष्पदा षडक्षरैः पादै-

---

युक्त इति भावः॥ गायत्रीशब्देन तदुपादानत्वेनानुगतब्रह्मलक्षणायां बीजं। अनुपपत्तिमाह॥ न ह्यक्षरेति॥ ब्रह्मणोऽपि कथं सर्व्वात्मकत्वं तत्राह॥ कार्य्यञ्चेति॥ न च गायत्र्या ध्यानार्थं सर्व्वात्मत्वारोप इति वाच्यं, स्वतः सर्व्वात्मनो ध्यानसम्भवेनासदारोपायोगादिति भावः। तथा हि दर्शनमिति सूत्रशेषं व्याचष्टे॥ तथान्यत्रेति॥ दृश्यत इति दर्शनं दृष्टमित्यर्थः। एतं परमात्मानं बह्वृच ऋग्वेदिनो महत्युक्थे शस्त्रे तदनुगतमुपासते। एतमेवाग्निरहस्ये तमेतमग्निमित्यध्वर्यव उपासत इति श्रुतेः यजुर्वेदिनोऽग्नौ उपासते। एतमेव छान्दोगाः सामवेदिनो महाव्रते क्रतौ उपासते, इति तैत्तिरीयके दृष्टमित्यर्थः। गायत्रीशब्दो ब्रह्मलक्षक इति व्याख्याय गौण इत्याह॥ अपर इति॥ साक्षादेव वाच्यार्थग्रहणं विनैवेति यावत्। पूर्व्वं तूपास्यतया गायत्रीपदेनाजहल्लक्षणया गायत्री ब्रह्मणी दे अपि लक्षिते। न च गायत्री सर्व्वमित्यन्वयासम्भवः घटो रूपीति पदार्थैकदेशे यथा रूपान्वयवत् गायत्रीपदार्थैकदेशे गायत्र्यनुगते ब्रह्मणि प्रधाने सर्व्वात्मकत्वान्वयसम्भवादिति भावः। तथा

स्तथा ब्रह्म चतुष्पात्। तथाऽन्यत्रापि छन्दोऽभिधायी शब्दोऽर्थान्तरे संख्यासाम्यात् प्रयुज्यमानो दृश्यते। तद्यथा "ते वा एते पञ्चान्ये पञ्चान्ये दशसन्तः तत्कृतं" इत्युपक्रम्याह "सैषा विराडन्नाद" इति। अस्मिन् पक्षे ब्रह्मैवाभिहितमिति न छन्दोऽभिधानं। सर्व्वथाऽप्यस्ति पूर्व्वस्मिन् वाक्ये प्रकृतं ब्रह्मेति॥

भूतादिपादव्यपदेशोपपत्तेश्चैवं॥ २६॥

दृतश्चैवमभ्युपगन्तव्यमस्ति। पूर्व्वस्मिन् वाक्ये प्रकृतं ब्रह्मेति यतो भूतादीन् पादान् व्यपदिशति। भूतपृथिवीशरीरहृदयानि हि निर्दिश्याह "सैषा चतुष्पदा षड्विधा गायत्रीति। न हि ब्रह्माश्रयणे केवलस्य छन्दसो भूतादयः पादा उपपद्यन्ते। अपि च ब्रह्मानाश्रयणे नेयमृक् सम्बध्येत "तावानस्य महिमा" इति। अनया हि ऋचा स्वरसेन ब्रह्मैवाभिधीयते "पादोऽस्य सर्व्वाभूतानि त्रिपादस्यामृतं दिवि" इति सर्व्वात्मत्वोपपत्तेः पुरुष-

---

च सूत्रे सिद्धान्तभागस्यायमर्थः। तथा गायत्रीवच्चतुष्पात्त्वगुणसामान्याच्चेतो ब्रह्मणि समर्प्यते येन सचेताऽर्पणो गायत्रीशब्दस्तेन ब्रह्मण एव निगदात्, अभिधानात्, छन्दोऽभिधानमसिद्धमिति। अधुना तथा हि दर्शनमिति शेषं व्याचष्टे॥ तथेति॥ संवर्गविद्यायामधिदैवमग्निसूर्य्यचन्द्राम्भांसि वायौ लीयन्ते। अध्यात्मं वाक्चक्षुःश्रोत्रमनांसि प्राणमपि यन्तीत्युक्तं ते वा एते पञ्चान्ये आधिदैविकाः, पञ्चान्ये आध्यात्मिकास्ते मिलित्वा दशसंख्याकाः सन्तः कृतमित्युच्यन्ते। सन्ति हि कृतत्रेता द्वापरकलिसंज्ञकानि चत्वारि द्यूतानि क्रमेण चतुरङ्गत्र्यङ्गद्व्यङ्गैकाङ्गानि तत्र कृतं दशात्मकं भवति चतुर्व्वंकेषु त्रयाणां त्रिषु द्वयोर्द्वयोरेकस्य चान्तर्भावात्, तथा च दशत्वगुणेन वाय्वादयः कृतशब्देनोच्यन्ते। एवं कृतत्वं वाय्वादीनामुपक्रम्याह॥ सैषेति॥ विधेयापेक्षया स्त्रीलिङ्गनि-

सूक्तेऽपीयमृक् ब्रह्मपरतयैव समाम्नायते। स्मृतिश्च ब्रह्मण एवं-रूपतां दर्शयति "विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्" इति "यद्वै तद्ब्रह्म" इति च निर्देशः। एवं सति मुख्यार्थ उपपद्यते। "ते वा एते पञ्चब्रह्मपुरुषाः" इति च "हृदयसुषिरेषु ब्रह्मपुरुषः" इति श्रुतिः ब्रह्मसम्बन्धितायां विवक्षितायां सम्भवति। तस्मादस्ति पूर्व्वस्मिन् वाक्ये प्रकृतं ब्रह्म। तदेव बह्व ज्योतिर्वाक्ये द्युसम्बन्धात् प्रत्यभिज्ञायमानं परामृश्यत इति स्थितं॥

उपदेशभेदान्नेति चेन्नोभयस्मिन्नप्यविरोधात्॥ २७॥

यदप्येतदुक्तं पूर्व्वत्र त्रिपादस्यामृतं दिवीति सप्तम्या द्यौराधारत्वेनोपदिष्टा, इह पुनरथ यदतः परो दिव इति पञ्चम्या मर्य्यादात्वेन तस्मादुपदेशभेदान् न तस्येह प्रत्यभिज्ञानमस्तीति तत्

र्देशः, विराट्पदं छन्दोवाचकं "दशाक्षरा विराट" इति श्रुतेः दशत्वसाम्येन वाय्वादयो विराडित्युच्यन्ते। एवञ्च दशत्वद्वारा वाय्वादिषु कृतत्वं विराट्त्वञ्च ध्येयं, तत्र विराट्त्वध्यानात् सर्व्वमस्यान्नं भवति "अन्नं विराट" इति श्रुतेः कृतत्वध्यानादन्नादो भवति कृतद्यूतस्यान्नादत्वात्। कृतं हि स्वीयचतुरङ्केषु व्यङ्कादिकमन्तर्भावयदन्नमत्तीव लक्ष्यते। अत एव कृतजयादितरद्यूतजयः श्रुत्युक्तः। कृताय विजितायाधरेयाः संयन्तीति, अयो द्यूतं कृतसंज्ञोऽयः कृतायः सर्व्वजितो येन तस्मै, अधरेयाः व्यङ्कादयः आयाः संयन्ति उपनमन्ते तेन जिता भवन्तीत्यर्थः। एवञ्च सा वाय्वादिदशात्मिका एषा कृतशब्दिता विराडन्नं कृतत्वादन्नादिनीत्यर्थः सर्व्वथापीति॥ गायत्रीति पदस्य लक्षकत्वे गौणत्वेऽपि नेत्यर्थः। अत्रापर आहेत्यपरपदेन गौणत्वं स्वमतं नेति द्योतयति। अजहल्लक्षणाश्रयत्वे हि वाग्वै गायत्रीति वाग्गात्रत्वं गायतिश्च गायते चेति निरुक्तनामकश्च गायत्या उपाधित्वेनोपात्तत्वादुपपन्नतरं गौणपक्षे गायत्रीत्यागात्तदु-

परिहर्त्तव्यं। अत्रोच्यते, नायं दोष उभयस्मिन्नप्यविरोधात्, उभयस्मिन्नपि मन्त्रन्यन्ते पठ्यन्ते चोपदेशेन न प्रत्यभिज्ञानं विरुध्यते। यथा लोके वृक्षाग्रेण सम्बन्धोऽपि श्येन उभयथोपदिश्यमानो दृश्यते, वृक्षाग्रे श्येनो वृक्षाग्रात् परतः श्येन इति च, एवं दिव्येव सत् ब्रह्म दिवः परमित्युपदिश्यते। अपर आह यथा लोके वृक्षाग्रेणासम्बद्धोऽपि श्येन उभयथोपदिश्यमानो दृश्यते वृक्षाग्रे

भयं सर्व्वात्मकत्वमात्रेणोपपादनीयं, एवं गायत्रीपदस्य स्वार्थत्यागोऽप्रसिद्धचतुष्पात्त्वगुणद्वारा विप्रकृष्टलक्षणा चेति बकसमञ्जसं। ननु गायत्री वा इदं सर्व्वं, इति गायत्री श्रुतेः कथं लक्षणेत्याशङ्क्य वाक्यशेषगतसर्व्वात्मकत्वाद्यनेकबलवत् प्रमाणसम्बन्धेन ब्रह्मणि तात्पर्य्यावगमादित्याह ॥ भूतादिपादेति ॥ एवं पदार्थमाह ॥ इतश्चेति ॥ सूत्रस्थादिपदार्थं दर्शयति ॥ भूतपृथिवीति ॥ अत्र सूत्रभाष्यकारयोर्भूतादिभिश्चतुष्पादगायत्री विसम्मतं षडक्षरैश्चतुष्पात्त्वं वृत्तिकारोक्तमप्रसिद्धत्वकारत्वूचितं। युक्त्यन्तरमाह ॥ अपि चेति ॥ ब्रह्मपरसूक्तोत्पन्नत्वाच्च तस्यास्तत्परत्वमित्याह ॥ पुरुषेति ॥ ब्रह्मपदस्य छन्दोवाचित्वमुक्तं निरस्यति ॥ यद्वै तत् ब्रह्मेति ॥ पूर्वस्यामृचि ब्रह्मोक्तावित्यर्थः हृदयस्य चतुर्दिक्षूर्द्ध्वं च पञ्चसुषयः सन्ति। तेषु ब्रह्मस्थानहृन्नगरस्य प्रागादिद्वारेषु क्रमेण प्राणव्यानापानसमानोदानाः पञ्चद्वारपाला इति ध्यानार्थं श्रुत्वा कल्पितं। तच्च हृदयच्छिद्रस्यप्राणेषु ब्रह्मपुरुषत्वश्रुतिर्हृदि गायत्र्याख्यब्रह्मण उपासनासम्बन्धितायां ब्रह्मणो द्वारपालत्वाद्ब्रह्मपुरुषा इति सम्भवतीत्याह ॥ पञ्चब्रह्मेति ॥ दिवि दिव इति विभक्तिभेदात् प्रकृतप्रत्यभिज्ञा नास्तीत्युक्तं नोपेक्षणीयमित्याह ॥ तत्परिहर्त्तव्यमिति ॥ परिहारं प्रतिजानीते ॥ अत्रेति ॥ सूत्रेणार्थं वदन् परिहारमाह ॥ नायमिति ॥ एवं सर्व्वत्र व्याख्येयं। प्रधानप्रातिपदिकार्थाद्द्युसम्बन्धेन प्रत्यभिज्ञाया विभक्त्यर्थभेदो न प्रतिबन्धकः, कथञ्चिदाधारस्यापि मर्य्यादात्वसम्भवात्। यथा वृक्षाग्रं खलग्नभागावच्छिन्नश्येनस्याधारः सन्नेव खाग्नभागावच्छिन्नस्य तस्यैव मर्य्यादा भवति, एवं दिवि सूर्ये हार्दाकाशे वा मुख्ये आधारे

श्येनो दृषायात् परतः श्येन इति च, एवं च दिवः परमपि सत् ब्रह्म दिवीत्युपदिश्यते। तस्मादस्मिं पूर्वनिर्दिष्टस्य ब्रह्मण इह प्रत्यभिज्ञानं। अतः परमेव ब्रह्म ज्योतिःशब्दमिति सिद्धं॥

प्राणस्तथानुगमात्॥ २८॥

अस्ति कौषीतकिब्राह्मणोपनिषदीन्द्रप्रतर्दनाख्यायिका "प्रतर्दनोह वै दैवोदासिरिन्द्रस्य प्रियं धामोपजगाम युद्धेन च पौरुषेण च" इत्यारभ्यान्नाता। तस्यां श्रूयते "स होवाच प्राणोऽस्मि प्रज्ञात्मा तं मामायुरमृतमित्युपास्व" इति, तथोत्तरत्रापि "अथ खलु प्राण एव प्रज्ञात्मा इदं शरीरं परिगृह्योत्थापयति" इति, तथा "न वाचं विजिज्ञासीत वक्तारं विद्यात्" इति, अन्ते च "स एव प्राण एव प्रज्ञात्मानन्दोऽजरोऽमृतः" इत्यादि। तच

सद् ब्रह्म दिवो मर्यादात्वं तदलमाकाशावच्छिन्नं ब्रह्म प्रति कल्पयित्वा दिवः परमित्युच्यत इत्यर्थः। यद्याकाशेन अनवच्छिन्नं ब्रह्म गृहीत्वा यद्यप्या दिवो मर्यादात्वमेव मुख्यं तदा गङ्गायां घोष इतिवत् सप्तम्या लाभीप्यलक्षणयाऽऽधारत्वं व्याख्येयमित्याह॥ अपर इति॥ सम्बद्धं प्रत्याधारत्वं मुख्यं पूर्वमुक्तं दिव्येव सादिति असम्बद्धं प्रतिमर्यादात्वं मुख्यमधुनोच्यते। दिवः परमपीति भेदः। तस्माज्ज्योतिर्वाक्यमुपास्ये ब्रह्मणि समन्वितमिति सिद्धं। प्राणस्तथानुगमात्। दिवोदासस्यापत्यं दैवोदासिः प्रतर्दनो नाम राजा युद्धेन पुरुषकारेण च काशीन्द्रस्य प्रेमास्पदं गृहं जगाम। तं ह इन्द्र उवाच प्रतर्दन वरं ते ददानीति। स होवाच प्रतर्दनः, यं त्वं मर्त्यायहिततमं मन्यसे तं वरं त्वमेवालोच्य मह्यं देहीति। तत इन्द्र इदमाच प्राणोऽस्मीत्यादिमुख्यं प्राणं निरसितुं प्रज्ञात्मत्वमुक्तं निर्विशेषचिन्मात्रं निरस्यति॥ तं मामिति॥ इदं प्राणस्येन्द्रदेवतात्वे लिङ्गं। मुख्यप्राणत्वे लिङ्गमाह॥ अथेति॥ वागादीनां देहधारणसाधनभावनिश्चयानन्तरमित्यर्थः। प्राणस्य देहधारकत्वमुत्था-

संशयः, किमिह प्राणशब्देन वायुमात्रमभिधीयते, उत देवतात्मा, उत जीवः, अथवा परं ब्रह्मेति। नन्वेत एव प्राणः इत्यत्र वर्णितं प्राणशब्दस्य ब्रह्मपरत्वमिहापि च ब्रह्मलिङ्गमस्ति "आनन्दोऽजरोऽमृतः" इत्यादि। कथमिह पुनः संशयः सम्भवति। अनेकलिङ्गदर्शनादिति ब्रूमः। न केवलमिह ब्रह्मलिङ्गमेवोपलभ्यते सन्ति हि इतरलिङ्गान्यपि। "मामेव विजानीहि" इतीन्द्रस्य वचनं देवतात्मलिङ्गमिदं शरीरं परिगृह्योत्थापयतीति प्राणलिङ्गं। "न वाचं विजिज्ञासीत वक्तारं विद्यात्" इत्यादि जीवलिङ्गं, अत उपपन्नः संशयः। तत्र प्रसिद्धो वायुः प्राण इति प्राप्ते, उच्यते, प्राणशब्दवाच्यं ब्रह्म विज्ञेयं। कुतः। तथानुगमात्। तथा हि पौर्वापर्येण पर्यालोच्यमाने वाक्ये पदार्थानां समन्वयो * ब्रह्मप्रतिपादनपर उपलभ्यते, उपक्रमे तावत् वरं वृणीष्वेतीन्द्रेणोक्तः। प्रत-

---

यकत्वञ्च प्रसिद्धमिति वक्तुं खल्वित्युक्तं। प्राणस्य जीवत्वे वक्तृत्वं लिङ्गमाह ॥ न वाचमिति ॥ आनन्दत्वादिकं ब्रह्मलिङ्गमाह ॥ अन्ते चेति ॥ अनेकेषु लिङ्गेषु दृश्यमानेषु बलाबलनिर्णयार्थमिदमधिकरणमित्यत्रार्थमाह ॥ अनेकलिङ्गेति ॥ पूर्वत्रप्रकृतब्रह्मवाचकयच्छब्दबलाज्ज्योतिःश्रुतिः ब्रह्मपरेत्युक्तं, न तथेह प्राणश्रुतिभङ्गे किञ्चिद्बलमस्ति। मिथो विरुद्धानेकलिङ्गानामनिश्चायकत्वादिति प्रत्युदाहरणसङ्गत्या पूर्वपक्षयति ॥ तत्रेति ॥ पूर्वं प्रधानप्रातिपदिकार्थबलात् विभक्त्यर्थबाधबलाच्चार्थज्ञानं प्रति हेतुत्वेन प्रधानानेकपदार्थबलादेकवाक्यता भङ्ग इति दृष्टान्तसङ्गतिर्वाऽस्तु। पूर्वपक्षे प्राणाद्यनेकोपास्तिः, सिद्धान्ते प्रत्यगब्रह्मधीरिति विवेकः। तथा ब्रह्मपरत्वेन पदानामन्वयावगमादिति हेत्वर्थमाह ॥ तथा हीति ॥ स्थितप्रत्यक्कर्मक्षयादिपदार्थानां

---

* समुच्चयो इति मु० पु० पाठः।

दृष्ट्वः परमं पुरुषार्थं वरमुपचिचेष "तमेव मे दृष्टीभ्य यं त्वं मन्यसे वरतमं मन्यसे" इति। तस्मै हिततमत्वेनोपदिश्यमानः प्राणः कथं परमात्मा न स्यात्। न ह्यन्यच परमात्मज्ञानात् हिततमप्राप्तिरस्ति "तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय" इत्यादिश्रुतिभ्यः। तथा "स यो मां वेद न ह वै तस्य केनचन कर्मणा लोको मीयते न स्तेयेन न भ्रूणहत्यया" इत्यादि च ब्रह्मपरिग्रहे घटते, ब्रह्मविज्ञाने हि सर्वकर्मक्षयः प्रसिद्धः। "क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे" इत्याद्यासु श्रुतिषु प्रज्ञात्मत्वञ्च ब्रह्मपद्य एवोपपद्यते। न ह्यचेतनस्य वायोः प्रज्ञात्मत्वं सम्भवति। तथोपसंहारेऽपि "आनन्दोऽजरोऽमृत" इत्यानन्दत्वादीनि न ब्रह्मणोऽन्यत्र सम्यक् सम्भवन्ति "स न साधुना कर्मणा भूयान् भवति न एवासाधुना कर्मणा कनीयानेष ह्येव साधु कर्म कारयति" तं यमेभ्यो लोकेभ्य उन्निनीषते एष उ एवासाधुकर्मकारयति। तं यमेभ्यो लोकेभ्योऽधोनिनीषते" इति "एष लोकपाल एष लोकाधिपतिरेष लोकेश" इति च। सर्वमेतत् परस्मिन् ब्रह्मण्याश्रीयमाणे अनुगन्तुं शक्यते न मुख्ये प्राणे। तस्मात् प्राणो ब्रह्म।

सम्बन्धो ब्रह्मणि तात्पर्यनिश्चायक उपलभ्यत इत्युक्तं विवृणोति॥ उपक्रम इत्यादिना॥ यं मन्यसे तं वरं त्वमेव प्रयच्छेत्यर्थः। स यः कश्चित् मां ब्रह्मरूपं वेद साक्षादनुभवति तस्य विदुषो लोको मोक्षो महताऽपि पातकेन न ह मीयते नैव हिंस्यते न प्रतिबध्यते ज्ञानाग्निना कर्मलक्षराशेर्दग्धत्वादित्याह॥ स य इति॥ साध्वसाधुनी पुण्यपापे ताभ्यामस्पृष्टत्वं तत्कारयितृत्वं निरङ्कुशैश्वर्यञ्च सर्वमेतदित्यर्थः। अहङ्कारवा-

न वक्तुरात्मोपदेशादिति चेदध्यात्मसम्बन्धभूमा ह्यस्मिन्।२९।

यदुक्तं प्राणो ब्रह्मेति तदाचिख्यते, न परं ब्रह्म प्राणशब्दं। कस्मात्, वक्तुरात्मोपदेशात्। वक्ता हीन्द्रो नाम कश्चिद्विग्रहवान् देवताविशेषः स्वमात्मानं प्रतर्दनायाचचक्षे "मामेव विजानीहि" इत्युपक्रम्य "प्राणोऽस्मि प्रज्ञात्मा" इत्यहङ्कारवादेन स एष वक्तुरात्मत्वेनोपदिश्यमानः प्राणः कथं ब्रह्म स्यात्। न हि ब्रह्मणो वक्तृत्वं सम्भवति "अवाङ्मनसः" इत्यादिश्रुतिभ्यः। तथा विग्रहसम्बन्धिभिरेव ब्रह्मणसम्भवद्भिर्धर्मैरात्मानं तुष्टाव "त्रिशीर्षाणं त्वाष्ट्रमहनं, अरुन्मुखान् यतीन् शालावृकेभ्यः प्रायच्छं" इत्येवमादिभिः। प्राणत्वञ्चेन्द्रस्य बलवत्त्वादुपपद्यते, "प्राणो वै बलं" इति हि विज्ञायते बलस्य चेन्द्रो देवता प्रसिद्धा। या च काचित् बलकृतिरिन्द्रकर्मैव तदिति हि वदन्ति। प्रज्ञात्मत्वमप्यप्रतिहतज्ञानत्वाद् देवतात्मनः सम्भवति, अप्रतिहतज्ञाना देवता इति वदन्ति। निश्चिते चैवं देवतात्मोपदेशे हिततमत्वादिवचनानि यथासम्भवं

देन स्वात्मवाचकशब्दैराचचक्षे, उक्तवान् इत्यर्थः। वाक्यस्य इन्द्रोपासनापरत्वे लिङ्गान्तरमाह ॥ तथा विग्रहेति ॥ त्रीणि शीर्षाणि यस्येति त्रिशीर्षा त्वष्टुः पुत्रो विश्वरूपो नाम ब्राह्मणः तं हतवानस्मि। शालावृकेति यथार्थं शब्दयतीति रुक् वेदान्तवाक्यं तन्मुखे येषां ते रुङ्मुखास्तेभ्यो ऽन्यान् वेदान्तवहिर्मुखान् यतीनरण्यश्वभ्यो दत्तवानस्मीत्यर्थः। इन्द्रे प्राणशब्दोपपत्तिमाह ॥ प्राणत्वञ्चेति ॥ लौकिका अपीत्यर्थः। बलवाचिना प्राणशब्देन बलदेवता लक्ष्यत इति भावः। इन्द्रो हितप्रदाढ्यत्वाद्धिततमः कर्म्मानधिकारादपाप इत्येवमाख्येयानीत्याह ॥ निश्चिते चेति ॥ किमिन्द्रपदेन विग्रहोपलक्षितं चिन्मात्रमुच्यते उत विग्रहः। आद्ये वाक्यस्य

तदिषयाण्येव योजयितव्यानि। तस्मादक्षुरिन्द्रस्यात्मोपदेशाच्च प्राणो ब्रह्मेत्याश्रित्य प्रतिसमाधीयते। अध्यात्मसम्बन्धभूमा ह्यस्मिन्निति। अध्यात्मसम्बन्धः प्रत्यगात्मसम्बन्धस्तस्य भूमा बाहुल्यमस्मिन्नध्याय उपलभ्यते। "यावत् ह वा अस्मिन् शरीरे प्राणो वसति तावदायुः" इति प्राणस्यैव प्रज्ञात्मनः प्रत्यग्भूतस्यायुषः सम्प्रदानोपसंहारयोः स्वातन्त्र्यं दर्शयति न देवताविशेषस्य पराचीनस्य। तथाऽस्तित्वे च प्राणानां निःश्रेयसमित्यध्यात्ममेवेन्द्रियाश्रयं प्राणं दर्शयति। तथा "प्राण एव प्रज्ञात्मेदं शरीरं परिगृह्योत्थापयति" इति, "न वाचं विजिज्ञासीत वक्तारं विद्यात्" इति चोपक्रम्य "तद्यथा रथस्यारेषु नेमिरर्पिता नाभावरा अर्पिताः" एवमेवैता भूतमात्राः प्रज्ञामात्रास्वर्पिताः प्रज्ञामात्राः

ब्रह्मपरत्वं सिद्धं, न द्वितीय इत्याह॥ अध्यात्मेति॥ आत्मनि देहेऽधिगत इत्यध्यात्मं प्रत्यगात्मा स सम्बद्ध्यते यैः शरीरस्थत्वादिभिरिन्द्रतनावसम्भावितैर्धर्मैस्ते अध्यात्मसम्बन्धास्तेषां भूमेत्यर्थः। आयुरत्र देहे प्राणवायुसञ्चारः। अस्तित्वे प्राणस्थितौ प्राणानामिन्द्रियाणां स्थितिरित्यर्थतः श्रुतिमाह॥ अस्तित्व इति॥ अथातो निःश्रेयसादानमित्यारभ्य श्रुतिः। इन्द्रियस्यापकत्वहेतोरित्यापकत्वमाह॥ तद्येति॥ वक्तृत्वमुक्त्वा सर्व्वाधिष्ठानत्वं दर्शितमित्याह॥ इति चोपक्रम्येति॥ तत्तच्च नानाप्रपञ्चस्यात्मनि कल्पनायां यथा दृष्टान्तः लोके प्रसिद्धस्य रथस्यारेषु नेमिनाम्नोर्मध्यशुषिरवाक्षासु चक्रोपान्तरूपा नेमिरर्पिता नाभौ चक्रपिण्डिकायामरा अर्पिता एवम्भूतानि पञ्च एधित्यादीनि मीयन्त इति मात्राः भोग्याः शब्दादयः पञ्चेति दशभूतमात्राः प्रज्ञामात्रास्तु दशस्वर्पिताः इन्द्रियजाः पञ्चशब्दादिविषयप्रज्ञाः। मीयन्ते आभिरिति मात्राः पञ्चधीन्द्रियाणि नेमिवत् ग्राह्यं। ग्राहकेषु अरेषु कल्पितमित्युक्ता नाभि-

प्राणेऽर्पिताः "स एष प्राण एव प्रज्ञात्मानन्दोऽजरोऽमृतः" इति विषयेन्द्रियव्यवहारारनाभिभूतं प्रत्यगात्मानमेवोपसंहरति "स म आत्मेति विद्यात्" इति चोपसंहारः प्रत्यगात्मपरिग्रहे साधुः न पराचीनविग्रहे। "अयमात्मा ब्रह्म सर्व्वानुभूः" इति च श्रुत्यन्तरं। तस्मादध्यात्मसम्बन्धवाऊखात् ब्रह्मोपदेश एवायं न देवतात्मोपदेशः। कथं तर्हि वक्तुरात्मोपदेशः॥

शास्त्रदृष्ट्या तूपदेशो वामदेववत्॥ ३०॥

इन्द्रो नाम देवतात्मा स्वमात्मानं परमात्मत्वेनाहमेव परं ब्रह्मेत्यार्षेण दर्शनेन यथाशास्त्रं पश्यन्नुपदिशति स्म मामेव विजानीहीति। यथा तद्वैतत् पश्यन् ऋषिर्वामदेवः प्रतिपेदे, अहं मनुरभवं सूर्य्यश्चेति तद्वत्, "तद्धो यो देवानां प्रत्यबुध्यत स एव तदभवत्" इति श्रुतेः। यत् पुनरुक्तं "मामेव विजानीहि" इत्युक्त्वा विग्रहधर्म्मैरिन्द्र आत्मानं तुष्टाव त्वाष्ट्रवधादिभिरिति तत्परिहर्त्तव्यं। अत्रोच्यते। न त्वाष्ट्रवधादीनां विज्ञेयेन्द्रस्तुत्यर्थत्वेनोपन्यासः, यस्मादेवं कर्म्माहं तस्मान्मां विजानीहीति, कथं तर्हि, विज्ञानस्तुत्यर्थत्वेन। यत् कारणं त्वाष्ट्रवधादीनि साहसानि

ज्ञानीये प्राणे सर्व्वं कल्पितमित्याह॥ प्राणेऽर्पिता इति॥ स प्राणो मम स्वरूपमित्याह॥ स म इति॥ तर्हि प्रत्यगात्मनि समन्वयो न तु ब्रह्मणि। तत्राह॥ अयमिति॥ अहङ्कारवादस्य मतिं पृच्छति॥ कथमिति॥ सूत्रमुत्तरं। तद्व्याख्याति॥ इन्द्र इति॥ जन्माश्मरक्षतव्रणादिना अस्मिन् जन्मनि स्वतः सिद्धं दर्शनमार्षं विज्ञेयेन्द्रस्तुत्यर्थ उपन्यासः। न चेत् कथं तर्हि स इति पृच्छति॥ कथमिति॥ ब्रह्मज्ञानस्तुत्यर्थः स इत्याह॥ विजानीहि॥ नियामकं ब्रूते॥ यदिति॥ परेण तस्य मे इत्या-

उपन्यस्य परेण विज्ञानस्तुतिमनुसन्दधाति "तस्य मे तस्य सोम च न मीयते स यो मां वेद न ह वै तस्य केनच कर्मणा लोको मीयत" इत्यादिना। एतदुक्तं भवति यस्मादीदृशान्यपि क्रूराणि कर्माणि कृतवतो मम ब्रह्मभूतस्य सोमापि न हिंस्यते स योऽन्योऽपि मां वेद न तस्य केनचिदपि कर्मणा लोको हिंस्यत इति। विज्ञेयन्तु ब्रह्मैव प्राणोऽस्मि प्रज्ञात्मेति वक्ष्यमाणं। तस्मात् ब्रह्मवाक्यमेतत्॥

जीवमुख्यप्राणलिङ्गान्नेतिचेन्नोपासात्रैविध्यादाश्रितत्वादिह तद्योगात्॥ ३१॥

यद्यप्याध्यात्मसम्बन्धभूमदर्शनान्न पराचीनस्य देवतात्मन उपदेशस्तथाऽपि न ब्रह्मवाक्यं भवितुमर्हति। कुतः। जीवलिङ्गान्मुख्यप्राणलिङ्गाच्च। जीवस्य तावदस्मिन् वाक्ये विस्पष्टं लिङ्गमुपलभ्यते "न वाचं विजिज्ञासीत वक्तारं विद्यात्" इत्यादि अत्र रागादिभि-

---

दिना वाक्येनेत्यन्वयः। स्तुतिमाह॥ एतदुक्तमिति॥ तस्मात् ज्ञानं श्रेष्ठमिति शेषः। स्तुतज्ञानविषय इन्द्र इत्यत आह॥ विज्ञेयन्विति॥ देहेत्यापनं जीवलिङ्गं किं न स्यात्तत्राह॥ शरीरधारणश्चेति॥ सर्वे वागादयः प्राणा अहमहं श्रेष्ठ इति विवदमानाः प्रजापतिमुपजग्मुः। स च तानुवाच यस्मिन्नुत्क्रान्ते शरीरं पापिष्ठतरं मतिष्यति स च श्रेष्ठ इति। तथा क्रमेण वागादिषूत्क्रान्तेष्वपि मूकादिभावेन शरीरं स्वस्थमस्थात्। मुख्यप्राणस्य तु उच्चिक्रमिषायां सर्वेषां व्याकुलत्वादसौ तान् वागादीन् वरिष्ठः प्राण उवाच। यूयं मोहमापद्यध्वं यतोऽहमेवैतत् करोमि। किं तत् पञ्चधा प्राणापानादिभावेनात्मानं विभज्य एतद्बाणमुच्छ्रयतीति वाणं तदेव वाणमस्थिरं शरीरमवष्टभ्याश्रित्य धारयामीत्यर्थः। द्विवचनञ्चहवासोत्क्रान्तिश्रुतेश्च न ब्रह्म प्राणमि-

करणैर्व्याप्तस्य कार्यकरणाध्यस्तस्य जीवस्य विज्ञेयत्वमभिधीयते तथा मुख्यप्राणलिङ्गमपि। अथ खलु प्राण एव प्रज्ञात्मेदं शरीरं परिगृह्योत्थापयतीति। शरीरधारणञ्च मुख्य एव प्राणस्य धर्मः। प्राणसंवादे वागादीन् प्राणान् प्रकृत्य "तान् वरिष्ठः प्राण उवाच मा मोहमापद्यथाऽहमेवैतत् पञ्चधाऽऽत्मानं प्रविभज्यैतद् बाणमवष्टभ्य विधारयामि" इति श्रवणात्। ये त्विमं शरीरं परिगृह्णेति पठन्ति तेषामिमं जीवमिन्द्रियग्रामं वा परिगृह्य शरीरमुत्थापयतीति व्याख्येयं। प्रज्ञात्मत्वमपि जीवे तावच्चेतनत्वादुपपन्नं मुख्येऽपि प्राणे प्रज्ञासाधनप्राणान्तराश्रयत्वादुपपन्नमेव। जीवमुख्यप्राणपरिग्रहे च प्राणप्रज्ञात्मनोः सहवृत्तित्वेनाभेदनिर्देशः स्वरूपेण च भेदनिर्देश इत्युभयथानिर्देश उपपद्यते "यो वै प्राणः सा प्रज्ञाया वै प्रज्ञा स प्राणः" इति, "सह स्येतावच्छिन् शरीरे वसतः सहोत्क्रामतः" इति। ब्रह्मपरिग्रहे तु किं कस्मात् भिद्येत, तस्मादिह जीवमुख्यप्राणयोरन्यतर उभौ वा प्रतीयेयातां न ब्रह्मेति चेत्, नैतदेवं, उपासात्रैविध्यात्। एवं सति त्रिविधमुपासनं प्रसज्येत जीवोपासनं मुख्यप्राणोपासनं ब्रह्मोपासनञ्चेति। न

त्वाह॥ जीवमुख्येति॥ अभेदनिर्देशमाह॥ यो वा इति॥ भेदमाह॥ सहेति॥ यदि जीवमुख्यप्राणयोर्लिङ्गानुपास्यत्वं तर्हि ब्रह्मणोऽपि लिङ्गानामुक्तत्वादुपासनं स्यात्, न चेष्टापत्तिः। उपक्रमादिना निश्चितैकवाक्यताभङ्गप्रसङ्ग इत्याह॥ नैतदेवमित्यादिना॥ न च स्वतन्त्रपदार्थभेदाद्वाक्यभेदः किं न स्यादिति वाच्यं, जीवमुख्यप्राणयोरुक्तलिङ्गानां ब्रह्मणि नेतुं शक्यतया स्वातन्त्र्यासिद्धेः, अप्रकृतपदार्थस्य प्रकृतवदाकाङ्क्षार्थशेषत्वेन प्रधानवाक्यार्थानुसारेण तल्लिङ्गनयनस्योचितत्वाच्च। न हि प्रधानवा-

चैतदेकस्मिन् वाक्येऽभ्युपगन्तुं युक्तं, उपक्रमोपसंहाराभ्यां हि वाक्यैकवाक्यत्वमवगम्यते। "मामेव विजानीहि" इत्युपक्रम्य "प्राणोऽस्मि प्रज्ञात्मा तं मामायुरमृतमित्युपास्व" इत्युक्ताऽन्ते "स एष प्राण एव प्रज्ञात्माऽऽनन्दोऽजरोऽमृतः" इत्येकरूपावुपक्रमोपसंहारौ दृश्येते। तचार्थैकत्वं युक्तमाश्रयितुं। न च ब्रह्मलिङ्गमन्यपरत्वे परिणेतुं शक्यं दृशानां भूतमात्राणां प्रज्ञामात्राणाञ्च ब्रह्मणोऽन्यत्वार्पणानुपपत्तेः। आश्रितत्वाच्चान्यत्रापि ब्रह्मलिङ्गवशात् प्राणशब्दस्य ब्रह्मणि वृत्तेः। इहापि च हिततमोपन्यासादि ब्रह्मलिङ्गयोगाद् ब्रह्मोपदेश एवायमिति गम्यते। यत् तु मुख्यप्राणलिङ्गं दर्शितं "इदं शरीरं परिगृह्योत्थापयति" इति तदसत्, प्राणव्यापारस्यापि परमात्मायत्तत्वात् परमात्मन्युपचरितुं शक्यत्वात्, "न प्राणेन नापानेन मर्त्यो जीवति कश्चन, इतरेण तु जीवन्ति यस्मिन्नेतावुपाश्रितौ" इति श्रुतेः। यदपि "न वाचं विजिज्ञासीत वक्तारं विद्यात्" इत्यादि जीवलिङ्गं दर्शितं, तदपि न ब्रह्मपक्षं निवारयति, न हि जीवो नामात्यन्तभिन्नो ब्रह्मणः "तत्त्वमसि" "अहं ब्रह्मास्मि" इत्यादि श्रुतिभ्यः। बुद्ध्याद्युपाधिकृतन्तु विशेषमाश्रित्य ब्रह्मैव सन् जीवः

क्यार्थब्रह्मलिङ्गमन्यथा नेतुं शक्यं। न वा तदुचितमित्याह ॥ न च ब्रह्मलिङ्गमिति ॥ सूत्रशेषं व्याचष्टे ॥ आश्रितत्वाच्चेति ॥ अन्यत्रातएव प्राण इत्यादौ वृत्तेराश्रितत्वादिहापि तस्य ब्रह्मलिङ्गस्य योगाद् ब्रह्मपर एव प्राणशब्द इत्यर्थः। प्राणादिलिङ्गानि सर्व्वात्मके ब्रह्मण्यनायासेन नेतुं शक्यानीत्याह ॥ यत्त्वित्यादिना ॥ यस्मिन्नेतौ प्रेर्य्यत्वेन स्थितौ तेनेतरेण ब्रह्मणा सर्व्वे प्राणादिव्यापारं कुर्व्वन्तीत्यर्थः। विशेषं परिच्छेदाभिमानमित्यर्थः। वक्तारं विद्यादिति न वक्तुर्ज्ञेयत्वमुच्यते तस्य

कर्त्ता भोक्ता चेत्युच्यते तस्योपाधिकृतविशेषपरित्यागेन ब्रह्मस्वरूपं प्रदर्शयितुं "न वाचं विजिज्ञासीत वक्तारं विद्यात्" इत्यादिना प्रत्यगात्माभिमुखीकरणार्थमुपदेशो न विरुद्ध्यते। "यद्वाचाऽनभ्युदितं येन वागभ्युद्यते तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते" इत्यादि च श्रुत्यन्तरं वचनादिक्रियाव्यापृतस्यैवात्मनो ब्रह्मत्वं दर्शयति। यत्पुनरेतदुक्तं "सह ह्येतावस्मिन् शरीरे वसतः सहोत्क्रामतः" इति प्राणप्रज्ञात्मनोर्भेददर्शनं ब्रह्मवादिनो नोपपद्यत इति। नैष दोषः। ज्ञानक्रियाशक्तिद्वयाश्रययोर्बुद्धिप्राणयोः प्रत्यगात्मोपाधिभूतयोर्भेदनिर्देशोपपत्तेः। उपाधिद्वयोपहितस्य तु प्रत्यगात्मनः स्वरूपेणाभेद इतः प्राण एव प्रज्ञात्मेत्येकीकरणमविरुद्धं। अथवा नोपासात्रैविध्यादाश्रितत्वादिह तद्योगादित्यस्यायमन्योऽर्थः। न ब्रह्मवाक्येऽपि जीवमुख्यप्राणलिङ्गं विरुद्ध्यते। कथं। उपासात्रैविध्यात्। त्रिविधमिह ब्रह्मोपासनं विवक्षितं प्राणधर्म्मेण प्रज्ञाधर्म्मेण स्वधर्म्मेण च। तत्र "आयुरमृतमित्युपास्वायुः प्राणः" इति "इदं शरीरं परिगृह्योत्थापयति" "तस्मादेतदेवोक्थमुपासीत"

लोकसिद्धत्वात्, किन्तु तस्य ब्रह्मत्वं बोध्यते तद्बोधाभिमुख्याय खिङादय इत्यत्र श्रुत्यन्तरमाह॥ यद्वाचेति॥ येन चैतन्येन वागभ्युद्यते स कार्य्याभिमुख्येन प्रेर्य्यते तदेव वागादेरगम्यं ब्रह्मेत्यर्थः। तत्त्वम्पदवाच्ययोः स्वरूपतो भेदस्ताभ्यामुपलक्ष्यात्मस्वरूपाभेदादेकत्वं निर्दिश्यत इत्याह॥ नैष दोष इति॥ स्वमतेन सूत्रं व्याख्याय वृत्तिकृन्मतेन व्याचष्टे॥ अथवेति॥ उपासनात्रित्वप्रसङ्गादिति पूर्व्वमुक्तं। अत्र त्रिप्रकारकस्यैकब्रह्मविशेष्यकस्यैकस्योपासनस्य विवक्षितत्वादित्यर्थः। अतो न वाक्यभेद इति भावः। देहे चेष्टात्मकजीवनहेतुत्वं प्राणस्यायुष्ट्वं देहापेक्षया तस्यानुत्क्रमत्वज्ञाना-

इति च प्राणधर्म्माः। अथ "यथाग्नेः प्रज्ञायै सर्व्वाणि भूतानि एकीभवन्ति तत् व्याख्यास्यामः" इत्युपक्रम्य "वागेवास्या एकमङ्गमदूदुहत् तस्यै नाम च परस्तात् प्रतिविहिता भूतमात्रा प्रज्ञया वाचं समारुह्य वाचा सर्व्वाणि नामान्याप्नोति" इत्यादिं प्रज्ञाधर्म्माः। "ता वा एता दशैव भूतमात्रा अधिप्रज्ञं दश प्रज्ञामात्रा अधिभूतं यदि भूतमात्रा न स्युः न प्रज्ञामात्राः स्युः*यदा प्रज्ञामात्रा न स्युः न भूतमात्राः स्युः न ह्यन्यतरतो रूपं किञ्चन सिद्ध्येत्, नो वा एतन्ना-

---

दमृतत्वमुत्थापयतीत्युक्थत्वमिति प्राणधर्म्माः। जीवधर्म्मानाह ॥ अथेति ॥ बुद्धिप्राणयोः सहस्थित्युत्क्रान्त्युत्क्रान्तिऽनन्तरमित्यर्थः। अत्र प्रज्ञापदेन साभासा जीवाख्या बुद्धिरुच्यते। तस्याः सम्बन्धीनि दृश्यानि सर्व्वाणि भूतानि यथैकं भवन्त्यधिष्ठानचिदात्मना तथा व्याख्यास्याम इत्युपक्रम्योक्तं वागेवेत्यादि चक्षुरेवास्या एकमङ्गमदूदुहदित्यादिपर्य्यायाणां संक्षिप्तार्थं उच्यते। उत्पन्नाया असत्कल्पायाः साभासबुद्धेर्नामप्रपञ्चविषयित्वमर्द्धशरीरं, अर्थात्मकरूपप्रपञ्चविषयित्वमर्द्धशरीरमिति मिलित्वा विषयित्वाख्यं पूर्णं शरीरमिन्द्रियसाध्यं। तच्च कर्म्मेन्द्रियेषु वागेवास्याः प्रज्ञाया एकमङ्गं देहार्द्धमदूदुहत् पूरयामास, वागिन्द्रियद्वारा नामप्रपञ्चविषयित्वं बुद्धिर्लभत इत्यर्थः। चतुर्थी षष्ठ्यर्था। तस्याः पुनर्नाम किल चक्षुरादिना प्रतिविहिता ज्ञापिता भूतमात्रा रूपाद्यर्थरूपापरनामादपरार्द्धे कारणं भवति ज्ञानकरणद्वारार्थप्रपञ्चविषयित्वं बुद्धिः प्राप्नोतीत्यर्थः। एवं बुद्धेः सर्व्वार्थद्रष्टृत्वमुपपाद्य तन्निष्ठचित्प्रतिविम्बद्वारा साक्षिणि द्रष्टृत्वाध्यासमाह ॥ प्रज्ञयेति ॥ बुद्धिद्वारा चिदात्मा वाचमिन्द्रियं समारुह्य तस्याः प्रेरको भूत्वा वाचा करणेन सर्व्वाणि नामानि वक्तव्यत्वेनाप्नोति, चक्षुषा सर्व्वाणि रूपाणि पश्यतीत्येवं द्रष्टा भवतीत्यर्थः। तथाच सर्व्वद्रष्टृत्वं चिदात्मनि द्रष्टृत्वाध्यासनिमित्तञ्च बुद्धेर्धर्म्म इत्युक्तं भवति सर्व्वाधारत्वानन्दत्वादिब्रह्मधर्म्म इत्याह ॥ ता वा इति ॥ दशत्वं व्याख्यातं, प्रज्ञा इन्द्रियजाः ता

---

* यदि इति मु०।

था तद्यथा रथस्यारेषु नेमिरर्पिता नाभावरा अर्पिता एवमेवैता भूतमात्रा प्रज्ञामात्रास्वर्पिताः प्रज्ञामात्राः प्राणेऽर्पिताः स एष प्राण एव प्रज्ञात्मा" इत्यादि ब्रह्मधर्माः। तस्मात् ब्रह्मण एवैतदुपाधिद्वयधर्मेण स्वधर्मेण चैकमुपासनं त्रिविधं विवक्षितं। अन्यत्रापि मनोमयः प्राणशरीर इत्यादावुपाधिधर्मेण ब्रह्मण उपासनमाश्रितं, इहापि तद्युज्यते वाक्यशेषोपक्रमोपसंहाराभ्यामेकार्थत्वावगमात् प्राणप्रज्ञाब्रह्मलिङ्गावगमाच्च। तस्माद्ब्रह्मवाक्यमेत-

---

धिकृत्य ग्राह्यभूतमात्रा वर्त्तन्ते प्रज्ञामात्रा इन्द्रियाणि ग्राह्यं भूतजातमधिकृत्य वर्त्तन्त इति ग्राह्यग्राहकयोर्मिथःसापेक्षत्वमुक्तं साधयति॥ यदिति॥ तदेव स्फुटयति॥ न हीति॥ ग्राह्येण ग्राह्यस्वरूपं न सिद्धति किन्तु ग्राहकेण। एवं ग्राहकमपि ग्राह्यमनपेक्ष्य न सिद्धति, तस्मात् सापेक्षत्वादेतद् ग्राह्यग्राहकद्वयं वस्तुतो न भिन्नं किन्तु चिदात्मन्यारोपितमित्याह॥ नो इति॥ तद्यथेत्यादि श्रुतव्याख्यानं। सूत्रार्थमुपसंहरति॥ तस्मादिति॥ अन्यधर्मेणान्यस्योपासनं कथमित्याशङ्क्याऽऽश्रितत्वादित्याह॥ अन्यत्रापीति॥ उपाधिर्जीवः। अन्यधर्मेणोपासनमियमसङ्गता वाच्या, तथाहि न तावदारण्याद्यनेकगुणविशिष्टप्राप्तिक्रियावत्, उपासात्रयविशिष्टस्य ब्रह्मणो विधिः सम्भवति सिद्धस्य विधानर्हत्वात्, नापि ब्रह्मानुवादेनोपासात्रयविधिः वाक्यभेदात्, न च नानाधर्मविशिष्टमेकमुपासनं विधीयत इति वाच्यं, तादृग्विधिवाक्यस्याश्रवणात्, न च त मायुरमृतमित्युपाख्येति, अत्र मामिति जीवेनायुरिति प्राणेनामृतमिति ब्रह्मणा स्वधर्मवता विशिष्टोपासनाविधिरिति वाच्यं, सर्व्वेषां धर्म्माणामश्रवणाद् ब्रह्मश्रुतेश्च। प्राणो वा अमृतमिति प्राणस्यैवामृतत्वश्रुतेः। अत्र उपासनाविधिलुब्धे न वक्तारं विद्यात्, एतदेवोक्थमुपासीत स म आत्मेति विद्यादिति जीवप्राणब्रह्मोपासनविधयः, अन्ये गुणविधय इति स्वीकृत्यैकवाक्यत्वं वाच्यं तच्चायुक्तमुपक्रमादिनैकवाक्यतानिर्णयात्। तस्माद् ज्ञेयं प्रत्यक्-ब्रह्मपरमिदं वाक्यमित्युपसंहरति॥ तस्मादिति॥ इति श्रीमत्परम-

दिति सिद्धं ॥ इति श्रीमच्छारीरकमीमांसाभाष्ये श्रङ्करभगवत्-पूज्यपादकृतौ प्रथमाध्यायस्य प्रथमः पादः ॥

नमः परमात्मने। प्रथमे पादे जन्माद्यस्य यत इत्याकाशादेः समस्तस्य जगतो जन्मादिकारणं ब्रह्मेत्युक्तं। तस्य समस्तजगत्कारणस्य ब्रह्मणो व्यापित्वं नित्यत्वं सर्व्वज्ञत्वं सर्व्वात्मकत्वमित्येवंजातीयको धर्म्म उक्त एव भवति। अर्थान्तरप्रसिद्धानां केषाञ्चिच्छब्दानां ब्रह्मविषयत्वे हेतुप्रतिपादनेन कानिचिदाकाशादीनि सन्दिह्यमानानि ब्रह्मपरतया निर्णीतानि। पुनरन्यान्यानि वाक्यानि असृष्टब्रह्मलिङ्गानि सन्दिह्यन्ते किं परं ब्रह्म प्रतिपादयन्ति, आहोस्विदर्थान्तरं किञ्चिदिति। तन्निर्णयाय द्वितीयतृतीयौ पादावारभ्येते।

सर्व्वत्र प्रसिद्धोपदेशात् ॥ १ ॥

इदमाम्नायते। "सर्व्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत। अथ खलु क्रतुमयः पुरुषो यथाक्रतुरस्मिन् लोके

हंसपरिव्राजकाचार्य्यश्रीगोविन्दानन्दभगवत् पादकृतौ श्रीमच्छारीरकमीमांसाव्याख्यायां भाष्यरत्नप्रभायां प्रथमाध्यायस्य प्रथमः पादः ॥

नमः परमात्मने।

श्रीरामं सिद्धमन्त्रारं गुरुं ज्ञप्तिनमन्तरं।
अन्तर्यामिनमन्तेयं वैश्वानरमहं भजे ॥

पूर्व्वपादेनोत्तरपादयोः सङ्गतिं वक्तुं वृत्तमनुवदति॥ प्रथम इति॥ जगत्कारणोक्त्या व्यापित्वादिकमर्थात् सिद्धं। तदुपजीव्योत्तरं पादद्वयं प्रवर्त्तत इति हेतुहेतुमद्भावः सङ्गतिः। कथं पादभेद इत्याशङ्क्य पादानां प्रमेयभेदमाह॥ अर्थान्तरेति॥ आकाशादिशब्दानां स्वसत्रसिद्धिर्ब्र-

पुरुषो भवति तथेतः प्रेत्य भवति स क्रतुं कुर्वीत मनोमयः प्राणशरीरः" इत्यादि। तत्र संशयः। किमिह मनोमयत्वादिभिर्धर्मैः शारीर आत्मोपास्यत्वेनोपदिश्यते, आहोस्वित् परं ब्रह्मेति। किं तावत् प्राप्तं शारीर इति। कुतः। तस्य हि कार्य्यकरणाधिपतेः प्रसिद्धो मन आदिभिः सम्बन्धो न तु परस्य ब्रह्मणः "अप्राणो ह्यमनाः शुभ्रः" इत्यादिश्रुतिभ्यः। ननु "सर्व्वं खल्विदं ब्रह्म" इति खशब्देनैव ब्रह्मोपात्तं कथमिह शारीर आत्मोपास्य इत्याशङ्क्यते। नैष दोषः। नेदं वाक्यं ब्रह्मोपासनाविधिपरं। किं तर्हि। शमविधिपरं। यत् कारणं सर्व्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीतेत्याह। एतदुक्तं भवति। यस्मात् सर्व्वमिदं विकारजातं ब्रह्मैव तज्जत्वात्तल्लत्वात्तदनत्वाच्च। न च सर्व्वस्यैकात्मत्वे रागादयः सम्भवन्ति, तस्माच्छान्त उपासीतेति। न च शमविधिपरत्वे सत्यनेन वाक्येन ब्रह्मोपासनं नियन्तुं शक्यते, उपासनन्तु सक्रतुं कुर्वीतेत्यनेन विधीयते।

ह्मणि समन्वयो दर्शितः। अस्यतु ब्रह्मलिङ्गवाक्यसमन्वयः पादद्वये वक्ष्यते। प्रायेणोपास्यज्ञेयब्रह्मभेदात् पादयोरवान्तरभेद इति भावः। छान्दोग्यमुदाहरति॥ इदमिति॥ तस्माज्जायत इति तज्जं, तस्मिन् लीयत इति तल्लं, तस्मिन्नमनीति चेष्टत इति तदनं तज्जश्च तल्लश्च तत्तदनश्चेति, तज्जलान् कर्म्मधारयेऽस्मिन् शाकपार्थिवन्न्यायेन मध्यपदस्य तच्छब्दस्य लोपः, तज्जलानमिति वाच्ये छान्दसोऽवयवलोपः, इतिशब्दो हेतौ। सर्व्वमिदं जगद्ब्रह्मैव तद्विवर्त्तत्वादित्यर्थः। ब्रह्मणि मिथ्याभिन्नभेदाभावाच्छान्तो रागादिरहितो भवेदिति गुणविधिः। स क्रतुमुपासनं कुर्वीतेति विहितोपासनस्योपासीतेत्यनुवादात् फलमाह॥ अथेति॥ क्रतुमयः सङ्कल्पविकार इत्यर्थः। पुरुषस्य ध्यानविकारत्वं स्फुटयति॥ यथे-

क्रतुः सङ्कल्पो ध्यानमित्यर्थः। तस्य च विषयत्वेन श्रूयते "मनोमयः प्राणशरीरः" इति जीवलिङ्गं। अतो ब्रूमो जीवविषयमेतदुपासनमिति। "सर्वकर्मा सर्वकामः" इत्याद्यपि श्रूयमाणं पर्य्यायेण जीवविषयमुपपद्यते। "एष म आत्माऽन्तर्हृदयेऽणीयान् व्रीहेर्वा यवाद्वा" इति च हृदयायतनत्वमणीयस्त्वं चाराग्रमात्रस्य जीवस्यावकल्पते नापरिच्छिन्नस्य ब्रह्मणः। ननु "ज्यायान् पृथिव्याः" इत्याद्यपि न परिच्छिन्नेऽवकल्पते, इति, अत्र ब्रूमः, न तावदणीयस्त्वं ज्यायस्त्वञ्चोभयमेकस्मिन् समाश्रयितुं शक्यं विरोधात्, अन्यतराश्रयणे च प्रथमश्रुतत्वादणीयस्त्वं युक्तमाश्रयितुं। ज्यायस्त्वन्तु ब्रह्मभावापेक्षया भविष्यति। निश्चिते च जीवविषयत्वे यदन्ते ब्रह्मसंकीर्त्तनमेतद् ब्रह्मेति तदपि प्रकृतपरामर्शार्थत्वाज्जीवविषयमेव। तस्मान्मनोमयत्वादिभिर्धर्मैर्जीव उपास्य इत्येवं प्राप्ते ब्रूमः, परमेव ब्रह्मेह मनोमयत्वादिभिर्धर्मैरुपास्यं। कुतः। सर्वत्र प्रसिद्धोपदेशात्। यत् सर्वेषु वेदान्तेषु प्रसिद्धं ब्रह्मशब्दस्यालम्बनं जगत्कार-

---

ति॥ इह यद्यायति मत्वा ध्यानमहिम्ना तद्ध्येयरूपेण जायत इत्यर्थः॥ क्रतुमयः सङ्कल्पप्रधान इति वाऽर्थः। क्रतोर्विषयमाह॥ मन इति॥ ब्रह्मोपक्रमान्मनोमयं प्राणशरीरं भारूपं सत्यसङ्कल्पमन्तर्हृदये ध्येयमित्यर्थः। पूर्वत्र ब्रह्मलिङ्गैरब्रह्मलिङ्गबाध उक्तः, न तथेहोपक्रमे ब्रह्मणो लिङ्गमस्ति, किन्तु प्रकरणं। तच्च शान्तिगुणविधानार्थमन्यथासिद्धं। अतो जीवलिङ्गं बलीय इति प्रत्युदाहरणेन पूर्वपक्षयति॥ शारीर इत्यादिना॥ श्रुतिमाश्रित्यान्यथासिद्धा परिहरति॥ नैष दोष इति॥ क्रमविधिपरत्वे हेतुमाह॥ यत् कारणमिति॥ यत एवमाह तस्माच्छमविधिपरमित्यन्वयः। अतेदंशब्दः प्रकृतब्रह्मपरामर्शार्थः, न तु जगत्परामर्शार्थः, जगद्विशेषे प्रयोजनाभावात्। अत्र प्रयोजनाभावेऽपि

णमिह च सर्व्वं खल्विदं ब्रह्मेति वाक्योपक्रमे श्रुतं तदेव मनोमयत्वादिधर्म्मैर्विशिष्टमुपदिश्यत इति युक्तं। एवञ्च प्रकृतहानाप्रकृतप्रक्रिये न भविष्यतः। ननु वाक्योपक्रमे शमविधिविवक्षया ब्रह्म निर्द्दिष्टं न स्वविवक्षया, इत्युक्तं। अत्रोच्यते। यद्यपि शमविधिविवक्षया ब्रह्म निर्द्दिष्टं तथापि मनोमयत्वादिषूपदिश्यमानेषु तदेव सन्निहितं भवति। जीवस्तु न सन्निहितो न च स्वशब्देनोपात्त इति वैषम्यं॥

यत्र प्रयोजनं तत्र भवत्येव जगदिशेषणं यथात्मैवेदं सर्व्वं। अत्र बाधायां सामानाधिकरण्यदार्ढ्यार्थं विशेषणमावश्यकं तदाक्यस्य ज्ञेयब्रह्मविषयत्वात्। अत्र तूपासनायां बाधानावश्यकत्वाद् विषयाभेदेन ब्रह्मण उपास्यत्वात्॥ न च शमेति॥ शमध्यानयोर्विधौ वाक्यभेदापत्तेरित्यर्थः। जन्मपरम्परया जीवस्यापि सर्व्वकर्म्मत्वादिसम्भवमाह॥ सर्व्वकर्मेति। सर्व्वाणि कर्म्माणि यस्य सर्व्वे कामा भोग्या यस्य सर्व्वगन्धः सर्व्वरस इत्यादि शब्दार्थः॥ आराग्रमात्रस्येति॥ नेत्रप्रोतशलाकाग्रपरिमाणस्येत्यर्थः॥ सर्व्वत्र प्रसिद्धब्रह्मण एवात्रोपास्यत्वोपदेशान्न जीव उपास्य इति सूत्रार्थमाह॥ सर्व्वेति॥ यत्र फलं नोच्यते तत्र पूर्व्वोत्तरपक्षसिद्धिः फलमिति मन्तव्यं। यद्यपि निराकाङ्क्षं ब्रह्म तथापि मनःप्रचुरमुपाधिरस्य प्रायः शरीरमस्येति कृत्वार्थाववोधक वाक्यान्तर्गत सर्व्वनाम्न इत्यर्थः। समासान्तर्गतसर्व्वनाम्नः सन्निहितविशेष्याकाङ्क्षत्वाद् ब्रह्म सम्बद्ध्यते। "शोभनन्ते सदनं करोमि" इति संस्कारार्थसदनस्य निराकाङ्क्षस्यापि तस्मिन् सीदेतिसाकाङ्क्षतच्छब्देन परामर्शदर्शनादित्याह॥ अत्रोच्यत इति॥ शोभनं यानं ते पुरोडाश्यस्येति श्रुत्यर्थः। जीवोऽपिसिद्धात् सन्निहित इत्यत आह॥ जीवस्येति॥ इदं लिङ्गदर्शं लोकसिद्धं जीवं न सन्निधापयति। दुःखिन उपास्ययोग्यत्वात् फलाभावाच्च, अतो विश्वजिन्न्यायेन सर्व्वाभिलषितमानन्दरूपं ब्रह्मैवोपासनाक्रियानुबन्धीति भावः, किञ्च ब्रह्मपदश्रुत्या लिङ्गबाध इत्याह॥ न चेति॥ अन्यतराकाङ्क्षानुगृहीतं फलवत् प्रकरणं विफललिङ्गाद्बलीय

विवक्षितगुणोपपत्तेश्च ॥ २ ॥

वक्तुमिष्टा विवक्षिताः। यद्यप्यपौरुषेये वेदे वक्तुरभावान्नेच्छार्थः संभवति तथाप्युपादानेन फलेनोपचर्यते। लोके हि यच्छब्दाभिहितमुपादेयं भवति तद्विवक्षितमित्युच्यते, यदनुपादेयं तदविवक्षितमिति, तद्वदेदेऽप्युपादेयत्वेनाभिहितं विवक्षितं भवतीतरदविवक्षितं। उपादानानुपादाने तु वेदवाक्ये तात्पर्य्यातात्पर्य्याभ्यामवगम्येते। तदिह ये विवक्षिता गुणा उपासनायामुपादेयत्वेनोपदिष्टाः सत्यसङ्कल्पप्रभृतयः ते परस्मिन् ब्रह्मण्युपपद्यन्ते। सत्यसङ्कल्पत्वं हि सृष्टिस्थितिसंहारेष्वप्रतिबन्धशक्तित्वात् परमात्मनोऽवकल्प्यते। परमात्मगुणत्वेन च "आत्माऽपहतपाप्मा" इत्यत्र "सत्यकामः सत्यसङ्कल्पः" इति श्रुतं "आकाशात्मा" इत्यादिनाऽऽकाशवदात्मास्येत्यर्थः। सर्व्वगतत्वादिभिर्धर्म्मैः संभवत्याकाशेन साम्यं ब्रह्मणः। "ज्यायान् पृथिव्याः" इत्यादिना चैतदेव दर्शयति। यदप्याकाश आत्माऽस्य इति व्याख्यायते तदपि संभवति सर्व्वजगत्कारणस्य सर्व्वात्मनो ब्रह्मण आकाशात्मत्वमत एव सर्व्वकर्म्मेत्यादि। एवमिहोपास्यतया विवक्षिता गुणा ब्रह्मण्युपपद्यन्ते। यत्तूक्तं "मनोमयः प्राणशरीरः"

इति समुदायार्थः। वस्तुनो विवक्षायाः फलमुपादानं स्वीकारः स च प्रकृतेषु गुणेष्वस्तीति विवक्षोपचार इत्याह॥ तथाप्युपादानेनेति॥ नन्विदं ग्राह्यमिदं त्याज्यमितिधीर्विवक्षाधीना वेदे कुतः स्यादित्यत आह॥ उपादानानुपादाने इति॥ तात्पर्य्यं नाम फलवदर्थप्रतीत्यनुकूलत्वं शब्दधर्म्मः। उपक्रमादिना तस्य ज्ञानात्तयोरवगम इत्यर्थः॥ तदिहेति॥ तत्

इति जीवलिङ्गं न तद्ब्रह्मणुपपद्यत इति, तदपि ब्रह्मणुपपद्यत इति ब्रूमः। सर्व्वात्मत्वाद्धि ब्रह्मणो जीवसम्बन्धीनि मनोमयत्वादीनि ब्रह्मसम्बन्धीनि भवन्ति। तथाच ब्रह्मविषये श्रुतिस्मृती भवतः "त्वं स्त्री त्वं पुमानसि त्वं कुमार उतवा कुमारी त्वं जीर्णो दण्डेन वञ्चसि त्वं जातो भवसि विश्वतोमुखः" इति। "सर्व्वतः पाणिपादन्तत् सर्व्वतोऽक्षि शिरोमुखं। सर्व्वतः श्रुतिमल्लोके सर्व्वमावृत्य तिष्ठति" इति च। "अप्राणो ह्यमनाः शुभ्रः" इति च श्रुतिः शुद्धब्रह्मविषया। इयन्तु मनोमयः प्राणशरीर इति सगुणब्रह्मविषयेति विशेषः। अतो विवक्षितगुणोपपत्तेः परमेव ब्रह्मेहोपास्यत्वेनोपदिष्टमिति गम्यते।

अनुपपत्तेस्तु न शारीरः ॥ ३ ॥

पूर्व्वेण सूत्रेण ब्रह्मणि विवक्षितानां गुणानामुपपत्तिरुक्ता, अनेन शारीरे तेषामनुपपत्तिरुच्यते। तुशब्दोऽवधारणार्थः। ब्रह्मैवोक्तेन न्यायेन मनोमयत्वादिगुणं, न तु शारीरो जीवो

तस्मात् तात्पर्य्यवत्त्वादित्यर्थः। सर्व्वात्मत्वे प्रमाणमाह॥ तथाचेति॥जीर्णः स्थविरो यो दण्डेन वञ्चति गच्छति सोऽपि त्वमेव यो जातो बालःस त्वमेव सर्व्वतः सर्व्वासु दिक्षु श्रुतयः श्रोत्राण्यस्येति सर्व्वतः श्रुतिमत् सर्व्वजन्तूनां प्रसिद्धाः पाण्यादयस्तस्येति सर्व्वात्मत्वोक्तिः। ननु जीवधर्म्माश्चेद्ब्रह्मणि योज्यन्ते तर्हि ब्रह्मधर्म्मा एव जीवे किमिति न योज्यन्ते। तत्राह॥ अनुपपत्तेरिति॥ सूत्रं व्याचष्टे॥ पूर्व्वेणेति॥ सर्व्वात्मत्वादिव्यक्तन्यायः। कल्पितस्य धर्म्मा अधिष्ठाने सम्बन्ध्यन्ते, न अधिष्ठानधर्म्माः कल्पित इति भावः, अधिष्ठानज्ञानकाले कल्पितधर्म्माभावात्। वागेव वाक्यः सोऽस्यास्तीति वाकी। नवाकी अवाकी अनिन्द्रिय इत्यर्थः। कुत्साद्यादरः कामोऽस्य नास्तीत्यनादरः नित्यतृप्त इत्यर्थः। ज्यायस्त्वाद्यनुपपत्तौ शारीर

मनोमयत्वादिगुणः, यत्कारणं सत्यसङ्कल्प आकाशात्माऽवाक्यानादरो ज्यायान् पृथिव्या इति चैवञ्जातीयका गुणा न शारीरे आञ्जस्येनोपपद्यन्ते। शारीर इति शरीरे भव इत्यर्थः। नन्वीश्वरोऽपि शरीरे भवति। सत्यं शरीरे भवति न तु शरीर एव भवति। ज्यायान् पृथिव्या ज्यायानन्तरिक्षादाकाशवत् सर्व्वगतस्य नित्य इति च व्यापित्वश्रवणात्। जीवस्तु शरीर एव भवति। तस्य भोगाधिष्ठानाच्छरीरादन्यत्र वृत्त्यभावात्।

कर्म्मकर्त्तव्यपदेशाच्च ॥ ४ ॥

इतश्च न शारीरो मनोमयत्वादिगुणः, यस्मात् कर्म्मकर्त्तव्यपदेशो भवति "एतमितः प्रेत्याभिसंभविताऽस्मि" इति। एतमिति प्रकृतं मनोमयत्वादिगुणमुपास्यमात्मानं कर्म्मत्वेन प्राप्यत्वेन व्यपदिशति। अभिसंभविताऽस्मीति शारीरमुपासकं कर्त्तृत्वेन प्रापकत्वेन। अभिसंभविताऽस्मीति प्राप्नोऽस्मीत्यर्थः। न च सत्यां गतावेकस्य कर्म्मकर्त्तव्यपदेशो युक्तः, तथोपास्योपासकभावोऽपि भेदाधिष्ठान एव, तस्मादपि न शारीरो मनोमयत्वादिविशिष्टः।

इति परिच्छेदो हेतुः सूत्रोक्तः। स तु जीवस्यैव नेश्वरस्येत्याह ॥ सत्यमित्यादिना ॥ प्रापकत्वेन व्यपदिश्यतीति सम्बन्धः। कर्म्मकर्त्तव्यपदेशमदस्यार्थान्तरमाह ॥ तथोपास्येति ॥ एकार्थत्वं प्रकरणस्य समानत्वं। अन्तरात्मन्निति विभक्ति व्योमश्छान्दसः शब्दयोर्विशेषो विभक्तिभेदः। तस्मात्तदर्थयोर्भेद इति सूत्रार्थः। स्मृतौ हृदिस्थस्य जीवाद्भेदोक्तेरत्रापि हृदिस्थो मनोमय ईश्वर इत्याह ॥ स्मृतेश्चेति। भूतानि जीवान् यन्त्रं शरीरं। अत्र सूत्रकृता सत्यभेद उक्त इति भ्रान्तिनिरासायेत्येवाधिक-

शब्दविशेषात् ॥ ५ ॥

इतश्च शारीरादन्यो मनोमयत्वादिगुणः, यस्माच्छब्दविशेषो भवति, समानप्रकरणे श्रुत्यन्तरे "यथा व्रीहिर्वा यवो वा श्यामाको वा श्यामाकतण्डुलो वैवमयमन्तरात्मन् पुरुषो हिरण्मयः" इति शारीरस्यात्मनोऽन्यः शब्दोऽभिधायकः सम्प्रत्यन्तोऽन्तरात्मन्निति। तस्मादिशिष्टोऽन्यः प्रथमान्तः पुरुषशब्दो मनोमयत्वादिविशिष्टस्यात्मनोऽभिधायकः, तस्मात्तयोर्भेदोऽधिगम्यते ॥

स्मृतेश्च ॥ ६ ॥

स्मृतिश्च शारीरपरमात्मनोर्भेदं दर्शयति "ईश्वरः सर्व्वभूतानां हृद्देशे ऽर्जुन तिष्ठति। भ्रामयन् सर्व्वभूतानि यन्त्रारूढानि मायया" इत्याद्या। अत्राह। कः पुनरयं शारीरो नाम परमात्मनोऽन्यो यः प्रतिषिद्ध्यते, अनुपपत्तेस्तु न शारीर इत्यादिना। श्रुतिस्तु "नान्योऽतोऽस्ति द्रष्टा नान्योऽतोऽस्ति श्रोता" इत्येवञ्जातीयका परमात्मनोऽन्यमात्मनं वारयति। तथा स्मृतिरपि "क्षेत्रज्ञञ्चापि मां विद्धि सर्व्वक्षेत्रेषु भारत" इत्येवञ्जातीयकेति। अत्रोच्यते। सत्यमेवैतत् पर एवात्मा देहेन्द्रियमनोबुद्ध्युपाधिभिः परिच्छिद्यमानो बालैः शारीर इत्युपचर्य्यते। यथा घटकरकाद्युपाधिवशादपरिच्छिन्नमपि नभः परिच्छिन्नवदवभासते तद्वत्। तदपेक्षया च कर्त्तृत्वकर्त्तृत्वादिभेदव्यवहारो न विरुद्ध्यते प्राक्

रश्चे निरस्तमपि चोद्यमुद्भाव्य निरस्यति॥ अत्राहेत्यादिना॥ तदुक्तरीत्या वस्तुत एकत्वमेव भेदस्तु कल्पितः, सूत्रेष्वनूद्यत इत्याह॥ सत्यमिति॥ अर्भ-

'तत्त्वमसि' इत्यात्मैकत्वोपदेशग्रहणात्। गृहीते त्वात्मैकत्वे बन्ध-मोक्षादिसर्व्वव्यवहारपरिसमाप्तिरेव स्यात्॥

अर्भकौकस्त्वात्तद्व्यपदेशाच्च नेति चेन्न निचाय्यत्वादेव व्योमवच्च॥ ७॥

अर्भकमल्पमोको नीडं एष मे आत्मान्तर्हृदयमिति परि-च्छिन्नायतनत्वात्। स्वशब्देन चाणीयान् व्रीहेर्वा यवादेत्य-णीयस्त्वव्यपदेशात्, शारीर एवाराग्रमात्रो जीव इहोपदिश्यते न सर्व्वगतः परमात्मेति यदुक्तं तत्परिहर्त्तव्यं, अत्रोच्यते। नायं दोषः। न तावत् परिच्छिन्नदेशस्य सर्व्वगतत्वव्यपदेशः कथमप्युपपद्यते, सर्व्वगतस्य तु सर्व्वदेशेषु विद्यमानत्वात् परि-च्छिन्नदेशव्यपदेशोऽपि कयाचिदपेक्षया संभवति, यथा समस्त-सुधाधिपतिरपि हि सन्नयोध्याधिपतिरिति व्यपदिश्यते। कया पुनरपेक्षया सर्व्वगतः सन्नीश्वरोऽर्भकौकाअणीयांश्च व्यपदि-श्यत इति। निचाय्यत्वादेवमिति ब्रूमः। स एवमणीयस्त्वादि-गुणगणोपेत ईश्वरस्तत्र हृदयपुण्डरीके निचाय्यो द्रष्टव्य उप-दिश्यते, यथा शालग्रामे हरिस्तत्रास्य बुद्धिविज्ञानं ग्राहकं।

कमोको यस्य सोऽर्भकौकाः तस्य भावस्तत्त्वं तस्मादार्थिकमल्पत्वं अणीया-नित्यल्पत्वं वाचकशब्देनापि श्रुतमित्याह॥स्वशब्देनेति॥नायं दोष इत्युक्तं विवृणोति॥न तावदिति॥कथमपि ब्रह्मभावापेक्षयाऽपीत्यर्थः। परिच्छेद-त्यागं विना ब्रह्मत्वासम्भवात् तत्त्यागे च ब्रह्मण एवोपास्यत्वमायातीति भावः। विभोःपरिच्छेदोक्तौ दृष्टान्तमाह॥ यथा समस्तेति॥ सर्वेश्वर-स्यायोध्यायां स्वित्यपेक्षापरिच्छेदोक्तिवदल्पहृदि ध्येयत्वेन तथोक्तिरि-त्यर्थः। ननु किमिति हृदयमेव प्रायेणोच्यते तत्राह॥ तत्रेति॥ हृदये परमात्मनो बुद्धिवृत्तिर्ग्राहिका भवति। अत ईश्वराभिव्यक्तिस्थानत्वा-

सर्व्वगतोऽपीश्वरस्तत्रोपास्यमानः प्रसीदति। व्योमवच्चैतद् द्रष्टव्यं। यथा सर्व्वगतमपि सद् व्योम सूचीपाशाद्युपेक्षयाऽभ्रकौकोऽणीयश्च व्यपदिश्यते, एवं ब्रह्मापि। तदेवं निचाय्यत्वापेक्षं ब्रह्मणोऽभ्रकौकस्त्वमणीयस्त्वञ्च न पारमार्थिकं। तच्च यदाश्रङ्खते हृदयायतनत्वाद् ब्रह्मणो हृदयायतनानाञ्च प्रतिशरीरं भिन्नत्वाद् भिन्नायतनानाञ्च शुकादीनामनेकत्वसावयवत्वाऽनित्यत्वादिदोषदर्शनाद् ब्रह्मणोऽपि तद्वत् प्रसङ्ग इति तदपि परिहृतं भवति।

सम्भोगप्राप्तिरिति चेन्न वैशेष्यात्॥ ८॥

व्योमवत् सर्व्वगतस्य ब्रह्मणः सर्व्वप्राणिहृदयसम्बन्धाच्छिद्रूपतया च शारीरेणाविशिष्टत्वात् सुखदुःखादिसंभोगोऽप्यविशिष्टः प्रसज्येत। एकत्वाच्च। न हि परस्मादात्मनोऽन्यः कश्चिदात्मा संसारी विद्यते "नान्योऽतोऽस्ति विज्ञाता" इत्यादिश्रुतिभ्यः। तस्मात् परस्यैव संसारसम्भोगप्राप्तिरिति चेत्। न। वैशेष्यात्। न तावत् सर्व्वप्राणिहृदयसम्बन्धाच्छारीरवद् ब्रह्मणः सम्भोगप्रसङ्गो

त्तदुक्तिरित्यर्थः। व्योमदृष्टान्तासिना शङ्कालताऽपि काचित् छिन्नेत्याह॥ तच्च यदाश्रङ्खत इत्यादिना॥ भिन्नायतनत्वेऽपि व्योम्नः सत्यभेदाद्यभावादिति भावः। ब्रह्मणो हार्दत्वे ऽनिष्टसंभोगापत्तेर्जीव एव हार्द उपास्य इति शङ्कां व्याचष्टे॥ व्योमवदिति॥ ब्रह्म भोक्तृ स्यात् हार्दत्वे सति चेतनत्वाज्जीवाभिन्नत्वाच्च जीववदित्युक्तं निरस्यति॥ न वैशेष्यादिति॥ धर्म्माधर्म्मवत्त्वमुपाधिरित्यर्थः। अयमेव विशेषो वैशेष्यं स्वार्थे यत् प्रत्ययः विशेषस्यातिशयार्थो वा धर्म्मादेः स्वाश्रये फलहेतुत्वमतिशयः, तस्मादिति सूत्रार्थः। किञ्च विभवो बहव आत्मान इतिवादिनामेकस्मिन् देहे सर्व्वात्मनां भोक्तृत्वप्रसङ्गः स्वकर्म्मार्जित एव देहे

वैशेष्यात्। विशेषो हि भवति शारीरपरमेश्वरयोरेकः कर्त्ता भोक्ता धर्माधर्मसाधनः सुखदुःखादिमांश्च, एकस्तद्विपरीतोऽपहतपाप्मत्वादिगुणः। एतस्मादनयोर्विशेषादेकस्य भोगो नेतरस्य। यदि च सन्निधानमात्रेण वस्तुशक्तिमनाश्रित्य कार्यसम्बन्धोऽभ्युपगम्येत आकाशादीनामपि दाहादिप्रसङ्गः। सर्वगतानेकात्मवादिनामपि समावेतौ चोद्यपरिहारौ। यदप्येकत्वात् ब्रह्मण आत्मान्तराभावात् शारीरस्य भोगेन ब्रह्मणो भोगप्रसङ्ग इति अत्र वदामः इदं तावद्देवानां प्रियः प्रष्टव्यः कथमयं त्वया आत्मान्तराभावोऽध्यवसित इति। तत्त्वमस्यहं ब्रह्मास्मि नान्योऽतोऽस्ति विज्ञातेत्यादि शास्त्रेभ्य इति चेत्, यथाशास्त्रं तर्हि शास्त्रीयोऽर्थः प्रतिपत्तव्यो न तच्चार्द्धजरतीयं लभ्यं। शास्त्रञ्च तत्त्वमसीत्यपहतपाप्मत्वादिविशेषणं ब्रह्मशारीरस्यात्मत्वेनोपदिशत् शारीरस्यैव तावदुपभोक्तृत्वं वारयति। कुतः। तदुपभोगेन ब्रह्मण उपभोगप्रसङ्गः। अथागृहीतं शारीरस्य ब्रह्मणैकत्वं तदा मिथ्याज्ञाननिमित्तः शारीरस्योपभोगो न तेन परमार्थरूपस्य ब्रह्मणः संस्पर्शः। न हि बालैस्तलमलिनतादिभिर्व्योम्नि विकल्प्यमाने तलमलिनतादिविशिष्टमेव पर-

---

भोग इति परिहारश्च तुल्य इति न वयं पर्य्यनुयोज्या इत्याह॥ सर्वगतेति॥ वस्तुतस्तेषामेव भोगसाङ्कर्य्यमित्यये वक्ष्यते। ब्रह्मणो जीवाभिन्नत्वं श्रुत्वा निश्चित्य तेन भोक्तृत्वानुमाने उपजीव्यश्रुतिबाधमाह॥ यथाशास्त्रमिति॥ अर्द्धं सुखमात्रं जरत्या वृद्धायाः कामयते नाश्नातीति सोऽयमर्द्धजरतीयन्यायः स चात्र न युक्तः। न ह्यभेदमङ्गीकृत्याभोक्तृत्वं वक्तुं युक्तं श्रुत्यैवाभेदसिद्ध्यर्थं भोक्तृत्ववारणादित्याह॥ शास्त्रेति॥ नन्वेकत्वं मया श्रुत्वा न गृहीतं येनोपजीव्यबाधः

मार्थतो क्षोभ भवति। तदाह "न वैशेष्यात्" इति। नैकस्मिंऽपि शारीरस्योपभोगेन ब्रह्मण उपभोगप्रसङ्गो वैशेष्यात्। विशेषो हि भवति मिथ्याज्ञानसम्यग्ज्ञानयोः। मिथ्याज्ञानकल्पित उपभोगः, सम्यग्ज्ञानदृष्टमेकत्वं। न च मिथ्याज्ञानकल्पितेनोपभोगेन सम्यग्ज्ञानदृष्टं वस्तु संस्पृश्यते तस्मान्नोपभोगगन्धोऽपि ब्रह्मेश्वरस्य कल्पयितुं।

अत्ता चराचरग्रहणात्॥९॥

कठवल्लीषु पठ्यते "यस्य ब्रह्म च क्षत्रञ्चोभे भवत ओदनः मृत्युर्यस्योपसेचनं क इत्था वेद यत्र सः" इति। अत्र कश्चिदोदनोपसेचनसूचितोऽत्ता प्रतीयते। तत्र किमग्निरत्ता स्यादुत जीवोऽथवा परमात्मेति संशयः, विशेषानवधारणात्, क्वचाणाग्न्यग्निजीवपरमात्मनामस्मिन् ग्रन्थे प्रश्नोपन्यासोपलब्धेः।

स्यात्। किन्तु तदुक्त्या गृहीतमित्याग्रङ्ख विम्बप्रतिविम्बयोः कल्पितभेदेन भोक्तृत्वाभोक्तृत्वव्यवस्थोपपत्तेरप्रयोजको हेतुरित्याह॥ अथ गृहीतमित्यादिना॥ कल्पितासङ्गित्वमधिष्ठानस्य वैशेष्यमित्यस्मिन्नर्थेऽपि सूत्रं पातयति॥ तदाहेति॥ ब्रह्मणो हार्दत्वे बाधकाभावाच्छाण्डिल्यविद्यावाक्यं ब्रह्मोपास्ये समन्वितमिति सिद्धं। अत्ता चराचरग्रहणात्। यस्य ब्रह्मक्षत्रादिजगदोदनो मृत्युः सर्व्वप्राणिसंहारकोऽपि यस्योपसेचनमोदनसंस्कारकृतप्रायः सोऽत्ता यत्र शुद्धे चिन्मात्रेऽभेदकल्पनया वर्त्तते तच्छुद्धं ब्रह्म इत्था इत्थं ईश्वरस्याप्यधिष्ठानभूतं को वेद, चिन्मुद्राद्युपायं विना कोऽपि न जानातीत्यर्थः॥ संशयबीजमाह॥ विशेषेति॥ स त्वमग्निं प्रब्रूहीत्यग्नेः, येयं प्रेते विचिकित्सेति जीवस्य, अन्यत्र धर्म्मादिति ब्रह्मणः प्रश्नः। लोकादिमग्निं तमुवाचेत्यग्नेः, हन्त त इदं प्रवक्ष्यामीतीतरयोः प्रतिवचनमुपलभ्यत इत्यर्थः। पूर्व्वत्र ब्रह्मणो

किन्नावत् प्राप्तं,अग्निरत्तेति। कुतः।"अग्निरन्नादः"इति श्रुतिप्रसिद्धिभ्यां। जीवो वाऽत्ता स्यात् "तयोरन्यः पिप्पलं स्वाद्वत्ति" इति दर्शनात्। न परमात्मा "अनश्नन्नन्योऽभिचाकशीति" इति दर्शनादित्येवं प्राप्ते ब्रूमः,अत्ताच परमात्मा भवितुमर्हति। कुतः। चराचरग्रहणात्। चराचरं हि स्थावरजङ्गमं मृत्युपसेचनमिह्यत्वेन प्रतीयते। तादृशस्य चाद्यस्य न परमात्मनोऽन्यः कार्त्स्न्येनात्ता सम्भवति, परमात्मा तु विकारजातं संहरन् सर्व्वमत्तीत्युपपद्यते। नन्विह चराचरग्रहणं नोपलभ्यते, तत् कथं सिद्धवच्चराचरग्रहणं हेतुत्वेनोपादीयते। नैष दोषः। मृत्युपसेचनत्वेन सर्व्वस्य प्राणिनिकायस्य प्रतीयमानत्वाद् ब्रह्मक्षत्रयोश्च प्राधान्यात् प्रदर्शनार्थत्वोपपत्तेः। यत्तु परमात्मनोऽपि नात्तृत्वं सम्भवति "अनश्नन्नन्योऽभिचाकशीति" इतिदर्शनादिति, अत्रोच्यते, कर्म्मफलभोगस्य प्रतिषेधकमेतद्दर्शनं तस्य सन्निहितत्वान् न विकारसंहारस्य प्रतिषेधकं, सर्व्ववेदान्तेषु सृष्टिस्थितिसंहारकारणत्वेन ब्रह्मणः प्रसिद्धत्वात्, तस्मात् परमात्मैवेहात्ता भवितुमर्हति।

भोक्तृत्वं नास्तीत्युक्तं तदुपजीव्य पूर्व्वपक्षयति॥ किं तावदिति॥ अग्निप्रकरणमतीतमित्यत्रचेराह॥ जीवो वेतिः॥ पूर्व्वपक्षे जीवोपास्तिः सिद्धान्ते निर्व्विशेषब्रह्मज्ञानमिति फलभेदः। ओदनशब्दो भोग्यवाचीति पूर्व्वपक्षः, सिद्धान्तस्तु ब्रह्मक्षत्रशब्दैरुपस्थापितकार्य्यमात्रे गौण ओदनशब्दः। गुणत्वाच्च मृत्युपसेचनपदेन सन्निधापितं प्रसिद्धौदनगतं विनाशत्वं गृह्यते गौणशब्दस्य सन्निहितगुणग्राहित्वात्। तथाच सर्व्वस्य विनाशत्वेन भानाच्छिवादीश्वरोऽत्तेत्याह॥ नैष दोष इति॥ तस्य सन्नि-

प्रकरणाच्च ॥ १० ॥

इतश्च परमात्मैवेहात्मा भवितुमर्हति यत्कारणं प्रकरणमिदं परमात्मनः "न जायते म्रियते वा विपश्चित्" इत्यादि। प्रकृतग्रहणञ्च न्याय्यं 'क इत्था वेद यत्र सः' इति च दुर्विज्ञानत्वं परमात्मलिङ्गं।

गुहां प्रविष्टावात्मानौ हि तद्दर्शनात् ॥ ११ ॥

कठवल्लीष्वेव पठ्यते

"ऋतं पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्द्धे।
छायातपौ ब्रह्मविदो वदन्ति पञ्चाग्नयो ये च त्रिनाचिकेताः"॥

इति। तत्र संशयः। किमिह बुद्धिजीवौ निर्दिष्टौ, उत जीवपरमात्मानाविति। यदि बुद्धिजीवौ ततो बुद्धिप्रधानात् कार्य्यकरणसंघाताद् विलक्षणो जीवः प्रतिपादितो भवति, तदपीह प्रतिपादयितव्यं। "येयं प्रेते विचिकित्सा मनुष्येऽस्तीत्येके नायमस्तीति चैके एतद्विद्यामनुशिष्टस्त्वयाहं वराणामेष

हितत्वादिति पिप्पलं स्वादत्तीति भोगस्य पूर्वोक्तत्वादित्यर्थः। अत्तृवाक्यानन्तरवाक्यस्यापि ज्ञेयात्मनि समन्वयमाह ॥ गुहामिति ॥ ऋतमवश्यम्भावि कर्म्मफलं पिबन्तौ भुञ्जानौ सुकृतस्य कर्म्मणो लोके कार्य्ये देहे परस्य ब्रह्मणोऽर्द्धं स्थानमर्हतीति परार्द्धं हृदयं परमं श्रेष्ठं तस्मिन् या गुहा नभोरूपा बुद्धिरूपा वा तां प्रविश्य स्थितौ छायातपवत् मिथोविरुद्धौ तौ च ब्रह्मविदः कर्म्मिणश्च वदन्ति। त्रिनाचिकेतोऽग्निश्चितो यैस्ते त्रिनाचिकेताः तेऽपि वदन्तीत्यर्थः। नाचिकेतवाक्यानामत्राध्ययनं तदर्थज्ञानं तदनुष्ठानञ्चेति त्रित्वं बोध्यं बुद्ध्यवच्छिन्नजीवस्य परमात्मनश्च प्रकृतत्वात् संशयमाह ॥ तत्रेति ॥ पूर्व्वोत्तरपक्षयोः फलं स्वयमेवाह ॥ यदीत्यादिना ॥ तदपि जीवस्य बुद्धिवैलक्षण्यमपीत्यर्थः। मनुष्ये प्रेते मृते सति येयं विचिकित्सा संशयः परलोकभोक्ताऽस्तीत्येके नास्तीत्यन्ये, अत-

वरस्तृतीयः" इति पृष्टत्वात्। अथ जीवपरमात्मानौ, ततो जीवादिलक्षणः परमात्मा प्रतिपादितो भवति, तदपीह प्रतिपादयितव्यं। "अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात् कृताकृतान्यत्रभूताच्च भव्याच्च यत्तत् पश्यसि तद्वद" इति पृष्टत्वात्। अत्राह आचेत्ना उभावप्येतौ पक्षौ न संभवतः। कस्मात्। ऋतपानं कर्मफलोपभोगः सुकृतस्य लोक इति लिङ्गात्। तच्च चेतनस्य चेत्यस्य सम्भवति नाचेतनाया बुद्धेः। पिबन्ताविति च द्विवचनेन द्वयोः पानं दर्शयति श्रुतिः। अतो बुद्धिचेत्यपक्षावत् न सम्भवति। अत एव चेत्यपरमात्मपक्षोऽपि न सम्भवति चेतनेऽपि परमात्मनि ऋतपानासम्भवात् "अनश्नन्नन्योऽभिचाकशीति" इति मन्त्रवर्णादिति। अत्रोच्यते। नैष दोषः। कृचिणो गच्छन्तीत्येकेनापि कृचिणा बहूनां कृचिलोपचारदर्शनात्, एवमेकेनापि पिबता द्वौ पिबन्तावुच्येयातां। यद्वा जीवश्चावत् पिबति, ईश्वरस्तु पाययति पाययन्नपि पिबतीत्युच्यते। पाचयितर्यपि पक्तृत्वप्रसिद्धिदर्शनात्। बुद्धिचेत्यपरियहोऽपि

स्वयोपदिष्टोऽहमेतदात्मतत्वं जानीयामित्यर्थः। तदपीति परमात्मस्वरूपमपीत्यर्थः। उभयोर्भोक्तृत्वायोगेन संशयमाक्षिपति॥ अत्राहेति॥ कृचिपदेन गन्तार इव पिबत्यदेनाजहल्लक्षणया प्रविष्टावुच्येते इत्याह॥ अत्रोच्यत इति॥ पानकर्तृवाचिपदेन पानानुकूलौ वा लक्षावित्याह॥ यदेति॥ नियतपूर्वभाविकृतिमत्त्वरूपमनुकूलत्वं कर्तृकारयितोः साधारण्यं यः कारयति स करोत्येवेति न्यायादिति भावः। अत्र प्रकृतिर्मुख्यार्था प्रत्यये लक्षणामिप्राऽस्तु कृतिः प्रत्ययार्थो मुख्यः। प्रकृत्या लक्षहल्लक्षणयापायनं लक्ष्यमित्याऽऽहः। पूर्वपक्षे पिबन्ताविति कर्तृवाचिशतृप्रत्ययेन बुद्धिजीवसाधारण्यं कारकत्वं लक्ष्य-

सम्भवति करणे कर्तृत्वोपचारात्, एधांसि पचन्तीति प्रयोगदर्शनात्। न चाध्यात्माधिकारेऽन्यो कोचिद् द्वातृतं पिबन्तौ सम्भवतः, तस्माद्बुद्धिजीवौ स्यातां जीवपरमात्मानौ वेति संशयः। किं तावत्प्राप्तं बुद्धिक्षेत्रज्ञाविति। कुतः। गुहां प्रविष्टाविति विशेषणात्। यदि शरीरं गुहा यदि वा हृदयमुभयथापि बुद्धिक्षेत्रज्ञौ गुहां प्रविष्टावुपपद्येते। न च सति सम्भवे सर्व्वगतस्य ब्रह्मणो विशिष्टदेशत्वं युक्तं कल्पयितुं। 'सुकृतस्य लोके' इति च कर्म्मगोचरानतिक्रमं दर्शयति। परमात्मा तु न सुकृतस्य दुष्कृतस्य वा गोचरे वर्त्तते। "न कर्म्मणा वर्द्धते नो कनीयान्" इति श्रुतेः। छायातपाविति च चेतनाचेतनयोर्निर्देश उपपद्यते छायातपवत् परस्परस्य विलक्षणत्वात्। तस्माद्बुद्धिक्षेत्रज्ञाविहोच्येयातामित्येवं प्राप्ते ब्रूमः। विज्ञानात्मपरमात्मानाविहोच्येयातां। कस्मात्। आत्मानौ हि तौ उभावपि चेतनौ समानस्वभावौ, सङ्घाश्रवणे च समानस्वभावेष्वेव लोके प्रतीतिर्दृश्यते, अस्य

मित्याह॥ बुद्धीति॥ एधांसि काष्ठानि पचन्तीत्याख्यातेन कारकत्वं कर्त्तृत्वं प्रकृतिस्तु मुख्यैवेति भावः। मुख्यघातारौ प्रसिद्धपक्षिणौ ग्राह्याविवत्र आह॥ न चेति॥ ब्रह्मक्षत्रपदस्य सन्निहितत्वमुपदादनित्यवत्तुपरत्ववदिहापि पिबत्पदस्य सन्निहितगुहापदाद् बुद्धिजीवपरतेति दृष्टान्तेन पूर्व्वपक्षयति॥ किं तावदिति॥ गोचरं पक्षं। एकस्मिन् जातिमति ज्ञाते सजातीयमेव द्वितीयं ग्राह्यं। व्यक्तिमात्रग्रहे मानवान् न विजातीयं जातिव्यक्त्युभयकल्पनागौरवात्। न चास्तु कारकत्वेन सजातीया बुद्धिरेव जीवस्य द्वितीयेति वाच्यं, चेतनत्वस्य जीवस्वभावस्य कारकत्वादन्तरङ्गत्वात्। तथा च लोके द्वितीयस्यान्तरङ्गजातिमत्त्वदर्शनाज्जीवस्य द्वितीयश्चेतन एवेति सूत्रा-

गोर्द्वितीयोऽन्वेष्टव्य इति श्रुतौ गौरेव द्वितीयोऽन्विष्यते नाश्वः पुरुषो वा, तदिह श्रुतपानेन लिङ्गेन निश्चिते विज्ञानात्मनि द्वितीयान्वेषणायां समानस्वभावश्चेतनः परमात्मैव प्रतीयते। ननूक्तं गुहाहितत्वदर्शनान् न परमात्मा प्रत्येतव्य इति। * अत्र वदामः। गुहाहितत्वन्तु श्रुतिस्मृतिष्वसकृत् परमात्मन एव दृश्यते। "गुहाहितं गह्वरेष्ठं पुराणं", "यो वेद निहितं गुहायां परमे व्योमन्", "आत्मानमन्विच्छ गुहां प्रविष्टं" इत्याद्यासु। सर्व्वगतस्यापि ब्रह्मण उपलब्ध्यर्थो देशविशेषोपदेशो न विरुद्ध्यत इत्येतदप्युक्तमेव। सुकृतलोकवर्त्तित्वन्तु क्वचित्त्ववदेकस्मिन्नपि वर्त्तमानमुभयोरविरुद्धं। छायातपावित्यप्यविरुद्धं। छायातपवत् परस्परविलक्षणत्वात् संसारित्वासंसारित्वयोः। अविद्याकृतत्वात् संसारित्वस्य पारमार्थिकत्वाच्चासंसारित्वस्य, तस्माद्विज्ञानात्मपरमात्मानौ गुहां प्रविष्टौ गृह्येते। कुतश्च विज्ञानात्मपरमात्मानौ गृह्येते।

विशेषणाच्च ॥ १२ ॥

विशेषणञ्च विज्ञानात्मपरमात्मनोरेव सम्भवति "आत्मानं

र्थमाह ॥ सङ्घात्रयवर्त्ती चेति ॥ गुहायां बुद्धौ स्थितं गह्वरे अनेकानर्थसङ्कुले देहे स्थितं पुराणमनादिपुरुषं विदित्वा हर्षशोकौ जहाति परमश्रेष्ठे व्योमन्, हार्दाकाशे या गुहा बुद्धिः तस्यां निहितं ब्रह्म यो वेद सोऽश्नुते सर्व्वान् कामानित्यन्वयः, अन्विच्छविचारयेत्यर्थः। विशेषणं गन्तृगन्तव्यत्वादिकं लिङ्गमाह ॥ विशेषणाच्चेति ॥ सः जीवोऽध्वनः

---

* गुहाहितत्वदर्शनादेव परमात्मा प्रत्येतव्य इति वदामः। इति लि० ८) पु०पा०

रथिनं विद्धि शरीरं रथमेव च" इत्यादिना परेण ग्रन्थेन रथिरथादिरूपककल्पनया विज्ञानात्मानं रथिनं संसारमोक्षयोर्गन्तारं कल्पयति। "सोऽध्वनः पारमाप्नोति" "तद्विष्णोः परमं पदं" इति परमात्मानं गन्तव्यं कल्पयति। तथा "तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणं। अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति" इति पूर्वस्मिन्नपि ग्रन्थे मन्तृमन्तव्यत्वेनैतावेव विशेषितौ। प्रकरणञ्चेदं परमात्मनः। ब्रह्मविदो वदन्तीति च वक्तृविशेषोपादानं परमात्मपरिग्रहे घटते, तस्मादिह जीवपरमात्मानावुच्येयातां। एष एव न्यायो "द्वा सुपर्णा सयुजा सखाया" इत्येवमादिष्वपि। तत्रापि ह्यध्यात्माधिकारान् न प्राकृतौ सुपर्णावुच्येते "तयोरन्यः पिप्पलं स्वाद्वत्ति" इति अदनलिङ्गाद्विज्ञानात्मा भवति। 'अनश्नन्योऽभिचाकशीति' इत्यनश्नचेतनत्वाभ्यां परमात्मा। अनन्तरे च मन्त्रे तावेव द्रष्टृद्रष्टव्यभावेन विशिनष्टि "समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः जुष्टं यदा

संसारमार्गस्य परमं पारं किं तत्, विष्णोर्व्याप्तशीलस्य परमात्मनः पदं स्वरूपमाप्नोतीत्यर्थः। दुर्दर्शं दुर्ज्ञानं तच्च हेतुर्गूढमायावृत्तं मायानुप्रविष्टं पश्चाद् गुहानिहितं गुहाद्वारा गह्वरेष्ठं, एवं बहिरागतमात्मानमध्यात्मयोगः स्थूलसूक्ष्मकारणदेहलयक्रमेण प्रत्यगात्मनि चित्तसमाधानं तेनाधिगमो महावाक्यजा वृत्तिः तया विदित्वेत्यर्थः। ऋतपानमन्त्रे जीवानुवादेन वाक्यार्थज्ञानाय तत्पदार्थौ ब्रह्म प्रतिपाद्यत इति उपसंहरति॥ तस्मादिहेति॥ उक्तन्यायमतिदिशति॥ एष इति॥ द्वा द्वौ छान्दसौ द्विवचनस्याकारः। सुपर्णाविव सहैव युज्येते नियम्य नियामकभावेनेति। सयुजौ सखायौ चेतनत्वेन तुल्यस्वभावौ। समान-

पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः" इति। अपर आह द्वा सुपर्णेति। नेयमृगस्याधिकरणस्य सिद्धान्तं भजते पैङ्गिरहस्य ब्राह्मणेनान्यथाव्याख्यातत्वात्। तयोरन्यः पिप्पलं स्वाद्वत्तीति सत्त्वं। अनश्नन्योऽभिचाकशीतीत्यनश्नन्योऽभिपश्यति ग्रस्तावेतौ सत्त्वक्षेत्रज्ञाविति, सत्त्वशब्दो जीवः क्षेत्रज्ञशब्दः परमात्मेति यदुच्येत, तन्न। सत्त्वक्षेत्रज्ञशब्दयोरन्तःकरणशरीरपरतया प्रसिद्धत्वात् तत्रैव च व्याख्यातत्वात्। "तदेतत् सत्त्वं येन स्वप्नं पश्यत्यथ योऽयं शारीर उपद्रष्टा स क्षेत्रज्ञस्तावेतौ सत्त्वक्षेत्रज्ञौ" इति। नायस्याधिकरणस्य पूर्वपक्षं भजते। न ह्यत्र शारीरः क्षेत्रज्ञः कर्तृत्वभोक्तृत्वादिसंसारधर्मोपेतो विवक्ष्यते। कथं तर्हि सर्वसंसारधर्मापेतो ब्रह्मस्वभावश्चैतन्य-

---

मेकं वृक्षच्छेदनयोग्यं शरीरमाश्रित्य स्थितावित्यर्थः। गुहां प्रविष्टाविति यावत्। एतावात्मानौ। तल्लिङ्गदर्शनादित्याह॥ तयोरन्य इति॥ विशेषमाचष्टे॥ अनन्तरे चेति॥ अनीशया स्वस्येश्वरत्वाप्रतीत्या देहनिमग्नः मुह्यमानो जीवः शोचति। निमग्नपदार्थमाह॥ मुह्यमान इति॥ नवोऽहमिति भ्रान्त इत्यर्थः। जुष्टं ध्यानादिना सेवितं यदा ध्यानपरिपाकदशायामीशमन्यं विशिष्टरूपाद्भिन्नं शोधितचिन्मात्रं प्रत्येकत्वेन पश्यति तदाऽस्य महिमानं स्वरूपमेति प्राप्नोतीव ततो वीतशोको भवतीत्यर्थः। द्वा सुपर्णेतिवाक्यं जीवेश्वरपरमिति ज्ञात्वा चिन्तितं। अधुना ज्ञातां चिन्तामुद्घाटयति॥ अपर इति॥ अन्यथा बुद्धिविशिष्टजीवत्वं पदलक्षणापरत्वेनेत्यर्थः॥ सत्त्वं बुद्धिरिति सम्मते॥ सत्त्वशब्द इति। बुद्धिजीवौ चेत् पूर्वपक्षार्थः स्यादित्यत आह॥ नायेति॥ पूर्वपक्षार्थस्तदा स्याद् यद्यत्र बुद्धिभिन्नः संसारी प्रतिपाद्यते, न ह्यत्र संसारी विवक्ष्यते। किन्तु शोधितस्वरूपो ब्रह्मेत्यर्थः। श्रुतिस्मृतिभ्यां चायमर्थो युक्त इति शेषः। तावता मन्मथाख्यामात्रेण। एवमेव जीवस्य ब्रह्मलोकावेव। न हि

मात्रस्वरूपः "अनश्नन्नन्योऽभिपश्यति शः" इति वचनात्। "तत्त्वमसि", "क्षेत्रज्ञञ्चापि मां विद्धि" इत्यादिश्रुतिस्मृतिभ्यश्च। तावता च विद्योपसंहारदर्शनमेवावकल्प्यते "तावेतौ सत्त्वक्षेत्रज्ञौ", "न ह वा एवं विदि किञ्चन रज आर्ध्नोति" इत्यादि। कथं पुनरस्मिन् पक्षे "तयोरन्यः पिप्पलं स्वाद्वत्ति" इति सत्त्वं दृत्यचेतने सत्त्वे भोक्तृत्ववचनमिति। उच्यते। नेयं श्रुतिरचेतनस्य सत्त्वस्य भोक्तृत्वं वक्ष्यामीति प्रवृत्ता। किं तर्हि। चेतनस्य क्षेत्रज्ञस्याभोक्तृत्वं ब्रह्मस्वभावतां वक्ष्यामीति। तदर्थं सुखादिविक्रियावति सत्त्वे भोक्तृत्वमध्यारोपयति। इदं हि कर्तृत्वं भोक्तृत्वं सत्त्वक्षेत्रज्ञयोरितरेतरस्वभावाविवेककृतं*कल्प्यते, परमार्थतस्तु नान्यतरस्यापि सम्भवति, अचेतनत्वात् सत्त्वस्य, अविक्रियत्वाच्च क्षेत्रज्ञस्य, अविद्याप्रत्युपस्थापित†स्वभावत्वाच्च सत्त्वस्य सुतरां न सम्भवति। तथा च श्रुतिः "यत्र त्वान्यदिव स्यात् तत्रान्योऽन्यत् पश्येत्" इत्यादिना स्वप्नदृष्टहस्त्यादिव्यवहारवदविद्याविषय एव कर्तृत्वादिव्यवहारं दर्शयति। "यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्येत्" इत्यादिना च विवेकिनः कर्तृत्वादिव्यवहारं वारयति।

जीवो बुद्धिभिन्न इति विवेकमात्रेणोपसंहारो युक्तः। भेदज्ञानस्य भ्रान्तित्वादैक्यस्याचेति भावः। अविद्या विदुषि किमपि स्वकार्यं नार्ध्नोति न सम्पादयति, ज्ञानाग्निना स्वस्या एव दग्धत्वादित्यर्थः। अविद्या नागच्छतीति वाऽर्थः। जीवस्य ब्रह्म त्वपरमिदं वाक्यमिति पक्षे भज्यते॥ कथमिति॥ बुद्धेर्भोक्तृत्वोक्तावतात्पर्यात्। नात्र युक्तिचिन्तया मनः खेदनीयमित्याह॥ उच्यत इति॥ तदर्थं ब्रह्मत्वबोधनार्थं भोक्तृत्व-

* अविरेकेति मु०। † सद्भावत्वाच्च मु०।

अन्तर उपपत्तेः ॥ १३ ॥

"य एषोऽक्षिणि पुरुषो दृश्यते एष आत्मेति होवाचैतदमृतमभयमेतद् ब्रह्म" इति, "तद्यद्यप्यस्मिन् सर्पिर्वोदकं वा सिञ्चति वर्त्मनी एव गच्छति" इत्यादि श्रूयते। तत्र संशयः। किमयं प्रतिबिम्बात्माऽत्राधिकरणे निर्दिश्यते, अथ विज्ञानात्मा, उत देवतात्मेन्द्रियस्याधिष्ठाताऽथवेश्वर इति। किं तावत् प्राप्तं, छायात्मा पुरुषप्रतिरूप इति। कुतः। तस्य दृश्यमानत्वप्रसिद्धेः "य एषोऽक्षिणि पुरुषो दृश्यते" इति च प्रसिद्धवदुपदेशात्। विज्ञानात्मनो वा अयं निर्देश इति युक्तं। स हि चक्षुषा रूपं पश्यन् चक्षुषि

मुपाधिमत्तके निक्षिपतीत्यर्थः। वस्तुतो जीवस्याभोक्तृत्वे भोक्तृत्वधीः। कथमित्यत आह ॥ इदं हीति ॥ चित्तादात्म्येन कल्पिता बुद्धिः सुखादिरूपेण परिणमते बुद्ध्यविवेकाच्चिदात्मनः सुखादिरूपवृत्तिव्यक्तचैतन्यवत्त्वं भोक्तृत्वं भातीत्यर्थः। भोक्तृत्वमाविद्यकं न वस्तुत इत्यत्र मानमाह ॥ तथा चेति ॥ यत्राविद्याकाले चैतन्यं भिन्नमिव भवति तदा द्रष्टृत्वादिकं न वस्तुनि ज्ञात इत्यर्थः। तस्माद्दृतं पिबन्ताविति वाक्यमेव गुहाधिकरणविषय इति स्थितं। अन्तर उपपत्तेः। उपकोशलविद्यावाक्यमुदाहरति ॥ य इति ॥ तदक्षिस्थानमसङ्गत्वेन ब्रह्मणोऽनुरूपं यतोऽस्मिन् क्षिप्तं वर्त्मनी पक्ष्माणी एव गच्छतीत्यर्थः। दर्शनस्य लौकिकत्वश्रौत्रीयत्वाभ्यां संशयमाह ॥ तत्रेति ॥ पूर्वं पिबन्ताविति प्रथमश्रुतचेतनत्वानुसारेण चरमश्रुता गुहाप्रवेशादयो नीताः, तद्वदिहापि दृश्यत इति चाक्षुषत्वानुसारेणामृतत्वादयो ध्यानार्थं कल्पितत्वेनानया इति दृष्टान्तेन पूर्वपक्षयति ॥ छायात्मेति ॥ पूर्वपक्षे प्रतिबिम्बोपास्तिः सिद्धान्ते ब्रह्मोपास्तिरिति फलं ॥ प्रसिद्धवदिति॥ चाक्षुषत्वेनेत्यर्थः। सम्भावनामात्रेण पक्षान्तरमाह ॥ विज्ञानात्मन इत्यादिना ॥ मनो ब्रह्मेतिवत्, एतद्ब्रह्मेति इति वाक्यशेषत्वान् न स्वार्थपरत्वमिति पूर्वपक्षः। मनो ब्रह्मेत्युपासीतेत्यत्र इतिपदस्य प्रत्य-

सन्निहितो भवति, आत्मशब्दश्चास्मिन् पक्षेऽनुकूलो भवति। आदित्यपुरुषो वा चक्षुषोऽनुग्राहकः प्रतीयते "रश्मिभिरेषोऽस्मिन् प्रतिष्ठितः" इति श्रुतेः। अमृतत्वादीनाञ्च देवतात्मन्यपि कथञ्चित् सम्भवात्, नेश्वरः, स्थानविशेषनिर्देशादित्येवं प्राप्ते ब्रूमः। परमेश्वर एवाक्षण्यन्तरः पुरुष दृहोपदिष्ट इति। कस्मात्। उपपत्तेः। उपपद्यते हि परमेश्वरे गुणजातमिहोपदिश्यमानं। आत्मत्वं तावन्मुख्यया वृत्त्या परमेश्वर उपपद्यते "स आत्मा", "तत्त्वमसि" इति श्रुतेः। अमृतत्वाभयत्वे च तस्मिन्नसकृत् श्रूयेते। तथा परमेश्वरानुरूपमेतदक्षिस्थानं। यथा हि परमेश्वरः सर्व्वदोषैरलिप्तोऽपहतपाप्मादिश्रवणात् तथाक्षिस्थानं सर्व्वलेपरहितमुपदिष्टं "तद्यथाप्यस्मिन् सर्पिर्व्वोदकं वा सिञ्चति वर्त्मनी एव गच्छति" इति श्रुतेः। संयद्वामादिगुणोपदेशश्च तस्मिन्नवकल्पत एतं संयद्वाम इत्याचक्षते। "एतं हि सर्व्वाणि वामान्यभिसंयन्ति। एष उ एव वामनीरेष हि सर्व्वाणि वामानि नयति। एष उ एव भामनीरेष हि सर्व्वेषु लोकेषु भाति" इति च। अत उपपत्तेरन्तरः परमेश्वरः॥

वयरत्वात्। इह च ब्रह्मेत्युवाचेत्यन्वयेन इतिपदस्योक्तिसम्बन्धिनोऽर्थपरत्वादैक्यमिति सिद्धान्तयति॥ परमेश्वर एवेति॥ बलप्रमाणसंवादस्तात्पर्य्यानुग्राहक इति न्यायानुगृहीताभ्यामात्मब्रह्मश्रुतिभ्यां दृश्यत्वलिङ्गं बाध्यमित्याह॥ संयद्वामेति॥ वामानि कर्म्मफलान्यनेनेति चक्षिपुरुषमभिलक्ष्य संयन्ति उत्पद्यन्ते सर्व्वफलोदयहेतुरित्यर्थः। लोकानां फलदातायमेवेत्याह॥ वामनीरिति॥ नयति फलानि लोकान् प्रापयतीत्यर्थः। भामानि भामानि नयत्ययमित्याह॥ भामनीरिति॥ सर्व्वार्थप्रकाशक इत्यर्थः। स्थाननामरूपाणां ध्यानार्थं श्रुत्यन्तरेऽप्युपदेशादक्षि-

स्थानादिव्यपदेशाच्च ॥ १४ ॥

कथं पुनराकाशवत् सर्व्वगतस्य ब्रह्मणोऽल्पस्थानमुपपद्यते इति। अत्रोच्यते। भवेदेषाऽनवकॢप्तिः यद्येतदेवैकं स्थानमस्य निर्दिष्टं भवेत्। सन्ति हि अन्यान्यपि पृथिव्यादीनि स्थानान्यस्य निर्दिष्टानि "यः पृथिव्यां तिष्ठन्" इत्यादिना। तेषु हि चक्षुरपि निर्दिष्टं यश्चक्षुषि तिष्ठन्निति। स्थानादिव्यपदेशादित्यादियहणेनैतद्दर्शयति। न केवलं स्थानमेवैकमनुचितं ब्रह्मणो निर्दिश्यते, किं तर्हि नामरूपमित्येवं जातीयकमप्यनामरूपस्य ब्रह्मणोऽनुचितं निर्दिश्यमानं दृश्यते, तस्योदिति नाम हिरण्यश्मश्रुरित्यादि निर्गुणमपि सत् ब्रह्म नामरूपगतैर्गुणैः सगुणमुपासनार्थं तच्च तत्रोपदिश्यते इत्येतदप्युक्तमेव। सर्व्वगतस्यापि ब्रह्मण उपलब्ध्यर्थं स्थानविशेषो न विरुद्ध्यते ग्रामवद्य विष्णोरित्येतदप्युक्तमेव।

सुखविशिष्टाभिधानादेव च ॥ १५ ॥

अपि च, नैवाच विवदितव्यं, किं ब्रह्मास्मिन् वाक्येऽभिधीयते न वेति। सुखविशिष्टाभिधानादेव ब्रह्मत्वं सिद्धं। सुखविशिष्टं हि ब्रह्म यद्वाक्योपक्रमे प्रक्रान्तं "प्राणो ब्रह्म" "कं ब्रह्म खं ब्रह्म" इति तदेवेहाभिहितं, प्रकृतपरिग्रहस्य न्याय्यत्वात्,

---

स्थानत्वोक्तिरच न दोष इति सूत्रयोजना। अनवकॢप्तिः अकॢप्तकल्पना तदा भवेद्यदैव निर्दिष्टं भवेदित्यन्वयः। नन्वनुचितबाऽल्पोक्तिरसमाधानमित्याशङ्क्य युक्तिमाह ॥ निर्गुणमपीति ॥ प्रकरणादपि ब्रह्मायाप्तमित्याह ॥ सुखविशिष्टेति ॥ ध्यानार्थं भेदकल्पनया सुखगुणविशि-

"आचार्यस्तु ते गतिं वक्ता" इति च गतिमात्राभिधानप्रतिज्ञानात्। कथं पुनर्वाक्योपक्रमे सुखविशिष्टं ब्रह्म विज्ञायत इति। उच्यते। "प्राणो ब्रह्म कं ब्रह्म खं ब्रह्म" इत्येतद्ग्रीनां वचनं श्रुत्वोपकोशल उवाच। "विजानाम्यहं यत् प्राणो ब्रह्म कञ्च खञ्च तु न विजानामि" इति। तत्रेदं प्रतिवचनं। "यद्वाव कं तदेव खं यदेव खं तदेव कं" इति। तत्र खंशब्दो भूताकाशे निरूढो लोके। यदि तस्य विशेषणत्वेन कंशब्दः सुखवाची नोपादीयेत, तथा सति केवले भूताकाशे ब्रह्मशब्दो नामादिष्विव प्रतीकाभिप्रायेण प्रयुक्त इति प्रतीतिः स्यात्। तथा कंशब्दस्य विषयेन्द्रियसम्पर्कजनिते सामये सुखे प्रसिद्धत्वात्। यदि तस्य खंशब्दो विशेषणत्वेन नोपादीयेत लौकिकं सुखं ब्रह्मेति प्रतीतिः स्यात्। इतरेतरविशेषितौ तु कंखंशब्दौ सुखात्मकं ब्रह्म गमयतः। तत्र दि-

---

स्य ब्रह्मणः प्रकृतस्य य एष इति सर्वनाम्नाभिधानादन्तरः परमात्मा स्यादिति सूत्रार्थः। ननु प्रकरणात् प्रबलेन दृश्यत्वलिङ्गेनोपस्थापितः क्षायात्मा सर्वनामार्थ इत्यत आह॥ आचार्यस्त्विति॥ उपकोसलो नाम कश्चित् ब्रह्मचारी जाबालस्याचार्यस्याग्नीन् द्वादश वत्सरान् परिचचार। तमनुपदिश्य देशान्तरगते जाबाले गार्हपत्याद्यग्निभिर्दयया प्राणो ब्रह्मेत्यात्मविद्यामुपदिश्योक्तं॥ आचार्यस्त्विति॥ तवात्मविद्याफलावाप्तये मार्गमर्चिरादिकं वदिष्यतीत्यर्थः। पश्चादाचार्येणागत्य य एषोऽक्षिणीत्युक्तार्चिरादिकागतिरुक्ता। तथा चाग्निभिरुक्तात्मविद्यावाक्यस्य गतिवाक्येनैकवाक्यता वाच्या, सा च सर्वनाम्ना प्रकृतात्मग्रहे निर्वहतीत्येकवाक्यतानिर्वाहकं प्रकरणं वाक्यभेदकाङ्क्षिकाद्बलवदिति भावः। श्रुतिं व्याचष्टे॥ उच्यत इति॥ प्राणश्च सूत्रात्मा दृष्टत्वाद्बलेति यत् तज्जानामि कं विषयसुखं खञ्च भूताकाशं ब्रह्मत्वेन ज्ञातुं न शक्नोमीत्यर्थः। खं कथम्भूतं यत् कं तदेव खमिति सुखेन विशेषितस्य खस्य भूत-

तीये ब्रह्मशब्देऽनुपादीयमाने कं खं ब्रह्मेत्येवोच्यमाने कंशब्दस्य विशेषणत्वेनैवोपयुक्तत्वात् सुखस्य गुणस्याध्येयत्वं स्यात्, तन्मा भूदित्युभयोः कंखंशब्दयोः ब्रह्मशब्दशिरस्त्वं कं ब्रह्म खं ब्रह्मेति। दृष्टं हि सुखस्यापि गुणस्य गुणिवद्ध्येयत्वं। तदेवं वाक्योपक्रमे सुखविशिष्टं ब्रह्मोपदिष्टं। प्रत्येकञ्च गार्हपत्यादयोऽग्नयः स्वं स्वं महिमानमुपदिश्य "एषा सोम्य ते अस्मद्विद्याऽऽत्मविद्या च" इत्युपसंहरन्तः पूर्ववच्च ब्रह्मनिर्दिष्टमिति ज्ञापयन्ति। "आचार्यस्तु ते गतिं वक्ता" इति च गतिमात्राभिधानप्रतिज्ञानमर्थान्तरविवक्षां वारयति। "यथा पुष्करपलाशे आपो न श्लिष्यन्ते, एवमेवं विदि पापं कर्म न श्लिष्यते" इति चाश्लिष्टानं पुरुषं

त्वनिरासः। तथा कं कथम्भूतं यत् खं तदेव कमिति विभुत्वेन विशेषितस्य कस्य जन्यत्वनिरास इति व्यतिरेकमुखेनाह॥ तच्च खमित्यादिना॥ आत्मविद्येतिश्रुतिविरोधात् प्रतीकध्यानमात्रानिष्टमिति भावः। सामय इति। आमयो दोषः। साधनपारतन्त्र्यानित्यत्वादिः तत्सहित इत्यर्थः। प्रत्येकग्रहणे दोषमुक्त्वा द्वयोर्ग्रहणे फलितमाह॥ इतरेतरेति॥ विशेषितार्थकावित्यर्थः। नन्वेकं ब्रह्मैवात्र ध्येयं चेद् ब्रह्मपदान्तरं किमर्थमित्यत आह॥ तच्चेति॥ विशेषणत्वेन खस्य भूतत्वव्यावर्त्तकत्वेनेत्यर्थः। ब्रह्मशब्दः शिरोयथोक्तत्वमिति विग्रहः। अध्येयत्वे को दोषस्तत्राहः॥ दृष्टं हीति॥ मार्गोक्त्या सगुणविद्यात्वावगमादिति भावः। आत्मविद्यापदेनोपसंहारादपि प्रकृतं ब्रह्मेत्याह। प्रत्येकञ्चेति। पृथिव्यग्निरन्नमादित्य इति मम चतस्रस्तनवो विभूतिरिति गार्हपत्य उपदिदेश। आपो दिशो नक्षत्राणि चन्द्रमा इति अन्वाहार्य्य वचनं उवाच। प्राण आकाशो द्यौर्विद्युदिति खमहिमानमाहवनीयो जगादेति भावः। इयमस्माकमयीनां विद्या प्रत्येकमुक्ता आत्मविद्या तु पूर्वमस्माभिर्मिलित्वा प्राणो ब्रह्मेत्युक्तेत्यर्थः। उच्यतामग्निभिर्ब्रह्मकायात्मा गुरुणोच्यतां वक्तृभेदादिति तत्राह॥ आचार्य्यस्त्विति॥ एकवाक्यता

विजानतः पापेनानुपघातं ब्रुवन्नचिरादानस्य पुरुषस्य ब्रह्मत्वं दर्शयति। तस्मात् प्रकृतस्यैव ब्रह्मणोऽचिरादानतां संयद्वामादिगुणतांश्च उक्त्वा अर्चिरादिकां तद्विदो गतिं वक्ष्यामीति उपक्रमे "य एषोऽक्षिणि पुरुषो दृश्यत एष आत्मेति होवाच" इति॥

श्रुतोपनिषत्कगत्यभिधानाच्च ॥ १९ ॥

इतश्चाचिरादानः पुरुषः परमेश्वरो यस्मात् श्रुतोपनिषत्कस्य श्रुतरहस्यस्य विज्ञानस्य ब्रह्मविदो या गतिर्देवयानाख्या प्रसिद्धा श्रुतौ "अथोत्तरेण तपसा ब्रह्मचर्येण श्रद्धया विद्ययात्मानमन्विष्यादित्यमभिजयन्ते, एतद्वै प्राणानामायतनमेतदमृतमभयमेतत् परायणमेतस्मान्न पुनरावर्त्तन्ते" इति श्रुतौ। स्मृतावपि।

निश्चयाद्ब्रह्मभेदेऽपि नार्थभेद इत्यर्थः। श्रुता अनुष्ठिता उपनिषद्रहस्यं सगुणब्रह्मोपासनं येन तस्य या गतिः श्रुतौ स्मृतौ च प्रसिद्धा तस्या अत्राभिधानात् लिङ्गादिति सूत्रार्थमाह ॥ इतश्चेति ॥ यस्माद् दृश्यते तत्तस्मादित्यन्वयः। श्रुतिमाह ॥ अथेति ॥ देहपातानन्तरमित्यर्थः। स्वधर्मरूपः तपो ब्रह्मचर्यश्रद्धाविद्याभिः आत्मानं ध्यात्वा तया ध्यानविद्ययोत्तरं देवयानमार्गं प्राप्यते नोत्तरेण यथा। आदित्यद्वारा सगुणब्रह्मस्थानं गच्छन्ति एतद्वै ब्रह्म प्राणानां व्यष्टिसमष्टिरूपाणामायतनं लिङ्गात्मकं हिरण्यगर्भरूपं वस्तुतस्त्वेतदमृतादिरूपं निर्गुणं सर्वाधिष्ठानं। अतः कार्यब्रह्म प्राप्य तत् स्वरूपं निर्गुणं ज्ञात्वा मुच्यन्त इत्यर्थः। अग्निरेव ज्योतिर्देवता एवमहरादयो देवता एव स्मृतौ उक्ताः॥ अस्मिन्नुपासके मृते सति यदि पुत्रादयः श्राद्धं श्रवसंस्कारादिकं कुर्वन्ति यदि च न कुर्वन्ति उभयथाप्युपास्तिमहिम्ना अर्चिरादिदेवान् क्रमेण गच्छन्ति। अर्चिषमग्निं ततोऽहरहः शुक्लपक्षं तत उत्तरायणं तस्मात् संवत्सरं ततो देवलोकं ततो वायुं वायोरादित्यं ततश्चन्द्रं

"अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणं।
तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः" ॥

इति। सैवेहाचिपुरुषविदोऽभिधीयमाना दृश्यते। "अथ यदु चैवास्मिन् शवं कुर्वन्ति यदु च नार्चिषमेवाभिसम्भवन्ति" इत्युपक्रम्य "आदित्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत् पुरुषोऽमानवः स एतान् ब्रह्म गमयत्येष देवपथो ब्रह्मपथ एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्ते" इति। तदिह ब्रह्मविद्विषयया प्रसिद्ध्या गत्याऽचिष्मानस्य ब्रह्मत्वं निश्चीयते ॥

अनवस्थितेरसम्भवाच्च नेतरः ॥ १७ ॥

यत् पुनरुक्तं "छायात्मा विज्ञानात्मा देवतात्मा वा स्यादचिष्मानः" इति। अत्रोच्यते, न छायात्मादिरितर इह ग्रहणमर्हति। कस्मात्। अनवस्थितेः। न तावत् छायात्मनश्चक्षुषि नित्यमवस्थानं सम्भवति। यदैव हि कश्चित् पुरुषश्चक्षुरामीदति तदा चक्षुषि पुरुषच्छाया दृश्यतेऽपगते तस्मिन्न दृश्यते, "य एषोऽक्षिणि पुरुषः" इति च श्रुतिः सन्निधानात् स्वे चक्षुषि दृश्यमानं पुरुषमुपास्यत्वेनोपदिशति। न चोपासनकाले स छायाकरं कश्चित् पुरुषं चक्षुःसमीपे सन्निधायोपास्त इति युक्तं कल्पयितुं। "अस्येव शरीरस्य नाशमन्वेष नश्यति" इति श्रुतिश्छायात्मनोऽ

चन्द्रादिद्युतं गत्वा तत्र विद्युल्लोके स्थितानुपासकान् मानवः पुरुषो ब्रह्मलोकादागत्य कार्यब्रह्मलोकं प्रापयति। एषोऽर्चिरादिभिर्देवैर्विग्रहो देवपथो मन्तव्येन ब्रह्मणा योगाद्ब्रह्मपथश्च। एतेन कार्यं ब्रह्मप्रतिपद्यमाना उपासका इमं मानवं मनोः स्वर्गं यावर्तं जन्ममरणा-

नवस्थितत्वं दर्शयति। असम्भवाच्च। तस्मिन्नमृतत्वादीनां गुणानां न छायात्मनि प्रतीतिः। तथा विज्ञानात्मनोऽपि साधारणे छत्त्वशरीरेन्द्रियसम्बन्धे सति चक्षुष्येवावस्थितत्वं वक्तुं न शक्यं। ब्रह्मणस्तु सर्व्वव्यापिनोऽपि दृष्ट उपलब्ध्यर्थो हृदयादिदेशविशेषसम्बन्धः। समानश्च विज्ञानात्मन्यप्यमृतत्वादीनां गुणानामसम्भवः। यद्यपि विज्ञानात्मा परमात्मनोऽनन्य एव तथाप्यविद्याकामकर्म्मकृतं तस्मिन्मर्त्यत्वमध्यारोपितं भयक्षेत्यमृतत्वाभयत्वेनोपपद्येते। संयद्वामत्वादयश्चैतस्मिन्नैश्वर्य्यादनुपपन्ना एव। देवतात्मनस्तु "रश्मिभिरेषोऽस्मिन् प्रतिष्ठितः" इति श्रुतेः यद्यपि चक्षुष्यवस्थानं स्यात् तथाप्यात्मत्वं तावन्न सम्भवति परायूपत्वात्। अमृतत्वादयोऽपि न सम्भवन्ति उत्पत्तिप्रलयश्रवणात्। अमरत्वमपि देवानां चिरकालावस्थानापेक्षं। ऐश्वर्य्यमपि परमेश्वरायत्तं न स्वाभाविकं, "भीषास्माद्वातःपवते भीषोदेति सूर्य्यः भीषास्मादग्निश्चेन्द्रश्च मृत्युर्धावति पञ्चमः" इति मन्त्र-

---

वृत्तियुक्तं नावर्त्तन्ते नागच्छन्तीत्यर्थः। चक्षुरासीदतीति उपगच्छतीत्यर्थः। अनवस्थितस्योपास्यत्वं सदा न सिद्धतीति भावः। किञ्चाव्यवधानात् स्वात्त्विक्य उपास्यः। न च तस्य स्वचक्षुषा दर्शनं सम्भवतीत्याह॥ य एष इति॥ अस्तु तर्हि परेण दृश्यमानस्योपास्तिरित्यत्र आह॥ न चेति॥ कल्पनागौरवादित्यर्थः। युक्तिसिद्धानवस्थितत्वे श्रुतिमाह॥ अस्येति॥ छायाकरस्य बिम्बस्य नाशमदर्शनमनुलक्ष्येव छायात्मा नश्यतीत्यर्थः। जीवं निरस्यति॥ तथेति॥ जात्यन्धस्याप्यक्षमित्यविशेषेण जीवस्याभिधत्ते चक्षुरेव स्थानमित्ययुक्तमित्यर्थः॥ दृष्ट इति॥ श्रुताविति शेषः। ननु "चक्षोः सूर्य्योऽजायत सूर्य्योऽक्षमेति" इति वाक्यं अमरा देवा इति प्रसिद्धिर्बाधितमित्याशङ्क्याह॥ अमरत्वमपीति॥

वर्णात्। तस्मात् परमेश्वर एवायमधिष्ठानः प्रत्येतव्यः। अस्मिंश्च पक्षे दृश्यत इति प्रसिद्धवदुपादानं शास्त्रापेक्षं विदद्विषयं प्ररोचनार्थमिति व्याख्येयं॥

अन्तर्याम्यधिदैवादिषु तद्धर्म्मव्यपदेशात्॥ १८॥

"य इमञ्च लोकं परञ्च लोकं सर्व्वाणि च भूतान्यन्तरो यमयति" इत्युपक्रम्य श्रूयते "यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः" इत्यादि। अत्र "अधिदैवतमधिलोकमधिवेदमधियज्ञमधिभूतमध्यात्मञ्च कश्चिदन्तरवस्थितो यमयिताऽन्तर्याम्यि" इति श्रूयते। स किमधिदेवाद्यभिमानी देवतात्मा कश्चित्, किंवा प्राणिमात्रैश्वर्य्यः कश्चिद्योगी, किंवा परमात्मा, किंवाऽर्थान्तरं किञ्चिदित्यपूर्व्वसञ्शादर्शनात् संशयः। किं

भीषा भयेनास्मादीश्वरादायुध्यलति। अग्निश्चेन्द्रश्च स्वस्वकार्य्यं कुरुतः। उत्तापेक्षया पञ्चमो मृत्युः समाप्तायुषां निकटे धावतीत्यर्थः। ईश्वरपक्षे दृश्यत इत्ययुक्तं तत्राह॥ अस्मिन्निति॥ दर्शनमनुभवः। तस्य शास्त्रे श्रुतस्य शास्त्रमेव करणं कर्त्तव्यं सन्निधानात्। तथा च शास्त्रकरणको विददनुभव उपासना स्तुत्यर्थ उच्यत इत्यर्थः। तस्मादुपकोसलविद्यावाक्यमुपास्ये ब्रह्मणि समन्वितमिति सिद्धं, अन्तर्य्याम्यधिदैवादिषु तद्धर्म्मव्यपदेशात्। बृहदारण्यकवाक्यमुदाहरति॥ य इति॥ अन्तर्य्यामिब्राह्मणे प्रतीयमानार्थमाह॥ अत्रेति॥ यः पृथिव्यामित्यादिना देवताः पृथिव्याद्या अधिकृत्य यमयिता श्रूयते। तथा यः सर्व्वेषु लोकेष्वित्यधिलोकं। यः सर्व्वेषु वेदेष्वित्याधिवेदं। यः सर्व्वेषु यज्ञेष्वित्यधियज्ञं। यः सर्व्वेषु भूतेष्वित्यधिभूतं। यः प्राणे तिष्ठन्नित्यादि य आत्मनीत्यन्तमध्यात्मञ्चेति विभागः। अशरीरस्य नियन्तृत्वसम्भवासम्भवाभ्यां संशयः। पूर्व्वत्रेश्वरस्याधिष्ठानत्वसिद्धये पृथिव्यादिष्वानुमि-

तावन्नः प्रतिभाति सङ्ख्याया अप्रसिद्धत्वात् सङ्ख्येनार्थप्रसिद्धेनार्थान्तरेण केनचित् भवितव्यमिति, अथ वा नानिरूपितरूपमर्थान्तरं शक्यमस्तीत्यभ्युपगन्तुं। अन्तर्यामिशब्दस्यान्तर्यमणयोगेन प्रवृत्तो नात्यन्तमप्रसिद्धः। तस्मात् पृथिव्याद्यभिमानी कश्चिद्देवोऽन्तर्यामी स्यात्। तथा च श्रूयते "पृथिव्येव यस्यायतनमग्निर्लोको मनो ज्योतिः" इत्यादि। स च कार्य्यकरणवत्त्वात् पृथिव्यादीन्नन्तस्तिष्ठन् यमयतीति युक्तं देवात्मनो यमयितृत्वं। योगिनो वा कस्यचित् सिद्धस्य सर्व्वानुप्रवेशेन यमयितृत्वं स्यात्। न तु *परमात्मा प्रतीयेत अकार्य्यकरणवत्त्वादित्येवं प्राप्त इदमुच्यते। योऽन्तर्य्याम्यधिदैवादिषु श्रूयते स परमात्मैव स्यान्नान्य इति। कुतः। तद्धर्म्मव्यपदेशात्। तस्य हि परमात्मनो धर्म्मा इह निर्दिश्यमाना दृश्यन्ते। पृथिव्यादि तावदधिदैवादिभेदभिन्नं समस्तं विकारजातमन्तस्तिष्ठन् यमयतीति परमात्मनो यमयितृत्वं धर्म्म उपपद्यते, सर्व्वविकारकारणत्वे सति सर्व्वज्ञत्वोपपत्तेः।

र्देशो दृष्टान्त उक्तस्यस्य दृष्टान्तवाक्यस्येश्वरपरत्वमाक्षिप्य समाधीयत इत्याक्षेपसङ्गतिः, अतः पूर्व्वफलेनास्य फलवत्त्वं। अवान्तरफलन्तु पूर्व्वपक्षे अनीश्वरोपास्तिः सिद्धान्ते प्रत्यग् ब्रह्मज्ञानमिति मन्तव्यं। स्वयमेवार्थं वदन् प्रश्नान्तरमाह ॥ अथ वेति ॥ अनिश्चितार्थे फलाभावेनाफलस्य वेदार्थत्वायोगादिति भावः। तथा च श्रूयते यस्य देवस्यायतनं शरीरं लोक्यतेऽनेनेति लोकश्चक्षुर्ज्योतिः सर्व्वार्थप्रकाशकं मन इत्यर्थः। उपक्रमादिनाऽन्तर्य्याम्यैक्यनिश्चयादनेकदेवपक्षो न युक्त इत्यवधेराह ॥ योगिनो वेति ॥ आगन्तुकसिद्धस्यान्तर्य्यामित्वे सिद्धसाधनकल्पनागौरवान् नित्यसिद्ध एवान्तर्य्यामीति सिद्धान्तयति ॥ एवं प्राप्त इति ॥

---

* नाच इति मु०।

"एष त आत्माऽन्तर्याम्यमृतः" इति चात्मत्वामृतत्वे मुख्ये परमात्मन उपपद्येते। "यं पृथिवी न वेद" इति च पृथिवीदेवताया अविज्ञेयमन्तर्यामिणं ब्रुवन् देवतात्मनोऽन्यमन्तर्यामिणं दर्शयति, पृथिवीदेवता ह्यहमस्मि पृथिवीत्यात्मानं विजानीयात्। तथा "अदृष्टोऽश्रुतः" इत्यादिव्यपदेशो रूपादिविहीनत्वात् परमात्मन उपपद्यत इति। यत्तु कार्य्यकरणहीनस्य परमात्मनो यमयितृत्वं नोपपद्यत इति, नैष दोषः, यान्नियच्छति तत् कार्य्यकरणैरेव तस्य कार्य्यकरणवत्त्वोपपत्तेः। तस्याप्यन्यो नियन्तेत्यनवस्थादोषस्य न सम्भवति भेदाभावात्। भेदे हि सत्यनवस्थादोषोपपत्तिः। तस्मात् परमात्मैवान्तर्यामी॥

न च स्मार्त्तमतद्धर्म्माभिलापात्॥ १९॥

स्यादेतद्दृष्टत्वादयो धर्म्माः साङ्ख्यस्मृतिकल्पितस्य प्रधानस्याप्युपपद्यन्ते रूपादिहीनतया तस्य तैरभ्युपगमात्। "अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्व्वतः" इति हि स्मरन्ति। तस्यापि नियन्तृत्वं

देवतानिरासे हेत्वन्तरमाह॥ यं पृथिवीति॥ ईश्वरो न नियन्ता अशरीरत्वात् घटवदित्युक्तं निरस्यति॥ नैष दोष इति॥ नियम्यातिरिक्तशरीरशून्यत्वं वा हेतुः शरीरासम्बन्धित्वं वा। आद्ये स्वदेहनियन्तरि जीवे व्यभिचारः द्वितीयस्त्वसिद्धः। ईश्वरस्य स्वाविद्योपार्जितसर्व्वसम्बन्धित्वादित्याह॥ यान्नियच्छतीति॥ सशरीरो नियन्तेति लोकदृष्टिमनुरुध्यैवैतदुक्तं। वस्तुतस्तु चेतनसान्निध्यात् तस्य व्यापारो नियमनं तच्छक्तिमत्त्वं नियन्तृत्वं। तच्चाचिन्त्यमायाशक्तेश्चिदात्मनः शरीरं विनैवोपपन्नं। कार्य्यकरणसङ्घातात्मको देहो याह्यः तेन विशुद्धदेहस्य व्यावृत्तिः। ननु देहनियन्तुर्जीवस्यान्यो नियन्ता चेत् तस्याप्यन्यः, अत आह॥ इत्यनवस्थेति॥ निरङ्कुशं सर्व्वनियन्तृत्वं ईश्वरस्य श्रुतं। तस्मा-

न्तृत्वं सर्व्वविकारकारणत्वादुपपद्यते। तस्मात् प्रधानमन्तर्य्यामिशब्दं स्यात्, ईक्षतेर्नाशब्दमित्यत्र निराकृतमपि सत् प्रधानमिहादृष्टत्वादिव्यपदेशसम्भवेन पुनराशङ्क्यते। तत उत्तरमुच्यते। न च स्मार्त्तं प्रधानमन्तर्य्यामिशब्दं भवितुमर्हति। कस्मात्। अतद्धर्म्माभिलापात्। यद्यप्यदृष्टत्वादिव्यपदेशः प्रधानस्य सम्भवति तथापि न द्रष्टृत्वादिव्यपदेशः सम्भवति प्रधानस्याचेतनत्वेन तैरभ्युपगमात्। "अदृष्टो द्रष्टा अश्रुतः श्रोता अमतो मन्ता अविज्ञातो विज्ञाता" इति हि वाक्यशेष दृश्यते भवति। आत्मत्वमपि न प्रधानस्योपपद्यते। यदि प्रधानमात्मत्वद्रष्टृत्वाद्यसम्भवान्नान्तर्य्याम्यभ्युपगम्यते शारीरस्तर्ह्यन्तर्य्यामी भवतु। शारीरो हि चेतनत्वाद् द्रष्टा श्रोता मन्ता विज्ञाता च भवत्यात्मा च प्रत्यक्षात्, अमृतस्य धर्म्माधर्म्मफलोपभोगोपपत्तेः। अदृष्टत्वादस्य धर्म्माः शारीरे सुप्रसिद्धाः दर्शनादिक्रियायाः कर्त्तरि प्रवृत्तिविरोधात्। "न दृष्टेर्द्रष्टारं पश्येत्" इत्यादिश्रुतिभ्यश्च। तस्य च कार्य्यकारणसङ्घातमन्तर्य्यमयितुं शीलं भोक्तृत्वात्। तस्माच्छारीरोऽन्तर्य्यामीति अत उत्तरं पठति।

नियन्त्वन्तरानुमाने श्रुतिबाध इति नानवस्थेत्यर्थः। यद्वा ईश्वराङ्गीकल्पनया जीवस्य नियन्तृत्वोक्तेः। सत्यभेदाभावान् नानवस्थेत्यर्थः। प्रधानं महदादिक्रमेण कथं प्रवर्त्तत इति तर्कस्याविषय इत्याह॥ अप्रतर्क्यमिति॥ रूपादिहीनत्वादविज्ञेयं सर्व्वतो दिक्षु प्रसृतमिव तिष्ठति जडत्वादित्यर्थः। अतत्, अप्रधानं चेतनं तस्य धर्म्माणामभिधानादिति हेत्वर्थः। उत्तरसूत्रं निरस्याशङ्कामाह॥ यदि प्रधानमित्यादिना॥ अमृतस्येति॥ विनाशिनो देहान्तरभोगानुपपत्तेरित्यर्थः। यथा देवदत्तकर्त्तृकगमनक्रियायाः ग्रामः कर्म्म तु देवदत्तस्तथात्मकर्त्तृक-

शारीरश्चोभयेऽपि हि भेदेनैनमधीयते ॥ २० ॥

नेति पूर्वसूत्रादनुवर्त्तते शारीरश्च नान्तर्य्यामी स्यात्। यद्यपि द्रष्टृत्वादयो धर्म्मास्तस्य सम्भवन्ति तथापि घटाकाशवदुपाधिपरिच्छिन्नत्वान् न स कार्त्स्न्येन पृथिव्यादिखन्तरवस्थातुं नियन्तुञ्च शक्नोति। अपि च। उभयेऽपि हि शाखिनः काण्वा-माध्यन्दिनाश्चान्तर्य्यामिणो भेदेनैनं शारीरं पृथिव्यादिवदधिष्ठानत्वेन नियम्यत्वेन चाधीयते। "यो विज्ञाने तिष्ठन्" इति काण्वाः। "य आत्मनि तिष्ठन्" इति माध्यन्दिनाः। य आत्मनि तिष्ठन्नित्यस्मिंस्तावत् पाठे भवत्यात्मशब्दः शारीरस्य वाचकः। यो विज्ञाने तिष्ठन्नित्यस्मिन्नपि पाठे विज्ञानशब्देन शारीर उच्यते, विज्ञानमयो हि शारीर इति। तस्माच्छारीरादन्य ईश्वरोऽन्तर्य्यामीति सिद्धं। कथं पुनरेकस्मिन्देहे द्वौ द्रष्टारावुपपद्येते। यस्यायमीश्वरोऽन्तर्य्यामी यस्यायमितरः शारीरः। का पुनरि-

---

दर्शनादिक्रियाया अनात्मा विषयः न त्वात्मा क्रियायाः कर्त्तृविषयत्वायोगादित्याह ॥ कर्त्तरीति ॥ क्रियायां गुणः कर्त्ता प्रधानं कर्म्म तच्चैकस्यां क्रियायामेकस्य गुणत्वप्रधानत्वयोर्विरोधान् न कर्त्तुः कर्म्मत्वमित्यर्थः। दृष्टेर्द्रष्टारमात्मानं तया दृश्यया दृष्ट्या न विषयीकुर्य्या इत्यादिश्रुतेश्चादृष्टत्वादिधर्म्माः शारीरस्येत्याह ॥ नेति ॥ अपिशब्दसूचितहेतुमुक्त्वा कण्ठोक्तं हेतुमाह ॥ अपि चेति ॥ भेदेनेति सूत्रात् तात्त्विकभेदे भ्रान्तिं निरसितुं शङ्कते ॥ कथमिति ॥ नन्वचैको भोक्ता जीवः ईश्वरस्यभोक्तेति न विरोध इति शङ्कते ॥ का पुनरिति ॥ तयोर्भेदः श्रुतिविरुद्ध इति पूर्ववाद्याह ॥ नान्य इति ॥ स एव श्रुत्यर्थमाह ॥ अन्येति श्रुतेरर्थान्तरमाशङ्क्य निषेधति ॥ नियन्तरेत्यादिना ॥ न केवलमप्रसक्तप्रतिषेधः, किन्त्वविशेषेण द्रष्टृन्तरनिषेधश्रुतेरन्तर्य्यामान्तर-

हानुपपत्तिः। "नान्योऽतोऽस्ति द्रष्टा" इत्यादिश्रुतिवचनं विरुद्धेत। अत्र हि प्रकृतादन्तर्यामिणोऽन्यं द्रष्टारं श्रोतारं मन्तारं विज्ञातारं चात्मानं प्रतिषेधति। नियन्त्रन्तरप्रतिषेधार्थमेतद्वचनमिति चेत्, न, नियन्त्रन्तराप्रसङ्गात्, अविशेषश्रवणाच्च। अत्रोच्यते। अविद्याप्रत्युपस्थापितकार्य्यकरणोपाधिनिमित्तोऽयं शारीरान्तर्य्यामिणोर्भेदव्यपदेशो न पारमार्थिकः। एको हि प्रत्यगात्मा भवति न द्वौ प्रत्यगात्मानौ सम्भवतः। एकस्यैव तु भेदव्यवहार उपाधिकृतः, यथा घटाकाशो महाकाश इति। ततश्च ज्ञातृज्ञेयादिभेदश्रुतयः प्रत्यक्षादीनि च प्रमाणानि संसारानुभवो विधिप्रतिषेधशास्त्रञ्चेति सर्व्वमेतदुपपद्यते। तथा च श्रुतिः "यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति" इत्यविद्याविषये सर्व्वव्यवहारं दर्शयति। "यत्र त्वस्य सर्व्वमात्मैवाभूत्तत् केन कं पश्येत्" इति विद्याविषये सर्व्वव्यवहारं वारयति।

निषेधार्थत्वे बाधञ्चेत्याह॥ अविशेषेति॥ तस्मात् सूत्रे य आत्मनि तिष्ठन्निति श्रुतौ च द्रष्टृभेदोक्तिरयुक्ता। नान्य इति वाक्यशेषे भेदनिरासादिति प्राप्तभेद उपाधिकल्पितः श्रुतिसूत्राभ्यामनूद्यत इति समाधत्ते॥ अत्रोच्यत इति॥ भेदः सत्यः किं न स्यादत आह॥ एको हीति॥ गौरवेण द्वयोरहंधीगोचरत्वासम्भवादेक एव तद्गोचरः तदगोचरस्य घटवदनात्मत्वान्नात्मभेदः सत्य इत्यर्थः॥ ततश्चेति॥ कल्पितभेदाङ्गीकाराद्भेदापेक्षं सर्व्वं युज्यत इत्यर्थः। तस्मादन्तर्य्यामिब्राह्मणं ज्ञेये ब्रह्मणि समन्वितमिति सिद्धं। अदृश्यत्वादिगुणको धर्म्मोक्तेः। मुण्डकवाक्यमुदाहरति॥ अथेति॥ कर्म्मविद्यारूपापरविद्योक्त्यानन्तरं यया निर्गुणं ज्ञायते परा सोच्यते तामेव विषयोक्त्या निर्दिशति॥ यत्तदिति॥ अदृश्यं अदृश्यं ज्ञानेन्द्रियैः अग्राह्यं कर्म्मेन्द्रियैश्च। गोत्रं वंशः। वर्णो ब्राह्मणत्वादि जातिः। चक्षुःश्रोत्रशून्यं अचक्षुःश्रोत्रं।

अदृश्यत्वादिगुणको धर्म्मोक्तेः ॥ २१ ॥

"अथ परा यया तदक्षरमधिगम्यते" "यत्तदद्रेश्यमग्राह्यम-गोत्रमवर्णमचक्षुःश्रोत्रं तदपाणिपादं नित्यं विभुं सर्व्वगतं सुसूक्ष्मं तदव्ययं यद् भूतयोनिं परिपश्यन्ति धीराः" इति श्रूयते। तत्र संशयः। किमयमदृश्यत्वादिगुणको भूतयोनिः प्रधानं स्यात्, उत शारीरः, आहोस्वित् परमेश्वर इति। तत्र प्रधान-मचेतनं भूतयोनिरिति युक्तं, अचेतनानामेव तत्र दृष्टान्तत्वे-नोपादानात् "यथोर्णनाभिः सृज्यते गृह्यते च यथा पृथिव्या-मोषधयः सम्भवन्ति यथा सतः पुरुषात् केशलोमानि तथाऽ-क्षरात् सम्भवतीह विश्वं" इति। ननूर्णनाभिः पुरुषश्चेतनाविह दृष्टान्तत्वेनोपात्तौ, नेति ब्रूमः, न हि केवलस्य चेतनस्य तत्र सूत्रयोनित्वं केशलोमयोनित्वञ्चास्ति। चेतनाधिष्ठितं ह्यचेतन-मूर्णनाभिशरीरं सूत्रस्य योनिः पुरुषशरीरञ्च केशलोमानामिति प्रसिद्धं। अपि च। पूर्व्वत्रादृष्टत्वाद्यभिलापसम्भवेऽपि द्रष्टृत्वा-द्यभिलापासम्भवान् न प्रधानमभ्युपगतं।

पाणिपादशून्यमपाणिपादं ज्ञानकर्म्मेन्द्रियविकलमित्यर्थः। विभुं प्रभुं सुसूक्ष्मं दुर्ज्ञेयत्वात् नित्याव्ययपदाभ्यां नाशापक्षययोर्निराशः। भूतानां योनिं प्रकृतिं यत् पश्यन्ति धीराः पण्डितास्तदक्षरं तद्विद्यापरेत्यन्वयः॥ अदृश्यत्वादिगुणानां ब्रह्मप्रधानसाधारण्यात् संशयः। पूर्व्ववद् द्रष्टृ-त्वादीनां चेतनधर्म्मत्वाम्नानाच्छ्रुतेः। अस्तु प्रधानमिति प्रत्युदाहरणेन पूर्व्वपक्षयति॥ तत्रेति॥ पूर्व्वपक्षे प्रधानाद्युपात्तिः सिद्धान्ते निर्गुण-धीरिति पदं। ऊर्णनाभिर्लूताकीटः तन्तून् स्वदेहात् सृजति उपसं-हरति चेत्यर्थः। सतो जीवतः। ननु पूर्व्वं निरस्तं प्रधानं कथमुत्थाप्यते

इह त्वदृश्यत्वादयो धर्माः प्रधाने सम्भवन्ति, न चात्र विरुद्ध्यमानो धर्मः कश्चिदभिलभ्यते। ननु "यः सर्व्वज्ञः सर्व्ववित्" इत्ययं वाक्यशेषोऽचेतने प्रधाने न सम्भवति। कथं प्रधानं भूतयोनिः प्रतिज्ञायत इति। अत्रोच्यते। "यथा तदक्षरमधिगम्यते यत्तदद्रेश्यं" इत्यक्षरशब्देनादृश्यत्वादिगुणकं भूतयोनिं आवयित्वा पुनः आवयिष्यति "अक्षरात् परतः परः" इति। तत्र यः परोऽक्षरात् श्रुतः स सर्व्वज्ञः सर्व्ववित्त्व सम्भवियति प्रधानमेव त्वक्षरशब्दनिर्द्दिष्टं भूतयोनिः। यदा तु योनिशब्दो निमित्तवाची तदा शारीरोऽपि भूतयोनिः स्यात्, धर्म्माधर्म्माभ्यां भूतजातस्योपसर्जनादिति। एवं प्राप्तेऽभिधीयते, योऽयमदृश्यत्वादिगुणको भूतयोनिः स परमेश्वर एव स्यान्नान्य इति। कथमेतदवगम्यते। धर्म्मोक्तेः। परमेश्वरस्य हि धर्म्म इहोच्यमानो दृश्यते "यः सर्व्वज्ञः सर्व्ववित्" इति। न हि प्रधानस्याचेतनस्य शारीरस्य वोपाधिपरिच्छिन्नदृष्टेः सर्व्वज्ञत्वं सर्व्ववित्त्वं वा सम्भवति। नन्वक्षरशब्दनिर्द्दिष्टाद् भूतयोनेः परस्यैवैतत् सर्व्वज्ञत्वं

तत्राह ॥ अपि चेति ॥ अत्र प्रधाने विरुद्ध्यमानोऽसम्भावितो वाक्यशेषः श्रुत इति सङ्गते ॥ ननु य इति ॥ पञ्चम्यन्ताक्षरश्रुत्या भूतप्रकृतेः प्रत्यभिज्ञानात् प्रथमान्तपरशब्दोक्तस्य जगन्निमित्तेश्वरस्य सर्व्वज्ञत्वादिकमित्याह ॥ अत्रोच्यत इति ॥ सन्दिग्धे तु वाक्यशेषादिति न्यायेन सिद्धान्तयति ॥ एवं प्राप्त इति ॥ चेतनाचेतनत्वेन सन्दिग्धे भूतयोनौ यः सर्व्वज्ञ इति वाक्यशेषादीश्वरत्वनिर्णय इत्ययुक्तं वाक्यशेषे भूतयोनेः प्रत्यभिज्ञापकाभावादिति शङ्कते ॥ नन्विति ॥ जनिकर्त्तुः प्रकृतिरिति सूत्रेण प्रकृतेरपादानसञ्ज्ञायां पञ्चमी स्मरणादक्षरात् सम्भवतीति

सर्व्ववित्त्वञ्च न भूतयोनिविषयमित्युक्तं। अत्रोच्यते। नैवं सम्भवति "~~यत्तदक्षरमक्षरात्~~ सम्भवतीह विश्वं" इति प्रकृतं भूतयोनिमिह जायमानप्रकृतित्वेन निर्द्दिश्यानन्तरमपि जायमानप्रकृतित्वेनैव सर्व्वज्ञं निर्द्दिशति।

"~~यः सर्व्वज्ञः~~ सर्व्ववित्तस्य ज्ञानमयं तपः।
तस्मादेतद्ब्रह्म नाम रूपमन्नञ्च जायते" ॥ इति ॥

तस्मान्निर्द्देशसाम्येन प्रत्यभिज्ञायमानत्वात् प्रकृतस्यैवाक्षरस्य भूतयोनेः सर्व्वज्ञत्वं सर्व्ववित्त्वञ्च धर्म्म उच्यत इति गम्यते। "अक्षरात् परतः परः" इत्यत्रापि न प्रकृतात् भूतयोनेरक्षरात् परः कश्चिदभिधीयते। कथमेतदवगम्यते। "येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्यां" इति प्रकृतस्यैवाक्षरस्य भूतयोनेरदृश्यत्वादिगुणकस्य वक्तव्यत्वेन प्रतिज्ञातत्वात्। कथं तर्ह्यक्षरात् परतः पर इति व्यपदिश्यत इत्युत्तरसूत्रे वक्ष्यामः। अपि

प्रकृतित्वेनोक्ताक्षरस्य भूतयोनेर्वाक्यशेषे तस्मादिति प्रकृतित्वलिङ्गेन प्रत्यभिज्ञानमस्तीति समाधत्ते॥ अत्रोच्यत इति॥ एतत् कार्य्यं ब्रह्मसूक्ष्मात्मकं नामरूपं स्थूलं ततोऽन्नं व्रीह्यादीत्यर्थः। यदुक्तं पञ्चम्यन्ताक्षरश्रुत्या भूतयोनेः प्रत्यभिज्ञानादचेतनत्वमिति तत्राह ॥ अक्षरात् पर इति ॥ नायमक्षरशब्दो भूतयोनिं परामृशति परविद्याधिगम्यत्वेनोक्तस्याक्षरस्य भूतयोनेरक्षरं पुरुषं वेदेत्यक्षरश्रुत्या वेद्यत्वलिङ्गत्वा पूर्व्वमेव ब्रह्मत्वेन परामर्शादित्याह ॥ येनेति ॥ येन ज्ञानेनाक्षरं भूतयोनिं सर्व्वज्ञं पुरुषं वेद तां ब्रह्मविद्यां योग्यशिष्याय प्रब्रूयादित्युपक्रम्याप्राप्तो ह्यमनाः शुभः अक्षरात् परतः पर इति उच्यमानः परो भूतयोनिरिति गम्यत इत्यर्थः। तर्हि पञ्चम्यन्ताक्षरशब्दार्थः क इत्याशङ्क्याज्ञानमिति वक्ष्यत इत्याह ॥ कथमिति ॥ परविद्येति समाख्ययाऽपि तद्विषयस्य

चात्र द्वे विद्ये वेदितव्ये उक्ते परा चैवापरा च इति। तत्रापरामृग्वेदादिलक्षणां विद्यामुक्ता ब्रवीति "अथ परा यया तदक्षरमधिगम्यते" इत्यादि। तत्र परस्याविद्याया विषयत्वेनाक्षरं श्रुतं। यदि पुनः परमेश्वरादन्यदृश्यचादिगुणकमक्षरं परिकल्प्येत नेयं परा विद्या स्यात्। परापरविभागो ह्ययं विद्ययोरभ्युदयनिःश्रेयसफलतया परिकल्प्यते। न च प्रधानविद्या निःश्रेयसफला केनचिदभ्युपगम्यते। तिस्रश्च विद्याः प्रतिज्ञायेरन् तत्पक्षेऽक्षराद् भूतयोनेः परस्य परमात्मनः प्रतिपाद्यमानत्वात्। द्वे एव तु विद्ये वेदितव्ये दृष्टे निर्दिष्टे "कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवति" इति चैकविज्ञानेन सर्वविज्ञानापेक्षणं सर्वात्मके ब्रह्मणि विवक्ष्यमाणेऽवकल्प्यते, नाचेतनमात्रैकायने प्रधाने भोग्यव्यतिरिक्ते वा भोक्तरि। अपि च "स ब्रह्मविद्यां

ब्रह्मत्वमित्याह ॥ अपि चेति ॥ ननु प्रधानविद्याऽपि कारणविषयत्वात् परेत्यत आह ॥ परापरविभागो हीति ॥ अनित्यफलत्वेनापरविद्यां निन्दित्वा मुमुक्षुणा ब्रह्मविद्यां प्रोवाचेति वाक्यशेषोक्तेरित्यर्थः। अस्तु प्रधानविद्याऽपि मुक्तिफलत्वेन परेत्यत आह ॥ न चेति ॥ ननु यः सर्वज्ञ इत्यत्र परविद्याविषय उच्यते, अत्रेश्यवाक्येन तु प्रधानविद्योच्यत इत्यत आह ॥ तिस्रश्चेति ॥ इतश्च भूतयोनेर्ब्रह्मत्वमित्याह ॥ कस्मिन्निति ॥ अचेतनमात्रस्यैकायनमुपादानं तज्ज्ञानात् कार्यज्ञानेऽपि तदकार्यात्मानां ज्ञानं न भवति। एवं जीवे ज्ञाते तदकार्यस्य भोग्यस्य ज्ञानं न भवतीत्यर्थः। ब्रह्मविद्याशब्दाच्च भूतयोनिर्ब्रह्मेत्याह ॥ अपि चेति ॥ स ब्रह्मविद्यां सर्वविद्यानां प्रतिष्ठां समाप्तिभूमिं ब्रह्मविद्यामुवाच। ब्रह्मणि सर्ववेदानां विद्याफलानां चान्तर्भावाद् ब्रह्मविद्या सर्वविद्याप्रतिष्ठा। नन्वपरविद्यापरप्रकरणे किमर्थमुक्तेत्यत आह ॥

सर्वविद्याप्रतिष्ठामथर्वाय ज्येष्ठाय पुत्राय प्राह" इति। ब्रह्मविद्यां प्राधान्येनोपक्रम्य परापरविभागेन परां विद्यामक्षराधिगमनीन्दर्शयंस्तस्या ब्रह्मविद्यात्वं दर्शयति। सा च ब्रह्मविद्यासमाख्या तदधिगम्यस्याक्षरस्याब्रह्मत्वे बाधिता स्यात्। अपरा ऋग्वेदादिलक्षणा कर्मविद्या ब्रह्मविद्योपक्रम उपन्यस्यते ब्रह्मविद्याप्रशंसार्थे, "प्लवा ह्येते अदृढा यज्ञरूपा अष्टादशोक्तमवरं येषु कर्म एतत् श्रेयो येऽभिनन्दन्ति मूढा जरां मृत्युं ते पुनरेवापि यन्ति" इत्येवमादिनिन्दावचनात्। निन्दित्वा चापरां विद्यां ततो विरक्तस्य परविद्याधिकारं दर्शयति "परीक्ष्य लोकान् कर्मचितान् ब्राह्मणोऽपि निर्वेदमायान्नास्त्यकृतः कृतेन तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठं" इति। यत्तूक्तमचेतनानां पृथिव्यादीनां दृष्टान्तत्वेनोपादानाद् दार्ष्टान्तिकेनाप्यचेतनेनैव भूतयोनिना भवितव्यमिति, तदयुक्तं। न हि दृष्टान्तदार्ष्टान्तिकयोरत्यन्तस्वा-

---

श्रेयेति॥ प्लवन्ते गच्छन्तीति प्लवा विनाशिनः। अदृढा नित्यफलसम्पादनाशक्ताः षोडशर्त्विजः पत्नी यजमानस्त्वेत्यष्टादश। यज्ञेन नामनिमित्तेन निरूप्यन्त इति यज्ञरूपाः। तथा हि ऋतुषु याजयन्ति यज्ञं कारयन्तीत्यृत्विजः, यजत इति यजमानः, पत्युर्नो यज्ञसंयोग इति सूत्रेण पतिशब्दस्य नकारान्तादेशो यज्ञसम्बन्धे विहित इति पत्नी, एवमृत्विजादिनामप्रवृत्तिनिमित्तं यज्ञ इति यज्ञरूपा येष्ववरमनित्यफलकं कर्मोक्तं, एतदेव कर्म श्रेयो नान्यदात्मज्ञानमिति ये मूढास्तुष्यन्ति ते पुनः पुनर्जन्ममरणमाप्नुवन्तीत्यर्थः। तद्विज्ञानार्थं ब्रह्मज्ञानार्थं गुरुमभिगच्छेदेवेति नियमः। ब्रह्मनिष्ठस्याप्यनधीतवेदस्य गुरुत्वं

ष्येन भवितव्यमिति नियमोऽस्ति। अपि च स्थूलाः पृथिव्यादयो दृष्टान्तत्वेनोपात्ता इति न स्थूल एव दार्ष्टान्तिको भूतयोनिरभ्युपगम्यते, तस्माददृश्यत्वादिगुणको भूतयोनिः परमेश्वर एव।

विशेषणभेदव्यपदेशाभ्याञ्च नेतरौ ॥ २२ ॥

इतश्च परमेश्वर एव भूतयोनिः, नेतरौ शारीरः प्रधानं वा। कस्मात्। विशेषणभेदव्यपदेशाभ्यां। विशिनष्टि हि प्रकृतं भूतयोनिं शारीरादिलक्षणत्वेन "दिव्यो ह्यमूर्त्तः पुरुषः स बाह्याभ्यन्तरो हि अजोऽप्राणो ह्यमनाः शुभ्रः" इति। न ह्येतद्दिव्यत्वादिविशेषणमविद्याप्रत्युपस्थापितनामरूपपरिच्छेदाभिमानिनः तद्धर्म्मांश्च स्वात्मनि कल्पयतः शारीरस्योपपद्यते। तस्मात् साक्षादौपनिषदः पुरुष इहोच्यते। तथा प्रधानादपि प्रकृतं भूतयोनिं भेदेन व्यपदिशति "अक्षरात् परतः परः" इति। अक्षरमव्याकृतं नाम-

---

वारयति॥ ओचियमिति॥ कार्य्यमुपादानाभिन्नमित्यंशे दृष्टान्तः। सर्व्वसाम्ये तवाप्यनिष्टापत्तेरित्याह॥ अपि च स्थूला इति॥ विशेषणान्न जीवो भेदोक्तेर्न प्रधानमिति हेतुद्वयं विभज्य व्याचष्टे॥ विशिनष्टि हीत्यादिना॥ दिव्यो द्योतनात्मकः स्वयं ज्योतिरमूर्त्तः पूर्णः पुरुषः पुरिशयः प्रत्यगात्मा बाह्यं स्थूलमाभ्यन्तरं सकारणं सूक्ष्मं ताभ्यां सहाधिष्ठानत्वेन तिष्ठति स बाह्याभ्यन्तरः, हि तथा श्रुतिषु प्रसिद्ध इत्यर्थः। अविद्याकृतं नामरूपात्मकं शरीरं तेन परिच्छेदोऽल्पत्वं। तस्य शारीरस्य धर्म्मान् जाड्यमूर्त्तत्वादीनित्यर्थः। नन्वक्षरशब्देन प्रधानोक्तावशब्दत्वं प्रधानस्य प्रतिज्ञातं बाध्येत। तत्राह॥ अक्षरमव्याकृतमिति॥

रूपबीजशक्तिरूपं भूतसूक्ष्ममीश्वराश्रयं तस्यैवोपाधिभूतं सर्व्वस्मा-
द्विकारात् परो योऽविकारः तस्मात् परतः पर इति भेदेन
व्यपदेशात् परमात्मानमिह विवक्षितं दर्शयति। नात्र प्रधानं
नाम किञ्चित् स्वतन्त्रं तत्त्वमभ्युपगम्यं तस्माद्भेदव्यपदेश उच्यते।
किं तर्हि। यदि प्रधानमपि कल्प्यमानं श्रुत्यविरोधेनाव्याकृता-

श्नोति व्याप्नोति स्वविकारजातमित्यक्षरं। अव्याकृतमकृतं अनादीति
यावत्। नामरूपयोर्बीजं ईश्वरः तस्य शक्तिरूपं परतन्त्रत्वादुपादा-
नमपि शक्तिरित्युक्तं। भूतानां सूक्ष्माः संस्कारा यत्र तद्भूतसूक्ष्मं।
ईश्वरश्चिन्मात्र आश्रयो यस्य तत्तथा। तस्यैव चिन्मात्रस्य जीवेश्वर-
भेदोपाधिभूतं यत्तु ईश्वर आश्रयो विषयो यस्येति नानाजीववादिनां
व्याख्यानं तद्व्याख्ये वह्निभूतं। एतस्मिन् स्वक्षरे आकाश ओतश्च प्रो-
तश्चेत्योतप्रोतभावेनाव्याकृतस्य चिदाश्रयत्वश्रुतेः, आश्रयपदलक्षणाया
निर्मूलत्वात्। न हि मूलप्रकृतेर्भेदे किञ्चिन्मानमस्ति। न च "इन्द्रो माया-
भिः" इति श्रुतिर्मानं। "अजामेकां" इत्यादयनेकश्रुतिबलेन लाघवतर्कस-
हायेन तस्याः श्रुतेर्बुद्धिभेदेन मायाभेदानुवादित्वात्। तदुक्तं सुरे-
श्वराचार्यैः "स्वतत्त्वविद्याभेदोऽत्र मनागपि न विद्यते" इति। साङ्ख्य-
योगाचार्याः पुराणेतिहासकर्त्तारश्च मूलप्रकृत्यैक्यं वदन्ति। नन्ववि-
द्यैक्ये बन्धमुक्त्यव्यवस्था कथं। न च व्यवस्था नास्तीति वाच्यं श्रवणे प्रत्य-
क्षादिबाधापातादिति चेत्। उच्यते। ये ह्यविद्यानानात्वमिच्छन्ति तैरपि
परिणामित्वेन सांशत्वमविद्याया अङ्गीकार्य्यं, तथा चानर्थात्मकः स्वीय-
सङ्घातात्मना परिणता विद्यांशोपहितजीवभेदाद्व्यवस्था सिद्धति।
यस्य ज्ञानमन्तःकरणे जायते तस्यान्तःकरणपरिणाम्यज्ञानांशनाशो
मुक्तिरिति। एवञ्च श्रोतुः स्वरूपानन्दप्राप्तिः श्रवणादौ प्रवृत्तिर्विदनु-
भवो जीवन्मुक्तिश्चास्खलेति सर्व्वमबाधितं भवति। न चैवं नानाजी-
वपक्षादविशेषः मूलप्रकृतिनानात्वाभावादित्यलं परत्वे हेतुः॥ अवि-
कार इति॥ ननु सूचकता श्रुतौ प्राधान्याद्भेदव्यपदेश उक्तस्तत्र कथ-
मज्ञानाद्भेदोक्तिर्व्याख्यायते तत्राह॥ नात्रेति॥ कार्य्यात्मना प्रधीयत

दिशब्दवाच्यं भूतसूक्ष्मं परिकल्प्येत कल्प्यतां तस्माद्भेदव्यपदेशात् परमेश्वरो भूतयोनिरित्येतदिह प्रतिपाद्यते। कुतश्च परमेश्वरो भूतयोनिः।

रूपोपन्यासाच्च ॥ २३ ॥

अपि च "अक्षरात् परतः परः" इत्यस्यानन्तरं "एतस्माज्जायते प्राणः" इति प्राणप्रभृतीनां पृथिवीपर्य्यन्तानां तत्त्वानां स्वर्गमुक्त्वा तस्यैव भूतयोनेः सर्व्वविकारात्मकं रूपमुपन्यस्यमानं पश्यामः। "अग्निर्मूर्द्धा चक्षुषी चन्द्रसूर्य्यौ दिशः श्रोत्रे वाग्विवृताश्च वेदाः वायुः प्राणो हृदयं विश्वमस्य पद्भ्यां पृथिवी ह्येष सर्व्वभूतान्तरात्मा" इति। तच्च परमेश्वरस्यैवोचितं सर्व्वविकारकारणत्वान्न शारीरस्य तनुमहिम्नो नापि प्रधानस्यायं रूपोपन्यासः सम्भवति सर्व्वभूतान्तरात्मत्वासम्भवात्, तस्मात् परमेश्वर एव भूतयोनिर्नेतराविति गम्यते। कथं पुनर्भूतयोनेरयं रूपोपन्यास इति गम्यते। प्रकरणात्। "एष" इति च प्रकृतानुकर्षणाद् भूतयोनिं हि प्रकृत्य "एतस्माज्जायते प्राण एष सर्व्वभूतान्तरात्मा" इत्यादि वचनं भूतयोनिविषयमेव भवति। यथोपाध्यायं प्रकृत्य "एतस्मादधीष्व एष वेदवेदाङ्गपारगः" इति वचनं उपाध्याय-

---

इति प्रधानमज्ञानमेव। ततोऽन्यस्याप्रामाणिकत्वादित्यर्थः। अतोऽज्ञानमेव भूतयोनिरिति पूर्व्वपक्षं कृत्वा निरस्यते। तन्निरासेनार्थात् साङ्ख्यकल्पितप्रधाननिरास इति मन्तव्यं। वृत्तिकृन्मतेनादौ सूत्रं व्याचष्टे॥ अपि चेत्यादिना॥ "प्राणो मनः सर्व्वेन्द्रियाणि च खं वायुर्ज्योति-

विषयं भवति तद्वत्। कथं पुनरद्रेयत्वादिगुणकस्य भूतयोनेर्विषयत्वद्रूपं सम्भवति। सर्व्वात्मत्वविवक्षयेदमुच्यते न तु विषयत्ववत्त्वविवक्षयेत्यदोषः। "अथमात्मेदममात्मसर्व्वात्मा" इत्यादिवत्। अन्ये पुनर्मन्यन्ते नायं भूतयोनेरूपेणोपन्यासः जायमानत्वेनोपन्यासात् "एतस्माज्जायते प्राणो मनः सर्व्वेन्द्रियाणि च। खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी" इति हि पूर्व्वत्र प्राणादिपृथिव्यन्तं तत्त्वजातं जायमानत्वेन निरदिक्षत्। उत्तरत्रापि च "तस्मादग्निः समिधो यस्य सूर्य्य" इत्येवमादि, अतश्च "सर्व्वा ओषधयो रसास्त्वेत्येवमन्तं जायमानत्वेनैव निर्देक्ष्यति। इहैव कथमकस्मादन्तराले भूतयोनेरूपमुपन्यस्येत। सर्व्वात्मत्वमपि सृष्टिं परिसमाप्योपदेक्ष्यति "पुरुष एवेदं विश्वं कर्म" इत्यादिना। श्रुतिसूत्रयोश्च चैलोक्यशरीरस्य प्रजापतेर्जन्मनिर्दिश्यमानमुपलभामहे "हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत्, स दधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेमः" इति समवर्त्ततेत्यजायत इत्यर्थः। तथा "स वै शरीरी प्रथमः स वै पुरुष उच्यते,

---

रापः पृथिवी" इति श्रुतिः। "अग्निर्द्युलोकः, असौ वाव लोको गौतमाग्निः" इति श्रुतेः। विदताः वेदाः वागित्यन्वयः। पद्भ्यां पादावित्यर्थः। यस्येदं रूपं स एष सर्व्वप्राणिनामन्तरात्मेत्यर्थः। तनुमहिम्न इति अल्पशक्तेरित्यर्थः। यथा कश्चित् ब्रह्मवित् स्वस्य सर्व्वात्मत्वप्रकटनार्थमहमन्नमिति साम गायति न त्वन्नत्वादिकमात्मनो विवक्षति। अफलत्वात्, तथेहापीत्याह॥ अहमन्नमिति॥ वृत्तिकृद्व्याख्यां दूषयति॥ अन्ये पुनरिति॥ एष सर्व्वभूतान्तरात्मा सूक्ष्मात्मा एतस्माद्भूतयोनेर्जायत इति श्रुत्यन्वयेन हिरण्यगर्भस्याच जायमानत्वेनोपन्यासादित्यर्थः।

आदिकर्त्ता स भूतानां ब्रह्माग्रे समवर्त्तत" ॥ इति।

विकारपुरुषस्यापि सर्व्वभूतान्तरात्मत्वं सम्भवति, प्राणात्मना सर्व्वभूतानामध्यात्ममवस्थानात्। अस्मिन् पक्षे "पुरुष एवेदं विश्वं कर्म" इत्यादिसर्व्वरूपोपन्यासः परमेश्वरप्रतिपत्तिहेतुरिति व्याख्येयं।

वैश्वानरः साधारणशब्दविशेषात् ॥ २४ ॥

"को न आत्मा किं ब्रह्मेति आत्मानमेवेमं वैश्वानरं सम्प्रत्य-

निरदिहदवोचदित्यर्थः। अग्निर्द्युलोको यस्य समिद्रूपः सूर्य्यः सोऽपि द्युलोकाग्निरुत्तस्मादजायतेत्यर्थः। "तस्यादित्य एव समित्"इति श्रुत्यन्तरात्। अतो मध्येऽपि स्थितिरेव वाच्या न रूपमिति भावः। यदुक्तमग्निर्मूर्द्धेत्यत्र भूतयोनेः सर्व्वात्मत्वं विवक्षितमिति तन्नेत्याह॥ सर्व्वात्मत्वमपीति॥ ननु हिरण्यगर्भस्य जन्मान्यत्रानुक्तं कथमत्र वक्तव्यं तत्राह॥ श्रुतीति॥ अग्रे समवर्त्तत जातः सन् भूतग्रामस्यैकः पतिरीश्वरप्रसादादभवत् स सूत्रात्मा द्यामिमां पृथिवीञ्च सूर्यं सर्व्वमधारयत् कशब्दस्य प्रजापतिसञ्ज्ञात्वे सर्व्वनामत्वाभावेन स्मा इत्ययोगादेकारश्रोपेनैकस्मै देवाय प्राणात्मने हविषा विधेम परिचरेमेति व्याख्येयं। "कतमः स एको देव इति प्राणः" इति श्रुतेः। यद्वा यस्मादयं जातस्तस्मा एकस्मै देवायेत्यर्थः। "एको देवः सर्व्वभूतेषु गूढः"इति श्रुत्यन्तरात्। ननु तस्य भूतान्तरात्मत्वं कथं। तत्राह॥ विकारेति॥ पूर्व्वकल्पे प्रक्तष्टोपासनाकर्म्मसमुच्चयानुष्ठानादस्मिन् कल्पे सर्व्वप्राणिव्यष्टिलिङ्गानां व्यापकं सर्व्वप्राणान्तर्गतं ज्ञानकर्म्मेन्द्रियप्राणात्मकसमष्टिलिङ्गशरीरं जायते तद्रूपस्य सूत्रात्मनः सर्व्वभूतान्तरात्मत्वं युक्तमित्यर्थः। स्वपक्षे सूत्रार्थमाह॥ अस्मिन् पक्ष इति॥ कर्म्म सफलं सर्व्वश्रौतस्मार्त्तादिकं तपश्च पुरुष एवेति सर्व्वान्तरत्वरूपोपन्यासाच्च भूतयोनौ ज्ञेये वाक्यं समन्वितमित्यर्थः॥ वैश्वानरः॥ छान्दोग्यमुदाहरति॥ को न इति॥ प्राचीनशालसत्ययज्ञेन्द्रद्युम्नजनकबुडिला मिलिता मीमांसाञ्चक्रुः को न आत्मा

मेवैतमेव नो ब्रूहीति" इति चोपक्रम्य द्युसूर्य्यवाय्वाकाशवारिपृथिवीनां सुतेजस्त्वादिगुणयोगमेकैकोपासननिन्द्या च वैश्वानरं प्रत्येषां मूर्द्धादिभावमुपदिश्याम्नायते "यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते स सर्व्वेषु लोकेषु सर्व्वेषु भूतेषु सर्व्वेष्वात्मस्वन्नमत्ति तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्द्धैव सुतेजाश्चक्षुर्विश्वरूपः प्राणः पृथग्वर्त्मात्मा सन्देहो बहुलो

किं ब्रह्मेति। आत्मैव ब्रह्मेति ज्ञापनार्थं पदद्वयं। ते पञ्चापि निश्चयार्थमुद्दालकमाजग्मुः। सोऽपि सम्यक् न वेदेति तेनोद्दालकेन सह षडप्यश्वपतिं कैकेयं राजानमाजग्मुरात्मानमिति अध्येषि स्मरसि तमेव नो ब्रूहीति। राजा तु तेषां भ्रान्तिनिरासार्थं तान् प्रत्येकमपृच्छत्। कं त्वमात्मानमुपास्स इति। ते च प्राचीनशालादयः क्रमेण तं प्रत्येकमूचुः। दिवमेवाहं वैश्वानरं वेद्मि। आदित्यमेवाहं वेद्मि। वायुमेव। आकाशमेव। अप एव। पृथिवीमेवाहं वेद्मीति। ततो राजा द्युसूर्य्यादीनां यस्यां यथाक्रमेण सुतेजस्त्वविश्वरूपत्वपृथग्वर्त्मात्मत्वबहुलत्वरयित्वप्रतिष्ठात्वगुणान् विधाय भवन्तो यदि मामपृष्ट्वा द्युसूर्य्यादिषु भगवतो वैश्वानरस्याङ्गेष्वेव प्रत्येकं वैश्वानरत्वदृष्टयो भवेयुस्तदा क्रमेण मूर्द्धपातान्धत्वप्राणोत्क्रमणदेहविशीर्णत्ववस्तिभेदपादशैथिल्या भवतां स्युरिति प्रत्येकोपासनं निन्दित्वा सुतेजस्त्वगुणको द्युलोकोऽस्यात्मनो वैश्वानरस्य मूर्द्धा विश्वरूपत्वगुणकः सूर्य्यो यस्य चक्षुरित्येवं द्युसूर्य्यादीनां मूर्द्धादिभावमुपदिश्य समस्तवैश्वानरध्यानविधिराम्नायते॥ यस्त्वेतमिति॥ आभिमुख्येनापरोक्षतया विश्वं विमिमीते जानातीत्यभिविमानः। तं सर्व्वज्ञं स तदुपासकः सर्व्वत्र भोग्यं भुङ्क्त इत्यर्थः। लोका भूरादयो भूतानि शरीराण्यात्मानो जीवा इति भेदः। सुतेजः कान्तिर्यस्य द्युलोकस्य स सुतेजाः विश्वानि रूपाणि यस्य सूर्य्यस्य। "एष शुक्र एष नीलः" इति श्रुतेः। पृथक् नानाविधं वर्त्मगमनं आत्मा स्वभावो यस्य वायोः स नानागतित्वगुणकोऽस्य प्राणः बहुलत्वं व्यापित्वं तदुक्त आकाशोऽस्य सन्देहो देहमध्ये रयित्वं घनत्वं तदुक्त

वस्तिरेव रयिः पृथिवीत्येवाहास्यै उर एवेडा बर्हिर्होत्राभिर्यदिदं गार्हपत्यो मनोऽन्वाहार्यपचन आसन्नाहवनीये" इत्यादि। अत्र संशयः। किं वैश्वानरशब्देन जाठरोऽग्निरुपदिश्यत उत भूताग्निरथ तदभिमानिनो देवता अथ वा शारीर आहोस्वित् परमेश्वर इति। किं पुनरत्र संशयकारणं। वैश्वानर इति जाठरभूताग्निदेवतानां साधारणशब्दप्रयोगादात्मेति च शारीरपरमेश्वरयोः। तत्र कस्योपादानं न्याय्यं कस्य वा हानमिति भवति संशयः। किन्तावत् प्राप्तं जाठरोऽग्निरिति। कुतः। तत्र हि विशेषेण क्वचित् प्रयोगो दृश्यते "अयमग्निर्वैश्वानरो योऽयमन्तःपुरुषे येनेदमन्नं पच्यते यदिदमद्यते" इत्यादौ। अग्निमात्रं वा स्यात् सामान्येनापि प्रयोगदर्शनात् "विश्वस्या अग्निं भुवनाय देवा वैश्वानरं केतुमह्नामकृण्वन्" इत्यादौ। अग्निशरीरा वा देवता स्यात् तस्यामपि प्रयोगदर्शनात् "वैश्वानरस्य सुमतौ

आपो यस्य वस्तिर्मूर्धस्थानं प्रतिष्ठात्वगुणा पृथिवी तस्य पादौ तस्य होमाधारत्वं सम्पादयति॥ उर एवेत्यादिना॥ पूर्वमुपक्रमस्याद्दश्यत्वादिसाधारणधर्म्मस्य वाक्यशेषस्यसर्व्वज्ञत्वादिलिङ्गेन ब्रह्मनिष्ठत्वमुक्तं, तदुदरादाप्युपक्रमस्थसाधारणवैश्वानरशब्दस्य वाक्यशेषस्थहोमाधारत्वलिङ्गनजाठरनिष्ठत्वमिति दृष्टान्तेन पूर्व्वपक्षयति॥ किं तावदित्यादिना॥ पूर्व्वोत्तरपक्षयोर्जाठरब्रह्मणोर्ध्यानं फलं। यदद्यते तदन्नं येन पच्यते सोऽयं पुरुषे शारीरेऽन्तरस्तीत्यर्थः। पक्षान्तरमाह॥ अग्निमात्रं वेति॥ विश्वस्मै भुवनाय वैश्वानरमग्निमन्नां केतुं चिह्नं सूर्य्यं देवा अकृण्वन् कृतवन्तः। सूर्य्योदये दिनव्यवहारादित्यर्थः। स्यादैश्वानर इत्यनुषङ्गः। हि यस्मात् कं सुखप्रदो भुवनानां राजा वैश्वानरोऽभिमुखा श्रीरस्येत्यभिश्रीरीश्वरः। तस्मात् तस्य वैश्वानरस्य सुमतौ वयं

स्याम राजा हि कं भुवनानामभिश्रीः" इत्येवमाद्यायाः श्रुतेर्दैवतायामैश्वर्याद्युपेतायां सम्भवात्। अथात्मशब्दसामानाधिकरण्यात् उपक्रमे च "को न आत्मा किंब्रह्म" इति केवलात्मशब्दप्रयोगादात्मशब्दवशेन वैश्वानरशब्दः परिणेय इत्युच्यते। तथापि शारीर आत्मा स्यात् तस्य भोक्तृत्वेन वैश्वानरसन्निकर्षात्, प्रादेशमात्रमिति च विशेषणस्य तस्मिन् उपाधिपरिच्छिन्ने सम्भवात्। तस्मान्नेश्वरो वैश्वानर इत्येवं प्राप्तं। तत इदमुच्यते वैश्वानरः परमात्मा भवितुमर्हति। कुतः। साधारणशब्दविशेषात्। साधारणशब्दयोर्विशेषः साधारणशब्दविशेषः। यद्यप्येतावुभावप्यात्मवैश्वानरशब्दौ साधारणशब्दौ, वैश्वानरशब्दस्तु त्रयाणां साधारणः, आत्मशब्दश्च द्वयोः, तथापि विशेषो दृश्यते येन परमेश्वरपरत्वं तयोरभ्युपगम्यते "तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्धैव सुतेजाः" इत्यादि। अत्र हि परमेश्वर

स्याम तस्यास्मद्विषया शुभमतिर्भवत्वित्यर्थः। पक्षत्रयेऽप्यरुचिं वदन् कल्पान्तरमाह॥ अथेत्यादिना॥ आत्मा वैश्वानर इति श्रुतेरित्यर्थः। केवलत्वं वैश्वानरशब्दशून्यत्वं। अत्र जाठरो विश्वानर इति मुख्यः पूर्वपक्षः प्राग्निहोत्रहोमाधारत्वलिङ्गात्। तस्य देहव्यापित्वादात्मत्वं। श्रुत्या द्युमूर्द्धत्वादिकल्पनया दृढत्वाद्बलवत्त्वमिति ध्येयं। सिद्धान्तयति॥ तत इदमिति॥ साधारणश्रुत्योरुपक्रमस्थयोर्विशेषात् प्रथमश्रुतमुख्यवैलोक्यशरीरलिङ्गात्। सर्वात्मकेश्वरपरत्वं युक्तं न चरमश्रुतकल्पितहोमाधारत्वलिङ्गेन जाठरपरत्वमित्यर्थः। ननु निर्विशेषस्य कुतो विशेष इत्यत आह॥ अत्र हीति॥ अवस्थान्तरमतः वैलोक्यात्मनास्थित इत्यर्थः। जाठरस्यापि ध्यानार्थं विशेषकल्पनेति चेत्। न। असत्कल्पनापत्तेः। ईश्वरस्य तु उपादानत्वादिविशेषः सन्नेव ध्यानार्थं

एव द्युमूर्द्धत्वादिविशिष्टोऽवस्थान्तरगतः प्रत्यगात्मत्वेनोपन्यस्त आधानायेति गम्यते कारणत्वात्। कारणस्य हि सर्व्वाभिः कार्य्यगताभिरवस्थाभिरवस्थावत्त्वाद् द्युलोकाद्यवयवत्वमुपपद्यते। "स सर्व्वेषु लोकेषु सर्व्वेषु भूतेषु सर्व्वेष्वात्मस्वन्नमत्ति" इति च सर्व्वलोकाद्याश्रयं फलं श्रूयमाणं परमकारणपरिग्रहे सम्भवति। "एवं ह्यस्य सर्व्वे पाप्मानः प्रदूयन्ते" इति च तद्विदः सर्व्वपाप-प्रदाहश्रवणं। "को न आत्मा किं तद् ब्रह्म" इति चात्मब्रह्म-शब्दाभ्यामुपक्रम इत्येवमन्तानि ब्रह्मलिङ्गानि परमेश्वरमेव ग-मयन्ति। तस्मात् परमेश्वर एव वैश्वानरः॥

स्मर्य्यमाणमनुमानं स्यादिति॥ २५॥

इतश्च परमेश्वर एव वैश्वानरः, यस्मात् परमेश्वरस्यैवाग्नि-राख्यं द्यौर्मूर्द्धेतीदृशं चैलोक्यात्मकं रूपं स्मर्य्यते "यस्याग्नि-राख्यं द्यौर्मूर्द्धा खं नाभिश्चरणौ क्षितिः सूर्य्यश्चक्षुर्दिशः श्रोत्रे तस्मै लोकात्मने नमः" इति तत् स्मर्य्यमाणं रूपं मूलभूतां श्रुतिमनुमापयदस्य वैश्वानरशब्दस्य परमेश्वरपरत्वेनानुमानं लिङ्गं गमकं स्यादित्यर्थः। इतिशब्दो हेत्वर्थो यस्मादिदं गमकं तस्मादपि वैश्वानरः परमात्मैवेत्यर्थः। यद्यपि स्मृतिरियं तस्मै

उच्यतामित्याह॥ कारणत्वादिति॥ लिङ्गान्तराण्याह॥ स सर्व्वेष्वित्या-दिना॥ यथाग्नौ विक्षिप्तमिषीकातूलं दह्यते एवं ह्यस्य विदुष इत्यर्थः। नन्वसदादेरपेक्षापि स्मृतिसम्भवान्न मूलश्रुत्यपेक्षेत्याशङ्क्याह॥ यद्यपि स्मृतिरिति॥ तथापीतिपदमर्थतः पठति॥ स्मृतित्वमपीति॥ द्युमूर्द्धत्वा-

लोकात्मने मन इति स्तुतित्वमपि नासति मूलभूते वेदवाक्ये सत्यगीदृशेन रूपेण सम्भवति।

"द्यौर्मूर्द्धानं यस्य विप्रा वदन्ति
खं वै नाभिं चन्द्रसूर्यौ च नेत्रे।
दिशः श्रोत्रे विद्धि पादौ क्षितिञ्च
सोऽचिन्त्यात्मा सर्व्वभूतप्रणेता" ॥

इत्येवं जातीयका च स्मृतिरिहोदाहर्त्तव्या ॥

शब्दादिभ्योऽन्तःप्रतिष्ठानान्नेति चेन्न तथा दृष्ट्युपदेशादसम्भवात् पुरुषमपि चैनमधीयते ॥ २९ ॥

अत्राह न परमेश्वरो वैश्वानरो भवितुमर्हति। कुतः। शब्दादिभ्योऽन्तःप्रतिष्ठानात्। चशब्दस्तावद्वैश्वानरशब्दो न परमेश्वरे सम्भवति, अर्थान्तरे रूढत्वात्। तथाऽग्निशब्दः "स एषोऽग्निर्वैश्वानरः" इति। आदिशब्दाद् हृदयगार्हपत्याद्यग्निचेताप्रकल्पनं। तद्यङ्गकं प्रथममागच्छेत् तद्धोमीयमित्यादिना च प्राणाऽऽत्यधिकरणतासङ्कीर्त्तनं। एतेभ्यो हेतुभ्यो जाठरो वैश्वानरः प्रत्येतव्यः। तथान्तःप्रतिष्ठानमपि श्रूयते "पुरुषेऽन्तःप्रतिष्ठितं वेद" इति तच्च जाठरे

दिरूपेण स्तुतिर्नरमात्रेण कर्त्तुमशक्या विना श्रुतिमित्यर्थः। सता रूपेण स्तुतिसम्भवान्नासदारोप इति भावः। शब्दादीनां गतिं वक्तुमुत्क्षिपति समाधत्ते ॥ शब्दादिभ्य इति ॥ स एषोऽग्निर्वैश्वानर इत्यग्निरहस्ये वैश्वानरविद्यायां श्रुतोऽग्निशब्द ईश्वरे न सम्भवतीत्यन्वयः। सूचस्यादिशब्दार्थमाह ॥ आदिशब्दादिति ॥ भक्तमन्नं होमीयं होमसाधनं तेन प्राणाग्निहोत्रं कार्य्यमित्यर्थः। वाजसनेयिनामग्निरहस्ये सम्प्रपञ्चां वैश्वानरविद्यामुक्त्वा "स यो हैतमग्निं वैश्वानरं पुरुषविधं पुरुषे

सम्भवति यदयुक्तं "मूर्द्धा द्युलोकः" इत्यादेर्विशेषात् कारणात् परमात्मा वैश्वानर इत्यत्र नूमः। कुतोऽभिधानिर्णयो यदुभयथापि विशेषप्रतिभाने सति परमेश्वरविषय एव विशेष आश्रयणीयो न जाठरविषय इति। अथ वा भूताग्नेरन्तर्बहिश्चावतिष्ठमानस्यैष निर्देशो भविष्यति। तथापि हि द्युलोकादिसम्बन्धो मस्तवर्णादवगम्यते "यो भानुना पृथिवीं द्यामुतेमामाततान्तताम रोदसीमन्तरिक्षं" इत्यादौ। अथ वा तच्छरीरायादेवताया ऐश्वर्ययोगाद् द्युलोकाद्यवयवत्वं सम्भवति। तस्मान्न परमेश्वरो वैश्वानर इति। अत्रोच्यते। न तथा दृष्ट्युपदेशादिति। न शब्दादिभ्यः कारणेभ्यः परमेश्वरस्य प्रत्याख्यानं युक्तं। कुतः। तथा जाठरापरित्यागेन दृष्ट्युपदेशात्। परमेश्वरदृष्टिर्हि जाठरे वैश्वानर इहोपदिश्यते "मनो ब्रह्मेत्युपासीत" इत्यादिवत्। अथ वा जाठरवैश्वानरोपाधिः परमेश्वर इह द्रष्टव्यत्वेनोपदिश्यते "मनोमयः प्राणशरीरो भारूपः" इत्यादि-

---

ऽन्तःप्रतिष्ठितं वेद स सर्व्वान्नमत्ति" इत्युक्तं देहान्तरस्थत्वं जाठरे सम्भवति प्रसिद्धेरित्याह ॥ तथेति ॥ अत्र सूत्रे आदिपदेनैवान्तःप्रतिष्ठानस्य ग्रहे सम्भवति पृथगुक्तिः। साधारणलिङ्गत्वद्योतनार्थात् शब्दादिबलादिदमपि जाठरं गमयतीत्यभ्युच्चयः ॥ यद्यपि द्युमूर्द्धत्वादिविशेष ईश्वरपक्षपाती द्योमाधारत्वादिर्जाठरपक्षपातीति प्रतिभानं समं तथापि पारमेश्वरो विशेषो जाठरे न सम्भवतीति बलवानित्यत आह ॥ अथ वेति ॥ एष द्युमूर्द्धत्वादिनिर्देश इत्यर्थः। इमां पृथिवीं द्यामपि ते एव द्यावापृथिव्यौ रोदसी तयोर्मध्यमन्तरिक्षञ्च यो भूताग्निर्भानुरूपेणाततान व्याप्तवान् स ध्यातव्य इत्यर्थः। जडमात्रस्य न ध्येयत्वमित्यत आह ॥ अथ वेति ॥ परमेश्वरदृष्ट्योपास्य जाठराग्निप्रतीक-

वत्। यदि चेह परमेश्वरो न विवक्ष्येत, केवल एव जाठरोऽग्निर्विवक्ष्येत, ततो मूर्ध्नैव सुतेजा इत्यादेर्विशेषस्यासम्भव एव स्यात्। यथा तु देवताभूताग्निव्यपाश्रयेणाप्यं विशेष उपपादयितुं न शक्यते, तथोत्तरसूत्रे वक्ष्यामः। यदि च केवल एव जाठरो विवक्ष्येत पुरुषेऽन्तःप्रतिष्ठितत्वं केवलं तस्य स्यान् न तु पुरुषत्वं, पुरुषमपि चैनमधीयते वाजसनेयिनः "स एषोऽग्निर्वैश्वानरो यत् पुरुषः स यो चैतमेवमग्निं वैश्वानरं पुरुषं पुरुषविधं पुरुषेऽन्तःप्रतिष्ठितं वेद" इति। परमेश्वरस्य तु सर्वात्मत्वात् पुरुषत्वं पुरुषेऽन्तःप्रतिष्ठितत्वञ्चोभयमुपपद्यते। ये तु पुरुषविधमपि चैनमधीयते इति सूत्रावयवं पठन्ति तेषामेषोऽर्थः। केवलजाठरपरिग्रहे पुरुषेऽन्तःप्रतिष्ठितत्वं केवलं स्यात्, न तु पुरुषविधत्वं। पुरुषविधमपि चैनमधीयते वाजसनेयिनः "पुरुषविधं पुरुषेऽन्तःप्रतिष्ठितं वेद" इति। पुरुषविधत्वञ्च प्रकरणात्। यदधिदैवतं द्युमूर्द्धत्वादिपृथिवीप्रतिष्ठितत्वान्तं, यच्चाध्यात्मं प्रसिद्धं मूर्द्धत्वादिचुबुकप्रतिष्ठितत्वान्तं, तत् परिगृह्यते॥

अत एव न देवता भूतञ्च॥ २७॥

यत् पुनरुक्तं भूताग्नेरपि मन्त्रवर्णे द्युलोकादिसम्बन्धदर्शनात्

वाचकाभ्यामग्निवैश्वानरशब्दाभ्यां द्युमूर्द्धत्वादिमानीश्वरो लक्ष्य इत्युक्त्वा कल्पान्तरमाह॥ अथ वा जाठर इति॥ अस्मिन् पक्षे प्राधान्येनेश्वरोपासना पूर्व्वत्र गुणतेति भेदः। उपाधिवाचिभ्यां पदाभ्यामुपहितो लक्ष्य इत्यर्थः। लक्षणाबीजमसम्भव आचष्टे॥ यदि चेति॥ पुरुषमपीत्यादिसूत्रशेषं व्याचष्टे॥ यदि च केवल इति॥ ईश्वरप्रती-

मूर्द्धैव सुतेजा इत्याद्यवयवकल्पनं तस्यैव भविष्यतीति तच्छरीराया देवतायाः वा ऐश्वर्य्ययोगादिति तत् परिहर्त्तव्यमत्रोच्यते। अत एवोक्तेभ्यो हेतुभ्यो न देवता वैश्वानरः, तथा भूताग्निरपि न वैश्वानरः। न हि भूताग्नेरौष्ण्यप्रकाशमात्रात्मकस्य द्युमूर्द्धत्वादिकल्पनोपपद्यते विकारस्य विकारान्तरात्मत्वासम्भवात्। तथा देवतायाः सत्यपैश्वर्य्ययोगे न द्युमूर्द्धत्वादिकल्पना सम्भवति, अकारणत्वात् परमेश्वराधीनैश्वर्य्यत्वाच्च। आत्मशब्दासम्भवश्च सर्व्वेष्वेषु पक्षेषु स्थित एव॥

साक्षादप्यविरोधं जैमिनिः॥ २८॥

पूर्व्वं जाठराग्निप्रतीको जाठराग्न्युपाधिको वा परमेश्वर उपास्य इत्युक्तमन्तःप्रतिष्ठितत्वाद्यनुरोधेन, इदानीन्तु विनैव

कत्वोपाधित्वशून्य इत्यर्थो विवक्ष्यते तदेति शेषः। यद्यः पुरुषः पूर्णः, स एषोऽग्निर्वैश्वानरशब्दितजाठरोपाधिक इति श्रुत्यर्थः। यो वेद स सर्व्वत्र भुङ्क्त इत्यर्थः। पुरुषत्वं पूर्णत्वमचेतनस्य जाठरस्य नेत्युक्त्वा पाठान्तरे पुरुषविधत्वं देहाकारत्वं तस्य नेत्याह॥ ये त्विति॥ ननु जाठरस्यापि देहस्थापित्वात् तद्विधत्वं स्यादित्यत आह॥ पुरुषविधत्वञ्च प्रकरणादिति॥ न देहस्थापित्वं पुरुषविधत्वं किन्तु विराड्देहाकारत्वमधिदैवं पुरुषविधत्वमध्यात्मञ्चोपासकमूर्द्धादिद्युकान्तेष्वङ्गेषु सम्पन्नत्वमीश्वरस्य पुरुषविधत्वमित्यर्थः। ईश्वरस्याङ्गेषु सम्पत्तिर्वक्ष्यते। एवं जाठरं निरस्य पक्षद्वयं निरस्यति॥ अत एवेति॥ सूत्रं व्याचष्टे॥ यत्पुनरित्यादिना॥ द्युमूर्द्धत्वादि, सर्वलोकः, फलभाक्त्वं, सर्वपापप्रमोदाद्यः, इति आत्मब्रह्मशब्दोपक्रमोक्ता हेतवः। तानेव स्मारयति॥ न हि भूताग्नेरित्यादिना॥ यो भानुनेति मन्त्रेणेश्वरदृष्ट्या महिमोक्त इति भावः। पूर्व्वमग्निवैश्वानरशब्दावीश्वरलक्षकावित्युक्तं, अधुना प्रतीकोपाधिपरित्यागेन विराट्पुरुषाकारस्य भगवतो वैश्वानरस्याध्यात्ममूर्द्धा-

प्रतीकोपाधिकल्पनाभ्यां साक्षादपि परमेश्वरोपासनपरिग्रहे न कश्चिद्विरोध इति जैमिनिराचार्यो मन्यते। ननु जाठराग्न्यपरिग्रहेऽन्तःप्रतिष्ठितत्ववचनं शब्दादीनि च कारणानि विरुद्धोरन्निति। अत्रोच्यते। अन्तःप्रतिष्ठितत्ववचनं तावन्न विरुद्ध्यते। न हीह पुरुषविधं पुरुषेऽन्तःप्रतिष्ठितं वेदेति जाठराग्न्यभिप्रायेणेदमुच्यते तस्याप्रकृतत्वादसंग्रथ्यितत्वाच्च। कथं तर्हि यत् प्रकृतं मूर्द्धादिषु चुबुकान्तेषु पुरुषावयवेषु पुरुषविधत्वं कल्पितं तदभिप्रायेणेदमुच्यते पुरुषविधं पुरुषेऽन्तःप्रतिष्ठितं वेदेति, यथा वृक्षे शाखां प्रतिष्ठितां पश्यतीति तद्वत्। अथ वा यः प्रकृतः परमात्माऽध्यात्ममधिदैवतञ्च पुरुषविधत्वोपाधिः, तस्य यत् केवलं साक्षिरूपं तदभिप्रायेणेदमुच्यते पुरुषविधं पुरुषेऽन्तःप्रतिष्ठितं वेदेति। निश्चिते च पूर्वापरालोचनवशेन परमात्मपरिग्रहे तद्विषय एव वैश्वानरशब्दः केनचिद्योगेन

दिचुबुकाङ्गेषु सम्याद्योपास्यत्वाङ्गीकारेऽपि न शब्दादिविरोधः शब्दयोरीश्वरे योगरूढ्या मुख्यत्वादन्तःस्थत्वादीनाञ्च तत्र सम्भवादित्याह॥ साक्षादपीति॥ साक्षात्पदस्यार्थमाह॥ विनैवेति॥ जाठराग्निसम्बन्धं विनेश्वरस्योपास्यत्वेऽपि शब्दाद्यविरोधं जैमिनिर्मन्यत इत्यर्थः। इदमन्तस्थत्वमुदरस्थत्वरूपं नोच्यते किन्तु नखादिशिखान्तावयवसमुदायात्मकपुरुषशरीरे मूर्द्धादिचुबुकान्ताङ्गानि वृक्षे शाखावत् प्रतिष्ठितानि तानि, तेषु सम्पन्नो वैश्वानरः पुरुषेऽन्तःप्रतिष्ठित इत्युच्यते। अथो यथा शाखास्थस्य पक्षिणो वृक्षान्तस्थत्वं तथा वैश्वानरस्य पुरुषान्तःस्थत्वमित्याह॥ न हीह पुरुषविधमित्यादिना॥ अन्यादिशब्दस्येश्वरवाचित्वाज्जाठराग्नेरसंग्रथ्यितत्वं। अत्रेश्वरस्य पुरुषावयवेषु सम्यादनात् पुरुषविधत्वमन्तस्थत्वञ्चेत्यर्थः॥ पक्षान्तरमाह॥ अथ वेति॥

वर्त्तिष्यते, विश्वस्यायं नरस्येति, विश्वेषां वाऽयं नरः, विश्वे वा नरा अस्येति विश्वानरः परमात्मा सर्व्वात्मत्वात्, विश्वानर एव वैश्वानरस्तद्धितेऽनन्यार्थो राक्षसवायसादिवत्। अग्निशब्दोऽप्यग्रणीत्वादियोगाश्रयणेन परमात्मविषय एव भविष्यति। गार्हपत्यादिकल्पनं प्राणाङ्गत्यधिकरणत्वञ्च परमात्मनोऽपि सर्व्वात्मत्वादुपपद्यते। कथं पुनः परमेश्वरपरिग्रहे प्रादेशमात्रश्रुतिरुपपद्यते, इति तां व्याख्यातुमारभ्यते॥

अभिव्यक्तेरित्याश्मरथ्यः॥ २९॥

अतिमात्रस्यापि परमेश्वरस्य प्रादेशमात्रत्वमभिव्यक्तिनिमित्तं स्यात्। अभिव्यज्यते किल प्रादेशमात्रपरिमाणः परमेश्वर उपासकानां कृते। प्रदेशविशेषेषु हृदयादिषु उपलब्धिस्थानेषु विशेषेणाभिव्यज्यते। अतः परमेश्वरेऽपि प्रादेशमात्रश्रुतिरभिव्यक्तेरुपपद्यत इत्याश्मरथ्य आचार्यो मन्यते॥

युरुषविधत्वं पूर्ववत्। अन्तस्थत्वं माध्यस्थ्यं साक्षित्वमित्यर्थः। एवमन्तस्थत्वमीश्वरे व्याख्याय द्यौरादीनि व्याचष्टे॥ निश्चिते चेति॥ विश्वस्यायं नरो जीवश्च सर्व्वात्मत्वात्। विश्वेषां विकाराणां वा नरः कर्त्ता। विश्वे सर्व्वे नरा जीवा अस्यात्मत्वेन नियम्यत्वेन वा सन्तीति विश्वानरः, रक्ष एव राक्षस इतिवत् स्वार्थे तद्धितप्रत्ययः। नरे संज्ञायामिति पूर्वपदस्य दीर्घता। अग्रिधातोर्गत्यर्थस्य निप्रत्ययान्तस्य रूपमग्रिरिति। अङ्गयति गमयत्यग्र्यं कर्म्मणः फलं प्रापयतीति अग्रिरग्रणीरुक्तः। अभितोऽगतीति वा अग्रिः, वैश्वानरोपासकस्यातिथिभोजनात् पूर्वं प्राणाग्निहोत्रं विद्याङ्गत्वेन विहितं, तदर्थमग्निरेतादिकल्पनं प्रधानाविरोधेन नेतव्यमितित्याह॥ गार्हपत्येति॥ माद्यां परि-

अनुस्मृतेर्बादरिः ॥ ३० ॥

प्रादेशमात्रहृदयप्रतिष्ठितेन वाऽयं मनसाऽनुस्मर्यते ततः प्रादेशमात्र इत्युच्यते। यथा प्रस्थमिता यवाः प्रस्था इत्युच्यन्ते तद्वत्। यद्यपि च यवेषु स्वगतमेव परिमाणं प्रस्थसम्बन्धाद्व्यपदिश्यते न चेह परमेश्वरगतं किञ्चित् परिमाणमस्ति यद् हृदयसम्बन्धाद्व्यपदिश्येत तथापि प्रयुक्तायाः प्रादेशमात्रश्रुतेः, सम्भवति यथा कथञ्चिदनुस्मरणमालम्बनमित्युच्यते। प्रादेशमात्रत्वेन वाऽयमप्रादेशमात्रोऽनुस्मरणीयः प्रादेशमात्रशब्दार्थवत्तायै। एवमनुस्मृतिनिमित्ता परमेश्वरे प्रादेशमात्रश्रुतिरिति बादरिराचार्यो मन्यते ॥

सम्पत्तेरिति जैमिनिस्तथा हि दर्शयति ॥ ३१ ॥

सम्पत्तिनिमित्ता वा स्यात् प्रादेशमात्रश्रुतिः। कुतः। तथा हि समानप्रकरणं वाजसनेयिब्राह्मणं द्युप्रभृतीन् पृथिवीपर्य्य-

---

मात्रमतिक्रान्तोऽतिमात्रः तस्य विभोरित्यर्थः। उपासकानां कृतेऽनुग्रहाय प्रादेशमात्रोऽभिव्यज्यते प्रादेशेषु वा मीयतेऽभिव्यज्यत इति प्रादेशमात्रः। मतान्तरमाह ॥ अनुस्मृतेरिति ॥ प्रादेशेन मनसा मितः प्रादेशमात्र इत्यर्थः ॥ यथा कथञ्चिदिति ॥ मनस्यं प्रादेशमात्रत्वं स्मृतिद्वारा स्मर्य्यमाणे कल्पितं श्रुतेरालम्बनमित्यर्थः ॥ सूत्रस्यार्थान्तरमाह ॥ प्रादेशेति ॥ सम्पत्तिं श्रुत्युक्तां प्रादेशमात्रश्रुतेर्गतिमाह ॥ सम्पत्तेरिति ॥ ब्राह्मणं पठति ॥ प्रादेशमात्रमिवेति ॥ अपरिच्छिन्नमपीश्वरं प्रादेशमात्रत्वेन सम्पत्त्या कल्पितं सम्यग्विदितवन्तो देवास्तमेवेश्वरमभिप्रत्यक्षेण सम्प्राप्ताः प्राप्तवन्तो ह वै पूर्वकाले ततो वो युष्मभ्यं तथा द्युप्रभृतीनवयवान् वक्ष्यामि। यथा प्रादेशमात्रं प्रादेशपरिमाण-

नान् चैलोक्यात्मनो वैश्वानरस्यावयवानध्यात्ममूर्द्धप्रभृतिषु चिबुकपर्य्यन्तेषु देहावयवेषु सम्यादयत् प्रादेशमात्रसम्पत्तिं परमेश्वरस्य दर्शयति। "प्रादेशमात्रमिव ह वै देवाः सुविदिता अभिसम्पन्नाः तथा नु व एतान् वक्ष्यामि यथा प्रादेशमात्रमेवाभिसम्पादयिष्यामीति स होवाच मूर्द्धानमुपदिशन्नुवाच, एष वा अतिष्ठा वैश्वानरः, इति। चक्षुषो उपदिशन्नुवाच, एष वै सुतेजा वैश्वानरः, इति। नासिके उपदिशन्नुवाच, एष वै पृथग्वर्त्मात्मा वैश्वानरः, इति। मुखमाकाशमुपदिशन्नुवाच, एष वै बहुलो वैश्वानरः, इति। मुख्या अप उपदिशन्नुवाच, एष वै रयिर्वैश्वानरः, इति। चुबुकमुपदिशन्नुवाच, एष वै प्रतिष्ठा वैश्वानरः" इति। चुबुकमित्यधरमुखफलकमुच्यते। यद्यपि वाजसनेयके द्यौरतिष्ठात्वगुणा समाम्ना-

---

मनतिक्रम्य मूर्द्धाद्यध्यात्माङ्गेषु वैश्वानरं सम्पादयिष्यामीति प्राचीनशालादीन् प्रति राजा प्रतिज्ञाय स्वकीयमूर्द्धानमुपदिशन् करेण दर्शयन्नुवाच। एष वै मे मूर्द्धा भूरादील्लोकानतीत्य उपरि तिष्ठतीत्यतिष्ठाऽसौ द्युलोको वैश्वानरः॥ तस्य मूर्द्धेति यावत्॥ अध्यात्ममूर्द्धाभेदेनाधिदैवमूर्द्धा सम्पाद्य ध्येय इत्यर्थः। एवञ्चक्षुरादिष्वूहनीयं॥ स्वकीयचक्षुषी दर्शयन् एष वै सुतेजाः सूर्य्यो वैश्वानरस्य चक्षुरित्युवाच। नासिकापदेन तन्निष्ठः प्राणो लक्ष्यते तस्मिन्नाध्यात्मिकप्राणेऽधिदैवप्राणस्य वायोर्दृष्टिमाह॥ नासिके इति॥ अत्र सर्व्वत्र वैश्वानरशब्दस्तदङ्गपरः। मुखस्थं मुख्यं तस्मिन्नधिदैवं बहुलाकाशदृष्टिः मुखस्थजलाशरूपासु रश्मिग्रन्थितत्तदीयवक्त्रिस्रोदकदृष्टिः चुबुके प्रतिष्ठा पादरूपा पृथिवी द्रष्टव्या। ननु गुणवैषम्ये न विद्ययोर्भेदादग्निरहस्यश्रुत्यनुसारेण छान्दोग्यस्थप्रादेशमात्रश्रुतिः कथं व्याख्येयेत्याशङ्क्याह॥

यते, आदित्यश्च सुतेजस्त्वगुणः, छान्दोग्ये पुनर्द्यौः सुतेजस्त्व-गुणा समाम्नायते, आदित्यश्च विश्वरूपत्वगुणः, तथापि नैतावता विशेषेण किञ्चिद्धीयते प्रादेशमात्रश्रुतेरविशेषात् सर्व्वशाखा-प्रत्ययवत्त्वाच्च। सम्पत्तिनिमित्तां प्रादेशमात्रश्रुतिं युक्ततरां जैमिनिराचार्य्यो मन्यते॥

आमनन्ति चैनमस्मिन्॥ ३२॥

आमनन्ति चैनं परमेश्वरमस्मिन् मूर्द्धचुवुकान्तराले जाबालाः। "य एषोऽनन्तोऽव्यक्त आत्मा सोऽविमुक्ते प्रतिष्ठित इति सोऽविमुक्तः कस्मिन् प्रतिष्ठित इति वरणायां नाश्यां च मध्ये प्रतिष्ठित इति कतमा वरणा कतमा नाशीति। तज्जघनामेव वरणां नासिकाञ्चेति निरुच्य सर्व्वाणीन्द्रियकृतानि पापानि वारयति सा वरणा सर्व्वाणीन्द्रियकृतानि पापानि नाशयति चेति सा नाशीति वरणा नाशीति" निरुच्य पुनरप्यामनन्ति।

यद्यपीत्यादिना॥ एतावताल्पवैषम्येन बह्वतरप्रत्यभिज्ञासिद्धं विद्यैक्यं न हीयते शाखाभेदेऽपि सर्व्वशाखासु प्रतीयमानं वैश्वानराद्युपासनं एकमिति न्यायस्य वक्ष्यमाणत्वाच्च। अतिष्ठात्वगुणश्छान्दोग्य उपसंहर्त्तव्यः। विश्वरूपत्वगुणश्च वाजिभिर्ग्राह्यः। तथा च द्युमूर्द्ध्नयोः सुतेजस्त्वं सममतिष्ठात्वविश्वरूपत्वयोर्व्यवस्था। यद्वा शाखाभेदेन गुणव्यवस्थाऽस्तु न विद्याभेद इति भावः। प्रादेशत्वस्य सम्पत्तिप्रयुक्तत्वे श्रुत्यन्तरं सम्पादयति॥ आमनन्तीति॥ य एषोऽनन्तोऽपरिच्छिन्नः अतोऽत्यन्तो दुर्विज्ञेयस्तं कथं जानीयामित्यत्रैः प्रश्ने याज्ञवल्क्यस्योत्तरं। स ईश्वरो अविमुक्ते कामादिभिर्बद्धो जीवो भेदकल्पनया प्रतिष्ठित उपास्यः पुनरत्रिप्रश्नः स इत्युत्तरं वरणायामिति। एवं प्रश्नोत्तरे अग्रेऽपि ज्ञेये।

"कतमश्चास्य स्थानं भवतीति भ्रुवोर्घ्राणस्य च यः सन्धिः। स एष द्युलोकस्य परस्य च सन्धिर्भवति" इति। तस्मादुपपन्ना परमेश्वरे प्रादेशमात्रश्रुतिः। अभिविमानश्रुतिः प्रत्यगात्मताभिप्राया। प्रत्यगात्मतया सर्व्वैः प्राणिभिरभिविमीयत इत्यभिविमानः। अभिगतो वाऽयं प्रत्यगात्मत्वात्। विमानश्च मानवियोगादित्यभिविमानोऽभिविमिमीते वा सर्व्वं जगत्कारणत्वादित्यभिविमानः, तस्मात् परमेश्वरो वैश्वानर इति सिद्धं॥ इति श्रीमच्छारीरकमीमांसाभाष्ये शङ्करभगवत्पूज्यपादकृतौ प्रथमाध्यायस्य द्वितीयपादः॥

तच्च श्रुतौ इमामेव भ्रूसन्धितां नासिकां निरुच्येति भाष्ययोजना। सर्व्वानिन्द्रियकृतान् दोषान् वारयतीति वरणा भ्रूः। सर्व्वान् दोषान् नाशयतीति नाशा नासिकेति निर्व्वचनं श्रुतं। नासाभ्रुवोर्जीवद्वारेश्वरस्थानत्वध्यानात् पापवारकत्वमिति मन्तव्यं। तयोर्मध्येऽपि विशिष्य जीवस्य स्थानं पृच्छति कतमदिति भ्रुवोरित्युत्तरं। प्राणस्येति पाठेऽपि घ्राणस्येत्यर्थः। स एष सन्धिर्द्युलोकस्य स्वर्गस्य परस्य च ब्रह्मलोकस्य सन्धित्वेन ध्येय इत्याह॥ स एष इति॥ आभिमुख्येनाहं ब्रह्मेति विमिमीयते ज्ञायते इत्यभिविमानः प्रत्यगात्मा। अभिगतश्चासौ विमानः सर्व्वस्वरूपत्वे सत्यानन्त्यात् मानमत्र परिमाणं। अभिविमिमीतेति निर्म्मिमीते। तस्माद्वैश्वानरवाक्यमुपास्ये ब्रह्मणि समन्वितमिति सिद्धं॥ इति श्रीमत्परमहंसपरिव्राजकाचार्य्यश्रीगोविन्दानन्दभगवत्पादकृतौ श्रीमच्छारीरकमीमांसाव्याख्यायां भाष्यरत्नप्रभायां प्रथमाध्यायस्य द्वितीयः पादः॥

नमः परमात्मने।

द्युभ्वाद्यायतनं स्वशब्दात् ॥ १ ॥

इदं श्रूयते "यस्मिन् द्यौः पृथिवी चान्तरिक्षमोतं मनः सह प्राणैश्च सर्वैस्तमेवैकं जानथ, आत्मानमन्या वाचो विमुञ्चथामृतस्यैष सेतुः" इति। अत्र यदेतद् द्युप्रभृतीनामोतत्ववचनादायतनं किञ्चिदवगम्यते तत् किं परं ब्रह्म स्यादाहोस्विदर्थान्तरमिति सन्दिह्यते। तत्रार्थान्तरं किमप्यायतनं स्यादिति प्राप्तं। कस्मात्। अमृतस्यैष सेतुरिति श्रवणात्। पारवान् हि लोके सेतुः प्रख्यातः। न च परस्य ब्रह्मणः पारवत्त्वं शक्य-

---

नमः परमात्मने।

द्युद्योतभूमपदमक्षरमीक्षणीयं
श्रीराममल्पहृदि भान्तमधीश्वितारं।
इन्द्रादिवेद्यमखिलस्य च शासितारं
ज्योतिर्नभः पदमनिन्द्रमजं भजेऽहं ॥

एवं रूढियुक्तपदबऋलानां प्रायेण सविशेषवाक्यानां समन्वयो द्वितीयपादे दर्शितः। अधुना यौगिकपदबऋलानां निर्विशेषप्रधानानां वाक्यानां समन्वयं वक्तुं तृतीयपाद आरभ्यते ॥ अतोऽत्राधिकरणानां श्रुत्यध्यायपादसङ्गतयस्तत्र पूर्वमुपक्रमस्थसाधारणशब्दस्य वाक्यशेषस्य-द्युमूर्द्धत्वादिना ब्रह्मपरत्वमुक्तं। तद्वदत्राप्युपक्रमस्थसाधारणायतनत्वस्य वाक्यशेषस्थसेतुश्रुत्या वस्तुतः परिच्छिन्ने प्रधानादौ व्यवस्थेति दृष्टान्त लक्षणाधिकरणसङ्गतिः। पूर्वपक्षे प्रधानाद्युपाप्तिः। सिद्धान्ते निर्विशेषब्रह्मधीरिति फलं ॥ मुण्डकवाक्यमुदाहरति ॥ इदमिति ॥ यस्मिन् लोकत्रयात्मा विराट् प्राणैः सर्वैः सह मनः सूत्रात्मकं चकारादव्याकृतं कारणं ओतं कल्पितं तदपवादेन तमेवाधिष्ठानात्मानं प्रत्यगभिन्नं

शुद्धिपत्रम्।

पृष्ठाङ्कः।	पंक्त्यङ्कः।	अशुद्धम्।	शुद्धम्।
२२७	५	नानेकरसता	नानैकरसता
,,	२०	मैत्रेयिः	मैत्रेयि
,,	२३	तद्गृह्णे	तदयह्णे
२२८	१२	ब्रातः	ब्रातः
२३१	४	कुतश्च न	कुतश्चन

मभ्युपगन्तुमनन्तमपारमिति श्रवणात्। अर्थान्तरे चायतने परिगृह्यमाणे स्मृतिप्रसिद्धं प्रधानं परिग्रहीतव्यं, तस्य हि कारणत्वादायतनत्वोपपत्तेः। श्रुतिप्रसिद्धो वा वायुः स्यात् "वायुर्वाव गौतम तत्सूचं वायुना वै गौतम सूत्रेणायं च लोकः परश्च लोकः सर्वाणि च भूतानि सन्दृब्धानि भवन्ति" इति। वायोरपि विधरणत्वश्रवणात्। शारीरो वा स्यात्, तस्यापि भोक्तृत्वाद्भोग्यं प्रपञ्चं प्रत्यायतनत्वोपपत्तेरित्येवं प्राप्त इदमाह, द्युभ्वाद्यायतनमिति। द्यौश्च भूश्च द्युभुवौ द्युभुवावादौ यस्य तदिदं द्युभ्वादि। यदेतस्मिन् वाक्ये द्यौः पृथिव्यन्तरिक्षं मनः प्राणा इत्येवमात्मकं जगदेतत्वेन निर्दिष्टं तस्यायतनं परं ब्रह्म भवितुमर्हति। कुतः। स्वशब्दादात्मशब्दादित्यर्थः। "आत्मशब्दो ह्योह भवति तमेवैकं जानथ आत्मानं" इति। आत्म-

---

जानथ अवगादिना अन्या अनात्मवाचो विमुञ्चथ विशेषेण निःशेषं त्यजथ एष वाग्विमोकपूर्वकात्मसाक्षात्कारोऽमृतस्य मोक्षस्यासारापारदुर्वारसंसारवार्धेः परपारस्य सेतुरिव सेतुः प्रापक इति माढवत् श्रुतिर्मुमुक्षूनुपदिशति। तच्चायतनत्वस्य साधारणधर्मस्य दर्शनात् संशयमाह ॥ तंत् किमिति ॥ अमृतस्य ब्रह्मणः सेतुरिति यथा ब्रह्मणोभिन्नत्वेन सेतोः श्रुतत्वादेषशब्दपरामृष्टं द्युभ्वाद्यायतनमब्रह्मैव सेतुरिव सेतुरित्याह ॥ अमृतस्येति ॥ भेदश्रवणात् सेतुरिति श्रवणाच्चेत्यर्थः। तत्र भेदश्रवणं व्याख्यातं सेतुश्रवणं स्वयं विवृणोति ॥ पारवारिति ॥ अनन्तं कालतः। अपारं देशतः, जलविधारकमुख्यसेतोरग्रहणासम्भवात् गौणसेतुग्रहे कर्त्तव्ये मुख्यसेत्वविनाभूतपारवत्त्वगुणवत्त्वेव कश्चिद् ग्राह्यः। न तु मुख्यस्यानियतविधारणगुणवानीश्वर इति भावः। यथा लोके मणयः सूत्रेण ग्रथिता एवं हे गौतम समष्टिलिङ्गात्मकवायुना स्यूतानि सर्वाणि सन्दृब्धानि ग्रथितानि

शब्दश्च परमात्मपरिग्रहे सम्यगवकल्पते नार्थान्तरपरिग्रहे। क्वचिच्च स्वशब्देनैव ब्रह्मण आयतनत्वं श्रूयते "सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः" इति। स्वशब्देनैव चेह पुरस्तादुपरिष्टाच्च ब्रह्म सङ्कीर्त्यते "पुरुष एवेदं विश्वं कर्म्म तपो ब्रह्म परामृतं" इति, "ब्रह्मैवेदममृतं पुरस्तात् पश्चाद् ब्रह्म दक्षिणतश्चोत्तरेण" इति च। तच्च त्वायतनायतनवद्भावश्रवणात् "सर्व्वं ब्रह्म" इति च सामानाधिकरण्यात्। यथाऽनेकात्मको वृक्षः शाखास्कन्धो मूलञ्चेत्येवं नानारसो विचित्र आत्मेत्याशङ्का सम्भवति। तां निवर्त्तयितुं स्वावधारणमाह "तमेवैकं जानथ आत्मानं" इति। एतदुक्तं भवति न कार्य्यप्रपञ्चविशिष्टो विचित्र आत्मा विज्ञेयः। किं तर्हि। अविद्याकृतं कार्य्यप्रपञ्चं "विद्यया प्रविलापयन्नस्तमेवैकमायतनभूतमात्मानं जानीथैकरसं" इति।

भवन्तीति श्रुत्यर्थः। आत्मशब्दात् पक्षद्वयमप्ययुक्तमित्यत आह॥ शारीरो वेति। सद्वितीयत्वेन सेतुशब्दोपपत्तेरित्यर्थः। नन्वात्मशब्दो जीवे सम्भवतीत्यत आह॥ आत्मशब्दस्येति॥ उपाधिपरिच्छिन्नस्य जीवस्य सर्व्ववस्तुप्रत्यक्षं मुख्यं नास्तीत्यर्थः। उपक्रमस्यासाधारणायतनत्वस्य गौणसेतुत्वलिङ्गात् प्रथमश्रुतात्मश्रुत्या ब्रह्मत्वनिश्चय इति भावः। स्वशब्दादित्यस्यार्थान्तरमाह॥ क्वचिच्चेति॥ प्रजानामुत्पत्तौ सदेव मूलं स्थितावायतनं लयप्रतिष्ठेति ब्रह्मवाचिसत्पदेन छान्दोग्ये ब्रह्मण आयतनत्वश्रुतेरत्रापि तथेत्यर्थः। अर्थान्तरमाह॥ स्वशब्देनैवेति॥ यस्मिन् द्यौरिति वाक्यात् पूर्व्वोत्तरवाक्ययोः पुरुषब्रह्मादिशब्देन ब्रह्मसङ्कीर्त्तनान्मध्येऽपि ब्रह्म ग्राह्यमित्यर्थः॥ पुरुष इति पूर्व्ववाक्यं, ब्रह्मैवेत्युत्तरवाक्यं, सर्व्वासु दिक्षु स्थितं सर्व्वं ब्रह्मैवेत्यर्थः। उत्तरेणोत्तरस्यां दिशि उदाहृतवाक्यस्य सविशेषब्रह्मपरत्वमाशङ्क्य वाक्यं व्याचष्टे॥ तच्चेत्यादिना॥ सामानाधिकरण्यादिति च आत्मेति सम्बन्धः। यस्मिन् सर्व्वं

यथा यस्मिन्नास्ते देवदत्तः तदानयेत्युक्त आसनमेवानयति न देवदत्तं तद्वदायतनभूतस्यैवैकरसस्यात्मनो विज्ञेयत्वमुपदिश्यते विकारानृताभिसम्बन्धस्य चापवादः श्रूयते "मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति" इति। सर्वं ब्रह्मेति तु सामानाधिकरण्यं प्रपञ्चविलापनार्थं नानेकरसताप्रतिपादनार्थं "स यथा सैन्धवघनोऽनन्तरोऽवाह्यः कृत्स्नो रसघन एवैवं वा अरेऽयमात्माऽनन्तरोऽवाह्यः कृत्स्नः प्रज्ञानघन एव" इत्येकरसताश्रवणात्। तस्माद्युभ्वाद्यायतनं परं ब्रह्म। यत् तूक्तं सेतुश्रुतेः सेतोश्च पारवत्त्वोपपत्तेर्ब्रह्मणोऽर्थान्तरेण द्युभ्वाद्यायतनेन भवितव्यमिति, अत्रोच्यते। विधरणत्वमात्रमत्र सेतुश्रुत्या विवक्ष्यते न पारवत्त्वादि। न हि मृद्दारुमयो लोके सेतुर्दृष्ट इत्यत्रापि मृद्दारुमय एव सेतुरभ्युपगम्यते। सेतुशब्दार्थोऽपि विध-

---

मोतन्तमेवैकमित्येवकारैकशब्दाभ्यां निर्विशेषं ज्ञेयमित्युक्त्वा हेत्वन्तरमाह ॥ विकारानृतेति ॥ विकारे अनृते कल्पिते अभिसन्धोऽभिमानो यस्य तस्यानर्थभाक्त्वेन निन्दाश्रुतेश्च कूटस्थसत्यं ज्ञेयमित्यर्थः। कथं तर्हि सामानाधिकरण्यं तत्राह ॥ सर्वं ब्रह्मेति ॥ यच्चोरः स स्थाणुरितिवद् यत् सर्वं तद्ब्रह्मेति सर्वोद्देशेन ब्रह्मत्वविधानाद् बाधनार्थं, न तु यद्ब्रह्म तत्सर्वमिति नानारसत्वार्थमित्यर्थः। तत्र नियामकमाह ॥ स यथेति ॥ लवणपिण्डोऽन्तर्बहिश्च रसान्तरशून्यः सर्वो लवणैकरसो यथा, एवमरे मैत्रेयिः चिदेकरस आत्मेत्यर्थः। यद्यपि पारवत्त्वसावयवत्वादिकं मुख्यसेत्वभिचारि तथापि सेतोर्जलादिबन्धनरूपं यद्विधारणं तदेव व्यभिचारित्वेऽपि सेतुपदार्थैकदेशत्वाद्गुणत्वेन ग्राह्यं न तु पदार्थबहिर्भूतं पारवत्त्वादिकमित्याह ॥ अत्रोच्यत इति ॥ दृष्टत्वात्तद्ग्रहेऽतिप्रसङ्गमाह ॥ न हीति ॥ अत्र श्रुतौ परेणेति शेषः। विधारणस्य शब्दा-

रणत्वमात्रमेव न पारवत्त्वादि षिञो बन्धनकर्मणः सेतुशब्द-व्युत्पत्तेः। अपर आह तमेवैकं जानथ आत्मानमिति। यदेतत् सङ्कीर्त्तितमात्मज्ञानं यच्चैतदन्या वाचो विमुञ्चथेति वाग्वि-मोचनं तदत्रामृतत्वसाधनत्वादमृतस्यैष सेतुरिति सेतुश्रुत्या सङ्कीर्त्यते न तु द्युभ्वाद्यायतनं। तत्र यदुक्तं सेतुश्रुतेर्ब्रह्मणो ऽर्थान्तरेण द्युभ्वाद्यायतनेन भवितव्यमित्येतदयुक्तं॥

मुक्तोपसृप्य व्यपदेशात्॥ २॥

दृतश्च परमेव ब्रह्म द्युभ्वाद्यायतनं यस्मान्मुक्तोपसृप्यताऽस्य व्यपदिश्यमाना दृश्यते। मुक्तैरुपसृप्यं मुक्तोपसृप्यं। देहादिष्व-नात्मस्वहमस्मीत्यात्मबुद्धिरविद्या, ततस्तत्पूजनादौ रागस्तत्प-रिभवादौ च द्वेषः, तदुच्छेददर्शनाद्भयं मोहश्चेत्येवमयमनन्त-भेदोऽनर्थव्रातः सन्ततः सर्व्वेषां नः प्रत्यक्षः, तद्विपर्य्ययेणाविद्या रागद्वेषादिदोषमुक्तैरुपसृप्यं गम्यमेतदिति द्युभ्वाद्यायतनं प्रकृत्य व्यपदेशो भवति। कथं।

र्थत्वं स्फुरयति॥ षिञ इति॥ सिनोति बध्नातीति सेतुपदार्थैकदेशो विधारणमित्यर्थः। तथा चामृतपदस्य भावप्रधानत्वादमृतत्वस्य सेतु-र्विधारकं ब्रह्मास्यैवामृतत्वं नान्यस्येत्यर्थः। यद्वा द्युभ्वाद्याधारो ब्रह्म न सेतुशब्दार्थः किन्त्वव्यवहितं ज्ञानमित्याह॥ अपर इति॥ फलितमाह॥ तत्र यदुक्तमिति॥ ज्ञाने सेतौ गृहीते सतीत्यर्थः। मुक्तैरुपसृप्यं प्रत्य-क्षेण प्राप्यं यद् ब्रह्म तस्याश्रोक्तेरिति सूचार्थः। मुक्तिप्रतियोगिनं बन्धं दर्शयति॥ देहादिष्विति॥ तद्विपर्य्ययेणेति उक्तपञ्चक्लेशात्मकबन्धनि-वृत्त्याऽऽत्मना स्थितमित्यर्थः। यथा नद्यो गङ्गाद्या नामरूपे विहाय समुद्रात्मना तिष्ठन्ति तथा ब्रह्मात्मविदपि संसारं विहाय परात्

"भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्व्वसंशयाः।
क्षीयन्ते चास्य कर्म्माणि तस्मिन् दृष्टे परावरे" ॥

इत्युक्ता ब्रवीति "तथा विद्वान्नामरूपादिमुक्तः परात् परं पुरुषमुपैति दिव्यं" इति ब्रह्मणश्च मुक्तोपसृप्यत्वं प्रसिद्धं शास्ते।

"यदा सर्व्वे प्रमुच्यन्ते कामा येऽस्य हृदि स्थिताः, अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते" ॥

इत्येवमादौ। प्रधानादीनान्तु न क्वचिन्मुक्तोपसृप्यत्वं प्रसिद्धमस्ति। अपि च "तमेवैकं जानथ आत्मानमन्या वाचो विमुञ्चथ" इति वाग्विमोकपूर्व्वकं विज्ञेयत्वमिह द्युभ्वाद्यायतनस्योच्यते। तच्च श्रुत्यन्तरे ब्रह्मणो दृष्टं।

"तमेव धीरो विज्ञाय प्रज्ञां कुर्व्वीत ब्राह्मणः।
नानुध्यायाद्बहूञ्छब्दान् वाचो विग्लपनं हि तत्" ॥ इति।

कारणादव्यक्तात् परं पूर्णं स्वयं ज्योतिरानन्दं प्रत्यक्षेण प्राप्य तिष्ठतीत्याह ॥ तथा विद्वानिति ॥ इदं प्रधानादेः किं न स्यादत आह ॥ ब्रह्मणश्चेति ॥ अस्य मुमुक्षोः हृदीति पदेनात्मधर्म्मत्वं कामानां निरस्तं यदा कामनिवृत्तिरथ तदाऽमृतो भवति मरणहेत्वभावान्न केवलमनर्थनिवृत्तिः किन्त्वत्र देहे तिष्ठन्नेव ब्रह्मानन्दमश्नुत इत्यर्थः। लिङ्गान्तरमाह ॥ अपि चेति ॥ धीरो विवेकी तमेवात्मानं विज्ञाय विशुद्धं लक्ष्यपदार्थं ज्ञात्वा वाक्यार्थज्ञानं कुर्य्यात्। ज्ञानार्थिनो ज्ञानप्रतिबन्धककर्म्मकाण्डादेर्वैमुख्यमाह ॥ नेति ॥ बहूनित्युक्ता अल्पान् वेदान्तशब्दानङ्गीकरोति।

"अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा।
जिह्वामूलञ्च दन्ताश्च नासिकोष्ठौ च तालु च" ॥ इति।

तस्मादपि द्युभ्वाद्यायतनं परं ब्रह्म ॥

नानुमानमतच्छब्दात् ॥ ३ ॥

यथा ब्रह्मणः प्रदिपादको* वैशेषिको हेतुरुक्तो नैवमर्थान्तरस्य वैशेषिको हेतुः प्रतिपादकोऽस्तीत्याह। नानुमानं साङ्ख्यस्मृतिपरिकल्पितं प्रधानमिह द्युभ्वाद्यायतनत्वेन प्रतिपत्तव्यं। कस्मात्। अतच्छब्दात्। तस्याचेतनस्य प्रधानस्य प्रतिपादकःशब्दस्तच्छब्दो न तच्छब्दोऽतच्छब्दः। न ह्यचाचेतनस्य प्रधानस्य प्रतिपादकः कश्चिच्छब्दोऽस्ति येनाचेतनं प्रधानं कारणत्वेनायतनत्वेन वाऽवगम्यते। तद्विपरीतस्य चेतनस्य प्रतिपादकशब्दोऽचास्ति "यः सर्व्वज्ञः सर्व्ववित्" इत्यादिः। अत एव न वाक्यशेषोऽपीह द्युभ्वाद्यायतनत्वेनाश्रीयते ॥

प्राणभृच्च ॥ ४ ॥

यद्यपि प्राणभृतो विज्ञानात्मन आत्मत्वं चेतनत्वञ्च सम्भ-

एतानि वागिन्द्रियस्थानत्वाद् वाक्यशब्देनोच्यन्ते तेषां श्रोघशमाशमनात्मशब्दोचारणफलं तज्ज्ञानान्मनसो ग्लानिमाचष्टमित्यर्थः ॥ वैशेषिक इति ॥ असाधारण आत्मशब्दादिरित्यर्थः। अतच्छब्दादित्यस्यार्थान्तरमाह ॥ तद्विपरीतस्येति ॥ अत एवातच्छब्दादेव प्राणभृच्चेति सूत्रे चकारः पूर्व्वसूत्रस्थनञोऽनुषङ्गार्थः। सर्व्वज्ञपदसमानाधिकरण आत्मशब्दो न जीववाचीत्यतच्छब्दस्तस्मादित्यर्थः। ननु नानुमानप्राणभृतावतच्छब्दादित्येकमेव सूत्रं किमर्थं न कृतं, उभयनिरासहेतोरेकत्वादित्यत आह ॥ एवमिति ॥ योगः सूत्रं, उत्तरसूत्रस्थहेतूनां जीवमात्रनिरासेनान्वयेऽपि सुबोधार्थं प्राणभृच्चेति प्रथक् सूत्रकरणमित्यर्थः। तानेव हेतूनाकाङ्क्षाद्वारा व्याचष्टे ॥ कृतञ्च नेत्यादिना ॥

* असाधारणेति मु० पा०।

वति तथाऽप्युपाधिपरिच्छिन्नज्ञानस्य सर्व्वज्ञत्वाद्यसम्भवे सत्यस्मादेवातच्छब्दात् प्राणभृदपि न द्युभ्वाद्यायतनत्वेनाश्रयितव्यः। न चोपाधिपरिच्छिन्नस्याविभोः प्राणभृतो द्युभ्वाद्यायतनत्वमपि सम्यक् सम्भवति। पृथग्योगकरणमुत्तरार्थं। कुतश्च न प्राणभृद् द्युभ्वाद्यायतनत्वेनाश्रयितव्यः॥

भेदव्यपदेशात्॥ ५॥

भेदव्यपदेशश्चेह भवति "तमेवैकं जानथ आत्मानं" इति ज्ञेयज्ञातृभावेन। तत्र प्राणभृत् तावत् मुमुक्षुत्वाज्ज्ञाता परिशेषादात्मशब्दवाच्यं ब्रह्म ज्ञेयं द्युभ्वाद्यायतनमिति गम्यते। कुतश्च न प्राणभृद् द्युभ्वाद्यायतनत्वेनाश्रयितव्यः॥

प्रकरणात्॥ ६॥

प्रकरणञ्चेदं परमात्मनः "कस्मिन्नु भगवो विज्ञाते सर्व्वमिदं विज्ञातं भवति" इत्येकविज्ञानेन सर्व्वविज्ञानापेक्षणात्। परमात्मनि हि सर्व्वात्मके विज्ञाते सर्व्वमिदं विज्ञातं स्यात्, न केवले प्राणभृति। कुतश्च न प्राणभृद् द्युभ्वाद्यायतनत्वेनाश्रयितव्यः॥

स्थित्यदनाभ्याञ्च॥ ७॥

द्युभ्वाद्यायतनञ्च प्रकृत्य "द्वा सुपर्णा सयुजा सखायौ" इत्यत्र

यद्यपि विशुद्धः प्रत्यगात्मैवात्र ज्ञेयः तथापि जीवत्वाकारेण ज्ञातुर्ज्ञेयाद्भेदान्न ज्ञेयरूपत्वमित्यर्थः। एवञ्च जीवत्वलिङ्गविशिष्टत्वेन जीवस्य द्युभ्वादिवाक्यार्थत्वं निरस्य तेन शुद्धरूपेणेति मन्तव्यं। ननु स्थित्येश्वरस्यादनाज्जीवस्य द्वासुपर्णेत्यत्रोक्तावपि ईश्वर आयतनवाक्येन किमथ

स्थित्यदने निर्दिश्येते,"तयोरन्यः पिप्पलं स्वाद्वत्ति" इति कर्म्म-फलासनं,"अनश्नन्योऽभिचाकशीति" इत्यौदासीन्येनावस्थानं, ताभ्याञ्च स्थित्यदनाभ्यामीश्वरचेत्रज्ञौ तत्र गृह्येते। यदि चेश्वरो द्युभ्वाद्यायतनत्वेन विवक्षितस्तस्य प्रकृतस्येश्वरस्य चेत्रज्ञात् पृथग्व-चनमवकल्पते, अन्यथा ह्यप्रकृतवचनमाकस्मिकमसम्बद्धं स्यात्। ननु तवापि चेत्रज्ञस्येश्वरात् पृथग्वचनमाकस्मिकमेव प्रसज्येत न तस्याविवक्षितत्वात्। चेत्रज्ञो हि कर्त्तृत्वेन भोक्तृत्वेन च प्र-तिशरीरं बुद्ध्युपाधिकसम्बन्धो लोकत एव प्रसिद्धो नामेो श्रुत्या तात्पर्य्येण विवक्ष्यते। ईश्वरस्तु लोकतोऽप्रसिद्धत्वात् श्रुत्या ता-त्पर्य्येण विवक्ष्यत इति न तस्याकस्मिकवचनं युक्तं। "गुहां प्रविष्टावात्मानौ हि" इत्यत्राप्येतद्दर्शितं। द्वा सुपर्णेत्यस्मादीश्वरचेत्रज्ञावुच्येते इति। यदाऽपि पैङ्गुपनिषत्कृतेन व्याख्याने-नास्मादेव मन्त्रचेत्रज्ञावुच्येते तदाऽपि न विरोधः कश्चित्। कथं प्राणभृदिह घटादिच्छिद्रवत् मन्त्राद्युपाध्यभिमानित्वेन प्रति-

---

ग्राह्य इत्यत आह॥ यदि चेश्वर इति॥ अत्र चेश्वरः शुद्धचिन्मात्रो ग्राह्यः। न सर्व्वज्ञत्वादिविशिष्टः तस्यात्राप्रतिपाद्यत्वात्। तथा चाप्र-तिपाद्यार्थस्याकस्मान्मध्ये वचनासम्भवात्। आद्यवाक्येन ग्रहणं कार्य्य-मित्यभिसन्धिः। तमज्ञात्वाऽऽशङ्कते॥ ननु तवापीति॥ ब्रह्मस्वरूपप्र-तिपादनार्थमकस्मादप्रकृतस्यापि लोकप्रसिद्धस्य जीवस्यानुवादस-म्भव इति परिहरति॥ नेति॥ ननु द्वासुपर्णेत्यत्र बुद्धिजीवयोरुक्तेः कथमिदं सूत्रमित्यत आह॥ गुहामिति॥ स्थित्यदनाभ्यामीश्वरचे-त्रयोरनुवादैक्यं दर्शितं इत्यर्थः। नन्वत्र जीवेशौ नानुवादौ पैङ्गि-व्याख्याविरोधादतः सूत्रासङ्गतिरित्यत आह। यदापीति॥ तदापीति

शरीरं गृह्यमाणे द्युभ्वाद्यायतनं न भवतीति प्रतिषिद्ध्यते। यस्तु सर्व्वशरीरेषूपाधिभिर्विनोपलक्ष्यते पर एव स भवति। यथा घटादिच्छिद्राणि घटादिभिरुपाधिभिर्विनोपलक्ष्यमाणानि महाकाश एव भवन्ति तद्वत् प्राणभृतः परस्मादन्यत्वानुपपत्तेः प्रतिषेधो नोपपद्यते, तस्मात् सत्त्वाद्यभिमानिन एव द्युभ्वाद्यायतनत्वप्रतिषेधः, तस्मात् परमेव ब्रह्म द्युभ्वाद्यायतनं। तदेतत् "अदृश्यत्वादिगुणको धर्म्मोक्तेः" इत्यनेनैव सिद्धं, तस्यैव हि भूतयोनिवाक्यस्य मध्य इदं पठितं "यस्मिन् द्यौः पृथिवी चान्तरिक्षं" इति। प्रपञ्चार्थन्तु पुनरुपन्यस्तं।

भूमा सम्प्रसादादध्युपदेशात् ॥ ८ ॥

इदं समामनन्ति "भूमा त्वेव जिज्ञासितव्यः" इति, "भूमानं भगवो जिज्ञासे" इति, "यत्र नान्यत् पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा, अथ यत्रान्यत् पश्यत्यन्यच्छृणोत्यन्यद्विजाना-

---

सूत्रस्यासङ्गतिर्नास्तीत्यर्थः। अदनवाक्येन बुद्धिमनूद्य स्थितिवाक्येन बुद्ध्यादिविलक्षणशुद्धप्रत्यग्ब्रह्मणो ज्ञेयस्योक्तेर्द्युभ्वादिवाक्ये तदेव ग्राह्यं न बद्ध्युपहितो जीव इति सूत्रसङ्गतिमाह ॥ कथमित्यादिना ॥ नन्वत्रानुपहितो जीव उक्तो न परं ब्रह्मेत्यत आह ॥ यस्मिन्निति ॥ यौगरूढ्यं शङ्कते ॥ तदेतदिति ॥ द्युभ्वादिवाक्यस्य ब्रह्मपरत्वमित्यर्थः। समाधत्ते ॥ प्रपञ्चार्थमिति ॥ सेतुशब्दव्याख्यानेन भूतयोनेः प्रत्यगात्मत्वस्फुटीकरणमित्यर्थः। तस्मान्मुण्डकोपनिषद्, ब्रह्मणि समन्वितेति सिद्धं ॥ भूमा ॥ छान्दोग्यमुदाहरति ॥ इदमिति ॥ नाल्पे सुखमस्ति भूमैव सुखं तस्मान्निरतिशयसुखार्थिना भूमैव विचार्य इति नारदं प्रति सनत्कुमारेणोक्ते सति नारदो ब्रूते ॥ भूमानमिति ॥ भूम्नो लक्षणमद्वितीयत्व-

ति तदर्थं"इत्यादि। तत्र संशयः किं प्राणो भूमा स्यादाहोस्वित् परमात्मेति। कुतः संशयः। भूमेति तावद् बहुत्वमभिधीयते। "बहोर्लोपो भू च बहोः"(पा० ६।४।१५८)इति भूमशब्दस्य भावप्रत्ययान्ततास्मरणात्। किमात्मकं पुनस्तद्बहुत्वमिति विशेषाकाङ्क्षायां"प्राणो वा आशाया भूयान्"इति सन्निधानात् प्राणो भूमेति प्रतिभाति। तथा श्रुतं"स्रोक इव मे भगवद्दृशेभ्यस्तरति शोकमात्मवित्"इति,"सोऽहं भगवः शोचामि तं मा भगवान् शोकस्य पारं तारयतु" इति प्रकरणोत्थानात् परमात्मा भूमा इत्यपि प्रतिभाति। तत्र कस्योपादानं न्याय्यं कस्य वा हानमिति भवति संशयः। किन्तावत् प्राप्तं प्राणो भूमेति। कस्मात्। भूयः प्रश्नप्रतिवच-

---

माह॥ यत्रेति॥ भूमलक्षणं परिच्छिन्नलक्षणोक्त्या स्फुटयति॥ अथेति॥ अत्र संशयबीजं प्रश्नपूर्वकमाह॥ कुत इत्यादिना॥ बहोर्भाव इति विग्रहे पृथ्वादिभ्य इमनिजिति इमनिच्प्रत्यये कृते बहोर्लोपो भू च बहोरिति सूत्रेण बहोः परस्येमनिच्प्रत्ययस्यादेरिकारस्य लोपः स्यात् बहोः स्थाने भूरित्यादेशश्च स्यादित्युक्ते भूमन्निति शब्दो निष्पन्नः, तस्य भावार्थकेमनिच्प्रत्ययान्तत्वाद्बहुत्वं वाच्यं। तत् किं धर्म्मिकमित्याकाङ्क्षायां सन्निहितप्रकरणस्थः प्राणो धर्मी भाति। वाक्योपक्रमस्थ आत्माऽपि स्वप्रतिपादनापेक्षो धर्म्मित्वेन भातीति सन्निहितव्यवहितप्रकरणाभ्यां संशय इत्यर्थः। पूर्वमात्मशब्दाद् द्युभाद्यायतनं ब्रह्मेत्युक्तं, तरति शोकमात्मविदित्यत्र ब्रह्मण्यप्यात्मशब्दप्रयोगादित्याक्षेपसङ्गत्या पूर्वपक्षयति॥ प्राणो भूमेति॥ धर्म्मधर्म्मिणोरभेदात् सामानाधिकरण्यं द्रष्टव्यं। पूर्वोत्तरपक्षयोः प्राणोपास्तिः, ब्रह्मज्ञानञ्च फलं क्रमेण मन्तव्यं। अत्राध्याये भूयः प्रश्नोत्तरभेदादर्थभेदो दृश्यते। भूमा तु प्राणात् परं भूयः प्रश्नं विनैवोक्तलिङ्गेन प्राणादभिन्न इत्याह॥ कस्मादित्यादिना॥ प्राणाद् भूय इति न दृश्यत इति पूर्वेण सम्बन्धः।

नपरम्पराद्दर्शनात्। यथा हि "अस्ति भगवो नाम्नो भूयः" इति, "वाग्वाव नाम्नो भूयसी" इति, तथा "अस्ति भगवो वाचो भूयः" इति, "मनो वाव वाचो भूयः" इति च नामादिभ्यो ज्यायः प्राणात् भूयः प्रश्नप्रतिवचनप्रवाहः प्रवृत्तः, नैवं प्राणात् परं भूयः प्रश्नप्रतिवचनं दृश्यते। "अस्ति भगवः प्राणाद्भूयः" इति, "अदो वाव प्राणाद्भूयः" इति, "प्राणमेव तु नामादिभ्य आम्नान्तेभ्यो भूयांसं प्राणो वाव आम्नाया भूयान्" इत्यादिना सप्रपञ्चमुक्त्वा प्राणदर्शिनश्चातिवादित्वं "अतिवाद्यसि" इति, "अतिवाद्यसीति ब्रूयान्नापह्नुवीत" इत्यभ्यनुज्ञाय, "एष तु वा अतिवदति यः सत्येनातिवदति" इति प्राणव्रतमतिवादित्वमनूद्य व्यापरित्यज्यैव प्राणं सत्यादिपरम्परया भूमानं समवतारयन्, "प्राणमेव भूमानं मन्यते" इति गम्यते। कथं पुनः प्राणे भूमेति व्याख्यायमाने यत्र नान्यत् पश्यतीत्येतद् भूम्नो लक्षणपरं वचनं व्याख्येयमिति। उच्यते। सुषुप्तावस्थायां प्राणयन्त्रेषु करणेषु दर्शनादिव्यवहारनिवृत्ति-

---

नन्वेष तु वा अतिवदतीति तुशब्देन प्राणप्रकरणविच्छेदान्न प्राणो भूमेत्यत आह ॥ प्राणमेवेति ॥ नामाद्याप्तान्तानुपास्यानतीत्य प्राणं श्रेष्ठं वदतीत्यतिवादी प्राणवित्तं प्रति अतिवाद्यसीति केनचित् प्रश्ने कृते अस्मीति ब्रूयात्, नाहमतिवादीत्यपह्नवं न कुर्यादित्युक्तं प्राणविदं, एष इति परामृश्य सत्यवचनध्यानमननश्रद्धादिधर्मपरम्परां विधाय भूमोपदेशान्न प्रकरणविच्छेदः। तुशब्दो नामाद्युपासकस्यातिवादित्वनिरासार्थ इत्यर्थः। भूम्नो लक्षणवचनं सुखत्वममृतत्वञ्च प्राप्ते प्रश्नपूर्वकं योजयति ॥ कथं पुनरित्यादिना ॥ प्राणयन्त्रेषु प्राणे लीनेषु न पश्यतीति सुषुप्तपुरुष इति शेषः। "गार्हपत्यो ह वा एषोऽपानो व्या-

दर्शनात् सम्भवति प्राणस्यापि यत्र नान्यत् पश्यतीत्येतल्लक्षणं। तथा च श्रुतिः "न शृणोति न पश्यति" इत्यादिना सर्व्वकरण-व्यापारप्रत्यस्तमयरूपां सुषुप्त्यवस्थामुक्त्वा "प्राणाग्नय एवैतस्मिन् पुरे जाग्रति" इति तस्यामेवावस्थायां पञ्चवृत्तेः प्राणस्य जागरणं ब्रुवती प्राणप्रधानां सुषुप्त्यवस्थां दर्शयति। यच्चैतद्भूम्नः सुखत्वं श्रुतं "यो वै भूमा तत् सुखं" इति तदप्यविरुद्धं, "अत्रैष देवः स्वप्नान्न पश्यत्यथ यदेतस्मिंच्छरीरे सुखं भवति" इति सुषुप्त्यव-स्थायामेव सुखश्रवणात्। यच्च "यो वै भूमा तदमृतं" इति, तदपि प्राणस्याविरुद्धं, "प्राणो वा अमृतं" इति श्रुतेः। कथं पुनः प्राणं भूमानं मन्यमानस्य "तरति शोकमात्मवित्" इत्यात्मविवि-दिषया प्रकरणस्योत्थानं उपपद्यते, प्राण एवेहात्मा विवक्षित इति ब्रूमः। तथा हि "प्राणो ह पिता प्राणो माता प्राणो भ्राता प्राणः स्वसा प्राण आचार्यः प्राणो ब्राह्मणः" इति प्राणमेव सर्व्वात्मानं करोति। "यथा वा अरा नाभौ समर्पिता एवमस्मिन् प्राणे सर्व्वं समर्पितं" इति च सर्व्वात्मत्वारनाभिनिदर्शनाभ्याञ्च सम्भवति वैपुल्यात्मिका भूमरूपता प्राणस्य। तस्मात् प्राणो भूमेत्येवं प्राप्तं। तत इदमुच्यते। परमात्मैवेह भूमा भवितुमर्हति, न प्राणः।

नोऽन्वाहार्य्यपचनः आहवनीयः प्राणः" इति श्रुतेः, प्राणा अमय इह पुरे शरीरे जाग्रति सव्यापारा एव तिष्ठन्तीत्यर्थः। देवो जीवः, अथ तदा स्वप्नदर्शनकाले सुखश्रवणात् प्राणस्य सुखत्वमविरुद्धमित्यन्वयः। आत्मपदेनोपक्रमविरोधं परिहरति॥ प्राण एवेति॥ प्राणस्यात्मत्वं कथमित्याशङ्क्य श्रुतत्वादित्याह॥ तथा हीति॥ सर्व्वं समर्पितमिति च सर्व्वाधिष्ठानं प्राणं स्वीकरोति श्रुतिरित्यन्वयः। अत आत्मत्वं प्रा-

कस्मात्। सम्प्रसादादध्युपदेशात्। सम्प्रसाद इति सुषुप्तं स्थानमुच्यते सम्यक्प्रसीदत्यस्मिन्निति निर्व्वचनात्। बृहदारण्यके च स्वप्नजागरितस्थानाभ्यां सह पाठात्, तस्माच्च सम्प्रसादावस्थायां प्राणो जागर्त्तीति प्राणोऽत्र सम्प्रसादोऽभिप्रेयते प्राणादूर्द्धं भूम्न उपदिश्यमानत्वादित्यर्थः। प्राण एव चेद्भूमा स्यात् स एव तस्मादूर्द्धमुपदिश्येतेत्यसिष्टमेतत् स्यात्। न हि नामैव नाम्नो भूय इति नाम्न ऊर्द्धमुपदिष्टं। किं तर्हि। नाम्नोऽन्यदर्थान्तरमुपदिष्टं वागाख्यं वाग्वाव नाम्नो भूयसीति, तथा वागादिभ्योऽप्याप्राणादर्थान्तरमेव तत्र तत्रोर्द्धमुपदिष्टं, तद्वत् प्राणादूर्द्धमुपदिश्यमानो भूमा प्राणादर्थान्तरभूतो भवितुमर्हति। नन्विह नास्ति प्रश्नः, अस्ति भगवः प्राणाद् भूय इति। नापि प्रतिवचनमस्ति प्राणाददो वाव भूयोऽस्तीति। कथं प्राणादधिभूमोपदिश्यते इत्युच्यते प्राणविषयमेव चातिवादित्वमुत्तरत्रानुकृष्यमाणं पश्यामः। "एष तु वा अतिवदति यः सत्येनातिवदति" इति, तस्मा-

---

योऽपि मुख्यमिति भावः। भूमरूपत्वं योजयति ॥ सर्व्वात्मत्वेति ॥ सम्प्रसादशब्देन प्राणं लक्षयितुं मुख्यार्थं दर्शयति ॥ सम्प्रसाद इति ॥ स वा एष एतस्मिन् सम्प्रसादे स्थित्वा पुनरादवतीति प्रयोगाच्च। तत् यदं सुषुप्तिवाचकमित्याह ॥ बृहदिति ॥ वाच्यार्थसम्बन्धात् प्राणो लक्ष्य इत्याह ॥ तस्माच्चेति ॥ अत्र सूत्र इत्यर्थः। भूमा प्राणाद्भिन्नः, अत्राध्याये। तस्मादूर्द्धमुपदिष्टत्वान्नामादेरूर्द्धमुपदिष्टवागादिवदित्यर्थः। विपक्षहेतूच्छेदं बाधकमाह ॥ प्राण एव चेदिति ॥ स्वस्यैव स्वस्मादूर्द्धमुपदिष्टत्वमयुक्तं नामादिषु अदृष्टत्वेत्यर्थः। हेत्वसिद्धिं शङ्कते ॥ नन्विहेति ॥ प्रकृतप्राणवित् परामर्शक एष शब्दो न भवति तस्य

नास्ति प्राणादध्युपदेश इति। अत्रोच्यते। न तावत् प्राण-विषयस्यैवातिवादित्वस्यैतदनुकर्षणमिति शक्यं वक्तुं विशेषवादाद्यः सत्येनातिवदतीति। ननु विशेषवादोऽप्ययं प्राणविषय एव भविष्यति। कथं। यथैषोऽग्निहोत्रीयः सत्यं वदतीत्युक्ते न सत्यवदनेनाग्निहोत्रित्वं, केन तर्हि, अग्निहोत्रेणैव, सत्यवदनस्त्वग्निहोत्रिणो विशेष उच्यते, तथैष तु वा अतिवदति यः सत्येनातिवदतीत्युक्ते न सत्यवदनेनातिवादित्वं, केन तर्हि, प्रकृतेन प्राणविज्ञानेनैव, सत्यवदनन्तु प्राणविदो विशेषो विवक्ष्यत इति, नेति ब्रूमः, श्रुत्यर्थपरित्यागप्रसङ्गात्, श्रुत्या ह्यत्र सत्यवदनेनातिवादित्वं प्रतीयते यः सत्येनातिवदति सोऽतिवदतीति। नात्र प्राणविज्ञानस्य सङ्कीर्त्तनमस्ति। प्रकरणात् तु प्राणविज्ञानं सम्बध्येत। तत्र प्रकरणानुरोधेन श्रुतिः परित्यक्ता स्यात्। प्रकृत-व्यावृत्त्यर्थस्य तुशब्दो न सङ्गच्छेत। एष तु वा अतिवदतीति। सत्यन्त्वेव विजिज्ञासितव्यमिति च प्रयत्नान्तरकरणमर्थान्तर-

---

यच्छब्दपरतन्त्रत्वेन सत्यादिवादिवाचित्वात्। अतः प्राणप्रकरणं विच्छिन्नमिति हेतुसिद्धिरित्याह॥ अत्रोच्यत इति॥ सत्येनातिवादित्वं विशेषः तद्वतो य एष इत्युक्तेर्न पूर्वानुकर्ष इत्यर्थः। य एष प्राणविदतिवदति इत्यनूद्य स सत्यं वदेदिति विधानान् न प्राणप्रकरणविच्छेदः इति दृष्टान्तेन शङ्कते॥ नन्विति॥ सत्यशब्दो ह्यबाधिते रूढो ब्रह्मवाचकः। तदन्यस्य मिथ्यात्वात्। सत्यवचने त्वबाधितार्थसम्बन्धाल्लाक्षणिक इति नात्र लक्षणावचनविधिरित्याह॥ नेति ब्रूमः इति॥ किञ्च सत्येन ब्रह्मातिवदतीति तृतीया श्रुत्या ब्रह्म करणकमतिवादित्वं श्रुतं, तस्य प्रकरणाद् बाधो न युक्त इत्याह॥ श्रुत्या ह्रीत्यादिना॥ नात्रेति सत्यवाक्ये इत्यर्थः। एवं सत्येनेति श्रुत्या प्रकरणं बाधमित्युक्ता

विवक्षां सूचयति। तस्माद्यथैकवेदिप्रश्नंसायां प्रक्रतायामेष तु महा ब्राह्मणो यच्चतुरो वेदानधीत इत्येकवेदिभ्योऽर्थान्तरभूतश्चतुर्वेदः प्रशस्यते तादृगेतद् द्रष्टव्यं। न च प्रश्नप्रतिवचनरूपयैवार्थान्तरविवक्षया भवितव्यमिति नियमोऽस्ति, प्रक्रतसम्बन्धासम्भवकारितत्वादर्थान्तरविवक्षायाः। तच्च प्राणान्तमनुशासनं श्रुत्वा तुष्णीं भूतं नारदं स्वयमेव सनत्कुमारो व्युत्पादयति। यत् प्राणविज्ञाणेन विकारानृतविषयेणातिवादित्वमनतिवादित्वमेव तदेष तु वा अतिवदति यः सत्येनातिवदतीति। तच्च सत्यमिति परं ब्रह्मोच्यते परमार्थरूपत्वात् "सत्यं ज्ञानमनन्तं ब्रह्म" इति च श्रुत्यन्तरात्। तथा व्युत्पादिताय नारदाय "सोऽहं भगवः सत्येनातिवदामि" इत्येवं प्रवृत्ताय विज्ञानादिसाधनपरम्परया भूमानमुपदिशति। तच्च यत् प्राणादधि-

---

तुशब्देनापि बाधमाह ॥ प्रक्रतेति ॥ विजिज्ञास्यत्वलिङ्गाच्च पूर्वोक्ताद्भिन्नमित्याह ॥ सत्यन्त्वेवेति ॥ प्रकरणविच्छेदे दृष्टान्तमाह ॥ तस्मादिति ॥ श्रुतिलिङ्गबलादेतत् सत्यं प्रक्रतात् प्राणात् प्राधान्येन भिन्नं द्रष्टव्यमित्यर्थः। एवमतिवादित्वस्य ब्रह्मसम्बन्धोक्त्या प्राणलिङ्गत्वं निरस्तं। यत्तु प्रश्नं विनोक्तत्वलिङ्गाद् भूमा प्राण इति तन्न, तस्याप्रयोजकत्वादित्याह ॥ न चेति ॥ प्रश्नभेदादर्थभेद इति न नियमः, एकस्यात्मनो मैत्रेय्या बह्वग्रः दृष्टत्वात् प्रश्नं विनोक्तचातुर्वेद्यस्य प्रक्रतैकवेदाद्भिन्नत्वदर्शनाच्चेत्यर्थः। तत्र यथा चतुर्वेदत्वस्य प्रक्रतासम्बन्धादर्थभेदः, एवमिहापीति स्फुटयति ॥ तच्चेत्यादिना ॥ सत्यपदेन प्राणोक्तिरित्यत आह ॥ तच्च सत्यमिति ॥ विज्ञानं निदिध्यासनं, आदिपदान्मननश्रद्धासाध्यश्रवणमनःशुद्धिनिष्ठातद्धेतुकर्म्माणि गृह्यन्ते। इमान्यपि श्रवणादीनि ज्ञेयस्य सत्यस्य ब्रह्मत्वे लिङ्गानि। एवं श्रुतिलिङ्गैः प्राणस्यावान्तरप्रकरणं बाधित्वा प्रस्तुतं सत्यं ब्रह्म भूमपदोक्तबह्वत्वधर्म्मी-

सत्यं वक्तव्यं प्रतिज्ञातं तदेवेह भूमेत्युच्यत इति गम्यते। तस्मादस्ति प्राणादधिभूम्न उपदेश इत्यतः प्राणादन्यः परमात्मा भूमा भवितुमर्हति। एवञ्चेहात्मविविदिषया प्रकरणस्योत्थानमुपपन्नं भविष्यति। प्राण एवेहात्मा विवक्षित इत्येतदपि नोपपद्यते। न हि प्राणस्य मुख्यया वृत्त्याऽऽत्मत्वमस्ति। न चान्यत्र परमात्मज्ञानाच्छोकविनिवृत्तिरस्ति, "नान्यः पन्था विद्यतेऽयनाय" इति श्रुत्यन्तरात्। "तं मा भगवान् शोकस्य पारं तारयतु" इति चोपक्रम्योपसंहरति "तस्मै मृदितकषायाय तमसः पारं दर्शयति भगवान् सनत्कुमारः" इति। तम इति शोकादिकारणमविद्योच्यते। प्राणान्ते चानुशासनेन प्राणस्यान्यायत्ततोच्येत। आत्मतः प्राण इति च ब्राह्मणं। प्रकरणान्ते च परमात्मविवक्षा भविष्यति, भूमाऽपि प्राण ऐवेति चेन्न। "स भगवः कस्मिन् प्रतिष्ठित इति स्वे महिम्नि" इत्यादिना भूम्न एवाप्रकरणसमाप्तेरनुकर्षात्। वैपुल्यात्मिका च भूमरूपता सर्व्वकारणत्वात् परमात्मनः सुतरामुपपद्यते॥

त्याह॥ तत्र यदिति॥ किञ्च सन्निहितादपि व्यवहितं साकाङ्क्षं बलीय इति न्यायेन सन्निहितं निराकाङ्क्षं प्राणं दृष्ट्वा वाक्योपक्रमस्य आत्मा स्वप्रतिपादनाय भूमवाक्यापेक्षं इह भूमा ग्राह्य इत्याह॥ एवञ्चेति॥ किञ्च शोकस्य पारमित्युपक्रम्य तमसः पारमित्युपसंहारात् शोकस्य मूलोच्छेदं विना तस्यायोगाच्च। शोकपदेन मूलतमो गृह्यते तन्निवर्त्तकज्ञानगम्यत्वलिङ्गात्, आत्मा ब्रह्मेत्याह॥ न चान्यत्रेति॥ ब्राह्मणमात्मा यत्तत्त्वं प्राणस्य वदतीति सम्बन्धः। नन्विदं चरमं ब्राह्मणं ब्रह्मपरमस्तु ततः प्रागुक्तो भूमा प्राण इति शङ्कते॥ प्रकरणान्त इति॥ तच्छब्देन भूमानकर्षात् नैवमित्याह॥ नंनि॥ भूम्नो

धर्म्मोपपत्तेश्च ॥ ९ ॥

अपि च ये भूम्नि श्रूयन्ते धर्म्मास्ते परमात्मन्युपपद्यन्ते। यत्र नान्यत् पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमेति दर्शनादिव्यवहाराभावं भूमन्यवगमयति परमात्मनि चायं दर्शनादिव्यवहाराभावोऽवगतः, यत्र त्वस्य सर्व्वमात्मैवाभूत्तत् केन कं पश्येदिति श्रुत्यन्तरात्। योऽयमेष सुषुप्त्यवस्थायां दर्शनादिव्यवहाराभाव उक्तः सोऽप्यात्मन एवासङ्गत्वविवक्षया उक्तो न प्राणस्वभावविवक्षया, परमात्मप्रकरणात्। यदपि तस्यामवस्थायां सुखमुक्तं तदप्यात्मन एव सुखरूपत्वविवक्षयोक्तं। यत आह एषोऽस्य परम आनन्द एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्तीति। इहापि यो वै भूमा तत् सुखं नाल्पे सुखमस्ति भूमैव सुखमिति सामयसुखनिराकरणेन ब्रह्मैव सुखं भूमानं दर्शयति यो वै भूमा तदमृतमिति। अमृतत्वमपीह श्रूयमाणं परमकारणं गमयति, विकाराणामनृतत्वस्य सापेक्षिकत्वात्, अतोऽन्यदार्त्तमिति च श्रुत्यन्तरात्। तथा च सत्यत्वं स्वमहिमप्रतिष्ठितत्वं सर्व्वगतत्वं सर्व्वात्मत्वमिति चैते

ब्रह्मत्वे लिङ्गान्तरमाह। धर्म्मेति। सूत्रे यदुक्तं भूम्नो लक्षणं सुखत्वममृतत्वञ्च प्राणेषु योज्यमिति तदनूद्य विघटयति। योऽप्यसाविद्यादिना। सति बुद्ध्याद्युपाधावात्मनो दृष्टृत्वादिस्तद्भावे सुषुप्तौ तदभाव इत्यसङ्गत्वज्ञानार्थं प्रश्नोपनिषदि न शृणोति न पश्यतीति परमात्मानं प्रकृत्योक्तं। तथा तत्रैवात्मनः सुखत्वमुक्तं न प्राणस्य। यतः श्रुत्यन्तर आत्मन एव सुखत्वमाह तस्मादित्यर्थः। आमयो नाड्यादिदोषः तत्सहितं सामयं। आर्त्तं नश्वरं। स एवाधस्तात् स उपरिष्टादिति सर्व्व-

धर्म्माः श्रूयमाणाः परमात्मन्येवोपपद्यन्ते नान्यत्र तस्मात् भूमा परमात्मेति सिद्धं ॥

अक्षरमम्बरान्तधृतेः ॥ १० ॥

कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्चेति स होवाचैतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्त्यस्थूलमनण्वित्यादि श्रूयते। तत्र संशयः किमक्षरशब्देन वर्ण उच्यते किं वा पर एवेश्वर इति। तत्राक्षरसमाम्नाय इत्यादावक्षरशब्दस्य वर्णे प्रसिद्धत्वात् प्रसिद्धिव्यतिक्रमस्य चायुक्तत्वात्, ॐकार एवेदं सर्व्वमित्यादौ च श्रुत्यन्तरे वर्णस्याणुपास्यत्वेन सर्व्वात्मकत्वावधारणात् वर्ण एवाक्षरशब्द इति, एवं प्राप्ते उच्यते। पर एवात्माक्षरशब्दवाच्यः, कस्मादम्बरान्तधृतेः पृथिव्यादेराकाशान्तस्य विकारजातस्य धारणात्। तत्र हि पृथिव्यादेः समस्तस्य विकारजातस्य कालत्रयविभक्तस्याकाश एव तदोतश्च प्रोतश्चेत्याकाशे प्रतिष्ठितत्वमुक्त्वा कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्चेत्यनेन प्रश्नेनेदम-

---

गतत्वं, स एवेदं सर्व्वमिति सर्व्वात्मत्वञ्च श्रुतं, तस्माद्भूमाध्यायो निर्गुणे समन्वित इति सिद्धं ॥

अक्षरं। बृहदारण्यकं पठति। कस्मिन्निति। यद्भूतं भवच्च भविष्यच्च तत्सर्व्वं कस्मिन्नोतमिति गार्ग्यां पृष्टेन मुनिना याज्ञवल्क्येनाव्याकृताकाशः कार्य्यमात्राश्रय उक्तः। आकाशः कस्मिन्नोत इति द्वितीयप्रश्ने स मुनिरुवाच। तत् अव्याकृतस्याधिकरणमेतदक्षरं अस्थूलादिरूपमित्यर्थः। उभयत्राक्षरशब्दप्रयोगात् संशयः। यथा सत्यशब्दो ब्रह्मणि रूढ इति ब्रह्म भूमेत्युक्तं तथाक्षरशब्दो वर्णे रूढ इति दृष्टान्तेन पूर्व्वपक्षः, तत्रोङ्कारोपास्तिः फलं। सिद्धान्ते निर्गुणब्रह्मधीरिति विवेकः। ननु न क्षरतीत्यचलत्वानाश्रित्वयोगात् ब्रह्मण-

चरमवतारितं, तथा चोपसंहृतमेतस्मिन् खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्चेति। न चेयमम्बरान्तधृतिर्ब्रह्मणोऽन्यत्र सम्भवति। यदप्योङ्कार एवेदं सर्व्वमिति तदपि ब्रह्मप्रतिपत्तिसाधनत्वात् स्तुत्यर्थं द्रष्टव्यं। तस्मान्न क्षरत्यश्नुते चेति नित्यत्वव्यापित्वाभ्यामक्षरं परमेव ब्रह्म। स्यादेतत् कार्य्यस्य चेत् कारणाधीनत्वं अम्बरान्तधृतिरभ्युपगम्यते प्रधानकारणवादिनोऽपीयमुपपद्यते कथं अम्बरान्तधृतेर्ब्रह्मत्वप्रतिपत्तिरिति, अत उत्तरं पठति॥

सा च प्रशासनात्॥ ११॥

सा चाम्बरान्तधृतिः परमेश्वरस्यैव कर्म्म, कस्मात् प्रशासनात्। प्रशासनं हीह श्रूयते एतस्य वाक्षरस्य प्रशासने गार्गि सूर्य्याचन्द्रमसौ विधृतौ तिष्ठत इत्यादि। प्रशासनञ्च पारमेश्वरं कर्म्म नाचेतनस्य प्रशासनं सम्भवति। न ह्यचेतनानां घटादिकारणानां मृदादीनां घटादिविषयं प्रशासनमस्ति॥

प्यक्षरशब्दो मुख्य इत्यत आह। प्रसिद्धिव्यतिक्रमस्येति। रूढियोगमपहरतीति न्यायादित्यर्थः। वर्णस्योङ्कारस्य सर्व्वाश्रयत्वं कथमित्याशङ्क्य ध्यानार्थमिदं यथा श्रुत्यन्तरे सर्व्वात्मत्वमित्याह। ॐकार इति। प्रश्नप्रतिवचनाभ्यां आकाशान्तजगदाधारत्वे तात्पर्य्यनिश्चयान्न ध्यानार्थता, अतस्तल्लिङ्गबलाद्रूढिं बाधित्वा योगवृत्तिर्ग्राह्येति सिद्धान्तयति एवमित्यादिना। आकाशभूतं क्षत्वा शङ्कते। स्यादेतदिति। चेतनकर्तृकशिक्षाया अच श्रुतेर्नैवमित्याह॥

सा चेति॥ सूत्रं व्याचष्टे। सा चेति॥ चकार आकाशस्य भूतत्वनिरासार्थः। भूताकाशस्य कार्य्यान्तःपातिनः श्रुतसर्व्वकार्य्याश्रयत्वायोगात् अव्याकृतमज्ञानमेवाकाशः प्रधानशब्दित इति तदाश्रयत्वाच्चाक्षरं न प्रधानमित्यर्थः। विधृतौ विषयत्वेन धृतौ॥

अन्यभावव्यावृत्तेश्च ॥ १२ ॥

अन्यभावव्यावृत्तेश्च कारणात् ब्रह्मैवाक्षरशब्दवाच्यं, तस्यैवाम्बरान्तधृतिः कर्म नान्यस्य कस्यचित्। किमिदमन्यभावव्यावृत्तेरिति। अन्यस्य भावोऽन्यभावस्तस्माद्व्यावृत्तिरन्यभावव्यावृत्तिरिति। एतदुक्तं भवति यदन्यद्ब्रह्मणोऽक्षरशब्दवाच्यमिहाशङ्क्यते तद्भावादिदमम्बरान्तविधरणमक्षरं व्यावर्त्तयति श्रुतिः, तद्वा एतदक्षरं गार्ग्यदृष्टं द्रष्टृ अश्रुतं श्रोतृ अमतं मन्तृ अविज्ञातं विज्ञातृति। तत्रादृष्टत्वादिव्यपदेशः प्रधानस्यापि सम्भवति, द्रष्टृत्वादिव्यपदेशस्तु न तस्य सम्भवत्यचेतनत्वात्, तथा नान्यदतोऽस्ति द्रष्टृ नान्यदतोऽस्ति श्रोतृ नान्यदतोऽस्ति मन्तृ नान्यदतोऽस्ति विज्ञातृत्यात्मभेदप्रतिषेधात् न शारीरस्याणुपाधिमतोऽक्षरशब्दवाच्यत्वं, अचक्षुष्कमश्रोत्रमवागमन इत्युपाधिमत्ताप्रतिषेधात्। न हि निरुपाधिकः शारीरो नाम भवति। तस्मात् परमेव ब्रह्माक्षरमिति निश्चयः ॥

ईक्षतिकर्म्मव्यपदेशात् सः ॥ १३ ॥

एतद्वै सत्यकाम परञ्चापरञ्च ब्रह्म यदोङ्कारस्तस्मादिद्वा-

प्रश्नपूर्व्वकं सूत्रं व्याकरोति। किमिदमिति। घटत्वात् व्यावृत्तिरिति भ्रान्तिं निरस्यति। एतदिति। अम्बरान्तस्याधारमक्षरं श्रुतिरचेतनत्वाद्व्यावर्त्तयतीत्यर्थः। जीवनिरासपरत्वेनापि सूत्रं योजयति। तथेति। अन्यभावो भेदः तन्निषेधादिति सूत्रार्थः। तर्हि शोधितो जीव एवाक्षरं न पर इत्यत आह। न हीति। शोधिते जीवत्वं नास्तीत्यर्थः। तस्माद्भागि ब्राह्मयं निर्गुणाक्षरे समन्वितमिति सिद्धं ॥

ईक्षतिकर्म्मव्यपदेशात् सः ॥ प्रश्नोपनिषदमुदाहरति। एतदिति।

नेतेनैवायतनेनैकतरमन्वेतीति प्रकृत्य श्रूयते। यः पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीतेति। किमस्मिन् वाक्ये परं ब्रह्माभिध्यातव्यमुपदिश्यते आहोस्विदपरमित्येतेनैवायतनेन परमपरञ्चैकतरमन्वेतीति प्रकृतत्वात् संशयः। तत्रापरमिदं ब्रह्मेति प्राप्तं, कस्मात् स तेजसि सूर्य्ये तावत् सम्पन्नः, स सामभिरुन्नीयते ब्रह्मलोकमिति च तद्विदो देशपरिच्छिन्नस्य फलस्योच्यमानत्वात्। न हि परब्रह्मविद्देशपरिच्छिन्नं फलमश्नुवीतेति युक्तं, सर्व्वगतत्वात् परस्य ब्रह्मणः। नन्वपरब्रह्मपरिग्रहे परं पुरुषमिति विशेषणं नोपपद्यते, नैष दोषः, पिण्डापेक्षया प्राणस्य परत्वोपपत्तेः, इत्येवं प्राप्तेऽभिधीयते। परमेव ब्रह्मेहाभिध्यातव्यमुपदिश्यते, कस्मात् ईक्षतिकर्म्मव्यप-

---

पिप्पलादो गुरुः सत्यकामेन पृष्टो ब्रूते, हे सत्यकाम परं निर्गुणमपरं सगुणं ब्रह्मैतदेव योऽयमोङ्कारः, स हि प्रतिमेव विशेषस्तस्य प्रतीकत्वात्तस्मात् प्रणवं ब्रह्मात्मना विद्वानेतेनैवोङ्कारध्यानेनायतनेन प्राप्तिसाधनेन यथाध्यानं परमपरं चान्वेति प्राप्नोतीति प्रकृत्य मध्ये एकमात्रद्विमात्रोङ्कारयोर्ध्यानमुक्त्वा ब्रवीति। यः पुनरिति। इत्यस्मात्ते तृतीया ब्रह्मोङ्कारयोरभेदोपक्रमात्। यो ह्युकारादिमात्रात्रये एकस्या मात्राया अकारस्य ऋच्छ्रादिकं जाग्रदादिविभूतिञ्च जानाति तेन सम्यक् ज्ञाता एकमात्रा यस्योङ्कारस्य स एकमात्रः। एवं मात्राद्वयस्य सम्यग्विभूतिज्ञाने द्विमात्रस्तथा त्रिमात्रः। तमोङ्कारं पुरुषं योऽभिध्यायीत स ॐकारविभूतित्वेन ध्यातैः सामभिः सूर्य्यद्वारा ब्रह्मलोकं गत्वा परमात्मानं पुरुषं ईक्षत इत्यर्थः। संशयं तद्बीजञ्चाह। किमित्यादिना। अस्मिन् त्रिमात्रवाक्य इत्यर्थः। पूर्व्वत्र पूर्व्वपक्षेणोक्ते ॐकारे बुद्धिस्थं ध्यातव्यं निश्चीयत इति प्रसङ्गसङ्गतिः। यद्वा पूर्व्वत्र वर्णे रूढस्याक्षरशब्दस्य लिङ्गात् ब्रह्मणि वृत्तिरुक्ता तदत्रापि ब्रह्म-

देशात्। ईक्षतिर्दर्शनं दर्शनव्याप्यमीक्षतिकर्म, ईक्षतिकर्मत्वेनास्याभिध्यातव्यस्य पुरुषस्य वाक्यशेषे व्यपदेशो भवति, स एतस्माज्जीवघनात् परात् परं पुरुषं पुरिशयं ईक्षत इति। तत्राभिध्यायतेरतथाभूतमपि वस्तु कर्म भवति मनोरथकल्पितस्यापि अभिध्यायतिकर्मत्वात्। ईक्षतेस्तु तथाभूतमेव वस्तु लोके कर्म दृष्टमित्यतः परमात्मैवायं सम्यग्दर्शनविषयभूत ईक्षतिकर्मत्वेन व्यपदिष्ट इति गम्यते। स एव चेह परपुरुषशब्दाभ्यामभिध्यातव्यः प्रत्यभिज्ञायते। नन्वभिध्याने परपुरुष उक्त ईक्षणे तु परात्परः कथमितर इतरत्र प्रत्यभिज्ञायते इति, अत्रोच्यते। परपुरुषशब्दौ तावदुभयत्र साधारणौ। न चात्र जीवघनशब्देन प्रकृतोऽभिध्यातव्यः परपुरुषः परामृश्यते येन तस्मात् परात्परोऽयमीक्षितव्यः पुरुषोऽन्यः स्यात्। कस्तर्हि जीवघन इत्युच्यते घना मूर्त्तिर्जीवलक्षणो घनो जीव-

---

लोकप्राप्तिलिङ्गात् परशब्दस्य हिरण्यगर्भे वृत्तिरिति दृष्टान्तेन पूर्व्वपक्षयति। तत्रापरमिति। कार्य्यपरब्रह्मणोरुपास्तिरुभयत्र फलं। स उपासकः। सूर्य्ये सम्पन्नः प्रविष्टः। ननु वसुदान ईश्वर इति ध्यानात् विन्दते वसित्यल्पमपि फलं ब्रह्मोपासकस्य श्रुतमित्यत आह। नहीति॥ अन्यत्र तथात्वेऽपि अत्र परवित् परमपरविदपरमन्वेतीत्यपरविदोऽपरप्राप्तिरयुक्ता उपक्रमविरोधात्। न चात्र परप्राप्तिरेवोक्तेति वाच्यं, परस्य सर्व्वगतत्वात्। अत्रैव प्राप्तिसम्भवेन सूर्य्यद्वारा गतिवैयर्थ्यात् उपक्रमानुगृहीतादपरप्राप्तिरूपाल्लिङ्गात् परं पुरुषमिति परश्रुतिर्बाध्येत्यर्थः॥ परश्रुतेर्गतिं पृच्छति। नन्विति। पिङ्गः स्थूलो विराट् तदपेक्षया सूक्ष्मस्य परत्वमिति समाधत्ते सूत्रे सशब्द ईश्वरपर इति प्रतिज्ञातत्वेन तं व्याचष्टे। परमेवेति। स उपासक एतस्माद्धिरण्यग-

घनः सैन्धवखिल्यवत् यः परमात्मनो जीवरूपः खिल्यभाव उपाधिकृतः परश्च विषयेन्द्रियेभ्यः सोऽत्र जीवघन इति। अपर आह स सामभिरुन्नीयते ब्रह्मलोकमिति, अतीतानन्तरवाक्यनिर्दिष्टो यो ब्रह्मलोकः परश्च लोकान्तरेभ्यः सोऽत्र जीवघन इत्युच्यते। जीवानां हि सर्व्वेषां करणपरिवृतानां सर्व्वकरणात्मनि हिरण्यगर्भे ब्रह्मलोकनिवासिनि सङ्घातोपपत्तेर्भवति ब्रह्मलोको जीवघनः, तस्मात् परो यः परमात्मोच्चणकर्म्मभूतः स एवाभिध्यानेऽपि कर्म्मभूत इति गम्यते। परं पुरुषमिति च विशेषणं परमात्मपरिग्रह एवावकल्प्यते। परो हि पुरुषः परमात्मैव भवति यस्मात् परं किञ्चिदन्यन्नास्ति, पुरुषान्न परं किञ्चित् सा काष्ठा सा परागतिरिति च

र्भात् परं पुरुषं ब्रह्माहमितीक्षत इत्यर्थः॥ नन्वीक्षणविषयोऽप्यपरोऽस्त तत्राह। तत्राभिध्यायतेरिति। नन्वीक्षणं प्रमात्वादिविषयसत्यतामपेक्षत इति भवतु सत्यः पर ईक्षणीयः ध्यातव्यस्वसत्योऽपरः किं न स्यादित्यत आह। स एवेति। श्रुतिभ्यां प्रत्यभिज्ञानात् स एवायमिति सौत्रः सशब्दो व्याख्यातः। अत्रैवं सूत्रयोजना, ॐकारे यो ध्येयः स पर एवात्मा वाक्यशेषे ईक्षणीयत्वोक्तेः, अत्र च श्रुतिप्रत्यभिज्ञानात् स एवायमिति। ननु शब्दभेदात् न प्रत्यभिज्ञेति शङ्कते। नन्विति। परात्परः इति शब्दभेदं अङ्गीकृत्य श्रुतिभ्यामुक्तप्रत्यभिज्ञाया अविरोधमाह। अत्रेति। न चैतस्माज्जीवघनात् परादित्येतत्पदेनोपक्रान्तध्यातव्यपरामर्शादीक्षणीयः परात्मा ध्येयादन्य इत्यत आह। न चात्रेति। ध्यानस्य तत्फलेक्षणस्य च लोके समानविषयत्वाद्ध्येय एवेक्षणीयः। एवञ्चोपक्रमोपसंहारयोरेकवाक्यता भवतीति भावः। स सामभिरुन्नीयते ब्रह्मलोकं स एतस्माज्जीवघनादित्येतत्पदेन सन्निहिततरो ब्रह्म-

श्रुत्यन्तरात्। परञ्चापरञ्च ब्रह्म यदोङ्कार इति च विभज्यानन्तरमोङ्कारेण परं पुरुषमभिध्यातव्यं ब्रुवन् परमेव ब्रह्म परं पूरुषं गमयति। यथा पादोदरत्वचा विनिर्मुच्यते एवं ह वै स पाप्मना विनिर्मुच्यत इति पाप्मविनिर्मोकफलवचनं परमात्मानमिहाभिध्यातव्यं सूचयति। अथ यदुक्तं परमात्माभिध्यायिनो न देशपरिच्छिन्नं फलं युज्यत इति, अत्रोच्यते। त्रिमात्रेणोङ्कारेणालम्बनेन परमात्मानमभिध्यायतः फलं ब्रह्मलोकप्राप्तिः क्रमेण च सम्यग्दर्शनोत्पत्तिरिति क्रममुक्त्यभिप्रायमेतद्भविष्यतीत्यदोषः॥

लोकस्वामी परामृश्यत इति प्रश्नपूर्व्वकं व्याचष्टे। कस्तर्हीत्यादिना। मूर्त्तो घन इति सूचादिति भावः। सैन्धवखिल्यो लवणपिण्डः खिल्यवदल्पो भावः परिच्छेदो यस्य स खिल्यभावः। एतत्पदेन ब्रह्मलोको वा परामृश्यते इत्याह। अपर इति। जीवघनशब्दस्य ब्रह्मलोके लक्षणां दर्शयति। जीवानां हीति। व्यष्टिकरणाभिमानिनां जीवानां घनः सङ्घातो यस्मिन् सर्व्वकरणाभिमानिनि स जीवघनः तत्स्वामिकत्वात् परम्परासम्बन्धेन लोको लक्ष्य इत्यर्थः। तस्मात् परः सर्व्वलोकातीतः शुद्ध इत्यर्थः। परपुरुषशब्दस्य परमात्मनि मुख्यत्वाच्च स एव ध्येय इत्याह। परमिति। यस्मात् परान्नापरमस्ति किञ्चित् स एव मुख्यः परः न तु पिण्डात् परः सूचात्मेत्यर्थः। किञ्च परशब्देनोपक्रमे निश्चितं परं ब्रह्मैवात्र वाक्यशेषे ध्यातव्यमित्याह। परञ्चापरञ्चेति। पायनिवृत्तिलिङ्गाच्चेत्याह॥ यथेति। पादोदरः सर्पः। ॐकारे परब्रह्मोपासनया सूर्य्यद्वारा ब्रह्मलोकं गत्वा परब्रह्मेत्वा तदेव शान्तमभयं प्राप्नोतीत्यविरोधमाह। अत्रोच्यत इति॥ एवमेकवाक्यतासमर्थप्रकरणानुगृहीतपरपुरुषश्रुतिभ्यां परब्रह्मप्रत्यभिज्ञया ब्रह्मलोकप्राप्तिलिङ्गं बाधित्वा वाक्यं प्रणवध्येये ब्रह्मणि समन्वितमिति सिद्धं॥

दहर उत्तरेभ्यः ॥ १४ ॥

अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशस्तस्मिन् यदन्तस्तदन्वेष्टव्यं, तदाव विजिज्ञासितव्यं इत्यादि वाक्यं समाम्नायते। तत्र योऽयं दहरे हृदयपुण्डरीके दहर आकाशः श्रुतः स किंभूताकाशोऽथ विज्ञानात्माथवा परमात्मेति संशय्यते। कुतः संशयः, आकाशब्रह्मपुरशब्दाभ्यां। आकाशशब्दो ह्ययं भूताकाशे परस्मिंश्च ब्रह्मणि प्रयुज्यमानो दृश्यते। तत्र किंभूताकाश एव दहरः स्यात् किं वा पर इति संशयः। तथा ब्रह्मपुरमिति किं जीवोऽत्र ब्रह्मनामा तस्येदं पुरं शरीरं ब्रह्मपुरमथ वा परस्यैव ब्रह्मणः पुरं ब्रह्मपुरमिति। तत्र जीवस्य परस्य वान्यतरस्य पुरस्वामिनो दहराकाशत्वे संशयः। तत्राकाशशब्दस्य भूताकाशे रूढत्वाद्भूताकाश एव दहर इति प्राप्तं, तस्य च दहरायत-

---

दहर उत्तरेभ्यः। छान्दोग्यमुदाहरति। अथेति। भूमविद्यानन्तरं दहरविद्याप्रारम्भार्थोऽथशब्दः। ब्रह्मणोऽभव्यक्तिस्थानत्वात् ब्रह्मपुरं शरीरं अस्मिन् यत् प्रसिद्धं दहरमल्पं हृत्पद्मं तस्मिन् हृदये यदन्तराकाशशब्दितं ब्रह्म तदन्वेष्टव्यं विचार्य ज्ञेयमित्यर्थः। अत्राकाशो जिज्ञास्यस्तदन्तःस्थं वेति प्रथमं संशयः कल्प्यः। तत्र यद्याकाशस्तदा संशयद्वयं। तत्राकाशशब्दादेकं संशयमुक्त्वा ब्रह्मपुरशब्दात् संशयान्तरमाह। तथा ब्रह्मपुरमितीति। अत्र शब्दे जीवस्य ब्रह्मणो वा पुरमिति संशयः। तत्र तस्मिन् संशये सतीति योजना। परपुरुषशब्दस्य ब्रह्मणि मुख्यत्वात् ब्रह्म ध्येयमित्युक्तं। तदेहाप्याकाशपदस्य भूताकाशे रूढत्वाद्भूताकाशो ध्येय इति दृष्टान्तेन पूर्वपक्षयति। तत्राकाशेत्यादिना। दहरवाक्यस्यानन्तरप्रजापतिवाक्यस्य च सगुणे

नापेक्षया दहरत्वं, यावान् वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाश इति च बाह्याभ्यन्तरभावकृतभेदस्योपमानोपमेयभावो द्यावापृथिव्यादि च तस्मिन्नन्तःसमाहितमवकाशात्मनाकाशस्यैकत्वात्। अथ वा जीवो दहर इति प्राप्तं ब्रह्मपुरशब्दात्, जीवस्य हीदं पुरं मच्छरीरं ब्रह्मपुरमित्युच्यते। तस्य स्वकर्मणोपार्ज्जितत्वात्। भक्त्या च तस्य ब्रह्मशब्दवाच्यत्वं। न हि परस्य ब्रह्मणः शरीरेण स्वस्वामिभावः सम्बन्धोऽस्ति। तत्र पुरस्वामिनः पुरैकदेशेऽवस्थानं दृष्टं यथा राज्ञः, मनउपाधिकश्च जीवो मनश्च प्रायेण हृदये प्रतिष्ठितमित्यतो जीवस्यैवेदं हृदयान्तरवस्थानं स्यात्। दहरत्वमपि तस्यैवाराग्रोपमितत्वादवकल्पते। आकाशोपमितत्वादि च ब्रह्माभेदविवक्षया भविष्यति। न चात्र दहरस्यान्वेष्टव्यत्वं विजिज्ञासितव्यत्वञ्च श्रूयते, तस्मिन् यदन्तरिति परविशेषणत्वेनोपादानादिति, अत

निर्गुणे च समन्वयोक्तेः श्रुत्यादिसङ्गतयः। पूर्व्वपक्षे भूताकाशाद्युपास्तिः सिद्धान्ते सगुणब्रह्मोपास्त्या निर्गुणधीरिति फलभेदः। न चाकाशस्तल्लिङ्गादित्यनेनास्य पुनरुक्तता शङ्कनीया। अत्र तस्मिन् यदन्तस्तदन्वेष्टव्यमित्याकाशान्तःस्थस्यान्वेष्टव्यत्वादिलिङ्गान्वयेन दहराकाशस्य ब्रह्मत्वे स्पष्टलिङ्गाभावात्। ननु भूताकाशस्याल्पत्वं कथमेकस्योपमानत्वं उपमेयत्वञ्च कथं उभे अस्मिन् द्यावापृथिवी अन्तरेव समाहिते उभावग्निश्च वायुश्चेत्यादिना अतसर्व्वाश्रयत्वञ्च कथमित्याशङ्क्य क्रमेण परिहरति। तस्येत्यादिना। हृदयापेक्षया अल्पत्वं ध्यानार्थं कल्पितभेदात् सादृश्यं, स्वत एकत्वात् सर्व्वाश्रयत्वमित्यर्थः। नन्वेष आत्मेत्यात्मशब्दो भूते न युक्त इत्यरुचेराह। अथ वेति। भक्त्येति। चैतन्यगुणयोगेनेत्यर्थः। मुख्यं ब्रह्म ग्रहीतामित्यत आह। न हीति। अस्तु पुरस्वामी जीवो

उत्तरं ब्रूमः। परमेश्वर एव दहराकाशो भवितुमर्हति न भूताकाशो जीवो वा। कस्मादुत्तरेभ्यो वाक्यशेषगतेभ्यो हेतुभ्यः। तथा हि द्रष्टव्यतया विहितस्य दहराकाशस्य तच्चेद्भूयुरित्युपक्रम्य किं तदत्र विद्यते यदन्वेष्टव्यं यद्वा विजिज्ञासितव्यं इत्येवमाक्षेपपूर्व्वकं प्रतिसमाधानवचनं भवति स ब्रूयाद् यावान् वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाश उभे अस्मिन् द्यावापृथिवी अन्तरेव समाहिते इत्यादि। तत्र पुण्डरीकदहरत्वेन प्राप्तदहरत्वस्याकाशस्य प्रसिद्धाकाशोपम्येन दहरत्वनिवर्त्तयन् भूताकाशत्वं दहरस्याकाशस्य निवर्त्तयतीति गम्यते। यद्यप्याकाशशब्दो भूताकाशे रूढस्तथापि तेनैव तस्योपमा नोपपद्यत इति भूताकाशशङ्का निवर्त्तिता भवति। नन्वेकस्याप्याकाशस्य वाह्याभ्यन्तरत्वकल्पितेन भेदेनोपमानोप-

---

हृदयस्याकाशस्तु ब्रह्मेत्यत आह। तच्चेति। पुरस्वामिन एव तदन्तःस्थत्वसम्भवात् नान्यापेक्षेत्यर्थः। व्यापिनोऽन्तःस्थत्वं कथमित्यत आह। मन इति। आकाशपदेन दहरमनुकृष्योक्तोपमादिकं ब्रह्माभेदविवक्षया भविष्यतीत्याह। आकाशेति। ननु जीवस्याकाशपदार्थत्वमयुक्तमित्याशङ्क्य तर्हि भूताकाश एव दहरोऽस्तु तस्मिन्नन्तःस्थं किञ्चिद्ध्येयमिति पक्षान्तरमाह। न चात्रेति। परमन्तःस्थं वस्तु, तद्विशेषणत्वेनाधारत्वेन दहराकाशस्य तच्छब्देनोपादानादित्यर्थः। यद्वा अन्वेष्टव्यादिलिङ्गात् दहरस्य निश्चयादाकाशस्तल्लिङ्गादित्यनेन गतार्थत्वमिति शङ्काच निरसनीया अन्वेष्टव्यादेः परविशेषणत्वेन ग्रहणात् दहरस्य ब्रह्मत्वे लिङ्गं नास्तीत्यर्थः। अपहतपाप्मत्वादिलिङ्गोपेतात्मश्रुत्या केवलाकाशश्रुतिर्बाध्येति सिद्धान्तयति। परमेश्वर इत्यादिना। आकाशस्याक्षेपपूर्व्वकमिति सम्बन्धः। तमाचार्यं प्रति यदि ब्रूयुः हृदय-

मेयभावः सम्भवतीत्युक्तं। नैवं सम्भवति। अगतिका ह्येषा गतिर्यत् काल्पनिकभेदाश्रयणं। अपि च कल्पयित्वा भेदमुपमानोपमेयभावं वर्णयतः परिच्छिन्नत्वाद्भ्यन्तराकाशस्य न बाह्याकाशपरिमाणत्वमुपपद्यते। ननु परमेश्वरस्यापि ज्यायानाकाशादिति श्रुत्यन्तरान्नैवाकाशपरिमाणत्वमुपपद्यते, नैष दोषः, पुण्डरीकवेष्टनप्राप्तदहरत्वनिवृत्तिपरत्वाद्वाक्यस्य न तावत्त्वप्रतिपादनपरत्वं। उभयप्रतिपादनेऽपि वाक्यं भिद्येत। न च कल्पितभेदे पुण्डरीकवेष्टिते आकाशैकदेशे द्यावापृथिव्यादीनामन्तःसमाधानमुपपद्यते। एष आत्मापहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्प इति चात्मत्वापहतपाप्मत्वादयश्च गुणा न भूताकाशे सम्भवन्ति। यद्यप्यात्मशब्दो जीवे सम्भवति तथापीतरेभ्यः कारणेभ्यो जीवा-

---

मेव तावदल्पं तत्रत्याकाशेऽल्पतरः किं तदचाल्पे विद्यते यद्दिचार्य ज्ञेयमिति, तदा स आचार्यो ब्रूयादाकाशस्याल्पतानिवृत्तिमित्यर्थः। वाक्यस्य तात्पर्यमाह। तत्रेति। निवर्त्तयति आचार्य इति शेषः। नन्वाकाशशब्देन रूढ्या भूताकाशस्य भानात् कथं तन्निवृत्तिरित्याशङ्क्याह। यद्यपीति। ननु रामरावणयोर्युद्धं रामरावणयोरिवेत्यभेदेऽप्युपमा दृष्टेति चेत् न, अभेदे सादृश्यस्यानन्वयेन युद्धस्य निरुपमत्वे तात्पर्यात् अनन्वयालङ्कार इति काव्यविदः। पूर्वोक्तमनूद्य निरस्यति। नन्वित्यादिना। सीताश्लिष्ट इवाभाति कोदण्डप्रभया युत इत्यादौ प्रभायोगसीताश्लेषरूपविशेषणभेदाभेदाश्रयणमेकस्यैव श्रीरामस्योपमानोपमेयभावसिद्ध्यर्थमङ्गीत्य कृतमित्यनुदाहरणं द्रष्टव्यं नैवमत्राश्रयणं युक्तं वाक्यस्याल्पत्वनिवृत्तिपरत्वेन गतिसद्भावात्। किञ्च हार्दाकाशस्यान्तरत्वात्यागे अल्पत्वेन व्यापकत्वाद्बाह्याकाशसादृश्यं न युक्तमित्याह। अपि चेति। आन्तरत्वत्यागे तु अत्यन्ताभेदान्न सादृश्यमिति

शङ्कापि निवर्त्तिता भवति। न ह्युपाधिपरिच्छिन्नस्याराग्रोपमितस्य पुण्डरीकवेष्टनकृतं दहरत्वं शक्यं निवर्त्तयितुं ब्रह्माभेदविवक्षया जीवस्य सर्वगतत्वादि विवक्ष्यत इति चेत् यदात्मतया जीवस्य सर्वगतत्वादि विवक्ष्यते तस्यैव ब्रह्मणः साक्षात् सर्वगतत्वादि विवक्ष्यतामिति युक्तं। यदप्युक्तं ब्रह्मपुरमिति जीवेन पुरस्योपलक्षितत्वाद्राज्ञ इव जीवस्यैवेदं पुरस्वामिनः पुरैकदेशवर्त्तित्वमस्तीत्यत्र ब्रूमः। परस्यैवेदं ब्रह्मणः पुरं सच्छरीरं ब्रह्मपुरमित्युच्यते ब्रह्मशब्दस्य तस्मिन् मुख्यत्वात्। तस्याप्यस्ति पुरेणानेन सम्बन्ध उपलब्ध्यधिष्ठानत्वात्। स एतस्माज्जीवघनात् परात् परं पुरिशयं पुरुषमीक्ष्यते, स वा अयं पुरुषः सर्वासु पूर्षु पुरिशय इत्यादिश्रुतिभ्यः। अथ वा जीवपुरे एवास्मिन् ब्रह्म *सन्निहितमुपलभ्यते। यथा सालग्रामे

भावः। ननु हार्दाकाशस्याल्पत्वनिवृत्तौ तावत्त्वे च तात्पर्यं किं न स्यादित्यत आह। उभयेति। अतोऽल्पत्वनिवृत्तावेव तात्पर्यमिति भावः। एवमाकाशोपमितत्वाद्दहराकाशो न भूतमित्युक्तं सर्व्वाश्रयत्वादिलिङ्गेभ्यश्च तथेत्याह। न चेत्यादिना। विगता जिघत्सा जग्धुमिच्छा यस्य सोऽयं विजिघत्सः बुभुक्षाशून्य इत्यर्थः। प्रथमश्रुतब्रह्मशब्देन तत्सापेक्षचरमश्रुतषष्ठीविभक्त्यर्थः सम्बन्धो नेयः न तु ब्रह्मणः पुरमिति षष्ठ्यर्थः स्वस्वामिभावो ग्राह्यः। निरपेक्षेण तत्सापेक्षं बाध्यमिति न्यायादित्याह। अत्र ब्रूम इति। शरीरस्य ब्रह्मणा तदुपलब्धिस्थानत्वरूपे सम्बन्धे मानमाह। स इति। पूर्षु शरीरेषु, पुरि हृदये शय इति पुरुष इत्यन्वयः। ननु ब्रह्मशब्दस्य जीवेऽप्यन्नादिना शरीरवृद्धिहेतौ मुख्यत्वान्न षष्ठ्यर्थः कथञ्चिन्नेय इत्यत आह। अथ वेति। दृंहयति देहमिति ब्रह्म जीवः तत्स्वामिके पुरे, हृदयं ब्रह्मवेश्म भवतु

---

* सन्निहितमुपदेक्ष्यते इति सो० B.

विष्णुः सन्निहित इति तद्वत्। तद्यथेह कर्म्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयत इति च कर्म्मणामन्तवत्फलत्वमुक्त्वाथ य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान् कामान् तेषां सर्व्वेषु लोकेषु कामचारो भवतीति प्रकृतदहराकाशविज्ञानस्यानन्तफलत्वं वदन् परात्मत्वमस्य सूचयति। यदप्येतदुक्तं न दहरस्याकाशस्यान्वेष्टव्यत्वं विजिज्ञासितव्यत्वञ्च श्रुतं परविशेषणत्वेनोपादानादित्यत्र ब्रूमः। यद्याकाशो नान्वेष्टव्यत्वेनोक्तः स्यात् यावान् वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाश इत्याद्याकाशस्वरूपप्रदर्शनं नोपपद्येत। नन्वेतदप्यन्तर्वर्त्तिवस्तुसद्भावदर्शनायैव प्रदर्श्यते तच्चेदं ब्रूयुः, यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशः किं तत्र विद्यते यदन्वेष्टव्यं यद्वाव विजिज्ञासितव्यमित्याक्षिप्य परिहारावसरे आकाशोपन्यासोपक्रमेण द्यावापृथिव्यादीनामन्तःसमाहितत्वदर्शनात् नैतदेवं। एवं हि

राजपुरे मैत्रसद्मवदित्यर्थः। अनन्तफललिङ्गादपि दहरः परमात्मेत्याह। तद्यथेति। अथ कर्म्मफलादैराग्यानन्तरमिह जीवदशायामात्मानं दहरं तदाश्रितांश्च सत्यकामादिगुणान् आचार्योपदेशमनुविद्य ध्यानेनानुभूय परलोकं गच्छन्ति तेषां सर्वलोकेष्वनन्तमैश्वर्यं स्वेच्छया सञ्चलनादिकं भवतीत्यर्थः। दहरे उक्तलिङ्गान्यन्यथासिद्धानि तेषां तदन्तःस्थगुणत्वादित्युक्तं स्मारयित्वा दूषयति। यदपीत्यादिना। उक्तमचाकाशस्वरूपप्रतिपादनान्यथानुपपत्त्या पूर्व्वं तस्यान्वेष्यत्वादिकमित्यत्रान्यथोपपत्तिं शङ्कते। नन्विति। एतदाकाशस्वरूपं आत्मैवाकाशस्याल्पत्वमुपमया निरस्यान्तःस्थवस्तूक्तेः तदन्तःस्थमेव ध्येयमित्यर्थः। तर्हि जगदेव ध्येयं स्यादित्याह। नैतदेवमिति। अस्तु को

सति यदन्तःसमाहितं द्यावापृथिव्यादि तदन्वेष्टव्यं विजिज्ञासितव्यञ्चोक्तं स्यात्। तच्च वाक्यशेषो नोपपद्येत। अस्मिन् कामाः समाहिताः एष आत्मापहतपाप्मा इति हि प्रकृतं तत् द्यावापृथिव्यादिसमाधानाधारमाकाशमाक्रम्याथ य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान् कामानिति समुच्चयार्थेन चशब्देनात्मानञ्च कामाधारमाश्रितांश्च कामान् विज्ञेयान् वाक्यशेषो दर्शयति। तस्माद्वाक्योपक्रमेऽपि दहर एवाकाशो हृदयपुण्डरीकाधिष्ठानः महान्तःस्थैः समाहितैः पृथिव्यादिभिः सत्यैः कामैः विज्ञेय उक्त इति गम्यते। स चोक्तेभ्यो हेतुभ्यः परमेश्वर इति॥

गतिशब्दाभ्यां तथा हि दृष्टं लिङ्गञ्च॥ १५॥

दहरः परमेश्वर उत्तरेभ्यो हेतुभ्य इत्युक्तं। त एवोत्तरे हेतव इदानीं प्रपञ्च्यन्ते। इतश्च परमेश्वर एव दहरो यस्मात् दहरवाक्यशेषे परमेश्वरस्यैव प्रतिपादकौ गतिशब्दौ

दोषस्तत्राह। तच्चेति। सर्वनामभ्यां दहराकाशमाक्रम्यात्मत्वादिगुणानुक्त्वा गुणैः सह तस्यैव ध्येयत्वं वाक्यशेषो ब्रूते, तद्विरोध इत्यर्थः। तस्मिन् यदन्तरिति तत्पदेन व्यवहितमपि हृदयं योग्यतया ग्राह्यमित्याह। तस्मादिति। यद्वा आकाशस्तस्मिन् यदन्तस्तदुभयमन्वेष्टव्यमिति योजना सूचयति। सहान्तःस्थैरिति॥

दहराकाशस्य ब्रह्मत्वे हेत्वन्तरमाह। गतीति। प्रजा जीवा एतं हृदयस्थं दहरं ब्रह्मस्वरूपं लोकमहरहः प्रत्यहं स्वापे गच्छन्त्यस्तदात्मना स्थिता अप्यहताज्ञानेनाहतास्तं न जानन्ति अतः पुनरुत्तिष्ठन्तीत्यर्थः। नन्वेतत्पदपरामृष्टदहरस्य स्वापे जीवगम्यत्वेऽपि ब्रह्मत्वे किमायात-

भवतः। इमाः सर्व्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्तीति, तत्र प्रकृतं दहरं ब्रह्मलोकशब्देनाभिधाय तद्विषया गतिः प्रजाशब्दवाच्यानां जीवानां अभिधीयमाना दहरस्य ब्रह्मतां गमयति। तथा ह्यहरहर्जीवानां सुषुप्त्यवस्थायां ब्रह्मविषयं गमनं दृष्टं श्रुत्यन्तरे सता सोम्य तदा सम्पन्नो भवतीत्येवमादौ। लोकेऽपि किल गाढं सुषुप्तमाचक्षते ब्रह्मीभूतो ब्रह्मतां गत इति। तथा ब्रह्मलोकशब्दोऽपि प्रकृते दहरे प्रयुज्यमानो जीवभूताकाशशब्दां निवर्त्तयन् ब्रह्मतामस्य गमयति। ननु कमलासनलोकमपि ब्रह्मलोकशब्दो गमयेत्, गमयेद्यदीद ब्रह्मणो लोक इति षष्ठीसमासवृत्त्या व्युत्पाद्यते। सामानाधिकरण्यवृत्त्या तु व्युत्पाद्यमानो ब्रह्मैव लोको ब्रह्मलोक इति परमेव ब्रह्म गमयिष्यति। एतदेव चाहरहर्ब्रह्मलोक-

---

मित्याशङ्क्य तथा हि दृष्टमिति व्याचष्टे। तथा हीति। लोकेऽपि दृष्टमित्यर्थान्तरमाह। लोकेऽपीति। गतिलिङ्गं व्याख्याय शब्दं व्याचष्टे। तथेति। जीवभूताकाशयोर्ब्रह्मलोकशब्दस्याप्रसिद्धेरिति भावः। ब्रह्मण्यपि तस्याप्रसिद्धिं शङ्कते। नन्विति। निषादस्थपतिन्यायेन समाधत्ते गमयेदिति। षष्ठे चिन्तितं स्थपतिर्निषादः शब्दसामर्थ्यात्। रौद्रीमिष्टिं विधाय एतया निषादस्थपतिं याजयेदित्याम्नायते। तत्र निषादानां स्थपतिः स्वामीति षष्ठीसमासेन चैवर्णिको ग्राह्यः अग्निविद्यादिसामर्थ्यात् न तु निषादश्चासौ स्थपतिरिति कर्म्मधारयेण निषादो ग्राह्योऽसामर्थ्यादिति प्राप्ते सिद्धान्तः। निषाद एव स्थपतिः स्यात् निषादशब्दस्य निषादे शक्तत्वात्, तस्याश्रुतषष्ठ्यर्थसम्बन्धलक्षकत्वकल्पनायोगात् श्रुतद्वितीयाविभक्तेः पूर्व्वपदसम्बन्धकल्पनायां लाघवात् अतो निषादस्थेष्टिसामर्थ्यमात्रं कल्प्यमिति तद्वद्ब्रह्मलोकशब्दे

मनं *दृष्टं ब्रह्मलोकशब्दस्य† सामानाधिकरण्यवृत्तिपरिग्रहे लिङ्गं। न ह्यहरहरिमाः प्रजाः कार्यब्रह्मलोकं सत्यलोकाख्यं गच्छन्तीति शक्यं कल्पयितुं॥

धृतेश्च महिम्नोऽस्यास्मिन्नुपलब्धेः॥ १९॥

धृतेश्च हेतोः परमेश्वर एवायं दहरः कथं दहरोऽस्मिन्नन्तराकाश इति हि प्रकृत्याकाशैपम्यपूर्वकं तस्मिन् ‡सर्वसमाधानमुक्त्वा तस्मिन्नेव चात्मशब्दं प्रयुज्यापहतपाप्मत्वादिगुणयोगञ्चोपदिश्य तमेवानतिवृत्तप्रकरणं निर्दिशत्यथ य आत्मा स सेतुर्विधृतिरेषां लोकानाममसम्भेदायेति। तत्र विधृतिरित्यात्मशब्दसामानाधिकरण्यादिधारयितेत्युच्यते, §क्तिचः कर्त्तरि स्मरणात्। यथोदकसन्तानस्य विधारयिता लोके सेतुः क्षेत्रसस्यदामसम्भेदायैवमयमात्मा एषामध्यात्मादिभेदभिन्नानां लो-

---

कर्म्मधारय इत्यर्थः। कर्म्मधारये लिङ्गाच्चास्तीति व्याचष्टे। एतदेवेति। सूत्रे चकार उक्तन्यायसमुच्चयार्थः॥

सर्व्वजगद्धारणलिङ्गाच्च दहरः पर इत्याह। धृतेरिति। नन्वथशब्दादहरप्रकरणं विच्छिद्य श्रुता धृतिर्न दहरलिङ्गमिति शङ्कते। कथमिति। य आत्मेति प्रकृतापकर्षात् अथशब्दो दहरस्य धृतिगुणविधिः प्रारम्भार्थमाह दहरोऽस्मिन्नित्यादिना। श्रुतौ विधृतिशब्दः कर्त्तृवाचित्वात् क्तिजन्तः क्त्यन्तः। सूत्रे तु महिमशब्दसामानाधिकरण्यात् धृतिशब्दः क्तिनन्तो विधारणं ब्रूते, स्त्रियां क्तिन्निति भावे क्तिनो विधानादिति विभागः। सेतुरसङ्करहेतुः, विधृतिस्तु स्थिति-

---

* दृष्टमिति का० सो० पु० नास्ति।

† सामानाधिकरण्यपरिग्रहे इति मु० पु०।

‡ सर्वसमाधानमिति सो० का० पु०।

§ क्तिनः इति मु० पु०।

कानां वर्णाश्रमादीनाञ्च विधारयिता सेतुरसम्भेदायासङ्क-रायेति। एवमिह प्रकृते दहरे विधरणलक्षणं महिमानं दर्श-यति, अथञ्च महिमा परमेश्वर एव श्रुत्यन्तरादुपलभ्यते एतस्य वाक्यस्य प्रशासने गार्गि सूर्य्याचन्द्रमसौ विधृतौ तिष्ठत इत्या-देः। तथान्यत्रापि निश्चिते परमेश्वरवाक्ये श्रूयते एष सर्वे-श्वर एष भूताधिपतिरेष भूतपाल एष सेतुर्विधारण एषां लोकानामसम्भेदायेति। एवं धृतेश्च हेतोः परमेश्वर एवायं दहरः।

प्रसिद्धेश्च ॥ १७ ॥

दृतश्च परमेश्वर एव दहरोऽस्मिन्नन्तराकाश इत्युच्यते। यत्कारणमाकाशशब्दः परमेश्वरे प्रसिद्धः। आकाशो वै नाम नामरूपयोर्निर्वहिता, सर्वाणि ह वा इमानि भूतान्या-काशादेव समुत्पद्यन्त इत्यादिप्रयोगदर्शनात्। जीवे तु न क्वचिदाकाशशब्दः प्रयुज्यमानो दृश्यते। भूताकाशस्तु सत्या-मप्याकाशशब्दप्रसिद्धौ उपमानोपमेयभावाद्यसम्भवान्न ग्रहो-तव्य इत्युक्तं ॥

हेतुरित्यपौनरुक्त्यमाह। यथोदकेति। सूत्रं योजयति। एवमिहेति। धृतेश्चेद्दहरः परः अस्य धृतिरूपस्य नियमस्य च महिम्नोऽस्मिन् परमात्मन्येव श्रुत्यन्तर उपलब्धेरिति सूत्रार्थः। धृतेश्चेति चकारात् सेतुपदोक्तनियामकत्वलिङ्गं ग्राह्यं तच्च नियमने श्रुत्यन्तरोपलब्धि-माह। एतस्येति। धृतौ तामाह। तथेति। आसमन्तात् काश्यते दीप्यते इति स्वयंज्योतिषि ब्रह्मण्याकाशशब्दस्य विभुत्वगुणतो वा प्रसिद्धिः प्रयोगप्राचुर्यं ॥

इतरपरामर्शात् स इति चेन्नासम्भवात् ॥ १८ ॥

यदि वाक्यशेषबलेन दहर इति परमेश्वरः परिगृह्येतास्मीतरस्यापि जीवस्य वाक्यशेषे परामर्शः। अथ य एष सम्प्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते एष आत्मेति *होवाचेति। अत्र हि सम्प्रसादशब्दः श्रुत्यन्तरे सुषुप्तावस्थायां दृष्टत्वादवस्थावन्तं जीवं शक्नोत्युपस्थापयितुं नार्थान्तरं। तथा शरीरव्यपाश्रयस्यैव जीवस्य शरीरात् समुत्थानं सम्भवति। यथाकाशव्यपाश्रयाणां वाय्वादीनामाकाशात् समुत्थानं तद्वत्। यथा चादृष्टोऽपि लोके परमेश्वरविषय आकाशशब्दः परमेश्वरधर्मसमभिव्याहारादाकाशो वै नाम नामरूपयोर्निर्वहितेत्येवमादौ परमेश्वरविषयोऽभ्युपगतः, एवं जीवविषयोऽपि भविष्यति। तस्मादितरपरामर्शात् दहरोऽस्मिन्नन्तराकाश इत्यत्र स एव जीव उच्यते इति चेत्, नैत-

---

यदि एष आत्मापहतपाप्मेत्यादिवाक्यशेषबलेन दहरः परस्तर्हि जीवोऽपीत्याशङ्क्य निषेधति। इतरेति। जीवस्य वाक्यशेषमाह। अथेति। दहरोक्त्यनन्तरं मुक्तोपसृप्यं शुद्धं ब्रह्मोच्यते, य एष सम्प्रसादो जीवोऽस्मात् कार्यकारणसङ्घात् सम्यगुत्थाय आत्मानं तस्मादविच्य विविक्तं आत्मानं स्वेन ब्रह्मरूपेणाभिनिष्पद्य साक्षात्कृत्य तदेव प्रत्यक् परं ज्योतिरुपसम्पद्यते प्राप्नोतीति व्याख्येयं। यथा मुखं व्यादाय स्वपितीति वाक्यं सुप्त्वा मुखं व्यादत्ते इति व्याख्यायते तद्वत्। ज्योतिषोऽनात्मत्वं निरस्यति। एष इति। सम्प्रसादादेव त्वाचरित्वेति श्रुत्यन्तरं। अवस्थावदुत्थानमपि जीवस्य लिङ्गमित्याह। तथेति। तदाश्रितस्य तस्मात् समुत्थाने दृष्टान्तः। यथेति। ननु क्वाप्याकाशशब्दो जीवेन दृष्ट इत्याशङ्क्यावस्थोत्थानलिङ्गबलात् कल्प्य इत्याह। यथा

---

* होवाचेति सो० पु० नास्ति।

देवं स्यात्, कस्मादसम्भवात्। नहि जीवो बुद्ध्याद्युपाधि*परिच्छिन्नाभिमानी सन्नाकाशे नोपमीयते। न चोपाधिधर्मानभिमन्यमानस्यापहतपाप्मत्वादयो धर्माः सम्भवन्ति। प्रपञ्चितञ्चैतत् प्रथमे सूत्रे, अतिरेकाशङ्का†परिहाराय तु पुनरुपन्यस्तं। पठिष्यति चोपरिष्टादन्यार्थश्च परामर्श इति [सू०१।३।२०] ॥

उत्तराच्चेदाविर्भूतस्वरूपस्तु ॥ १९ ॥

‡इतरपरामर्शाद्या जीवाशङ्का जाता सा असम्भवात् निराकृता। §अथेदानीं ‖मृतस्यैवामृतसेकात् पुनः ¶समुत्थानं जीवाशङ्कायाः क्रियते उत्तरस्मात् प्राजापत्याद्वाक्यात्। तत्र हि य आत्मापहतपाप्मेत्यपहतपाप्मत्वादिगुणकं आत्मानमन्वेष्टव्यं

चेति। नियामकाभावाज्जीवो दहरः किं न स्यादिति प्राप्ते नियामकमाह। नैतदित्यादिना। दहरे श्रुतधर्माणामसम्भवात् न जीवो दहर इत्यर्थः तर्हि पुनरुक्तिस्तत्राह। अतिरेकेति। उत्तराच्चेत्यधिकाशङ्कानिरासार्थमित्यर्थः। का तर्हि जीवपरामर्शस्य गतिस्तत्राह। पठिष्यतीति। जीवस्य स्वापस्थानभूतब्रह्मज्ञानार्थोऽयं परामर्श इति वक्ष्यते ॥

असम्भवादिति हेतोरसिद्धिमाशङ्क्य परिहरति। उत्तराच्चेत्यादि सूत्रं। निराकृताया जीवाशङ्कायाः प्रजातायाः प्रजापतिवाक्यबलात् पुनः समुत्थानं क्रियते जीवस्यैवापहतपाप्मत्वादिग्रहणेनासम्भवासिद्धेरित्यर्थः, कथं तत्र जीवोक्तिस्तत्राह। तत्रेत्यादिना। यद्यप्युपक्रमे जीवशब्दो नास्ति तथाप्यपहतपाप्मत्वादिगुणकमात्मानमुपक्रम्य तस्य

---

* परिच्छेदाभिमानीति सो० का० पु०।
† परिहारायाचेति मु० पु०।
‡ इतरेति मु० पु० नास्ति।
§ अथेति मु० पु० नास्ति।
‖ अमृतस्येवेति मु० पु०।
¶ समुत्थापनं जीवाशङ्का इति सो० का० पु०।

विजिज्ञासितव्यञ्च प्रतिज्ञाय च एषोऽक्षिणि पुरुषो दृश्यते एष आत्मेति ब्रुवन्नक्षिस्थं द्रष्टारं जीवमात्मानं निर्दिशति एतन्त्वेव ते भूयोऽनुव्याख्यास्यामीति च तमेव पुनः पुनः परामृश्य, य एष स्वप्ने महीयमानश्चरत्येष आत्मेति। तद्यत्रैतत् सुप्तः समस्तः सम्प्रसन्नः स्वप्नं न विजानात्येष आत्मेति *च जीवमेवावस्थान्तरगतं व्याचष्टे। तस्यैव चापहतपाप्मत्वादि दर्शयत्येतदमृतमभयमेतत् ब्रह्मेति। नाह खल्वयमेवं सम्प्रत्यात्मानं जानात्ययमहमस्मीति †नो एवेमानि भूतानीति च सुषुप्तावस्थायां दोषमुपलभ्य एतन्त्वेव ते भूयोऽनुव्याख्यास्यामि इति नो एवा-

---

जाग्रदाद्यवस्थात्रयोपन्यासादवस्थालिङ्गेन जीवनिश्चयात्तस्यैव ते गुणाः सम्भवन्तीति समुदायार्थः। इन्द्रं प्रजापतिर्ब्रूते। य एष इति। प्राधान्यादक्षिग्रहणं सर्वैरिन्द्रियैर्विषयदर्शनरूपजाग्रदवस्थापन्नमित्याह। द्रष्टारमिति। महीयमानः वासनामयैर्विषयैः पूज्यमान इति स्वप्नपर्याये, तद्यत्रेति, सुषुप्तिपर्याये च जीवमेव प्रजापतिर्व्याचष्टे इत्यन्वयः। यत्र काले तदेतत् स्वप्नं यथा स्यात् तथा सुप्तः सम्यक् अस्तो निरस्तः करणग्रामो यस्य स समस्तः, अत एवोपहृतकरणत्वात्तत्कृतकालुष्यहीनः सम्प्रसन्नः, स्वप्नं प्रपञ्चमज्ञानमात्रत्वेन विलापयति अतोऽज्ञानसत्त्वात् मुक्तद्विलक्षणः प्राज्ञः एष खल्वेतन्न्येन कारणशरीरसाक्षी तस्य साक्ष्यस्य सत्ता स्फूर्तिप्रदत्वात्मेत्यर्थः। चतुर्थपर्याये ब्रह्मोक्तेः तस्यैवापहतपाप्मत्वादिगुणा इत्याशङ्क्य तस्यापि पर्याये ऽस्य जीवत्वमाह। नाहेति। अहेति निपातः खेदार्थे। खिद्यमानो ह्येन्द्रः उवाच खलु सुप्तः पुमानयं सम्प्रति सुषुप्त्यवस्थायामयं देवदत्तोऽहमित्येवमात्मानं न जानाति। नो एव नैवेमानि भूतानि जानाति किन्तु विनाश एव प्राप्तो भवति। नाहमत्र भोग्यं पश्यामि इति दोषमुपलभ्य पुनः प्रजापतिमुपससार। तं दोषं श्रुत्वा प्रजापतिराह।

---

* चेति मु० पु० नास्ति

† नो एवेत्यादि भूतानि चेत्यन्तं मु० सो० पु० नास्ति।

न्यचैतदस्मादिति चोपक्रम्य शरीरसम्बन्धनिन्दापूर्वकमेष सम्प्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते स उत्तमः पुरुष इति जीवमेव शरीरात् समुत्थितं उत्तमं पुरुषं दर्शयति। तस्मादस्ति सम्भवो जीवे पारमेश्वराणां धर्माणां, अतो दहरोऽस्मिन्नन्तराकाश इति जीव एवोक्त इति चेत् कश्चिद्ब्रूयात् तं प्रतिब्रूयादाविर्भूतस्वरूपस्त्विति। तुशब्दः पूर्वपक्षव्यावृत्त्यर्थो नोत्तरस्मादपि वाक्यादिह जीवस्याशङ्का सम्भवतीत्यर्थः। कस्माद्यतस्तचापि आविर्भूतस्वरूपो जीवो विवक्ष्यते। आविर्भूतं स्वरूपमस्येत्याविर्भूतस्वरूपः, भूतपूर्वगत्या जीववचनं। एतदुक्तं भवति। य एषोऽक्षिणीत्यक्षिलक्षितं द्रष्टारं निर्दिश्योदशरावब्राह्मणेनैनं शरीरात्मताया व्युत्थाप्यैतं त्वेव त इति पुनः पुनस्तमेव व्याख्येयत्वेनाकृष्य *स्वप्नसुषुप्तोपन्यासक्रमेण परं ज्योति-

---

एतमिति। एतस्मात् प्रकृतादात्मनोऽन्यत्रान्यं न व्याख्यास्यामीत्युपक्रम्य मघवन्मर्त्यं वा इदं शरीरं इति निन्दापूर्वकं जीवमेव दर्शयतीत्यर्थः। तस्मात् प्रजापतिवाक्यात्। अतः सम्भवासिद्धेः। सिद्धान्तयति। तं प्रतीति। अवस्थात्रयाच्छोधनेनाविर्भूतं शोधितत्वमर्थस्य वाक्योक्त्यङ्गत्वमभिव्यक्तमित्यर्थः। तर्हि सूत्रे पुंलिङ्गेन जीवोक्तिः कथं ज्ञानेन जीवत्वस्य निवृत्तत्वादित्यत आह। भूतपूर्वेति। ज्ञानात् पूर्वमविद्या तत्कार्यप्रतिबिम्बितत्वरूपं जीवत्वमभूदिति कृत्वा ज्ञानानन्तरं ब्रह्मरूपोऽपि जीवनाम्नोच्यत इत्यर्थः। विश्वतैजसप्राज्ञतुरीयपर्यायचतुष्टयात्मकप्रजापतिवाक्यस्य तात्पर्यमाह। एतदिति। जन्मनाशवत्त्वात् प्रतिबिम्बवद्बिम्बदेहो नात्मेति ज्ञापनार्थं प्रजापतिरिन्द्रविरोचनौ प्रत्युवाचोदशरावे आत्मानमवेक्ष्य यदात्मनो न विजानीयस्तन्मे ब्रूत-

---

* स्वप्न० उपक्रमेणेति मु० पु०।

रूपसम्पद्य स्वेन रूपेणाभिनिष्पद्यत इति यदस्य पारमार्थिकं स्वरूपं परं ब्रह्म तद्रूपतयैनं जीवं व्याचष्टे न जीवेन रूपेण यत्तत् परं ज्योतिरूपसम्पत्तव्यं श्रुतं तत् परं ब्रह्म तच्चापहतपाप्मत्वादिधर्मकं तदेव च जीवस्य पारमार्थिकं स्वरूपं तत्त्वमसीत्यादिशास्त्रेभ्यो नेतरदुपाधिकल्पितं। यावदेव हि स्थाणाविव पुरुषबुद्धिं दैतलक्षणामविद्यां *न निवर्त्तयन् कूटस्थनित्यदृक्स्वरूपमात्मानमहं ब्रह्मास्मीति न प्रतिपद्यते तावज्जीवस्य जीवत्वं। यदा तु †देहेन्द्रियमनोबुद्धिसङ्घाताद्व्युत्थाप्य श्रुत्या प्रतिबोध्यते। नासि त्वं देहेन्द्रियमनोबुद्धिसङ्घातो नासि त्वं संसारी किं तर्हि सद्यत्तत् सत्यं स आत्मा चैतन्यमात्रस्वरूपस्त्वमसीति। तदा कूटस्थनित्यदृक्स्वरूपमात्मानं प्रतिबुध्यास्माच्छरीराद्य-

---

मित्यादि ब्रह्मणो नेत्याह। उदशरावेति। उदकपूर्णे शरावे प्रतिबिम्बात्मानं देहं दृष्ट्वा स्वस्याज्ञातं यत्तन्मह्यं वाच्यमित्युक्तश्रुत्यर्थः। व्युत्थाप्य विचार्य्याभिनिष्पद्यते इत्यत्रैतदुक्तं भवतीति सम्बन्धः। किमुक्तमित्यत आह। यदस्येति। जीवत्वरूपेण जीवं न व्याचष्टे लोकसिद्धत्वात् किन्तु तमनूद्य परस्परव्यभिचारिणीभ्योऽवस्थाभ्यो विविच्य ब्रह्मस्वरूपं बोधयति अतो यद्ब्रह्म तदेवापहतपाप्मत्वादिधर्मकं न जीव इत्युक्तं भवति, शोधितस्य ब्रह्माभेदेन तद्धर्मोक्तेरित्यर्थः। एवमवस्थोपन्यासस्य विवेकार्थत्वान्न जीवलिङ्गत्वं एतदमृतमेव तद्ब्रह्मेति लिङ्गोपेतश्रुतिविरोधादिति मन्तव्यं। ननु जीवत्वब्रह्मत्वविरुद्धधर्मवतोः कथमभेदस्तत्राह। तदेवेति। अन्वयव्यतिरेकाभ्यां जीवत्वस्याविद्याकल्पितत्वादविरोधः इति मत्वा दृष्टान्तेनान्वयमाह। यावदिति। व्यतिरेकमाह। यदेति। अविद्यायां सत्यां जीवत्वं वाक्योत्थप्रबोधात्तन्निवृत्तौ तन्निवृत्तिरित्याविद्यकं तदित्यर्थः। संसारित्वस्य कल्पितत्वे सिद्धं

---

* नेति सो० का० वर्ध० पु० नास्ति।

† देहे० बुद्धिदैतसङ्घातादिति मु० पु०।

भिमानात् समुत्तिष्ठन् स एव कूटस्थनित्यदृक्स्वरूप आत्मा भवति, स यो ह वै तत् परं ब्रह्म वेद ब्रह्मैव भवतीत्यादि-श्रुतिभ्यः। तदेव चास्य पारमार्थिकं स्वरूपं, येन शरीरात् समुत्थाय स्वेन रूपेणाभिनिष्पद्यते। कथं पुनः स्वञ्च रूपं *स्वेनैव च निष्पद्यत इति सम्भवति कूटस्थनित्यस्य। सुवर्णादीनान्तु द्रव्यान्तरसम्पर्कादभिभूतस्वरूपाणाम †भिव्यक्तासाधारणविशेषाणां क्षारप्रक्षेपादिभिः शोध्यमानानां स्वरूपेणाभिनिष्पत्तिः स्यात् तथा नक्तञ्चादीनामन्यभिभूतप्रकाशानामभिभावक-वियोगे रात्रौ स्वरूपेणाभिनिष्पत्तिः स्यात्। न तु ‡तथा चैतन्यज्योतिषो नित्यस्य केनचिदभिभवः सम्भवत्यसंसर्गित्वात् व्योम्न इव दृष्टविरोधाच्च। दृष्टिश्रुतिमतिविज्ञातयो हि जीवस्य स्वरूपं, तच्च शरीरादसमुत्थितस्यापि जीवस्य सदा

निगमयति। तदेव चास्येति। समुत्थाय स्वेन रूपेणाभिनिष्पद्यत इति श्रुतिं व्याख्यातुं आक्षिपति। कथं पुनरित्यादिना। कूटस्थनित्यस्य स्वरूपमित्यन्वयः। मनःसङ्गिनो हि क्रियया मलनाशादभिव्यक्तिर्न तु कूटस्थस्यासङ्गिन इत्याह। सुवर्णेति। द्रव्यान्तरं पार्थिवो मलः। अभिभूतेत्यस्य व्याख्यानमभिव्यक्तेति। असाधारणभास्वरत्वादिः अभिभावकः सौरालोकः। जीवस्वरूपस्याभिभवबाधकमाह। दृष्टेति। विज्ञानघन एवेति श्रुत्या चिन्मात्रस्तावदात्मा तच्चैतन्यं चक्षुरादिजन्यवृत्तिव्यक्तं दृष्ट्यादिपदवाच्यं सत् व्यवहाराङ्गं जीवरूपं भवतीति तस्याभिभूतत्वे दृष्टो व्यवहारो विरुध्येत हेत्वभावाद्व्यवहारो न स्यादित्यर्थः। अङ्गस्यापि स्वरूपं वृत्तिषु व्यक्तमित्यङ्गीकार्यं व्यवहारदर्शनादित्याह। तच्चेति। अन्यथेत्युक्तं स्फुटयति। तच्चेदिति। स्वरूपञ्चेत् ज्ञानिन

---

* तेनैव चेति मु० का० पु०।

† अनभिव्यक्तेति सो० पु०।

‡ तथात्मज्योतिष इति मु० का०।

निष्पन्नमेव दृश्यते। सर्वो हि जीवः पश्यन् शृण्वन्मन्वानो विजानन् व्यवहरत्यन्यथा व्यवहारानुपपत्तिः। तच्चेच्छरीरात् समुत्थितस्य निष्पद्येत प्राक् समुत्थानात् दृष्टो व्यवहारो विरुध्येत। अतः किमात्मकमिदं शरीरात् समुत्थानं किमात्मिका च स्वरूपेणाभिनिष्पत्तिरिति, अत्रोच्यते, प्राक् विवेकविज्ञानोत्पत्तेः शरीरेन्द्रियमनोबुद्धिविषयवेदनोपाधिभिरविविक्तमिव जीवस्य दृष्ट्यादि ज्योतिःस्वरूपं भवति। यथा शुद्धस्य स्फटिकस्य स्वाच्छ्यं शैत्यञ्च स्वरूपं प्राक् विवेकग्रहणाद्रक्तनीलाद्युपाधिभिरविविक्तमिव भवति प्रमाणजनितविवेकग्रहणात्तु *उत्तरकालवर्त्ती पराचीनस्फटिकः स्वाच्छ्येन शैत्येन च स्वेन रूपेणाभिनिष्पद्यत इत्युच्यते प्रागपि तथैव †स्यात् तथा देहाद्युपाध्यविविक्तस्यैव सतो जीवस्य श्रुतिकृतं विवेकज्ञानं शरीरात् समुत्थानं विवेकवि-

---

एव व्यज्येत ज्ञानात्पूर्वं व्यवहारोच्छित्तिरित्यर्थः। अतः। सदैव व्यक्तस्वरूपत्वादित्यर्थः। सदावृत्तिषु व्यक्तस्य वस्तुतोऽसङ्गस्यात्मनः अविद्यकदेहाद्यविवेकरूपस्य मलसङ्गस्य सत्त्वात्तद्विवेकापेक्षया समुत्थानादिश्रुतिरित्युत्तरमाह। अत्रेति। वेदना हर्षशोकादिः। अविविक्तमिवेति तादात्म्यस्य सङ्गस्य कल्पितत्वमुक्तं। अत्र कल्पितसङ्गे दृष्टान्तो यथेति। श्रुतिकृतमिति। त्वंपदार्थश्रुत्या योऽयं विज्ञानमयः प्राणेष्वित्याद्यया सिद्धमित्यर्थः। प्राणादिभिन्नशुद्धत्वंपदार्थज्ञानस्य वाक्यार्थसाक्षात्कारः फलमित्याह। केवलेति। सशरीरत्वस्य सत्यत्वात् समुत्थानमुत्क्रान्तिरिति व्याख्येयं न विवेक इत्याशङ्क्याह। तथा विवेकेति। उक्तश्रुत्यनुसारेणेत्यर्थः। शरीरेष्वशरीरमवस्थितमिति श्रुतेः अविवेकमात्रकल्पितं सशरीरत्वं अतो विवेक एव समुत्थानमित्यर्थः। ननु स्वकर्मार्जिते शरीरे भोगस्यापरिहार्यत्वात् कथं जीवत एव स्वरूपा-

---

* उत्तरकालवर्त्तीति का० वर्ध० सो० पु० नास्ति।

† मन् इति का० वर्ध० सो० पु० पाठः। सम् इति च क्वचित्पाठः।

ज्ञानफलं स्वरूपेणाभिनिष्पत्तिः केवलात्मस्वरूपावगतिः। तथा विवेकाविवेकमात्रेणैवात्मनोऽशरीरत्वं सशरीरत्वञ्च मन्त्रवर्णात्, अशरीरं शरीरेष्विति, शरीरस्थोऽपि कौन्तेय न करोति न लिप्यत इति च सशरीरत्वाशरीरत्वविशेषाभावस्मरणात्। तस्मादविवेकविज्ञानाभावादनाविर्भूतस्वरूपः सन् विवेकज्ञानादाविर्भूतस्वरूप इत्युच्यते, न त्वन्यादृशावाविर्भावानाविर्भावौ स्वरूपस्य सम्भवतः स्वरूपत्वादेव। एवं मिथ्याज्ञानकृत एव जीवपरमेश्वरयोर्भेदो न वस्तुकृतः व्योमवदसङ्गत्वाविशेषात्। कुतस्त्वेतदेवं प्रतिपत्तव्यं। यतो य एषोऽक्षिणि पुरुषो दृश्यते इत्युपदिश्यैतदमृतमभयमेतत् ब्रह्मेत्युपदिशति। योऽक्षिणि प्रसिद्धो द्रष्टा द्रष्टृत्वेन विभाव्यते सोऽमृताभयलक्षणाद्-ब्रह्मणोऽन्यस्येत् स्यात् ततोऽमृताभयब्रह्मसामानाधिकरण्यं न स्यात्। नापि प्रतिच्छायात्माऽयमक्षिलक्षितो निर्दिश्यते, प्रजापतेर्मृषावादित्वप्रसङ्गात्। तथा द्वितीयेऽपि पर्याये य एष स्वप्ने महीयमानश्चरतीति न प्रथमपर्यायनिर्दिष्टादक्षिपुरुषात्

विर्भाव इत्यत आह। शरीरस्थोऽपीति। अशरीरवत् शरीरस्थस्यापि बन्धाभावस्मृतेर्जीवतो मुक्तिर्युक्तेत्यर्थः। अविरुद्धे श्रुत्यर्थे सूत्रशेषो युक्त इत्याह। तस्मादिति। अन्यादृशौ सत्यावित्यर्थः। ज्ञानाज्ञानकृताविर्भावतिरोभावाविति स्थिते भेदोऽप्यंशांशित्वकृतो निरस्त इत्याह। एवमिति। अंशादिशून्यत्वमसङ्गत्वं। आत्मा द्रव्यत्वव्याप्यजातिशून्यः विभुत्वात् व्योमवदित्यात्मैक्यसिद्धेर्भेदो मिथ्येत्यर्थः। प्रजापतिवाक्याच्च भेदो मिथ्येत्याकाङ्क्षापूर्वकमाह। कुतस्त्वेत्यादिना। एतद्भेदस्य सत्यत्वमेव नास्तीति कुत इत्यन्वयः। छायायां ब्रह्मदृष्टिपरमिदं वाक्यं नाभेदपरमित्यत आह। नापीति। यस्य ज्ञानात् कृतकृत्यता सर्वकाम-

द्रष्टुरन्यो *निर्दिष्टः, एतन्त्वेव ते भूयोऽनुव्याख्यास्यामीत्युपक्रमात्। किञ्चाहमद्य स्वप्ने हस्तिनमद्राक्षं नेदानीं तं पश्यामीति दृष्टमेव प्रतिबुद्धः प्रत्याचष्टे, द्रष्टारन्तु तमेव प्रत्यभिजानाति य एवाहं स्वप्नमद्राक्षं स एवाहं जागरितं पश्यामीति। तथा तृतीयेऽपि पर्य्याये नाह खल्वयमेवं सम्प्रत्यात्मानं जानात्ययमहमस्मीति, नो एवेमानि भूतानीति सुषुप्तावस्थायां विशेषविज्ञानाभावमेव दर्शयति न विज्ञातारं प्रतिषेधति। यत्तु तत्र विनाशमेवापीतो भवतीति तदपि विशेषविज्ञानविनाशाभिप्रायमेव न विज्ञातृविनाशाभिप्रायं। नहि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते अविनाशित्वादिति श्रुत्यन्तरात्। तथा चतुर्थेऽपि पर्य्याये एतन्त्वेव ते भूयोऽनुव्याख्यास्यामि नो एवान्यचैतस्मादित्युपक्रम्य मघवन्मर्त्यं वा इदं शरीरमित्यादिना प्रपञ्चेन शरीराद्युपाधिसम्बन्धप्रत्याख्यानेन सम्प्रसादशब्दोदितं जीवं स्वेन रूपेणाभिनिष्पद्यत इति ब्रह्म-

---

प्राप्तिस्तमात्मानमन्विच्छाव इति प्रवृत्तयोरिन्द्रविरोचनयोर्यद्यनात्मच्छायां प्रजापतिर्ब्रूयात तदा मघवादौ स्यादित्यर्थः। प्रथमवत् द्वितीयादिपर्य्याये व्यावृत्ताखवस्थासु अनुस्यूतात्मा ब्रह्मत्वेनोक्त इत्याह। तथेति। अवस्थाभेदेऽप्यनुस्यूतः। युक्तिमाह। किञ्चेति। सुषुप्तौ ज्ञातुर्व्यावृत्तिमाशङ्क्याह। तथा तृतीय इति। सुषुप्तौ निर्विकल्पज्ञानरूप आत्मान्तीत्यत्र बृहदारण्यकश्रुतिमाह। न हीति। बुद्धेः साक्षिणो नाशो नास्ति नाशकाभावादित्यर्थः। एवमवस्थाभिरसङ्गत्वेनोक्त आत्मैव तुरीयेऽपि ब्रह्मत्वेनोक्त इत्याह। तथेति। श्रुतेरेकदेशिव्याख्यां दूषयति। केचित्त्विति। जीवपरयोर्भेदादिति भावः। श्रुतिबाधान्मैव-

---

* निर्दिष्ट इतीति सो० पु० पाठः।

स्वरूपापन्नं दर्शयन् न परस्मात् ब्रह्मणोऽमृताभयस्वरूपादन्यं जीवं दर्शयति। केचित्तु परमात्मविवक्षायां एतन्त्वेव ते इति जीवाकर्षणमन्याय्यं मन्यमाना एतमेव वाक्योपक्रमसूचितमपहतपाप्मत्वादिगुणकमात्मानं ते भूयोऽनुव्याख्यास्यामीति कल्पयन्ति, तेषामेतमिति सन्निहितावलम्बिनो सर्वनामश्रुतिर्विप्रलुप्येत, भूयः श्रुतिश्चोपरुध्येत, पर्य्यायान्तराभिहितस्य पर्य्यायान्तरेणानभिधीयमानत्वात्, एतन्त्वेव ते इति च प्रतिज्ञाय प्राक् चतुर्थात् पर्य्यायादन्यमन्यं व्याचक्षाणस्य प्रजापतेः प्रतारकत्वं प्रसज्येत, तस्माद्यदविद्याप्रत्युपस्थापितमपारमार्थिकं जैवं रूपं कर्तृभोक्तृरागद्वेषादिदोषकलुषितमनेकानर्थयोगि तद्विलयनेन तद्विपरीतमपहतपाप्मत्वादिगुणकं पारमेश्वरं स्वरूपं विद्यया प्रतिपाद्यते। सर्पादिविलयनेनेव रज्ज्वादीन्। अपरे तु वादिनः पारमार्थिकमेव जैवं रूपमिति मन्यन्ते। अस्मदीयास्तु केचित् तेषां सर्वेषामात्मैकत्वसम्यग्दर्शनप्रतिप-

---

मित्याह। तेषामिति। सन्निहितो जीव एव सर्वनामार्थ इत्यर्थः। उक्तस्य पुनरुक्तौ भूय इति युज्यते। भवतूपक्रान्तपरमात्मनस्तुर्य एवोक्तोक्तद्वाध इत्याह। भूय इति। लोकसिद्धजीवानुवादेन ब्रह्मत्वं बोधयत इति स्वमतमुपसंहरति। तस्मादिति। व्याख्यानान्तरासम्भवादित्यर्थः। विलयनं शोधनं विद्यया महावाक्येनेति यावत्। ये तु संसारं सत्यमिच्छन्ति तेषामिदं शारीरकमेवोत्तरमित्याह। अपरे त्वित्यादिना। शारीरकस्यार्थं सङ्क्षेपेणोपदिशति। एक एवेति। अविद्यामाययोर्भेदं निरसितुं सामानाधिकरण्यं आवरणविक्षेपशक्तिरूपशब्दप्रवृत्तिनिमित्तभेदात् सहप्रयोगः ब्रह्मैवाविद्यया संसरति न ततोऽन्यो जीव इति शारीरकार्थ इत्यर्थः। तर्हि सूत्रकारः किमिति

चभूतानां प्रतिषेधायेदं शारीरकमारब्धमेक एव परमेश्वरः कूटस्थनित्यो विज्ञानधातुरविद्यया मायया मायाविवदनेकधा विभाव्यते नान्यो विज्ञानधातुरस्तीति। यत्त्विदं परमेश्वरवाक्ये जीवमाशङ्क्य प्रतिषेधति सूत्रकारः नासम्भवादित्यादिना (१।३।१८।) तत्रायमभिप्रायः नित्यशुद्धबुद्धमुक्त*सत्यस्वभावे कूटस्थनित्य †एकस्मिन्नसङ्गेऽरूपे परमात्मनि तद्विपरीतं जैवं रूपं व्योम्नीव तलमलादिपरिकल्पितं तदात्मैकत्वप्रतिपादनपरवाक्यैर्न्यायोपपत्तिभिर्द्वैतवादप्रतिषेधैश्चापनेष्यामीति परमात्मनो जीवादन्यत्वं द्रढयति, जीवस्य तु न परस्मादन्यत्वं प्रतिपिपादयिषति किन्त्वनुवदत्येवाविद्याकल्पितं लोकप्रसिद्धं जीवभेदं। एवं हि स्वाभाविककर्तृत्वभोक्तृत्वानुवादेन प्रवृत्ताः कर्मविधयो न विरुध्यन्त इति ‡मन्यते, प्रतिपाद्यन्तु शास्त्रार्थमात्मैकत्वमेव दर्शयति शास्त्रदृष्ट्या तूपदेशो वामदेववदित्यादिना, वर्णितञ्चास्माभिर्विद्वदविद्वद्भेदेन कर्मविधिविरोधपरिहारः॥

भेदं ब्रूते तत्राह। यत्त्विति। परमात्मनोऽसंसारित्वसिद्ध्यर्थं जीवाद्भेदं द्रढयति। तस्यासंसारित्वनिश्चयाभावे तदभेदोक्तावपि जीवस्य संसारित्वानपायादित्यर्थः। अधिष्ठानस्य कल्पिताद्भेदेऽपि कल्पितस्याधिष्ठानान्न पृथक्त्वमित्याह। जीवस्य त्विति। कल्पितभेदानुमानस्य फलमाह। एवं हीति। सूत्रेष्वभेदो नोक्त इति भ्रान्तिं निरस्यति। प्रतिपाद्यमिति। आत्मेति। तूपगच्छन्तीत्यादिसूत्रचाप्यादिपदार्थः। नन्वद्वैतस्य शास्त्रार्थत्वे द्वैतापेक्षविधिविरोधस्तत्राह। वर्णितञ्चेति। अद्वैतमजानतः कल्पितद्वैताश्रया विधयो न विदुष इति सर्वमुपपन्नमित्यर्थः॥

---

* सत्येति का० वर्ध० सो० पु० नास्ति।

† एकस्मिन्निरंशे इति का० असङ्गिनि निर्विशेषे इति वर्ध०।

‡ मन्यते इति स्थाने प्रतिपादयिष्यतीति का०।

अन्यार्थश्च परामर्शः ॥ २० ॥

अथ यो दहरवाक्यशेषे जीवपरामर्शो दर्शितः अथ य एष सम्प्रसाद इत्यादिः स दहरे परमेश्वरे व्याख्यायमाने न जीवोपासनोपदेशो न प्रकृतविशेषोपदेश इत्यनर्थकत्वं प्राप्नोतीत्यत आह, अन्यार्थः। अयं जीवपरामर्शः न जीवस्वरूपपर्य्यवसायी किन्तु हि परमेश्वरस्वरूपपर्य्यवसायी, कथं सम्प्रसादशब्देादितो जीवो जागरिते व्यवहारे देहेन्द्रियपञ्चराध्यक्षो भूत्वा तद्वासनानिर्म्मितांश्च स्वप्नान्नाडीचरोऽनुभूय *ह्यन्तःशरणं प्रेप्सुरुभयरूपादपि शरीराभिमानात् समुत्थाय सुषुप्तावस्थायां परं ज्योतिराकाशशब्दितं परं ब्रह्मोपसम्पद्य विशेषविज्ञानवत्त्वं परित्यज्य स्वेन रूपेणाभिनिष्पद्यते यदस्योपसम्पत्तव्यं परं ज्योतिः, येन स्वेन रूपेणायमभिनिष्पद्यते स एष आत्मापहतपाप्मत्वादिगुण उपास्य इत्येवमर्थोऽयं जीवपरामर्शः परमेश्वरवादिनोऽप्युपपद्यते॥

अल्पश्रुतेरिति चेत्तदुक्तं ॥ २१ ॥

यदप्युक्तं दहरोऽस्मिन्नन्तराकाश इत्याकाशस्याल्पत्वं श्रूयमाणं परमेश्वरे नोपपद्यते, जीवस्य †त्वाराग्रोपमितस्याल्पत्व-

---

एवं प्रजापतिवाक्ये जीवानुवादेन ब्रह्मण एवापहतपाप्मत्वाद्युक्ते जीवे तदसम्भवान्न जीवो दहर इत्युक्तं तर्हि जीवपरामर्शस्य का गतिरित्यत आह। अन्यार्थश्चेति। सूत्रं व्याचष्टे। अथेत्यादिना। प्रकृते दहरे विशेषो गुणस्तदुपदेशोऽपि नेत्यर्थः। तत्र दहरवाक्यशेषरूपं सम्प्रसादवाक्यमाशङ्क्यापूर्वकं दहरब्रह्मपरत्वेन व्याचष्टे। कथमित्यादिना॥

---

* आन्त इति का० वर्ध० सो० पु० पाठः।

† त्वाराग्रमात्रोपमितस्येति का० वर्ध० सो० पु० पाठः।

मवकल्पत इति तस्य परिहारो वक्तव्यः। उक्तो ह्यस्य परिहारः *परमेश्वरस्यापेक्षिकमल्पत्वमवकल्पत इत्यभैकौकस्त्वात्तद्व्यपदेशाच्च नेति चेन्न निचाय्यत्वादेवं व्योमवच्चेत्यत्र स †एव परिहारोऽनुसन्धातव्य इति सूचयति। श्रुत्यैव चेदमल्पत्वं प्रत्युक्तं प्रसिद्धेनाकाशेनोपमिमानया यावान् वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाश इति॥

अनुकृतेस्तस्य च॥ २२॥

तेजोधातु

न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति समामनन्ति। तत्र यं भान्तमनुभाति सर्वं यस्य च भासा सर्वमिदं विभाति स किं तेजोधातुः कश्चिदुत प्राज्ञ आत्मेति विचिकित्सायां तेजोधातुरिति तावत् प्राप्तं, कुतः तेजोधातूनामेव सूर्य्यादीनां भानप्रतिषेधात्।

उपास्यत्वादल्पत्वमुक्तमिति व्याख्याय श्रुत्वा निरस्तमित्यर्थान्तरमाह। श्रुत्यैव चेदमिति। एवं दहरवाक्यं प्रजापतिवाक्यञ्च सगुणे निर्गुणे च समन्वितमिति सिद्धं॥

अनुकृतेस्तस्य च। मुण्डकवाक्यमुदाहरति। न तत्रेति। तस्मिन् ब्रह्मणि विषये न भाति तं न भासयतीत्यर्थः। यदा चण्डभास्करादिर्न भासयति तदा अल्पदीप्तेरग्नेः का कथेत्याह। कुत इति। किञ्च सर्वस्य सूर्यादेस्तद्भास्यत्वान्न तद्भासकत्वमित्याह। तमेवेति। अनुगमनवदनुभानं स्वगतमिति शङ्कां निरस्यति। तस्येति। तत्रेति सप्तम्याः सति विषये च साधारण्यात् संशयमाह। तत्रेति। पूर्वत्रात्मश्रुत्यादि-

---

* परमेश्वरेऽप्यापेक्षिकमिति का० वर्ध० सो० पु० पाठः।

† एवेत्येति का० वर्ध० सो० पु० पाठः।

तेजःस्वभावकं हि चन्द्रतारकादि तेजःस्वभावके एव सूर्य्ये भासमानेऽहनि न भासत इति प्रसिद्धं, तथा सह सूर्य्येण सर्वमिदं चन्द्रतारकादि यस्मिन्न भासते सोऽपि तेजःस्वभावक एव कश्चिदित्यवगम्यते। अनुभानमपि तेजःस्वभावक एवोपपद्यते *समानस्वभावकेष्वनुकारदर्शनात्, गच्छन्तमनुगच्छतीति†वत्, तस्मात् तेजोधातुः कश्चिदित्येवं प्राप्ते ब्रूमः। प्राज्ञ एवायमात्मा भवितुमर्हति। कस्मात् अनुकृतेः, अनुकरणमनुकृतिः, यदेतत्तमेव भान्तमनुभाति सर्वमित्यनुभानं तत् प्राज्ञपरिग्रहेऽवकल्प्यते। भारूपः सत्यसङ्कल्प इति हि प्राज्ञमात्मानमामनन्ति, न तु तेजोधातुं कञ्चित् सूर्य्यादयोऽनुभान्तीति प्रसिद्धं। समत्वाच्च तेजोधातूनां सूर्य्यादीनां न तेजोधातुमन्यं प्रत्यपेक्षास्ति यं भान्तमनुभायुः। न हि प्रदीपः

बलादाकाशशब्दस्य रूढित्यागादीश्वरे वृत्तिराश्रिता तथेहापि सति समभीबलात् वर्त्तमानार्थत्यागेन यस्मिन् सति सूर्य्यादयो न भान्ति न तेजोविशेष उपास्य इति भविष्यदर्थे वृत्तिराश्रयणीया अधुना भासमाने सूर्य्यादौ न भातीति विरोधात् इति दृष्टान्तेन पूर्वपक्षयति। तेजोधातुरिति। तेजोधानं निर्गुणस्वयंज्योतिरात्मज्ञानमित्युभयत्र फलं। तेजोधातुत्वे लिङ्गमाह। तेजोधातूनामिति। यत्तेजसोऽभिभावकं तत्तेज इति व्याप्तिमाह। तेजःस्वभावकमिति। यस्मिन् सति यन्न भाति तदनु तद्भातीति विरुद्धमित्यत आह। अनुभानमिति। ततो निकृष्टभानं विवक्षितमिति भावः। मुख्यसम्भवे विवक्षानुपपत्तेः मुख्यानुभानलिङ्गात् सर्वभासकः परमात्मा स्वभावकोऽत्र ग्राह्यः इति सिद्धान्तमाह। प्राज्ञ इति। प्राज्ञत्वं स्वप्रकाशकत्वं भासकत्वार्थमुक्तं, तत्र श्रुतिमाह। भारूप इति। मानाभावाच्च

---

* समानस्वभावकेष्वेवेति का० वर्ध० सो० पु० पाठः।

† वत् इति उक्त पु० नास्ति।

प्रदीपान्तरमनुभाति। यदप्युक्तं समानस्वभावकेष्वनुकारो दृश्यत इति नायमेकान्तो नियमोऽस्ति भिन्नस्वभावकेष्वपि ह्यनुकारो दृश्यते, *यथा सुतप्तोऽयःपिण्डोऽग्न्यनुकृतिरग्निं दहन्नमनुदहति, भौमं वा रजो वायुं वहन्तमनुवहतीति। अनुकृतेरित्यनुभानमसूसूचत्। तस्य चेति चतुर्थपादमस्य श्लोकस्य सूचयति। तस्य भासा सर्वमिदं विभातीति च तद्धेतुकं भानं सूर्यादेरुच्यमानं प्राज्ञमात्मानं गमयति। तदेवा ज्योतिषां ज्योतिरायुर्होपासतेऽमृतमिति †हि प्राज्ञमात्मानमामनन्ति। तेजोऽन्तरेण तु सूर्यादितेजो विभातीत्यप्रसिद्धं विरुद्धं च, तेजोऽन्तरेण तेजोऽन्तरस्य प्रतिघातात्। अथ वा न सूर्यादीनामेव श्लोकपरिपठितानामिदं तद्धेतुकं विभानमुच्यते, किं तर्हि सर्वमिदमित्यविशेषश्रुतेः सर्वस्यैवास्य नामरूपक्रियाकारकफलजातस्य याभिव्यक्तिः सा ब्रह्मज्योतिःसत्तानिमित्ता। यथा सूर्यज्योतिःसत्तानिमित्ता सर्वस्य रूपजातस्याभिव्यक्तिस्तद्वत्। न

तेजोधातुर्न ग्राह्य इत्याह। न त्विति। किञ्च सूर्यादयस्तेजोऽन्तरभानमनु न भान्ति तेजस्त्वात् प्रदीपवदित्याह। समत्वाच्चेति। योऽयमनुकरोति स तज्जातीय इति नियमो नास्तीत्याह। नायमेकान्त इति। पौनरुक्त्यमाशङ्क्योक्तानुवादपूर्वकं सूत्रोक्तं हेत्वन्तरं व्याचष्टे। अनुकृतेरिति। तमेव भान्तमित्येवकारोक्तं तद्भानं विना सर्वस्य पृथग्भानाभावरूपं अनुभानमनुकृतेरित्यनेनोक्तं। तस्य चेति। सर्वभासकत्वमुक्तं इत्यपौनरुक्त्यमित्यर्थः। आत्मनः सूर्यादिभासकत्वं श्रुत्यन्तरप्रसिद्धमविरुद्धञ्चेत्याह। तदेवा इति। सर्वशब्दः प्रकृतसूर्यादिवाचक-

---

* यथेति का० वर्ध० पु० नास्ति।

† हि इति का० वर्ध० पु० नास्ति।

तच्च सूर्य्यो भातीति च तच्च शब्दमाहरन् प्रकृतग्रहणं दर्शयति प्रकृतञ्च ब्रह्म यस्मिन् द्यौः पृथिवी चान्तरिक्षमोतमित्यादिना। अनन्तरञ्च, हिरण्मये परे कोषे विरजं ब्रह्म निष्कलं। तच्छुभं ज्योतिषां ज्योतिस्तद्यदात्मविदो विदुरिति। कथं तज्ज्योतिषां ज्योतिरित्यत इदमुत्थितं न तच्च सूर्य्यो भातीति। यदप्युक्तं सूर्य्यादीनां तेजसां भानप्रतिषेधस्तेजोधातावेवान्यस्मिन्नवकल्पते सूर्य्य इवेतरेषां *ज्योतिषां इति, †तच्चानुभानं स एव तेजोधातुरन्यो न सम्भवतीत्युपपादितं। ब्रह्मण्यपि चैषां भानप्रतिषेधोऽवकल्पते, यतो यदुपलभ्यते तत् सर्व्वं ब्रह्मण्येव ज्योतिषोपलभ्यते, ब्रह्म तु नान्येन ज्योतिषोपलभ्यते, स्वयज्योतिःस्वरूपत्वात्, येन सूर्य्यादयस्तस्मिन् भायुः। ब्रह्म ह्यन्यद्

त्वेन व्याख्यातः। सम्प्रति तस्यासङ्गवद्वृत्तितां मत्वाऽर्थान्तरमाह। अथ वेति। तच्चेति सर्वनामश्रुत्या प्रकृतं ब्रह्म ग्राह्यमित्याह। न तच्च सूर्य्य इति। किञ्च स्वयंब्रह्मपरपूर्वमन्त्राकाङ्क्षापूरकत्वादयं मन्त्रो ब्रह्मपर इत्याह। अनन्तरञ्चेति। हिरण्मये ज्योतिर्मये अन्नमयाद्यपेक्षया परे कोषे आनन्दमयाख्ये पुच्छशब्दितं ब्रह्म विरजं आगन्तुकमलशून्यं निष्कलं निरवयवं शुभं नैसर्गिकमलशून्यं सूर्य्यादिसाक्षिभूतं ब्रह्मवित्प्रसिद्धमित्यर्थः। सति सप्तमीपक्षमनुवदति। यदपीति। सूर्य्याद्यभिभावकतेजोधातौ प्रामाणिके तस्येह ग्रहणशङ्का स्यात् न तच्च प्रमाणमस्तीत्याह। तच्चेति। सिद्धान्ते तच्चेति वाक्यार्थः कथमित्याशङ्क्याह। ब्रह्मण्यपीति। सति सप्तमीपक्षे न भातीति श्रुतं वर्त्तमानत्वं त्यक्त्वा तस्मिन् सति न भास्यन्तीत्यश्रुतभविष्यत्त्वं कल्पनीयं प्रत्यक्षविरोधनिरासाय, विषयसप्तमीपक्षे तु न भासयतीत्यश्रुतणिजध्याहारमात्रमवकल्प्य न श्रुतत्याग इति लाघवं, अतो ब्रह्मणि विषये सूर्य्यादे-

---

* ज्योतिषामिति मो०का० वर्ध० पु० नास्ति।

† तच्च तु स एवेति का० वर्ध० पु० पाठः।

व्यनक्ति न तु ब्रह्मान्येन व्यज्यते, आत्मनैवायं ज्योतिषास्ते अगृह्यो नहि गृह्यते इत्यादिश्रुतिभ्यः ॥

अपि च स्मर्य्यते ॥ २३ ॥

अपि चेदं रूपं प्राज्ञस्यैवात्मनः स्मर्य्यते भगवद्गीतासु।

"न तद्भासयते सूर्य्यो न शशाङ्को न पावकः।
यद्गत्वा न निवर्त्तन्ते तद्धाम परमं मम" ॥ इति।

"यदादित्यगतं तेजो जगद्भासयतेऽखिलं।
यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकं"॥ इति च ॥

शब्दादेव प्रमितः ॥ २४ ॥

अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति इति श्रूयते, तथा अङ्गुष्ठमात्रः पुरुषो ज्योतिरिवाधूमकः ईशानो भूतभ-

---

र्भासकत्वनिषेधेन ब्रह्मभास्यत्वमुच्यत इत्यर्थः। येनान्यभास्यत्वेन हेतुना सूर्य्यादयस्तस्मिन् ब्रह्मणि विषये भासकाः स्युः, तथा तु ब्रह्मान्येन नोपलभ्यते स्वप्रकाशत्वादिति योजना। उक्तमेव श्रुत्यन्तरेण द्रढयति। ब्रह्मेति। स्वप्रकाशत्वेऽन्याभास्यत्वे च श्रुतिद्वयं। अगृह्यायोग्यत्वादगृह्य इत्यर्थः ॥

निजध्याहारपक्षे स्मृतिबलमप्यस्तीत्याह। अपि चेति। सूत्रं व्याचष्टे। अपि चेति। अभास्यत्वे सर्वभासकत्वे च श्लोकद्वयं द्रष्टव्यं तस्मादनुभानमन्वो ब्रह्मणि समन्वित इति सिद्धं ॥

शब्दादेव प्रमितः। काठकवाक्यं पठति। अङ्गुष्ठेति। पुरुषः पूर्णोऽप्यात्मनि देहमध्ये अङ्गुष्ठमात्रे हृदये तिष्ठतीत्यङ्गुष्ठमात्र इत्युच्यते तस्यैव परमात्मत्ववादिवाक्यान्तरमाह। तथेति। अधूमकमिति पठनीयं। योऽङ्गुष्ठमात्रो जीवः स वस्तुतो निर्धूमज्योतिर्वन्निर्मलप्रकाशरूप इति तमर्थं संक्षेप्य तस्य ब्रह्मत्वमाह। ईशान इति। तस्याद्वितीयत्वमाह। स एवेति। कालत्रयेऽपि स एवास्ति नान्यत् नचि-

अस्य स एवास्य स उ स्य एतद्वैतत् इति च। तत्र योऽयमङ्गुष्ठमात्रः पुरुषः श्रूयते, स किं विज्ञानात्मा किं वा परमात्मेति संशयः। तत्र परिमाणोपदेशाद्विज्ञानात्मेति तावत् प्राप्तं। न ह्यनन्तायामविस्तारस्य परमात्मनोऽङ्गुष्ठमात्रपरिमाणमुपदिश्येत। विज्ञानात्मनस्तूपाधिमत्त्वात् सम्भवति कयाचित् कल्पनयाङ्गुष्ठमात्रत्वं, स्मृतेश्च,

अथ मर्त्यवतः कायात् पाशवद्धं वशङ्गतं।
अङ्गुष्ठमात्रं पुरुषं निश्चकर्ष यमो बलात्॥ इति।

नहि परमेश्वरो बलाद्यमेन निष्कृष्टुं शक्यः, तेन *तत्र संमार्ष्यङ्गुष्ठमात्रो निश्चितः स एवेहापीत्येवं प्राप्ते ब्रूमः। • परमात्मैवायमङ्गुष्ठमात्रपरिमितः पुरुषो भवितुमर्हति। कस्मात् शब्दात् ईशानो भूतभव्यस्येति। न ह्यन्यः परमेश्वराद् भूतभव्यस्य निरङ्कुशमीशिता। एतद्वै तदिति च। प्रकृतं पृष्टमिहा-

---

केतसा दृष्टं ब्रह्म तदेतदेवेत्यर्थः। परिमाणेशानशब्दाभ्यां संशयमाह। तत्रेति। यथानुमानादिलिङ्गात् लिङ्गध्याहारेण सूर्याद्यगोचरो ब्रह्मेत्युक्तं तथा प्रथममश्रुतपरिमाणलिङ्गात् जीवप्रतीताधीशानोऽस्मीति ध्यायेदिति विधध्याहारेण ध्यानपरं वाक्यमिति पूर्वपक्षयति। तत्र परिमाणेति। पूर्वपक्षे ब्रह्मदृष्ट्या जीवोपास्तिः, सिद्धान्ते तु प्रत्यग्ब्रह्मैक्यज्ञानं फलमिति मन्तव्यं। आयामो दैर्घ्यं विस्तारो महत्त्वमिति भेदः। कयाचिदिति। अङ्गुष्ठमात्रहृदयस्य विज्ञानशब्दितबुद्ध्यभेदाध्यासकल्पनयेत्यर्थः। स्मृतिसंवादादप्यङ्गुष्ठमात्रो जीव इत्याह। स्मृतेश्चेति। अथ मरणानन्तरं यमपाशैर्बद्धं कर्मवशं प्राप्तमित्यर्थः। तत्रापीश्वरः किं न स्यादित्यत आह। न हीति। प्रभवति संयमने

---

* तत्रेति का० वर्ध० पु० नास्ति।

नुसन्दधाति, एतदैतत् यत् पृष्टं ब्रह्मेत्यर्थः। पृष्टञ्चेह ब्रह्म। "अन्यत्र धर्मादन्यत्राधर्मात् कृताकृतात्। अन्यत्र भूताच्च भव्याच्च यत्तत् पश्यसि तदद" इति। शब्दादेवेति अभिधानश्रुतेरेवेशान इति परमेश्वरोऽवगम्यत इत्यर्थः। कथं पुनः सर्वगतस्य परमात्मनः परिमाणोपदेश इत्यत्र ब्रूमः॥

हृद्यपेक्षया तु मनुष्याधिकारत्वात्॥ २५॥

सर्वगतस्यापि परमात्मनो हृदयेऽवस्थानमपेक्ष्याङ्गुष्ठमात्रत्वमिदमुच्यते, आकाशस्येव वंशपर्वापेक्षमरत्निमात्रत्वं। न ह्यङ्गुष्ठमात्रस्यैव परमात्मनोऽङ्गुष्ठामात्रत्वमुपपद्यते। न चान्यः परमात्मन इह ग्रहणमर्हति ईशानशब्दादिभ्य इत्युक्तं। ननु प्रतिप्राणिभेदं हृदयानामनवस्थितत्वात्तदपेक्षमप्यङ्गुष्ठमात्रत्वं

ममापि विष्णुरिति यमस्येश्वरनियम्यत्वस्मरणादिति भावः। भूतभव्यस्येत्युपपदाद्वाधकाभावाच्च ईशान इतीशत्वशब्दान्निरङ्कुशमीशिता भातीति श्रुत्या लिङ्गं बाध्यमिति सिद्धान्तयति। परमात्मेति। प्रकरणाच्च ब्रह्मपरमिदं वाक्यमित्याह। एतदिति। शब्दो वाक्यं लिङ्गात् दुर्बलमित्याशङ्क्याह। शब्दादिति॥

करः सक्थनिष्ठः अरत्निः। मुख्याङ्गुष्ठमात्रो जीवो गृह्यतां किं गौणग्रहणेनेत्यत आह। न चान्य इति। सति सम्भवे मुख्यग्रहोऽन्याय्यः अत्र तु श्रुतिविरोधादसम्भव इति गौणग्रह इत्यर्थः। मनुष्यानेवेति चैवर्णिकानेवेत्यर्थः। शुक्लत्वादित्यनेन पश्वादीनां देवानामृषीणाञ्चाधिकारो बाधितः। तत्र पश्वादीना शास्त्रार्थज्ञानादिसामर्थ्याभावात् कर्मण्यशक्तिः, इन्द्रादेः स्वदेवताके कर्मणि स्वोद्देशेन द्रव्यत्यागायोगादशक्तिः, ऋषीणामार्षेयवरणे ऋत्यन्ताभावादशक्तिः।

शब्दादेव प्रमितः। हृद्यपेक्षया तु मनुष्याधिकारत्वात्। २५। तदुपर्यपि बादरायणः संभवात् विरोधः कर्मणीति चेन्नानेकप्रतिपत्तेर्दर्शनात्। २७। शब्द इति चेन्नातः प्रभवात्प्रत्यक्षानुमानाभ्याम्। २८॥ अतएव च नित्यत्वम्। २९। समाननामरूपत्वाच्चावृत्तावप्यविरोधो दर्शनात् स्मृतेश्च॥ ३०॥ अर्थादिसंभवादनधिकारं जैमिनिः ३५ ज्योतिषि भावाच्च ३२ भावं तु बादरायणोऽस्ति हि ३३ कुमस्य तदनादरश्रवणात् तदाद्रवणात्

नोपपद्यत इत्यत उत्तरमुच्यते, मनुष्याधिकारत्वादिति। शास्त्रं ह्यविशेषप्रवृत्तमपि मनुष्यानेवाधिकरोति शक्तत्वादर्थित्वाद-पर्युदस्तत्वादुपनयनादिशास्त्राच्चेति। वर्णितमेतदधिकारल-क्षणे, मनुष्याणाञ्च नियतपरिमाणः कार्यः, औचित्येन नियत-परिमाणमेव चैषामङ्गुष्ठमात्रं हृदयं। अतो मनुष्याधिकार-त्वाच्छास्त्रस्य मनुष्यहृदयावस्थानापेक्षमङ्गुष्ठमात्रत्वमुपपन्नं पर-मात्मनः। यदप्युक्तं परिमाणोपदेशात् स्मृतेश्च संभार्य्यैवाय-मङ्गुष्ठमात्रः प्रत्येतव्य इति तत् प्रत्युच्यते स आत्मा, तत्त्वमसी-

---

र्थित्वादित्यनेन निष्क्रामाना मुमुक्षूणां स्थावराणाञ्चाधिकारे वा-रितस्तत्र मुमुक्षूणां शुद्धार्थित्वे नित्यादिष्वधिकारो न काम्येषु शुद्ध-चित्तानां भोक्तार्थित्वे श्रवणादिषु यज्ञकेष्वधिकारो न कर्म्मस्विति मन्तव्यं। शूद्रस्याधिकारं निरस्यति। अपर्युदस्तत्वादिति। शूद्रो यज्ञे नावसृज्य इति पर्युदासात्, उपनयीत तमध्यापयीतेति शास्त्राच्च न शूद्रस्य वैदिके कर्म्मण्यधिकारः। तस्यैकजातित्वस्मृतेरुपनयनप्रयुक्त-द्विजत्वाभावेन वेदाध्ययनाभावात्। अत्रापेक्षितो न्यायः षष्ठाध्याये वर्णित इत्याह। वर्णितमिति। स्वर्गकामो यजेतेत्यादिशास्त्रस्याविः शेषेण सर्व्वान् फलार्थिनः प्रति प्रवृत्तत्वात् प्राणिमात्रस्य सुखार्थि-त्वाच्च फलार्थे कर्म्मणि पश्वादीनामधिकार इत्याशङ्क्योक्तरीत्या तेषां शक्तत्वाभावात् स्वर्गकामपद मनुष्यपरतया सङ्कोच्य मनुष्याधिकार-त्वस्यापि चातुर्वर्ण्याधिकारमाशङ्क्य वसन्ते ब्राह्मणोऽग्नीनादधीत ग्रीष्मे राजन्यः शरदि वैश्य इति चयाणामेवाग्निसम्बन्धश्रवणात् तेषामेवा-धिकार इति वर्णितमित्यर्थः। प्रकृते किमायातं तत्राह। मनुष्या-णाञ्चेति। प्रायेण सप्तवितस्तिपरिमितो मनुष्यदेह इत्यर्थः। एवम-ङ्गुष्ठशब्दः हृत्परिमाणवाचकः तत्स्थं ब्रह्म लक्षयतीत्युक्तं सम्मति तच्छब्देनाङ्गुष्ठमात्रजीवमनूद्यायमीशान इति ब्रह्मभेदो बोध्य इति वक्तुं उक्तमनुवदति। यदपीति। प्रतिपाद्याभेदविरोधात् अनुवाद्या-

सूच्यते हि ३४ क्षत्रियत्वगतेश्चोत्तरत्र चैत्ररथेन लिङ्गात् ३५ संस्कारपरामर्शात् तदभावाभिलापाच्च ३६ तदभावनिर्धारणे च प्रवृत्तेः ३७ श्रवणाध्ययनार्थप्रतिषेधात् स्मृतेश्च ३८ ॥

त्यादिवत् संसारिण एव मनोऽङ्गुष्ठमात्रस्य ब्रह्मत्वमिदमुपदिश्यत इति। द्विरूपा हि वेदान्तवाक्यानां प्रवृत्तिः, क्वचित् परमात्मस्वरूपनिरूपणपरा क्वचिद्विज्ञानात्मनः परमात्मैकत्वोपदेशपरा। तदत्र विज्ञानात्मनः परमात्मनैकत्वमुपदिश्यते नाङ्गुष्ठमात्रत्वं कस्यचित्। एतमेवार्थं परेण स्पष्टीकरिष्यति। अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा सदा जनानां हृदये सन्निविष्टः। तं स्वाच्छरीरात् प्रवृहेन् मुञ्जादिवेषीकां धैर्येण तं विद्याच्छुक्रममृतमिति ॥

ङ्गुष्ठमात्रत्वं बाध्यं तात्पर्यार्थस्य बलवत्त्वादित्याह। तदिति। क्वचिदस्थूलमित्यादौ, क्वचित्तत्त्वमसीत्यादौ। ननु परमात्मनोऽङ्गुष्ठपरिमाणत्वं न सम्भवतीति सूत्रकारेण हृदयापेक्षमङ्गुष्ठमात्रत्वमुक्तं द्विविधेत्यादिभाष्यात्तु जीवमुद्दिश्य ब्रह्मत्वबोधनमिति प्रतीयते इति सूत्रार्थास्पर्शित्वाद्भाष्यमनुपपन्नमिति चेत् न भाष्यतात्पर्यानभिज्ञानात्। कठवल्लीवाक्यस्यावान्तरतात्पर्यमेकं महातात्पर्यं चैकं तत्रावान्तरतात्पर्यमुपास्ये ब्रह्मणि महातात्पर्यं च ज्ञेये ब्रह्मणि अत एव भाष्यकारैर्वाक्यद्वयोपन्यासः कृतः। अत एवोपासनाफलं कठवल्यामेव श्रुते चैका च हृदयस्य नाड्य इत्यादिना बोधितं। अत एव चतुर्थाध्याये द्वितीयचरणे तदेके इति सूत्रेऽर्द्धविद्यां प्रकृत्य समामनन्ति इति भाष्यकारैः प्रथमवाक्यस्य उपास्ये ब्रह्मणि तात्पर्यमिति प्रकटीकृतं। इत्थं चाङ्गुष्ठमात्रत्वभाष्यं महातात्पर्याभिप्रायकमिति द्रष्टव्यं। रामानुजभाष्यकृता तु पूर्वपक्षेऽस्मद्भाष्यतात्पर्याज्ञानेनैव कृत इत्यवधेयं। एकत्वार्थे वाक्यशेषमनुकूलयति। एतमिति। श्रुतिर्यमो वा कर्त्ता द्रष्टव्यः जीवं प्रवृहेत् पृथक् कुर्यात् धैर्येण बलवदिन्द्रियनिग्रहादिना तं विविक्तमात्मानं शुक्रं स्वप्रकाशममृतं कूटस्थं ब्रह्म जानीयादित्यर्थः। तस्मात् कठवाक्यं प्रत्यग्ब्रह्मणि ज्ञेये समन्वितमिति सिद्धं ॥

तदुपर्य्यपि बादरायणः सम्भवात् ॥ २९ ॥

अङ्गुष्ठमात्रश्रुतिर्मनुष्यहृदयापेक्षा मनुष्याधिकारत्वाच्छास्त्रस्येत्युक्तं, तत्प्रसङ्गादिदमुच्यते। बाढं, मनुष्यानधिकरोति शास्त्रं न तु मनुष्यानेवेतीह ब्रह्मज्ञाने नियमोऽस्ति, तेषां मनुष्याणामुपरिष्टाद्दे देवादयस्तानप्यधिकरोति शास्त्रमिति बादरायण आचार्यो मन्यते, कस्मात् सम्भवात्। सम्भवति हि तेषामप्यर्थित्वाद्यधिकारकारणं। तच्चार्थित्वं तावन्मोक्षविषयं देवादीनामपि सम्भवति विकारविषयविभूत्यनित्यत्वालोचनादिनिमित्तं। तथा सामर्थ्यमपि तेषां सम्भवति मन्त्रार्थवादेतिहासपुराणलोकेभ्यो

शास्त्रस्य मनुष्याधिकारत्वे देवादीनां ब्रह्मविद्यायामप्यनधिकारः स्यादित्याशङ्क्याह। तदुपर्य्यपि सम्भवात्। ननु समन्वयाध्यायेऽधिकारचिन्ता न सङ्गतेत्यत आह। 'अङ्गुष्ठेति। स्मृतस्योपेक्षानर्हत्वं प्रसङ्गः अत्र मनुष्याधिकारत्वोक्त्या स्मृतानां देवादीनां वेदान्तश्रवणादावधिकारोऽस्ति न वेति सन्देहे भोगासक्तानां वैराग्याद्यसम्भवान्नेति प्राप्ते सिद्धान्तमाह। बाढमिति। एवमधिकारविचारात्मकाधिकरणद्वयस्य प्रासङ्गिकी सङ्गतिः। अत्र पूर्वपक्षे देवादीनां ज्ञानानधिकारात् देवत्वप्राप्तिद्वारा क्रममुक्तिफलासु दहराद्युपासनासु क्रममुक्त्यर्थिनां मनुष्याणां अप्रवृत्तिः फलं सिद्धान्ते तु प्रवृत्तिः। उपासनाभिर्देवत्वं प्राप्तानां श्रवणादिना ज्ञानान्मुक्तिसम्भवादिति सफलोऽयं विचारः। ननु भोगासक्तानां तेषां मोक्षार्थित्वाभावान्नाधिकार इत्यत आह। अर्थित्वं तावदिति। विकारत्वेनान्तवत्विषयसुखस्य क्षयोदयादिदोषदृष्ट्या निरतिशयसुखमोक्षार्थित्वं सत्त्वप्रकृतीनां देवानां सम्भवतीत्यर्थः। नन्विन्द्राय स्वाहेत्यादौ चतुर्थ्यन्तशब्दातिरिक्ता विग्रहवती देवता नास्ति शब्दस्य चासामर्थ्यान्नाधिकार इत्यत आह। तथेति। अर्थित्ववदित्यर्थः। अपर्य्याप्तत्वमाह।

विग्रहवत्त्वाद्यवगमात्'। न च तेषां कश्चित् प्रतिषेधोऽस्ति। *न चोपनयनादिश्रास्त्रेणैषामधिकारो †निवर्त्तितः। उपनयनस्य वेदाध्ययनार्थत्वात्, तेषाञ्च स्वयंप्रतिभातवेदत्वात्। अपि चैषां विद्याग्रहणार्थं ब्रह्मचर्य्यादि दर्शयति एकशतं ह वै वर्षाणि मघवा प्रजापतौ ब्रह्मचर्य्यमुवास, भृगुर्वै वारुणिर्वरुणं पितरमुपसशार अधीहि भगवो ब्रह्मेत्यादिः। यदपि कर्म्मस्वनधिकारकारणमुक्तं न देवानां देवतान्तराभावात् न ऋषीणामार्षेयान्तराभावादिति, न तद्विद्यास्वस्ति। न हीन्द्रादीनां विद्यास्वधिक्रियमाणानामिन्द्राद्युद्देशेन किञ्चित् छत्त्वमस्ति, न च भग्वादीनां भग्वादिसगोचतया, तस्माद्देवादीनामपि विद्यास्व-

---

न च तेषामिति। शूद्रो यज्ञे न क्लृप्त इतिवत् देवादीनां विद्याधिकारनिषेधो नास्तीत्यर्थः। ननु विग्रहवत्त्वेन दृष्टसामर्थ्ये सत्यप्युपनयनाभावात् श्रास्त्रीयसामर्थ्यं नास्तीत्यत आह। न चेति। जन्मान्तराध्ययनबलात् स्वयमेव प्रतिभाताः स्मृता वेदा येषां ते तथा तद्भावादित्यर्थः। बालादिषु प्रविष्टपिशाचादीनां वेदोद्वेषदर्शनात्। देवयोनीनां जन्मान्तरस्मरणमस्तीति स्मृतवेदान्तानामर्थविचारो युक्त इत्यर्थः। देवानाञ्च ऋषीणाञ्च विद्याधिकारे कारणमर्थित्वादिकमुक्त्वा श्रौतं गुरुकुलवासादिलिङ्गमाह। अपि चेति। ननु ब्रह्मविद्या देवादीनाधिकारीति वेदार्थत्वात् अग्निहोत्रवदित्यत आह। यदपीति। देवानां कर्म्मसु नाधिकारः देवतान्तराणामुद्देश्यानामभावादिति प्रथमसूत्रार्थः, ऋषीणामनधिकारः ऋष्यन्तराभावात् ऋषियुक्ते कर्म्मण्यशक्तेरिति द्वितीयसूत्रार्थः। असामर्थ्यमुपाधिरिति परिहरति। न तदिति। असामर्थ्यरूपं कारणं इत्यर्थः, न ह्यस्ति येनासामर्थ्यं स्या-

---

* उपनयनश्रास्त्रेति सो० का० वर्ध० पु० पाठः।

† निवर्त्तेतेति सो० का० वर्ध० पु० पाठः।

धिकारः केन वार्य्यते। देवाद्यधिकारेऽप्यङ्गुष्ठमात्रश्रुतिः स्वाङ्गुष्ठापेक्षया न विरुध्यते॥

विरोधः कर्म्मणीति चेन्नानेकप्रतिपत्तेर्दर्शनात्॥ २७॥

स्यादेतत् यदि विग्रहवत्त्वाद्यभ्युपगमेन देवादीनां विद्यास्वधिकारो वर्ण्येत विग्रहवत्त्वात् ऋत्विगादिवत् इन्द्रादीनामपि स्वरूपसन्निधानेन कर्माङ्गभावोऽभ्युपगम्येत, तदा च विरोधः कर्म्मणि स्यात्, न ह्येन्द्रादीनां स्वरूपसन्निधानेन यागेऽङ्गभावो दृश्यते, न च सम्भवति। बहुषु यागेषु युगपदेकस्येन्द्रस्य स्वरूपसन्निधानानुपपत्तेरिति चेत्, नायमस्ति विरोधः, कस्मादनेकप्र-

---

दिति शेषः, तद्यो यो देवानां प्रत्यबुद्धत स एव तदभवत्, तथर्षीणामिति वाक्यबाधोऽप्यनुमानस्य द्रष्टव्यः। ननु देवादीन् प्रत्यङ्गुष्ठमात्रश्रुतिः कथं तेषां महादेहत्वेन हृदयस्थाप्यदङ्गुष्ठमात्रत्वाभावात्। अतः श्रुतिषु तेषां नाधिकार इत्यत आह। देवाद्यधिकारेऽपीति॥

ननु मन्त्रादीनां प्रतीयमानविग्रहवत्त्वे तात्पर्यं कल्पयित्वा देवादीनामधिकार उक्तः स चायुक्तः अन्यपराणां तेषां प्रत्यक्षादिविरोधेन स्वार्थे तात्पर्यकल्पनानुपपत्तेरित्याक्षिप्य सूत्रचतुष्टयेन परिहरति। विरोधः कर्म्मणीत्यादिना। वर्ण्येत, तर्हीति शेषः। स्वरूपं विग्रहः, अङ्गत्वेऽभ्युपगम्ये प्रत्यक्षेण देवता दृश्येत न च दृश्यते अतो योग्यानुपलब्ध्या देवताया विग्रहवत्त्वा अभावात् सम्प्रदानकारकाभावेन कर्म्मनिष्पत्तिर्न स्यादित्याह। तदा चेति। विग्रहस्याङ्गत्वं अनुपलब्धिबाधितं युक्त्या च न सम्भवतीत्याह। न चेति। तस्मादर्थोपस्थितशब्द एव देवता तस्या अचेतनत्वान्न विद्याधिकार इति शङ्कार्थं परिहरति। नायमिति। एतस्यापि देवस्य योगबलादनेकदेहप्राप्तिः श्रुतिस्मृतिदर्शनात् सम्भवति। अतो न कर्म्मणि विरोध इति

तिपत्तेः। एकस्यापि देवतात्मनो युगपदनेकस्वरूपप्रतिपत्तिः सम्भवति। कथमेतदवगम्यते, दर्शनात्। तथा हि कति देवा इत्युपक्रम्य त्रयश्च त्री च शता त्रयश्च त्री च सहस्रेति निरूप्य कतमे ते इत्यस्यां पृच्छायां महिमान एवैषामेते त्रयस्त्रिंशत्त्वेव देवा इति ब्रुवती श्रुतिरेकैकस्य देवतात्मनो युगपदनेकरूपतां दर्शयति। तथा त्रयस्त्रिंशतोऽपि षडाद्यन्तर्भावक्रमेण कतम एको देव इति प्राण इति प्राणैकरूपतां देवानां दर्शयन्ती तस्यैवैकस्य प्राणस्य युगपदनेकरूपतां दर्शयति। तथा स्मृतिरपि

"आत्मनो वै शरीराणि बहूनि भरतर्षभ।
कुर्य्याद् योगी बलं प्राप्य तैश्च सर्व्वैर्महीञ्चरेत्॥
प्राप्नुयाद्विषयान् कैश्चित् कैश्चिदुग्रतपश्चरेत्।
सङ्क्षिपेच्च पुनस्तानि सूर्य्यो रश्मिगणानिव"॥

श्याचष्टे। कस्मादित्यादिना। वैश्वदेवशास्त्रे शस्यमानदेवाः कतीति शाकल्येन पृष्टो याज्ञवल्क्यो निविदा त्रयस्त्रेत्यादिरूपया उत्तरं ददौ। निविन्नाम शस्यमानदेवसङ्ख्यावाचकः शब्दः। षडधिकानि त्रीणि शतानि त्रीणि सहस्राणीति सङ्ख्योक्ता सङ्ख्येयस्वरूपप्रश्ने महिमानो विभूतयः सर्वे देवाः, एषां त्रयस्त्रिंशद्देवानां अष्टौ वसव एकादश रुद्रा द्वादशादित्या इन्द्रः प्रजापतिश्चेति त्रयस्त्रिंशद्देवास्तेऽपि घस्रां अग्निपृथिवीवाय्वन्तरिक्षादित्यदिवां महिमानस्तेऽपि षट्सु देवेषु अन्तर्भवन्ति। षट् देवास्त्रिषु लोकेषु त्रयश्च द्वयोरन्नप्राणयोर्द्वौ च एकस्मिन् प्राणे हिरण्यगर्भे अन्तर्भवत इति दर्शितमित्यर्थः। त्रयस्त्रिंशतोऽपि देवानामिति सम्बन्धः। दर्शनं श्रौतं व्याख्याय स्मार्त्तं व्याचष्टे। तथा स्मृतिरिति। बलं योगसिद्धिं।

इत्येवंजातीयिका प्राप्तास्मादैश्वर्याणां योगिनामपि युगपदनेकशरीरयोगं दर्शयति किमु वक्तव्यमाजानसिद्धानां देवानां। अनेकरूपप्रतिपत्तिसम्भवाच्चैकैका देवता बहुभी रूपैरात्मानं प्रविभज्य बहुषु यागेषु युगपदङ्गभावं गच्छति परैश्च न दृश्यतेऽन्तर्धानादिशक्तियोगादित्युपपद्यते। अनेकप्रतिपत्तेर्दर्शनात् इत्यस्यापरा व्याख्या विग्रहवतामपि कर्माङ्गभावचोदनास्वनेका प्रतिपत्तिर्दृश्यते। क्वचिदेकोऽपि विग्रहवाननेकत्र युगपदङ्गभावं न गच्छति यथा बहुभिर्भोजयद्भिर्नैको ब्राह्मणो युगपद्भोज्यते। क्वचिच्चैकोऽपि विग्रहवाननेकत्र युगपदङ्गभावं गच्छति। यथा बहुभिर्नमस्कुर्वाणैरेको ब्राह्मणो युगपन्नमस्क्रियते तद्वदिहोद्देशपरित्यागात्मकत्वाद्यागस्य विग्रहवतीमप्येकान्देवतामुद्दिश्य बहवः स्वं स्वं द्रव्यं युगपत् परित्यक्ष्यन्तीति विग्रहवत्त्वेऽपि देवानां न किञ्चित् कर्मणि विरुध्यते॥

अणिमा महिमा चैव लघिमा प्राप्तिरीशिता।
प्राकाम्यञ्च वशित्वञ्च यत्र कामावसायिता॥

इत्यष्टैश्वर्याणि। तत्रैन अणुर्महान् लघुर्गुरुश्च भवति योगी। अङ्गुल्या चन्द्रस्पर्शः प्राप्तिः। ईशिता सृष्टिशक्तिः। प्राकाम्यं इच्छानभिघातः। वशित्वं नियमनशक्तिः। सङ्कल्पमात्रादिष्टलाभो यत्रकामावसायितेति भेदः। आजानसिद्धानां जन्मना सिद्धानामित्यर्थः। फलितमाह। अनेकेति। अनेकेषु कर्मस्वेकस्य प्रतिपत्तिरङ्गभावः। तस्य लोके दर्शनादिति दृष्टं व्यतिरेकमाह। क्वचिदेक इति। प्रकृतोपयुक्तमन्वयदृष्टान्तमाह। क्वचिच्चेति॥

शब्द इति चेन्नातः प्रभवात् प्रत्यक्षानुमानाभ्यां ॥ २८ ॥

मा नाम विग्रहवत्त्वे देवादीनामभ्युपगम्यमाने कर्म्मणि क्वचिद्विरोधः प्रसञ्जि शब्दे तु विरोधः प्रसज्येत, कथं औत्पत्तिकं हि शब्दस्यार्थेन सम्बन्धमाश्रित्यानपेक्षत्वादिति वेदस्य प्रामाण्यं स्थापितं। इदानीन्तु विग्रहवती देवताऽभ्युपगम्यमाना यद्यप्यैश्वर्य्ययोगाद्युगपदनेककर्म्मसम्बन्धीनि हवींषि भुञ्जीत तथापि विग्रहयोगादस्मदादिवज्जननमरणवती सेति नित्यस्य शब्दस्यानित्येनार्थेन नित्यसम्बन्धे प्रतीयमाने यद्वैदिके शब्दे प्रामाण्यं स्थितं तस्य विरोधः स्यादिति चेन्नायमप्यस्ति विरोधः, कस्मात् अतः प्रभवात्। अतएव हि वैदिकाच्छब्दादेवादिकञ्जगत् प्रभवति। ननु जन्माद्यस्य यत इति ब्रह्मप्रभवत्वं जगतोऽवधारितं कथमिह शब्दप्रभवत्वमुच्यते। अपिच यदि

कर्म्मण्यविरोधमङ्गीकृत्य शब्दप्रामाण्यविरोधमाशङ्क्य परिहरति। शब्द इति चेदिति। मा प्रसञ्जि प्रसक्तो माभून्नामेत्यर्थः। औत्पत्तिकसूत्रे शब्दार्थयोरनाद्योः सम्बन्धस्यानादित्वाद्वेदस्य मानान्तरानपेक्षत्वेन प्रामाण्यमुक्तं, इदानीं अनित्यविग्रहत्वाद्यभ्युपगमे तत्सम्बन्धस्याप्यनित्यत्वात् मानान्तरेण व्यक्तिं ज्ञात्वा शब्दस्य सङ्केतः पुंसा कर्त्तव्यः इति मानान्तरापेक्षत्वात् प्रामाण्यस्य विरोधः स्यादित्याह। कथमित्यादिना। किं शब्दानामनित्यतया सम्बन्धस्य कार्य्यत्वमापद्यते उतार्थानामनित्यतया, नाद्य इत्याह। नायमपीति। कर्म्मण्यविरोधवदित्यपेरर्थः। देवादिव्यक्तिहेतुत्वेन प्रागेव शब्दानां सत्त्वात् नानित्यत्वमिति भावः। अत्र पूर्व्वापरविरोधं शङ्कते। नन्विति। शब्दस्य निमित्तत्वेन ब्रह्मसङ्कल्पकारित्वादविरोध इत्याशङ्क्य द्वितीयं कल्पमुत्थापयति। अपि

नाम वैदिकाच्छब्दादस्य प्रभवोऽभ्युपगतः कथमेतावता विरोधः शब्दे परिहृतः यावता वसवो रुद्रा आदित्या विश्वे देवा मरुत इत्येतेऽर्था अनित्या एवोत्पत्तिमत्त्वात् तदनित्यत्वे च तदाचिनां वैदिकानां वस्वादिशब्दानामनित्यत्वं केन निवार्यते। प्रसिद्धं हि लोके देवदत्तस्य पुत्रे उत्पन्ने यज्ञदत्त इति तस्य नाम क्रियते इति। तस्माद्विरोध एव शब्द इति चेन्न गवादिशब्दार्थसम्बन्धनित्यत्वदर्शनात्। नहि गवादिव्यक्तीनामुत्पत्तिमत्त्वे तदाकृतीनामप्युत्पत्तिमत्त्वं स्यात्, द्रव्यगुणकर्मणां हि व्यक्तय एवोत्पद्यन्ते नाकृतयः। आकृतिभिश्च शब्दानां सम्बन्धो न व्यक्तिभिः। व्यक्तीनामानन्त्यात् सम्बन्धग्रहणानुपपत्तेः। व्यक्तिषूत्पद्यमानास्वप्याकृतीनां नित्यत्वान्न गवादिशब्देषु कश्चिद्विरोधो

चेति। अनित्यत्वं सादित्वं व्यक्तिरूपार्थानामनित्यतया शब्दानां सम्बन्धस्यानित्यत्वं दुर्वारं, तस्मात् पौरुषेयसम्बन्धसापेक्षत्वात् प्रामाण्यविरोध इत्यर्थः। न च व्यक्तीनामनित्यत्वे घटत्वादिजातिसमवायवत् शब्दसम्बन्धोऽपि नित्यः स्यादिति वाच्यं, उभयाश्रितसम्बन्धस्यान्यतराभावे स्थित्ययोगेन दृष्टान्तासिद्धेरिति भावः। यथा गोत्वादयो गवादिशब्दवाच्याः तथा वसुत्वाद्याकृतयो वस्वादिशब्दार्थाः न व्यक्तय इति परिहरति। नेत्यादिना। शब्दानां तदर्थानां जातीनाञ्च नित्यत्वात्तत्सम्बन्धोऽपि नित्य इति प्रतिपादयति। न हीत्यादिना। व्यक्तीनामानन्त्यादिति। न च गोत्वावच्छेदेन व्यक्तिषु शक्तिः सुग्रहेति वाच्यं, सामान्यस्याप्रत्यासत्तित्वेन सर्वव्यक्त्युपस्थित्यभावात् गोत्वं शक्यतावच्छेदकमिति ग्रहापेक्षया गोत्वं शक्यमिति लाघवात् निरूढजघन्यलक्षणया व्यक्तेर्लाभेनान्यलभ्यत्वाभावाच्चेति भावः। यदा केवलव्यक्तिषु शक्तिरत्र निरस्यतेऽनुपपत्तिज्ञानं विनैव व्यक्तेः शब्दशक्त्यापन्नजातिज्ञानवि-

दृश्यते। तथा देवादिव्यक्तिप्रभवाभ्युपगमेऽपि आकृतिनित्यत्वान्न कस्मिंदश्वादिशब्देषु विरोध इति द्रष्टव्यं। आकृतिविशेषस्तु देवादीनां मन्त्रार्थवादादिभ्यो विग्रहवत्त्वाद्यवगमादवगन्तव्यः। स्थानविशेषसम्बन्धनिमित्ताश्चेन्द्रादिशब्दाः सेनापत्यादिशब्दवत्। ततश्च यो यस्तत् स्थानमधितिष्ठति स स इन्द्रादिशब्दैरभिधीयते इति न दोषो भवति। न चेदं शब्दप्रभवत्वं ब्रह्मप्रभवत्ववदुपादानकारणत्वाभिप्रायेणोच्यते कथं तर्हि स्थितिवाचकात्मना नित्ये शब्दे नित्यार्थसम्बन्धिनि शब्दव्यवहारयोग्यार्थव्यक्तिनिष्पत्तिरतः प्रभव इत्युच्यते। कथं पुनरवगम्यते शब्दात् प्रभवति जगदिति प्रत्यक्षानुमानाभ्यां। प्रत्यक्षं हि श्रुतिः प्रामाण्यं प्रत्यनपेक्षत्वात्। अनुमानं स्मृतिः प्रामाण्यं प्रति सापेक्षत्वात्। ते हि शब्दपूर्वां सृष्टिं दर्शयतः। एत

षयत्वेन उभयशक्तेरावश्यकत्वात्। तथा च नित्यजातितादात्म्येन व्यक्तेरनादित्वात्तत्सम्बन्धोऽप्यनादिः सत्कार्यवादात् अतएव वाक्यवृत्तौ तत्त्वमस्यादिवाक्ये भागलक्षणोक्ता युज्यते केवलसामान्यस्यावाच्यत्वे खण्डार्थस्य वाच्यैकदेशत्वाभावात्। अतः प्रभवादिति सूत्रस्वारस्याच्च केवलव्यक्तिनिरास इति गम्यते। केवलव्यक्तिवचनाः खलु डित्थादिशब्दाः अर्थानन्तरभाविनः साङ्केतिकाः गवादिशब्दास्तु व्यक्तिप्रभवहेतुत्वेन प्रागेव सन्तीति न व्यक्तिमात्रवचनाः साङ्केतिकाः किन्तु स्थूलसूक्ष्मभावेनानुस्यूतव्यक्त्यविनाभूतसामान्यवचना इति मन्तव्यं। न चेन्द्रादिव्यक्तेरेकत्वेन जात्यभावादाकाशशब्दवत् इन्द्रचन्द्रादिशब्दाः केवलव्यक्तिवचना इति साम्प्रतं अतीतानागतव्यक्तिभेदेन जात्युपपत्तेरित्यलं प्रपञ्चेन, दृष्टान्तमुपसंहृत्य दार्ष्टान्तिकमाह। व्यक्तिश्चित्यादिना। आकृतिर्जातिः। ननु का सा व्यक्तिः यदनुगतेन्द्रत्वादिजातिः शब्दार्थः

इति वै प्रजापतिर्देवानसृजतास्रग्रमिति मनुष्यानिन्दव इति पितॄंस्तिरःपवित्रमिति ग्रहानासव इति स्तोत्रं विश्वानीति शस्त्रमभिसौभगेत्यन्याः प्रजा इति श्रुतिः। तथान्यत्रापि स मनसा वाचं मिथुनं समभवदित्यादिना तत्र तत्र शब्दपूर्विका सृष्टिः श्राव्यते। स्मृतिरपि।

अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा।
आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः॥ इति।

उत्सर्गोऽयं वाचः सम्प्रदायप्रवर्त्तनात्मको द्रष्टव्यः अनादिनिधनाया अन्यादृशस्योत्सर्गस्यासम्भवात्। तथा।

नामरूपे च भूतानां कर्म्मणाञ्च प्रवर्त्तनं।
वेदशब्देभ्य एवादौ निर्ममे स महेश्वर॥ इति॥

स्यादित्यत आह। आकृतिविशेषस्थिति। वज्रहस्तः पुरन्दर इत्यादिभ्य इत्यर्थः। इन्द्रादिशब्दानां जातिः इन्द्रादिषु प्रवृत्तिनिमित्तमित्युक्ता उपाधिनिमित्तत्वमाह। स्थानेति। व्यक्तिप्रलयेऽपि स्थानस्य स्थायित्वात् शब्दार्थसम्बन्धनित्यता इत्यत आह। ततश्चेति। उक्तं पूर्वापरविरोधं परिहरति। न चेति। शब्दो निमित्तमित्यविरोधं मत्वा सूत्रशेषमवतारयति। कथं पुनरिति। स्मृत्या स्वप्रामाण्यार्थं मूलश्रुतिरनुमीयत इत्यनुमानं स्मृतिः। एतैः अस्रग्रमिन्दवस्तिरःपवित्रमासवः विश्वान्यभिसौभगेत्येतन्मन्त्रस्थैः पदैः स्मृत्वा ब्रह्मा देवादीनसृजत। तत्रैत इति पदं सर्वनामत्वात् देवानां स्मारकं, अस्रग्धिरं तत्प्रधाने देहे रमन्त इति अस्रग्रा मनुष्याः। चन्द्रस्थानां पितॄणां इन्दुशब्दः स्मारकः। पवित्रं सोमस्थानं तिरस्कुर्वतां ग्रहाणां तिरःपवित्रशब्दः। ऋचो सुवतां स्तोत्राणां गीतिरूपाणामासुशब्दः। ऋचध्यूढं सामेति श्रुतेः। स्तोत्रानन्तरं प्रयोगं विशतां शस्त्राणां विश्वशब्दः। सर्वत्र

सर्व्वेषाञ्च च नामानि कर्म्माणि च पृथक् पृथक्।
वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे॥ इति च॥

अपि च चिकीर्षितमर्थमनुतिष्ठन् तस्य वाचकं शब्दं पूर्व्वं स्मृत्वा पश्चात्तमर्थमनुतिष्ठतीति सर्व्वेषां नः प्रत्यक्षमेतत्। तथा प्रजापतेरपि स्रष्टुः *सृष्टेः पूर्व्वं वैदिकाः शब्दा मनसि प्रादुर्बभूवुः पश्चात्तदनुगतानर्थान् ससर्जेति गम्यते। तथाच श्रुतिः स भूरिति व्याहरत् स भूमिमसृजतेत्येवमादिका भूरादिशब्देभ्य एव मनसि प्रादुर्भूतेभ्यो भूरादीन् लोकान् †प्रादुर्भूतान् सृष्टान् दर्शयति। किमात्मकं पुनः शब्दमभिप्रेत्येदं शब्दप्रभवत्वमुच्यते। स्फोटमित्याह। वर्णपक्षे हि तेषामुत्पन्नप्रध्वंसित्वान्नित्येभ्यः शब्देभ्यो देवादिव्यक्तीनां प्रभव इत्यनुपपन्नं स्यात्। उत्पन्नप्रध्वंसिनश्च वर्णाः प्रत्युच्चारणमन्यथा चान्यथा च प्रतीयमानत्वात्।

सौभाग्ययुक्तानामभिसौभगशब्दः स्मारक इति छन्दोगब्राह्मणवाक्यार्थः। स प्रजापतिः मनसा वाचं चयीमिथुनं समभवत्। मनो वायूपं मिथुनं सम्भावितवान् मनसा चयीप्रकाशितां सृष्टिमालोचितवानित्यर्थः। रश्मिरित्येवादित्यमसृजतेत्यादिः श्रुतिरादिशब्दार्थः। सम्प्रदायो गुरुशिष्यपरम्पराध्ययनं। संस्था अवस्थाः। प्रजापतिसृष्टिः शब्दपूर्विका सृष्टित्वात् प्रत्यक्षघटादिवदिति प्रत्यक्षानुमानाभ्यामित्यस्यार्थान्तरमाह। अपि चेति। अतः प्रभवत्वप्रसङ्गात् शब्दस्वरूपं वक्तुमुक्तमाक्षिपति। किमात्मकमिति। वर्णरूपं तदतिरिक्तस्फोटरूपश्चेति किंशब्दार्थः। तत्र वर्णानामनित्यत्वात् स्फोटस्य चासत्त्वात् न जगद्धेतुत्वं इत्याक्षेपे द्वितीयपक्षं वैयाकरणो गृह्णाति। स्फोटमिति। स्फुट्यते वर्णैर्व्यज्यत इति स्फोटो वर्णव्यङ्ग्योऽर्थस्य व्यञ्जको गवादिशब्दो

---

* सृष्टेरिति का० बर्ध० सो० पु० नास्ति।
† प्रादुर्भूतानिति उक्तपु० नास्ति।

तथा ह्यदृश्यमानोऽपि पुरुषविशेषोऽध्ययनध्वनिश्रवणादेव विशेषतो निर्धार्यते देवदत्तोऽयमधीते यज्ञदत्तोऽयमधीते इति। नचायं वर्णविषयोऽन्यथात्वप्रत्ययो मिथ्याज्ञानं बाधकप्रत्ययाभावात्। न च वर्णेभ्योऽर्थावगतिर्युक्ता, न ह्येकैको वर्णोऽर्थं प्रत्याययेत् व्यभिचारात्। न च वर्णसमुदायप्रत्ययोऽस्ति क्रमवत्त्वाद्वर्णानां। पूर्वपूर्ववर्णानुभवजनितसंस्कारसहितोऽन्त्यो वर्णोऽर्थं प्रत्याययिष्यतीति यद्युच्येत, तन्न, सम्बन्धग्रहणापेक्षो हि शब्दः स्वयं प्रतीयमानोऽर्थं प्रत्याययेत् धूमादिवत्, न च पूर्वपूर्ववर्णानुभवजनितसंस्कारसहितस्यान्त्यवर्णस्य प्रतीतिरस्यप्रत्यक्षत्वात् संस्काराणां। कार्यप्रत्यायितैः संस्कारैः सहितोऽन्त्यवर्णोऽर्थं प्रत्याययिष्यतीति चेन्न, संस्कारकार्यस्यापि स्मरणस्य क्रमवर्त्तित्वात्, तस्मात् स्फोट एव शब्दः, स चैकैकवर्णप्रत्यया-

---

नित्यत्वमभिप्रेत्येति पूर्वेणान्वयः, स एवाद्यपक्षं दूषयति। वर्णेति। सोऽयं गकार इति प्रत्यभिज्ञया वर्णनित्यत्वसिद्धेर्नानुपपत्तिरित्यत आह। उत्पन्नेति। तारत्वमन्दत्वादिविरुद्धधर्मवत्त्वेन तारो गकारो मन्दो गकार इति प्रतीयमानगकारस्य भेदानुमानात् प्रत्यभिज्ञा गत्वजातिविषयेत्यर्थः। ननु विरुद्धधर्मज्ञानं ध्वन्युपाधिकं भ्रम इत्यत आह। न चेति। तथा च वर्णानामनित्यत्वात् न जगद्धेतुत्वमिति भावः। किञ्च तेषामर्थबोधकत्वायोगात् स्फोटोऽङ्गीकार्य इत्याह। न च वर्णेभ्य इत्यादिना। व्यभिचारात् एकस्माद्वर्णादर्थप्रतीत्यदर्शनात् वर्णान्तरवैयर्थ्यप्रसङ्गाच्चेत्यर्थः। तर्हि वर्णानां समुदायो बोधक इत्याशङ्क्य त्वन्मिकानां स नास्तीत्याह। न चेति। वर्णानां स्वतः साहित्याभावेऽपि संस्कारसहकृतापूर्वद्वारा साहित्यमाम्रेयादियागानामिवेति शङ्कते। पूर्वेति। किमयं संस्कारो वर्णैर्जनितोऽपूर्वाख्यः

हितसंस्कारबीजेऽन्त्यवर्णप्रत्ययजनितपरिपाके प्रत्यचिन्येकप्रत्यय-विषयतया झटिति प्रत्यवभासते। न चायमेकप्रत्ययो वर्ण-विषया स्मृतिः, वर्णानामनेकत्वादेकप्रत्ययविषयत्वानुपपत्तेः। तस्य च प्रत्युच्चारणं प्रत्यभिज्ञायमानत्वान्नित्यत्वं, भेदप्रत्ययस्य वर्णविषयत्वात्। तस्मान्नित्याच्छब्दात् स्फोटरूपात् अभि-धायकात् क्रियाकारकफललक्षणं जगदभिधेयभूतं प्रभवती-ति। वर्णा एव तु शब्द इति भगवानुपवर्षः। ननूत्पन्न-प्रध्वंसित्वं वर्णानामुक्तं, तन्न, त एवेति प्रत्यभिज्ञानात्। सादृ-श्यात् प्रत्यभिज्ञानं केशादिष्विवेति चेन्न प्रत्यभिज्ञानस्य प्रमा-णान्तरेण बाधानुपपत्तेः। प्रत्यभिज्ञानमाकृतिनिमित्तमिति चेत् न, व्यक्त्यभिज्ञानात्। यदि हि प्रत्युच्चारणं गवादि

कश्चित् उत वर्णानुभवजनितो भावनाख्यः। नाद्यो मानाभावात्। किञ्चा-यमज्ञातो ज्ञातो वाऽर्थधीहेतुः नाद्य इत्याह। तन्नेति। संस्कारसहितः शब्दो ज्ञात एवार्थधीहेतुः सम्बन्धग्रहणमपेक्ष्य बोधकत्वात् धूमादि-वदित्यर्थः। द्वितीये किं प्रत्यक्षेण ज्ञात उत कार्यलिङ्गेन नाद्य इत्याह। न चेति। द्वितीयं शङ्कते। कार्येति। कार्यमर्थधीस्तस्यां जातायां संस्कारप्रत्ययः तस्मिन् ज्ञाते सति परस्पराश्रयेण दूषयति। नेति। पदार्थस्मरणस्यापि पदज्ञानानन्तरभावित्वात् तेन संस्कारसहिता-न्त्यवर्णात्मकपदस्य ज्ञानं न युक्तमित्यज्ञरार्थः। अपिशब्दः परस्परा-श्रयद्योतनार्थः। एतेन भावनासंस्कारपक्षोऽपि निरस्तः। तस्य वर्ण-स्मृतिमात्रहेतुत्वेनार्थधीहेतुत्वायोगात्। न चान्त्यवर्णसाहित्यादर्थधी-हेतुत्वं केवलसंस्कारस्य तु वर्णस्मृतिहेतुत्वमिति वाच्यं अर्थधीपूर्वकाले भावनाया ज्ञानाभावेनार्थधीहेतुत्वायोगात्। न च वर्णस्मरणेनानु-मिता सा अन्त्यवर्णसहिता अर्थधीहेतुरिति वाच्यं, तत्कार्यस्य क्रमि-

व्यक्तिवदन्या अन्या वर्णव्यक्तयः प्रतीयेरंस्तत आकृतिनिमित्तं प्रत्यभिज्ञानं स्यात्। नत्वेतदस्ति। वर्णव्यक्तय एव हि प्रत्युच्चारणं प्रत्यभिज्ञायन्ते। द्विर्गोशब्द उच्चारित इति हि प्रतिपत्तिः न तु द्वौ गोशब्दाविति। ननु वर्णा अप्युच्चारणभेदेन भिन्नाः प्रतीयन्ते देवदत्तयज्ञदत्तयोरध्ययनध्वनिश्रवणादेव भेदप्रतीतेरित्युक्तं। अत्राभिधीयते। मति वर्णविषये निश्चिते प्रत्यभिज्ञाने संयोगविभागव्यङ्ग्यत्वाद्वर्णानामभिव्यञ्जकवैचित्र्यनिमित्तोऽयं वर्णविषयो विचित्रः प्रत्ययो न स्वरूपनिमित्तः। अपि च वर्णव्यक्तिभेदवादिनापि प्रत्यभिज्ञानसिद्धये वर्णाकृतयः कल्पयितव्याः। तासु च परोपाधिको भेदप्रत्यय इत्यभ्युपगन्तव्यं

कस्य वर्णस्मरणस्याप्यन्त्यवर्णानुभवानन्तरभावित्वेन तेनाननुभितभावनानामन्त्यवर्णसाहित्याभावादितिभावः। वर्णानामर्थबोधकत्वासम्भवे फलमाह। तस्मादिति। स्फोटेऽपि किं मानमित्याशङ्क्यैकं पदमिति प्रत्यक्षप्रमाणमित्याह। स चेति। यथा रत्नतत्त्वं बहुभिश्चाक्षुषप्रत्ययैः स्फुटं भासते तथा गवाक्षे पदस्फोटो गकाराद्येकैकवर्णकृतप्रत्ययैः स्फोटविषयैः आहिताः संस्कारा बीजं यस्मिन् चित्ते तस्मिन्नन्त्यवर्णकृतप्रत्ययेन जनितः परिपाकोऽन्त्यः संस्कारो यस्मिन् तस्मिन् प्रत्ययिनि चित्ते एकं गौरिति पदमिति प्रत्ययः प्रत्यक्षस्तद्विषयतया स्फुटं अवभासत इत्यर्थः। अनेन वर्णान्वयव्यतिरेकयोः स्फोटज्ञानेऽन्यथासिद्धिः। नचैकस्माद्वर्णात् सम्यक् स्फोटाभिव्यक्तिः येन वर्णान्तरवैयर्थ्यं किन्तु रत्नवद्बहुप्रत्ययसंस्कृते चित्ते सम्यक् स्फोटाभिव्यक्तिरित्युक्तं भवति। नन्वेकपदमेकं वाक्यमिति प्रत्ययः पदवाक्यस्फोढयोर्न प्रमाणं तस्य वर्णसमूहालम्बनस्मृतित्वादित्याशङ्क्य निषेधति। न चेति। स्फोटस्य जनकेतुल्यार्थं नित्यत्वमाह। तस्य चेति। ननु वर्णो ध्वनिः स्वरः स्फोट इत्यं शब्दश्चतुर्विधः।

तद्वरं वर्णव्यक्तिष्वेव परोपाधिको भेदप्रत्ययः, स्वरूपनिमित्तश्च प्रत्यभिज्ञानमिति कल्पना लाघवं। एष एव च वर्णविषयस्य भेदप्रत्ययस्य बाधकः प्रत्ययो यत् प्रत्यभिज्ञानं। कथं तर्ह्येकस्मिन् काले बह्वनामुच्चारयतामेक एव सन् गकारो युगपदनेकरूपः स्यात् उदात्तश्चानुदात्तश्च स्वरितश्च सानुनासिकश्च निरनुनासिकश्च इति। अथवा ध्वनिकृतोऽयं प्रत्ययभेदो न वर्णकृत इत्यदोषः। कः पुनरिदं ध्वनिर्नाम यो दूरादाकर्ण्यतो वर्णविवेकमप्रतिपद्यमानस्य कर्णपथमवतरति प्रत्यासीदतश्च मन्दत्वपटुत्वादिभेदं वर्णेष्वासञ्जयति तन्निबन्धनाश्चोदात्तादयो विशेषा न वर्णस्वरूपनिबन्धनाः।

तदेवेदं पदमिति प्रत्यभिज्ञा भ्रमः उदात्तादिभेदप्रत्ययादित्यत आह। भेदेति। आचार्यसम्प्रदायोक्तिपूर्वकं सिद्धान्तयति। वर्णा एवेति। वर्णातिरिक्तस्फोटात्मकशब्दस्यानभ्युपगमादित्यर्थः। सादृश्यदोषादियं भ्रान्तिरिति शङ्कते। सादृश्यादिति। वपनानन्तरं त एवैमे केशा इति धीर्भ्रान्तिरिति युक्तं भेदधीविरोधात्, स एवायं वर्ण इति धीस्तु प्रमैव बाधकाभावादित्याह। नेति। गोत्वादिप्रत्यभिज्ञावत् वर्णेषु प्रत्यभिज्ञा गत्वादिविषयेति शङ्कते। प्रत्यभिज्ञानमिति। व्यक्तिभेदे सिद्धे प्रत्यभिज्ञाया जातिविषयत्वं स्यात्, यत् त्वया पीतं जलं तदेव मया पीतमित्यादौ न तथेह व्यक्तिभेदः सिद्ध इति परिहरति। न व्यक्तीति। न त्वेतदिति। व्यक्त्यन्यत्वज्ञानमित्यर्थः। उदात्तत्वादिविरुद्धधर्मत्वात् व्यक्तिभेदोऽनुमानसिद्ध इत्यनुवदति। नन्विति। भेदप्रत्ययस्य कुम्भकूपाकाशभेदप्रत्ययवदौपाधिकभेदविषयत्वादन्यथासिद्धेः। अनन्यथासिद्धव्यक्त्यैक्यप्रत्यभिज्ञया निरपेक्षस्वरूपालम्बनया बाध इत्युत्तरमाह। अत्रेति। लाक्षादिदेशैः कोष्ठस्थवायुसंयोगविभागाभ्यां विचित्राभ्यां व्यङ्ग्यत्वात्

वर्णानां प्रत्युच्चारणं प्रत्यभिज्ञायमानत्वात्। एवञ्च सति साक्षम्बना उदात्तादिप्रत्यया भविष्यन्ति, इतरथा हि वर्णानां प्रत्यभिज्ञायमानानां निर्भेदत्वात् संयोगविभागकृता उदात्तादिभेदाः कल्पेरन्। संयोगविभागानाञ्चाप्रत्यक्षत्वात् न तदाश्रया विशेषाः वर्णेष्वध्यवसितुं शक्यन्त इत्यतो निरालम्बना एवैते उदात्तादिप्रत्ययाः स्युः। अपिच नैवैतदभिनिवेष्टव्यमुदात्तादिभेदेन वर्णानां प्रत्यभिज्ञायमानानां भेदो भवेदिति। न ह्यन्यस्य भेदेनान्यस्याभिद्यमानस्य भेदो भवितुमर्हति। नहि व्यक्तिभेदेन जातिं भिन्नां मन्यन्ते। वर्णेभ्यश्चार्थप्रतीतेः सम्भवात् स्फोटकल्पनानर्थिका। न कल्पयाम्यहं स्फोटं प्रत्यक्षमेव त्वेनमवगच्छामि। एकैकवर्णग्रहणाहितसंस्कारायां बुद्धौ झटिति प्रत्यव-

---

वर्णेषु वैचित्र्यधीरित्यर्थः। कल्पनागौरवाच्च वर्णेषु स्वतो भेदो नास्तीत्याह। अपि चेति। अनन्ताः गकारादिव्यक्तयस्तासु प्रत्यभिज्ञानार्थं गत्वादिजातयस्तासु चोदात्तत्वादिभेदस्यौपाधिकत्वमिति कल्पनान्तरं वर्णव्यक्तिभेदमात्रस्यौपाधिकत्वकल्पनमिति व्यक्त्यानन्त्यस्य जातीनाञ्च कल्पनमयुक्तमित्यर्थः। ननु भेदस्य बाधकाभावात् नौपाधिकत्वमित्यत आह। एष इति। अस्तु तर्हि प्रत्ययद्वयप्रामाण्याय भेदाभेदयोः सत्यत्वं तत्राह। कथं तर्हीति। उभयोरेकत्वविरोधात् भेद औपाधिक एवेत्यर्थः। ननु वायुसंयोगादेरतीन्द्रियत्वात् न तद्धृतवैचित्र्यस्योदात्तत्वादेर्वर्णेषु प्रत्यक्षारोपः सम्भवतीत्यरुचिं वदियन् स्वमतमाह। अथ वेति। ध्वनिधर्म्मा उदात्तत्वादयो ध्वन्यभेदाध्यासाद्वर्णेषु भान्तीत्यर्थः। प्रश्नपूर्व्वकं ध्वनिस्वरूपमाह। क इति। अवतरति, स्वध्वनिरिति शेषः। वर्णातिरिक्तः शब्दो ध्वनिरित्यर्थः। समीपं गतस्य पुंसस्तारत्वमन्दत्वादिधर्म्मान् स्वगतान् वर्णेषु स एवारोपयतीत्याह। प्रत्या-

भासनादिति चेत्, न, अस्या अपि बुद्धेर्वर्णविषयत्वात्, एकैक वर्णग्रहणोत्तरकालीना हीयमेका बुद्धिर्गौरिति समस्तवर्णविषया नार्थान्तरविषया। कथमेतदवगम्यते, यतोऽस्यामपि बुद्धौ गकारादयो वर्णा अनुवर्त्तन्ते न तु दकारादयः। यदि ह्यस्या बुद्धेर्गकारादिभ्योऽर्थान्तरं स्फोटो विषयः स्यात् ततो दकारादय इव गकारादयोऽप्यस्या बुद्धेर्व्यावर्त्तेरन्, *नतु तथास्ति, तस्मादियमेकबुद्धिर्वर्णविषयैव स्मृतिः। नन्वनेकत्वाद्वर्णानां नैकबुद्धिविषयतोपपद्यत इत्युक्तं तां प्रति ब्रूमः। समभिव्याहृतानेकस्याप्येकबुद्धिविषयत्वं। पङ्क्तिर्व्वनं सेना दशगतं सहस्रमित्यादिदर्शनात्। या तु गौरित्येकोऽयं शब्द इति बुद्धिः सा बह्वीष्वेव वर्णेषु एकार्थावच्छेदनिबन्धनौपचारिकी वनसेनादिबुद्धिवदेव। अत्राह, यदि

सीदतस्चेति। आदिपदं विवृणोति। तदिति। नन्वव्यक्तवर्णा एव ध्वनिर्नातिरिक्त इत्यत आह। वर्णानामिति। प्रत्युच्चारणं वर्णा अनुवर्त्तन्ते ध्वनिर्व्यावर्त्तत इति भेद इत्यर्थः। अन्यथा वाचिकेषु जप्यवर्णेषु अव्यक्तेषु ध्वनिबुद्धिः स्यात् दुन्दुभ्यादिध्वनौ शब्दत्वमात्रेण गृह्यमाने अयमव्यक्तो वर्ण इति धीः स्यादिति मन्तव्यं। एवं ध्वन्युपाधिकत्वे खमते गुणं वदन् वायूपाधिकत्वे पूर्व्वोक्तामरुचिं दर्शयति। एवं चेत्यादिना। अस्तु को दोषस्तत्राह। संयोगेति। वायुसंयोगादेरश्रावणत्वादित्यर्थः। तस्मात् श्रावणध्वनिरेवोदात्तत्वाद्यारोपोपाधिरितिभावः। एवं विरुद्धधर्म्मकध्वनीनां भेदेऽपि न तेष्वनुगता वर्णा भिद्यन्त इति उक्तं, तदेव दृष्टान्तेन द्रढयति। अपि चेति। यथा खण्डमुण्डादिविरुद्धानेकव्यक्तिष्वभिन्नं गोत्वं तथा ध्वनिषु वर्णा अभिन्ना एवेत्यर्थः। उदात्तादिर्ध्वनिस्तद्भेदेन हेतुना वर्णानामपीति योजना

---

* न तु तथास्तीति का० वर्ध० सो० पु० नास्ति।

वर्णा एव समस्तेनैकबुद्धिविषयतामापद्यमानाः पदं स्युः ततो जारा राजा कपिः पिक इत्यादिषु पदविशेषप्रतिपत्तिर्न स्यात्, त एव हि वर्णा इतरत्र चेतर एव प्रत्यवभासन्त इति। अत्र वदामः। सत्यपि समस्तवर्णप्रत्यवमर्शे यथा क्रमानुरोधिन्य एव पिपीलिकाः पङ्क्तिबुद्धिमारोहन्त्येवं क्रमानुरोधिन एव वर्णाः पदबुद्धिमारोक्ष्यन्ति, तत्र वर्णानामविशेषेऽपि क्रमविशेषकृता पदविशेषप्रतिपत्तिर्न विरुध्यते। वृद्धव्यवहारे चेमे वर्णाः क्रमाद्यनुगृहीता गृहीतार्थविशेषसम्बन्धाः सन्तः स्वव्यवहारेऽप्येकैकवर्णग्रहणानन्तरं समस्तप्रत्यवमर्शिन्यां बुद्धौ तादृशा एव प्रत्य-

---

प्रत्यभिज्ञाविरोधादित्यन्तरार्थः। यद्वा उदात्तत्वादिभेदविशिष्टतया प्रत्यभिज्ञायमानत्वात् वर्णानां भेद इत्याशङ्क्य दृष्टान्तेन निरस्यति। अपि चेति। वर्णानां स्थायित्वं प्रसाध्य तेषामेव वाचकत्वं वक्तुं स्फोटं विघटयति। वर्णेभ्यश्चेति। कल्पनामसहमान आशङ्कते। नेति। चक्षुषा दर्शनयुक्तायां बुद्धौ सुखवत् श्रोत्रेण श्रवणयुक्तायां बुद्धौ विनैव हेत्वन्तरं स्फोटः प्रत्यक्ष इत्याह। झटितीति। यस्यां संविदि योऽर्थो भासते सा तत्र प्रमाणं एकपदमिति बुद्धौ वर्णा एव स्फुरन्ति नातिरिक्तस्फोटः प्रमाणमित्याह। नास्या अपीत्यादिना। न तु गोपदबुद्धेः स्फोटो विषयो गकारादीनां तु व्यञ्जकत्वादनुवृत्तिरित्यत आह। यदिच्छेति। व्यङ्ग्यवह्निबुद्धौ व्यञ्जकधूमानुवृत्तेरदर्शनादित्यर्थः। वर्णसमूहालम्बनत्वोपपत्तेर्न स्फोटः कल्पनीयः पदार्थान्तरकल्पनागौरवादित्याह। तस्मादिति। अनेकस्याप्यौपाधिकमेकत्वं युक्तमित्याह। सम्भवतीति। ननु तत्रैकदेशादिरूपाधिरस्ति प्रकृते क उपाधिरित्यत आह। या त्विति। एकार्थे प्रक्लृप्तमेकं पदं प्रधानार्थे एकस्मिन् तात्पर्यवदेकं वाक्यमित्येकार्थसम्बन्धादेकत्वोपचार इत्यर्थः। न चैकपदत्वे ज्ञाते एकार्थज्ञानं, अस्मिन् ज्ञाते तदित्यन्योन्याश्रय इति वाच्यं। उत्तमबुद्धौ-

वभाषमानास्तं तमर्थमन्यभिचारेण प्रत्याययिष्यन्तीति वर्णवादिनो लघीयसी कल्पना। स्फोटवादिनस्तु दृष्टहानिरदृष्टकल्पना च। वर्णाश्चेमे क्रमेण गृह्यमाणाः स्फोटं व्यञ्जयन्ति, स स्फोटोऽर्थं व्यनक्तीति गरीयसी कल्पना स्यात्। अथापि नाम प्रत्युच्चारणमन्येऽन्ये च वर्णाः स्युस्तथापि प्रत्यभिज्ञालम्बनभावेन वर्णसामान्यानामवश्याभ्युपगम्यत्वात् या वर्णेष्वर्थप्रतिपादनप्रक्रिया रचिता सा सामान्येषु सञ्चारयितव्या, ततश्च नित्येभ्यः शब्देभ्यो देवादिव्यक्तीनां प्रभव इत्यविरुद्धं॥

अत एव च नित्यत्वं॥ २९॥

*स्वतन्त्रस्य †कर्त्तुः स्मरणादेव हि स्थिते वेदस्य नित्यत्वे देवादिव्यक्तिप्रभवाभ्युपगमेन तस्य विरोधमाशङ्क्य, अतः प्रभवादिति

ज्ञानां क्रमेणान्त्यवर्णश्रवणानन्तरं बालस्यैकस्मृत्यारूढानां मध्यमवृद्धस्मृतिप्रवृत्त्यादिलिङ्गानुमितैकार्थधीहेतुत्वनिश्चये सत्येकपदवाक्यत्वनिश्चयात्। वर्णसाम्येऽपि पदभेददृष्टेर्वर्णातिरिक्तं पदं स्फोटाख्यमङ्गीकार्यमिति शङ्कते। अत्रेति। क्रमभेदाद्वर्णेष्वेव पदभेददृष्टिरिति परिहरति। अत्रेति। ननु नित्यविभूनां वर्णानां कथं क्रमः कथं वा पदत्वज्ञानेनार्थधीहेतुत्वं तत्राह। वृद्धेति। व्युत्पत्तिदशायामुच्चारणक्रमेण उपलब्धिक्रममुपलभ्यमानवर्णेष्वारोप्यैते वर्णा एतत्क्रमैतत्सङ्ख्यावन्त एतदर्थसङ्केता इति गृहीताः सन्तः श्रोतुः प्रवृत्तिकाले तथैव स्मृत्यारूढाः स्वस्वार्थं बोधयन्तीत्यर्थः। स्थायित्वाद्वर्णमुपसंहरति। वर्णेति। दृष्टं वर्णानामर्थबोधकत्वं, अदृष्टः स्फोटः। सम्प्रति वर्णानामस्थिरत्वमङ्गीकृत्य प्रौढिवादेन स्फोटं घटयति। अथापीति। स्थिराणि गत्वादि-

---

* स्वतन्त्रस्येति का० वर्ध० पु० नास्ति।

† कर्तुरस्मरणादीभारति का० वर्ध० पु० पाठः।

परिहर्त्तुमिदानीं तदेव वेदस्य नित्यत्वं स्थितं दृढयति, अत एव च नित्यत्वमिति। अत एव च नियताकृतेर्देवादेर्जगतो वेदशब्दप्रभवत्वाद्वेदशब्दनित्यत्वमपि प्रत्येतव्यं। तथा च मन्त्रवर्णः, यज्ञेन वाचः पदवीयमायंस्तामन्वविन्दन्नृषिषु प्रविष्टामिति स्थितामेव वाचमनुविन्नां दर्शयति। वेदव्यासश्चैवमेव स्मरति,

युगान्तेऽन्तर्हितान् वेदान् सेतिहासान्महर्षयः।
लेभिरे तपसा पूर्वमनुज्ञाताः स्वयम्भुवा॥ इति।

समाननामरूपत्वाच्चावृत्तावप्यविरोधो दर्शनात् स्मृतेश्च॥३०॥

अथापि स्यात् यदि पश्वादिव्यक्तिवत् देवादिव्यक्तयोऽपि सन्तत्यैवोत्पद्येरन् निरुध्येरंश्च ततोऽभिधानाभिधेयाभिधातव्यवहाराविच्छेदात् सम्बन्धनित्यत्वेन विरोधः शब्दे परिहियेत। यदा तु खलु सकलं चैलोक्यं परित्यक्तनामरूपं निर्लेपं प्रलीयते प्रभवति चाभिनवमिति श्रुतिस्मृतिवादा वदन्ति तदा

सामान्यानि क्रमविशेषवन्ति गृहीतसङ्कृतिकान्यर्थबोधकानीति स्मृतेषु सामान्येषु प्रक्रिया सञ्चारयितव्या न त्वक्षुण्णः स्फोटः कल्पनीय इत्यर्थः। वर्णानां स्थायित्ववाचकत्वयोः सिद्धौ फलितमाह। ततश्चेति॥

पूर्वतन्त्रवृत्तानुवादपूर्वकं सूत्रं व्याचष्टे। कर्तुरित्यादिना। पूर्वतन्त्रसिद्धमेव वेदस्य नित्यत्वं देवादिव्यक्तिरूढौ तद्वाचकशब्दस्यापि रूढेरसिद्धमित्याशङ्क्य नित्याकृतिवाचकाच्छब्दात् व्यक्तिजन्मोक्त्या साङ्केतिकत्वं निरस्य वेदोऽवान्तरप्रलयावस्थायां जगद्धेतुत्वादीश्वरवदित्यनुमानेन दृढयतीत्यर्थः। यज्ञेन पूर्वसुकृतेन, वाचो वेदस्य, लाभयोग्यतां प्राप्ताः सन्तो याज्ञिकास्तास्मृषिषु स्थितां लब्धवन्त इति मन्त्रार्थः। अनुविन्नामुपलब्धां। पूर्वमवान्तरकल्पादौ॥

कथमविरोध इति। तचेदमभिधीयते समाननामरूपत्वादिति। तदापि संसारस्यानादित्वं तावदभ्युपगन्तव्यं। प्रतिपादयिष्यति चाचार्यः संसारस्यानादित्वमुपपद्यते चाणुपलभ्यते चेति। अनादौ च संसारे यथा स्वापप्रबोधयोः प्रलयप्रभवश्रवणेऽपि पूर्वप्रबोधवदुत्तरप्रबोधेऽपि व्यवहारान्न कश्चिद्विरोधः। एवं कल्पान्तरप्रभवप्रलययोरपीति द्रष्टव्यं। स्वापप्रबोधयोश्च प्रलयप्रभवौ श्रूयेते। "यदा सुप्तः स्वप्नं न कञ्चन पश्यत्यथास्मिन् प्राण एवैकधा भवति तदैनं वाक् सर्वैर्नामभिः सहाप्येति, चक्षुः सर्वैः रूपैः सहाप्येति, श्रोत्रं सर्वैः शब्दैः सहाप्येति, मनः सर्वैर्ध्यानैः सहाप्येति, स यदा प्रतिबुध्यते यथाग्नेर्ज्वलतः सर्वा दिशो विस्फुलिङ्गा विप्रतिष्ठेरन्नेवमवैतस्मादात्मनः सर्वे प्राणा यथायतनं विप्रतिष्ठन्ते प्राणेभ्यो देवा देवेभ्यो लोकाः" (कौ० ब्रा० उ० अ०३। ख०३) इति। स्यादेतत् स्वापे पुरुषान्तरव्यवहाराविच्छेदात् स्वयञ्च सुषुप्तप्रबुद्धस्य पूर्वप्रबोधव्यवहारानुसन्धानसम्भवादविरुद्धं। महाप्रलये तु सर्व-

---

ननु महाप्रलये जातेरप्यसत्त्वात् शब्दार्थसम्बन्धानित्यत्वं इत्याशङ्क्याह। समानेति। सूत्रं निरस्याशङ्कामाह। अथापीति। व्यक्तिसन्तत्या जातीनां अवान्तरप्रलये सत्त्वात् सम्बन्धस्तिष्ठति व्यवहाराविच्छेदात्, ज्ञायेत चेति वेदस्यानपेक्षत्वेन प्रामाण्येन कश्चिद्विरोधः स्यात्। निर्लेपप्रलये तु सम्बन्धनाशात् पुनः सृष्टौ केनचित् पुंसा सङ्केतः कर्त्तव्य इति पुरुषबुद्धिसापेक्षत्वेन वेदस्याप्रामाण्यं अध्यापकस्याश्रयस्य नाशादाश्रितस्यानित्यत्वञ्च प्राप्तमित्यर्थः। महाप्रलयेऽपि निर्लेपप्रलयोऽसिद्धः सत्कार्य्यवादात्। तथा च संस्कारात्मना शब्दार्थतत्सम्बन्धानां

व्यवहाराच्छेदाज्जन्मान्तरव्यवहारवच्च कल्पान्तरव्यवहारस्यानुसन्धातुमशक्यत्वात् *वैषम्यं इति। नैष दोषः, सत्यपि सर्वव्यवहारोच्छेदिनि महाप्रलये परमेश्वरानुग्रहादीश्वराणां हिरण्यगर्भादीनां कल्पान्तरव्यवहारानुसन्धानोपपत्तेः। यद्यपि प्राकृताः प्राणिनो न जन्मान्तरव्यवहारमनुसन्दधाना दृश्यन्ते इति, न तत् प्राकृतवदीश्वराणां भवितव्यं। यथा हि प्राणित्वाविशेषेऽपि मनुष्यादिस्तम्बपर्यन्तेषु ज्ञानैश्वर्यादिप्रतिबन्धः परेण परेण भूयान् भवन् दृश्यते, तथा मनुष्यादिष्वेव हिरण्यगर्भपर्यन्तेषु ज्ञानैश्वर्याद्यभिव्यक्तिरपि परेण परेण भूयसी भवतीत्येतत् †श्रुतिस्मृतिवादेष्वसकृदेवानुकल्पादौ प्रादुर्भवतां पारमैश्वर्यं श्रूयमाणं न शक्यं नास्तीति वदितुं। ततश्चा-

---

सतामेव पुनः सृष्टावभिव्यक्तेर्नानित्यत्वं। अभिव्यक्तानां पूर्वकल्पीयनामरूपसमानत्वात् न सङ्केतः केनचित् कार्य्यः, विषमसृष्टौ हि सङ्केतापेक्षा न तुल्यसृष्टाविति परिहरति। तत्रेदमित्यादिना। नन्वाद्यसृष्टौ सङ्केतः कार्य्य इत्यत आह। तदापीति। महासर्गप्रलयप्रवृत्तावपीत्यर्थः। नन्वस्वनादिसंसारे सम्बन्धस्यानादित्वं तथापि महाप्रलयव्यवधानादस्मरणे कथं वेदार्थव्यवहारस्तत्राह। अनादौ चेति। न कश्चिद्दोषः, शब्दार्थसम्बन्धस्मरणादेरिति शेषः। स्वापप्रबोधयोर्जीवसर्गासिद्धिमाशङ्क्य श्रुतिमाह। स्वापेति। अथ तदा सुषुप्तौ प्राणे परमात्मनि जीव एकीभवति एनं प्राणं सजीवन्तदैतीति शेषः। एतस्मात् प्राणात्मनः आयतनं गोलकं। आनन्तर्ये पञ्चमी प्राणेभ्य इत्यादौ द्रष्टव्या। स्वप्नवत् कल्पितस्याज्ञातसत्त्वाभावात् दर्शनं सृष्टिः अदर्शनं लयः इति दृष्टिसृष्टिपक्षः श्रुत्यभिप्रेत इति भावः। दृष्टान्त-

---

* विषम इति का० वर्ध० सो० पु० पाठः।

† श्रुतिस्मृतिवादेष्वसकृदनुश्रूयमाणमिति उक्त पु० पाठः।

तीतकल्पानुष्ठितप्रकृष्टज्ञानकर्मणामीश्वराणां हिरण्यगर्भादीनां वर्त्तमानकल्पादौ प्रादुर्भवतां परमेश्वरानुगृहीतानां सुनय-तिबुद्धुवत् कल्पान्तरव्यवहारानुसन्धानोपपत्तिः। तथा च श्रुतिः। "यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये" इति। स्मरन्ति च याज्ञवल्क्यादयो मधुच्छन्दःप्रभृतिभिर्ऋषिभिर्दाशतय्या दृष्टा इति। प्रतिवेदञ्चैवमेव काण्डर्ष्यादयः स्मर्य्यन्ते। श्रुतिरप्यृषिज्ञानपूर्वकमेव मन्त्रेणानुष्ठानं दर्शयति "यो ह वा अविदितार्षेयच्छन्दोदैवतब्राह्मणेन मन्त्रेण याजयति वाध्यापयति वा

वैषम्यमाशङ्क्य परिहरति। स्यादित्यादिना। अविरुद्धमनुसन्धानादिकमिति शेषः। हिरण्यगर्भादयः पूर्वकल्पानुसन्धानशून्याः संसारित्वादस्मदादिवदित्याशङ्क्याह। यद्यपीति। इति यद्यपि तथापि न प्राकृतवदिति योजना। ज्ञानादेर्निकर्षवदुत्कर्षोऽप्यङ्गीकार्यः बाधाभावादिति न्यायानुगृहीतश्रुत्यादिभिः सामान्यतो दृष्टानुमानं बाधमित्याह। यथा हीत्यादिना। ननु तथापि पूर्वकल्पे चरमाणां मुक्तत्वादस्मिन् कल्पे कोऽनुसन्धातेत्यत आह। ततश्चेति। ज्ञानाद्युत्कर्षादित्यर्थः। मुक्तेभ्योऽन्येऽनुसन्धातारः परमेश्वरानुगृहीतानां ज्ञानातिशये पूर्वोक्तश्रुतिस्मृतिवादानाह। तथा चेति। पूर्वं कल्पादौ सृजति तस्मै च ब्रह्मणे प्रहिणोति गमयति तस्य बुद्धौ वेदानाविर्भावयति यस्तं देवं स्वात्माकारं मद्भावाक्योत्थबुद्धौ प्रकाशमानं शरणं परममभयस्थानं निःश्रेयसरूपमहं प्रपद्य इत्यर्थः। न केवलमेकस्यैव ज्ञानातिशयः किन्तु बहूनां शाखाध्वर्यूणामिति विश्वासार्थमाह। स्मरन्तीति। ऋग्वेदो दशमण्डलावयवान् तत्र भवा ऋचो दाशतय्यः। वेदान्तरेऽपि काण्डसूक्तमन्त्राणां द्रष्टारो बोधायनादिभिः स्मृता इत्याह। प्रतीति। किञ्च मन्त्राणां ऋष्यादिज्ञानावश्यकत्वज्ञापिका श्रुतिर्मन्त्रदृष्टॄणां ज्ञानातिशयं दर्शयतीत्याह। श्रुतिरपीति।

स्थाणुं चर्च्छति गर्त्तं वा प्रपद्यत इत्युपक्रम्य तस्मादेतानि मन्त्रे मन्त्रे विद्यादिति। प्राणिनाञ्च सुखप्राप्तये धर्म्मो विधीयते दुःखपरिहाराय चाधर्म्मः प्रतिषिध्यते। दृष्टानुश्रविकसुखदुःखविषयौ च रागद्वेषौ भवतो न विलक्षणविषयावित्यतो धर्म्माधर्म्मफलभूतोत्तरोत्तरा सृष्टिर्निष्पद्यमाना पूर्वसृष्टिसदृश्येव निष्पद्यते। स्मृतिश्च भवति,

"तेषां ये यानि कर्म्माणि प्राक्सृष्ट्यां प्रतिपेदिरे।
तान्येव ते प्रपद्यन्ते सृज्यमानाः पुनः पुनः॥
हिंस्राहिंस्रे मृदुक्रूरे धर्म्माधर्म्मावृतानृते।
तद्भाविताः प्रपद्यन्ते तस्मात्तत्तस्य रोचते" ॥ इति ॥

आर्षेय ऋषियोगः, छन्दो गायत्र्यादि, दैवतमग्न्यादि, ब्राह्मणं विनियोगः, एतान्यविदितानि यस्मिन्मन्त्रे तेनेत्यर्थः। स्थाणुं स्थावरं, गर्त्तं नरकं, तथा च ज्ञानाधिकैः कल्पान्तरितं वेदं स्मृत्वा व्यवहारस्य प्रवर्त्तितत्वात् वेदस्यानादित्वमनपेक्षत्वञ्चाविरुद्धमिति भावः। अधुना समाननामरूपत्वं प्रपञ्चयति। प्राणिनां चेति। ततः किं तत्राह। दृष्टेति। ऐहिकामुष्मिकविषयसुखरागकृतधर्म्मस्य फलं पश्वादिकं दृष्टपश्वादिसदृशमिति युक्तं विसदृशे कामाभावेन हेत्वभावात्। तथा दृष्टदुःखद्वेषकृताधर्म्मफलं दृष्टसदृशदुःखमेव न सुखं कृतहान्यादिदोषापत्तेरित्यर्थः। तर्कितेऽर्थे मानमाह। स्मृतिश्चेति। उत्तरसृष्टिः पूर्वसृष्टिसजातीयका कर्म्मफलत्वात् पूर्वसृष्टिवदनुमानञ्च श्लोकार्थः। तेषां प्राणिनां मध्ये तान्येव तज्जातीयान्येव। तानि दर्शयन् तत्रादौ हेतुमाह। हिंस्रेति। कर्म्माणि विहितनिषिद्धत्वाकारेणापूर्वं क्रियात्वेन संस्कारञ्च जनयन्ति। तत्रापूर्वात् फलं भुङ्क्ते संस्कारभावितत्वात् पुनस्तज्जातीयानि करोतीत्यर्थः। संस्कारे लिङ्गमाह। तस्मादिति। संस्कारवशादेव पुण्यं पापं वा रोचते। अतोऽभिरुचिलिङ्गात् पुण्यापुण्यसंस्कारो-

प्रलीयमानमपि चेदं जगच्छक्त्यवशेषमेव प्रलीयते शक्तिमूलमेव च प्रभवतीतरथा आकस्मिकत्वप्रसङ्गात्। न चानेकाकाराः शक्तयः शक्याः कल्पयितुं। ततश्च विच्छिद्य विच्छिद्याप्युद्भवतां भूरादिलोकप्रवाहाणां देवतिर्यङ्मनुष्यलक्षणानाञ्च प्राणिनिकायप्रवाहाणां वर्णाश्रमधर्मफलव्यवस्थानाञ्चानादौ संसारे नियतलमिन्द्रियविषयसम्बन्धनियतलवत् प्रत्येतव्यं। न हीन्द्रियविषयसम्बन्धादेर्व्यवहारस्य प्रति सर्गमन्यथात्वं षष्टेन्द्रियविषयकल्पं शक्यमुत्प्रेक्षितुं। अतश्च सर्वकल्पानां तुल्यव्यवहारत्वात् कल्पान्तरव्यवहारानुसन्धानक्षमत्वाच्चेश्वराणां समाननामरूपा एव प्रतिसर्गं विशेषाः प्रादुर्भवन्ति समाननामरूपत्वाच्चावृत्ता-

---

ऽनुमेयः स एव स्वभावः प्रकृतिर्वासनेति च गीयते। एवं कर्म्मणा सृष्टिसादृश्यमुक्त्वा खोपादाने लीनकार्य्यसंस्काररूपशक्तिबलादपि सादृश्यमाह। प्रलीयमानमिति। इतरथा संस्कारप्रलये जगद्वैचित्र्यस्याकस्मिकत्वं स्यादित्यर्थः। ननु जगद्वैचित्र्यकारिण्योऽन्याः शक्तयः कल्प्यन्तां तत्राह। न चेति। अविद्यायां लीनकार्य्यात्मकसंस्कारादन्याः शक्तयो न कल्प्याः मानाभावाद्गौरवाच्च, खोपादाने लीनकार्य्यरूपा शक्तिस्तु महान् न्यग्रोधस्तिष्ठति अश्वत्थ सोम्येति श्रुतिसिद्धा, अतोऽविद्यातत्कार्य्यादन्याः शक्तयो न सन्ति आत्माविद्यैव तच्छक्तिरिति सिद्धान्त इत्यर्थः। निमित्तेष्वप्युपादानस्यकार्य्यमेवाविद्याघटनया शक्तिरन्या वेत्यनाग्रहः। उपादाने कार्य्यसंस्कारसिद्धेः फलमाह। ततश्चेति। यथा सुप्तोत्थितस्य पूर्वचक्षुर्जातीयमेव चक्षुर्जायते तच्च रूपजातीयमेव शब्दादिकं, भूर्लोका भोगाश्रयाः प्राणिनिकाया भोगहेतुकर्म्माणि संस्कारबलात् पूर्वलोकादितुल्यान्येवेति नियम इत्यर्थः। निकायाः समूहाः। दृष्टान्तासिद्धिमाशङ्क्याह। न हीति।

वपि महासर्गमहाप्रलयलक्षणायां जगतोऽभ्युपगम्यमानायां न कश्चिच्छब्दप्रामाण्यादिविरोधः। समाननामरूपताञ्च श्रुतिस्मृती दर्शयतः।

"सूर्याचन्द्रमसौ धाता यथा पूर्वमकल्पयत्।
दिवञ्च पृथिवीञ्चान्तरीक्षमथो स्वः"॥ इति।

यथा पूर्वस्मिन् कल्पे सूर्याचन्द्रमसःप्रभृति जगत् कृत्स्नं तथास्मिन्नपि कल्पे परमेश्वरोऽकल्पयदित्यर्थः। तथा अग्निर्वा अकामयत अन्नादो देवानां स्यामिति, स एवमग्नये कृत्तिकाभ्यः पुरोडाशमष्टाकपालं निरवपदिति, नक्षत्रेष्टिविधौ योऽग्निर्निरवपत् यस्मै वाग्नये निरवपत् तयोः समाननामरूपतां दर्शयतीत्येवं जातीयिका श्रुतिरिहोदाहर्त्तव्या। स्मृतिरपि,

"ऋषीणां नामधेयानि याश्च वेदेषु दृष्टयः।
सर्वेषान्तु प्रसूतानां तान्येवेभ्यो ददात्यजः॥

यथा षष्ठेन्द्रियस्य मनसोऽसाधारणविषयो नास्ति सुखादेः साक्षित्वेनत्वात्, तथा व्यवहारान्यथात्वमसदित्यर्थः। षष्ठमिन्द्रियं तद्विषयस्वासन्निति वार्थः। उक्तार्थं सङ्गिनति। अतश्चेति। व्यवहारसाम्यात् सम्भवाच्च व्यक्ष्यमाना व्यक्तयः समाना एवेत्यर्थः। सूत्रं योजयति। समानेत्यादिना। भाविदृष्ट्या यजमानोऽग्निः, अन्नादोऽग्निरहं स्यामिति कामयित्वा कृत्तिकानक्षत्राभिमानिदेवायाग्नये अष्टसु कपालेषु पचनीयं हविर्निरवपदित्यर्थः। बक्षत्रव्यक्तिबहुत्वाद्बहुवचनं। ननु यजमानोऽग्निर्भावी उद्देश्याग्निना समाननामरूपः कल्पान्तरे भवतीत्येवं रुद्रो वा अकामयत विष्णुर्वा अकामयतेत्यत्रापि तथा वक्तव्यं, तदयुक्तं। न ह्यग्निरिव विष्णुरुद्रयोरधिकारिपुरुषत्वं तयोर्जगत्कारणत्वश्रवणात् एक

यथर्त्वादृतुलिङ्गानि नानारूपाणि पर्य्यये।
दृश्यन्ते तानि तान्येव तथा भावा युगादिषु॥
यथाभिमानिनोऽतीतास्तुल्यास्ते साम्प्रतैरिह।
देवा देवैरतीतैर्हि रूपैर्नामभिरेव च"॥

इत्येवं जातीयका द्रष्टव्या॥

मध्वादिष्वसम्भवादनधिकारं जैमिनिः॥ ३१॥

इह देवादीनामपि ब्रह्मविद्यायामस्त्यधिकार इति यत्प्रतिज्ञातं तत्पर्य्यावर्त्यते। देवादीनामनधिकारं जैमिनिराचार्यो मन्यते। कस्मात् मध्वादिष्वसम्भवात्। ब्रह्मविद्याधिकाराभ्युपगमे हि विद्यात्वाविशेषान्मध्वादिविद्यास्वप्यधिकारोऽभ्युपगम्येत। न चैवं सम्भवति, कथमसौ वा आदित्यो देव मधित्यच मनुष्या आदित्यं मध्वध्यासेनोपासीरन्, देवादिषु ह्युपासकेष्वभ्युपगम्यमानेषु आदित्यः *कथमन्यमादित्यमुपासीत। पुन-

---

एव रुद्रो नेति एको विष्णुरित्यादि श्रुतिस्मृतिविरोधादिति। स्मृतौ, वेदेष्विति विषयसप्तमी, पर्य्वर्य्यन्ते प्रलयान्ते। ऋतूनां वसन्तादीनां, लिङ्गानि नवपल्लवादीनि। पर्य्यये घटीयन्त्रवदावृत्तौ, भावाः पदार्थाः, तुल्या इति शेषः॥

तस्माज्जन्मनाशवद्विग्रहाङ्गीकारेऽपि कर्म्मणि शब्दे च विरोधाभावात् देवानामस्ति विद्याधिकार इति स्थितमाक्षिपति। मध्वादिष्विति। ब्रह्मविद्या देवादीन् नाधिकारोति विद्यात्वात् मध्वादिविद्यावदित्यर्थः। दृष्टान्तं विवृणोति। कथमित्यादिना। द्युलोकाख्यवंशदण्डे अन्तरिक्षरूपे मध्वपूपे स्थित आदित्यो देवानां मोदनान्मध्वित्यारोप्य ध्यानं

---

* कमन्यमिति का० वर्ध० पु० पाठः।

आदित्यव्यपाश्रयाणि पञ्च रोहितादीन्यमृतान्यनुपक्रम्य वसवो रुद्रा आदित्या मरुतः साध्याश्च पञ्च देवगणाः क्रमेण तत्तदमृतमुपजीवन्तीत्युपदिश्य स य एतदेवममृतं वेद वसूनामेवैको भूत्वाग्निनैव मुखेनैतदेवामृतं दृष्ट्वा तृप्यतीत्यादिना वस्वाद्युपजीव्यान्यमृतानि विजानतां वस्वादिमहिमप्राप्तिं दर्शयति। वस्वाद्यस्तु कानन्यान् वस्वादीन् अमृतोपजीविनो विजानीयुः, कं चान्यं वस्वादिमहिमानं प्रेप्सेयुः। तथाग्निः पादो वायुः पाद आदित्यः पादो दिशः पादो वायुर्वाव सम्वर्गः आदित्यो ब्रह्मेत्यादेश इत्यादिषु देवतात्मोपासनेषु न तेषामेव देवतात्मनामधिकारः सम्भवति। तथेमामेव गोतमभरद्वाजावयमेव गोतमोऽयं भरद्वाज इत्यादिष्वृषिसम्बन्धेषु

कार्थं। तत्रादित्यस्याधिकारो न युक्तः ध्याद्यध्येयभेदाभावात् इत्याह। देवादिष्विति। अस्तु वस्वादीनां तत्राधिकार इति आशङ्क्य तेषामपि च ध्येयत्वात् प्राप्यत्वाच्च न ध्यातृत्वमित्याह। पुनश्चेति। चतुर्वेदोक्तकर्माणि प्रणवश्चेति पञ्च कुसुमानि तेभ्यः सोमाद्यादित्यान्ता ऊतानि ओतानि शुक्लकृष्णपरकृष्णगोपाख्यानि पञ्चामृतानि तत्तन्मन्त्रभागैः प्रागाद्यूर्ध्वान्तपञ्चदिगवस्थिताभिरादित्यरश्मिनाडीभिर्मध्ययूपच्छिद्ररूपाभिरादित्यमण्डलमानीतानि यशस्तेजइन्द्रियवीर्याण्यात्मना परिणतानि पञ्चदिक्षु स्थितैर्वस्वादिभिरुपजीव्यानीति ध्यायतां वस्वादिप्राप्तिरुक्तेत्यर्थः। सूचस्यादिपदार्थमाह। तथाग्निरिति। आकाशब्रह्मणश्चत्वारः पादाः द्वौ कर्णौ द्वे नेत्रे द्वे नासिके एका वागिति सप्तस्विन्द्रियेषु शिरस्यमसतोयस्थेषु सप्तर्षिध्यानं कार्यमित्याह। तथेमावेवेति। अयं दक्षिणः कर्णः गौतमो वामो भरद्वाज एवं दक्षिणनेत्रनासिके विश्वामित्रजमदग्निकश्यपा वामेति इमदग्निकश्यपा वागत्रिरित्यर्थः॥

उपासनेषु न तेषामेवर्षीणामधिकारः सम्भवति। कुतश्चन देवादीनामनधिकारः॥

ज्योतिषि भावाच्च॥ ३२॥

यदिदं ज्योतिर्मण्डलं द्युस्थानमहोरात्राभ्यां बंभ्रमज्जगदवभासयति तस्मिन्नादित्यादयो देवतावचनाः शब्दाः प्रयुज्यन्ते लोकप्रसिद्धेर्वाक्यशेषप्रसिद्धेश्च। न च ज्योतिर्मण्डलस्य हृदयादिना विग्रहेण चेतनतयाऽर्थित्वादिना वा योगोऽवगन्तुं शक्यते, मृदादिवदचेतनत्वावगमात्। एतेनाग्न्यादयो व्याख्याताः। स्यादेतत्, मन्त्रार्थवादेतिहासपुराणलोकेभ्यो देवादीनां विग्रहवत्त्वाद्यवगमादयमदोषः इति चेत् नेत्युच्यते, न तावल्लोको नाम किञ्चित् स्वतन्त्रं प्रमाणमस्ति, प्रत्यक्षादिभ्य एव ह्यविचारितविशेषेभ्यः प्रमाणेभ्यः *प्रसिद्ध एवार्थो लोकात् प्रसिद्ध इत्युच्यते, न

अत्र ऋषीणां ध्येयत्वान्नाधिकारः। किञ्च विग्रहाभावात् देवादीनां न क्वाप्यधिकार इत्याह। ज्योतिषि भावाच्चेति। आदित्यः सूर्यश्चन्द्रः शुक्रोऽङ्गारक इत्यादिशब्दानां ज्योतिःपिण्डेषु प्रयोगस्य भावात् सत्त्वान्न विग्रहवान् देवः कश्चिदस्तीत्यर्थः। आदित्यः पुरस्तादुदेता पश्चादस्तमेतेति मधुविद्यावाक्यशेषे ज्योतिष्येवादित्यशब्दः प्रसिद्धः। तर्हि ज्योतिःपिण्डानामेवाधिकारोऽस्तु तत्राह। न चेति। अग्न्यादीनामधिकारमाशङ्क्याह। एतेनेति। अग्निर्वायुर्भूमिः इत्यादिशब्दानां अचेतनवाचित्वेनेत्यर्थः। सिद्धान्ती शङ्कते। स्यादेतदित्यादिना। वज्रहस्तः पुरन्दरः इत्यादयो मन्त्राः। से ऽरोदीदित्यादयोऽर्थवादाः।

"इष्टान् भोगान् हि वो देवा दास्यन्ते यज्ञभाविताः।
तैर्दत्तान्तर्प्रयन्येनं सर्वकामफलैः शुभैः"॥

---

* प्रसिध्यन्नर्थो लोकात् प्रसिध्यतीति का० वर्ध० पु० पाठ.।

चात्र प्रत्यक्षादीनामन्यतमं प्रमाणमस्ति। इतिहासपुराणमपि पौरुषेयत्वात् प्रमाणान्तरमूलतामाकाङ्क्षति। अर्थवादा अपि विधिनैकवाक्यत्वात् स्तुत्यर्थाः मन्त्रा न पार्थगर्थ्येन देवादीनां विग्रहादिसद्भावे कारणभावं प्रतिपद्यन्ते। मन्त्रा अपि श्रुत्यादि-विनियुक्ताः प्रयोगसमवायिनोऽभिधानार्था न कस्यचिदर्थस्य प्रमाणमित्याचक्षते। तस्मादभावो देवादीनामधिकारस्य॥

भावन्तु बादरायणोऽस्ति हि॥३३॥

तुशब्दः पूर्वपक्षं व्यावर्त्तयति। बादरायणस्त्वाचार्यो भाव-मधिकारस्य देवादीनामपि मन्यते। यद्यपि मध्वादिविद्यासु देवतादिव्यामिश्रास्वसम्भवोऽधिकारस्य तथाप्यस्ति हि शुद्धा-

---

इत्यादीतिहासपुराणानि। लोकेऽपि यमं दण्डहस्तं लिखन्ति, इन्द्रं वज्रहस्तमिति विग्रहादिपञ्चकस्याभावात् अनधिकारदोषो नास्ती-त्यर्थः।

"विग्रहो ह्यविषां भोग ऐश्वर्य्यञ्च प्रसन्नता।
फलप्रदानमित्येतत् पञ्चकं विग्रहादिकं"॥

मानाभावादेतन्नास्तीति दूषयति। नेत्यादिना। न चाचेति, विग्र-हादावित्यर्थः। अर्थवादा मन्त्रा वा मूलमित्याशङ्क्याह। अर्थवादा इत्यादिना। व्रीह्यादिवत् प्रयोगविधिगृहीता मन्त्राः प्रयोगसम्बन्धा-र्थाभिधानार्थाः नाज्ञातविग्रहादिपरा इति मीमांसका आचक्षत इत्यर्थः। तस्माद्विग्रहाभावादित्यर्थः॥

सूत्राभ्यां प्राप्तं पूर्वपक्षं निरस्यति। तुशब्द इत्यादिना। ब्रह्मविद्या देवादीन्नाधिकरोति विद्यात्वात् मध्वादिविद्यावत् इति। उक्तहेतुर-प्रयोजक इत्याह। यद्यपीति। दर्शादिकं न ब्राह्मणमधिकरोति कर्म्मत्वात् राजसूयादिवदिति आभाससाम्यं विद्यात्वहेतोराह।

यां ब्रह्मविद्यायां सम्भवोऽर्थित्वसामर्थ्याप्रतिषेधाद्यपेक्षत्वादधिकारस्य। न च क्वचिदसम्भव इत्येतावता यत्र सम्भवस्तत्राप्यधिकारोऽपोद्येत, मनुष्याणामपि न सर्वेषां ब्राह्मणादीनां सर्वेषु राजसूयादिष्वधिकारः सम्भवति, तत्र योऽन्यायः सोऽत्रापि भविष्यति। ब्रह्मविद्याञ्च प्रकृत्य भवति लिङ्गदर्शनं श्रौतं देवाद्यधिकारस्य सूचकं, तद्यो यो देवानां प्रत्यबुध्यत स एव तदभवत्तथर्षीणां *तथा मनुष्याणामिति, ते होचुर्हन्त तमात्मानमन्विच्छामो यमात्मानमन्विय सर्वांश्च लोकानाप्नोति सर्वांश्च कामानिति, इन्द्रो ह वै देवानामभि प्रवव्राज विरोचनोऽसुराणामित्यादि च। स्मार्त्तमपि च गन्धर्वयाज्ञवल्क्यसंवादादि। यदप्युक्तं ज्योतिषि भावाच्चेति, अत्र ब्रूमः, ज्योतिरादिविषया अपि आदित्यादयो देवतावचनाः शब्दाश्चेतनावन्तमैश्वर्य्याद्युपेतं तं तं देवात्मानं समर्पयन्ति, मन्त्रार्थवादेषु तथा व्यवहारात्। अस्ति

न चेति। यत्र यस्याधिकारः सम्भवति स तत्राधिकारीति न्यासतुल्य इत्यर्थः। यतः सर्वेषां सर्वत्राधिकारो न सम्भवति ततो न चापोद्येतेत्यन्वयः। तत् ब्रह्म यो यो देवादीनां मध्ये प्रत्यक्षेणाबुध्यत स तत् ब्रह्माभवदित्यर्थः। ते ह देवा ऊचुरन्योन्यं, तत इन्द्रविरोचनौ सुरासुरराजौ प्रजापतिं ब्रह्मविद्याप्रदं जग्मतुरिति च लिङ्गमस्तीत्यर्थः। किमत्र ब्रह्मामृतमिति गन्धर्वप्रश्ने याज्ञवल्क्य उवाच तमिति मोक्षधर्म्मेषु श्रुतं देवादीनामधिकारलिङ्गमित्याह। स्मार्त्तमिति। यथा बालानां गोलकेषु चक्षुरादिपदयोगेऽपि शास्त्रैर्गोलकातिरिक्तेन्द्रियाणि खीक्रियन्ते, तथा ज्योतिरादौ सूर्य्यादिशब्दप्रयोगेऽपि विग्रह-

---

* तथा मनुष्याणामिति का० वर्ध० पु० नास्ति।

ह्यैश्वर्ययोगाद्देवतानां ज्योतिराद्यात्मभिश्चावस्थातुं यथेष्टञ्च तं तं विग्रहं ग्रहीतुं सामर्थ्यं। तथा हि श्रूयते। सुब्रह्मण्यार्थवादे मेधातिथेर्मेषेति, मेधातिथिं ह काण्वायनं इन्द्रो मेषो भूत्वा जहारेति। स्मर्यते च, आदित्यः पुरुषो भूत्वा कुन्तीमुपजगामेति। मृदादिष्वपि चेतनाधिष्ठातारोऽभ्युपगम्यन्ते मृदब्रवीदापोऽब्रुवन्नित्यादिदर्शनात्। ज्योतिरादेस्तु भूतधातोरादित्यादिष्वप्यचेतनत्वमभ्युपगम्यते, चेतनास्त्वधिष्ठातारो देवतात्मानो मन्त्रार्थवादादिषु व्यवहारादित्युक्तं। यदप्युक्तं मन्त्रार्थवादयोरन्यार्थत्वान्न देवताविग्रहादिप्रकाशनसामर्थ्यमिति, अत्र ब्रूमः। प्रत्ययाप्रत्ययौ हि सद्भावासद्भावयोः कारणं नान्यार्थत्वमनन्यार्थत्वं वा। तथा ह्यन्यार्थमपि प्रस्थितः पथि पतितं तृणपर्णादि

वद्देवताः स्वीकार्या इत्याह। ज्योतिरादीति। तथा चेतनत्वेन व्यवहारादित्यर्थः। एकस्य जडचेतनोभयरूपत्वं कथं तत्राह। अस्ति ह्येति। तथा हि विग्रहवत्तया देवव्यवहारः श्रूयते। सुब्रह्मण्य उद्गात्रृत्विक् तत्सम्बन्धी योऽर्थवाद इन्द्रागच्छेत्यादिः तत्र मेधातिथेर्मेषेतीन्द्रसम्बोधनं श्रुतं तद्व्याचष्टे। मेधेति। मुनिं मेषो भूत्वा जहारेति ह्यापनार्थं मेषेतीन्द्रसम्बोधनमित्यर्थः। यदुक्तमादित्यादयो मृदादिवदचेतना एवेति तन्न सर्वत्र जडाजडांशद्वयसत्त्वादित्याह। मृदिति। आदित्यादौ को जडभागः कश्चेतनांश इति तत्राह। ज्योतिरादेरिति। मन्त्रादिकं प्रदर्श्यैव भासमानविग्रहादौ स्वार्थे न प्रमाणं अन्यपरत्वात्, विषं भुंक्ष्वेति वाक्यवत् इत्याह। यदपीति। अन्यपरादपि वाक्यात् बाधाभावे स्वार्थो ग्राह्य इत्याह। अत्र ब्रूम इति। तात्पर्यशून्येऽप्यर्थे प्रत्ययमात्रेणास्तित्वमुदाहरति। तथा हीति। तृणादौ

अस्तीत्येवं प्रतिपद्यते। अत्राह विषम उपन्यासः तत्र हि दृष्ट-पर्णादिविषयं प्रत्यक्षं प्रवृत्तमस्ति येन तदस्तित्वं प्रतिपद्यते। अत्र पुनर्विध्युद्देशैकवाक्यभावेन स्तुत्यर्थेऽर्थवादेन पार्थगर्थ्येन वृत्तान्तविषया प्रवृत्तिः शक्याध्यवसाययितुं। न हि महावाक्ये प्रत्यायकेऽवान्तरवाक्यस्य पृथक् प्रत्यायकत्वमस्ति, यथा न सुरां पिबेदिति नञ्श्रुति वाक्ये पदद्वयसम्बन्धात् सुरापानप्रतिषेध एवैकोऽर्थो गम्यते न पुनः सुरां पिबेदिति पदद्वयसम्बन्धात् सुरापानविधिरपीति। अत्रोच्यते। विषम उपन्यासः, युक्तं यत् सुरापानप्रतिषेधे पदान्वयस्यैकत्वादवान्तरवाक्यार्थस्याग्रहणं, विध्युद्देशार्थवादयोस्त्वर्थवादस्थानि पदानि पृथगन्वयं वृत्तान्तविषयं प्रतिपद्यानन्तरं कैमर्थक्यवशेन विधिस्तावकत्वं प्रतिपद्यन्ते। यथा हि 'वायव्यं श्वेतमालभेत भूतिकामः' इत्यत्र विध्युद्देशवर्त्तिनां वायव्यादिपदानां विधिना सम्बन्धः, नैवं

प्रत्ययोऽस्ति विग्रहादौ स नास्तीति वैषम्यं शङ्कते। अत्राहेति। विध्युद्देशो वाक्यं तदेकवाक्यतया प्रशस्तो विधिरित्येवार्थवादेषु प्रत्ययः। वृत्तान्तो भूतार्थो, विग्रहादिः तद्विषयः प्रत्ययो नास्तीत्यर्थः। नन्ववान्तरवाक्येन विग्रहादिप्रत्ययोऽस्त्वित्यत आह। न हीति। सुरापानप्रत्ययोऽपि स्यादिति भावः। पदैकवाक्यत्ववाक्यैकवाक्यत्ववैषम्यान्नैवमित्याह। अत्रोच्यत इति। नञ्पदमेकं यदा सुरां पिबेदिति पदाभ्यामन्वेति. तदा पदैकवाक्यं एकमेवार्थानुभवं करोति न तु पदद्वयं पृथक् सुरापानं बोधयति तस्य विधौ निषेधानुपपत्तेः वाक्यार्थानुभवं प्रत्यद्वारत्वात्, अर्थवादस्तु भूतार्थसंसर्गस्तुतिद्वारं बोधयन् विधिना वाक्यैकवाक्यतां भजत इत्यस्ति विग्रहाद्यनुभव इत्यर्थः। नन्वर्थवादस्य-

वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिं गमयति इत्येषामर्थवादगतानां पदानां न हि भवति वायुर्वा आलभेत क्षेपिष्ठा देवता वा आलभेतेत्यादि वायुस्वभावसङ्कीर्त्तनेन त्ववान्तरमन्वयं प्रतिपद्य एवं विशिष्टदैवत्यमिदं कर्मेति विधिं स्तुवन्ति। तद्यत्र योऽवान्तरवाक्यार्थः प्रमाणान्तरगोचरो भवति तत्र तदनुवादेनार्थवादः प्रवर्त्तते। यत्र प्रमाणान्तरविरुद्धस्तत्र गुणवादेन। यत्र तु तदुभयं नास्ति तत्र किं प्रमाणान्तराभावाद्गुणवादः स्यादाहोस्वित् प्रमाणान्तराविरोधाद्विद्यमानार्थवाद इति प्रतीतिशरणैर्विद्यमानार्थवाद आश्रयणीयो न गुणानुवादः। एतेन मन्त्रो व्याख्यातः। अपि च, विधिभिरेवेन्द्रादिदैवत्यानि हवींषि चोदयद्भिरपेक्षितमिन्द्रादीनां स्वरूपं, न हि स्वरूपरहिता इन्द्रादयश्चेतस्यारोपयितुं

पदानामवान्तरसंसर्गबोधकत्वं विना साक्षादेव विध्यन्वयोऽस्तु तत्राह। यथा हीति। साक्षादन्वययोगं दर्शयति। न हीति। अर्थवादात् सर्वत्र ग्रहणमाशङ्क्यार्थवादान् विभजते। तद्यत्रेति। तत्रार्थवादेषु यत्राग्निर्हिमस्य भेषजमित्यादावित्यर्थः। आदित्यो यूप इत्यभेदो बाधित इति तेजस्वित्वगुणवादः, यत्र वज्रहस्तः पुरन्दर इत्यादौ मानान्तरसम्वादविसम्वादौ न स्तः तत्र भूतार्थवाद इत्यर्थः, इति विभज्येत्यध्याहारः। विग्रहार्थवादः स्वार्थेऽपि तात्पर्य्यवान् अन्यपरत्वे सत्यज्ञानाबाधितार्थकशब्दत्वात् प्रयाजादिवाक्यवत् इति न्यायं मन्त्रेष्वतिदिशति। एतेनेति। वेदान्तानुवादगुणवादानां निरासाय हेतौ पदानि न चोभयपरत्वे वाक्यभेदोऽवान्तरार्थस्य महावाक्यार्थद्वारत्वादिति भावः। विध्यनुपपत्त्यापि स्वर्गवद्देवताविग्रहोऽङ्गीकार्य्य इत्याह। अपि चेति।

शक्यन्ते। न च चेतस्यनारूढायै तस्यै तस्यै देवतायै हविः प्रदातुं शक्यते। आवयति च, यस्यै देवतायै हविर्गृहीतं स्यात्तां ध्यायेद्वषट्करिष्यन्निति। न च शब्दमात्रमर्थस्वरूपं सम्भवति शब्दार्थयोर्भेदात्, तत्र यादृशं मन्त्रार्थवादयोरिन्द्रादीनां स्वरूपमवगतं न तत्तादृशं शब्दप्रमाणकेन प्रत्याख्यातुं युक्तं। इतिहासपुराणमपि व्याख्यातेन मार्गेन सम्भवनमन्त्रार्थवादमूलत्वात् प्रभवति देवताविग्रहादि प्रपञ्चयितुं। *प्रत्यक्षमूलमपि सम्भवति। भवति ह्यस्माकमप्रत्यक्षमपि चिरन्तनानां प्रत्यक्षं। तथा च व्यासादयो देवादिभिः प्रत्यक्षं व्यवहरन्तीति स्मर्यते। यस्तु ब्रूयादिदानीन्तनानामिव पूर्वेषामपि नास्ति देवादिभिः व्यवहर्तुं सामर्थ्यमिति स जग-

---

ननु क्लेशात्मके कर्म्मणि विधिः फलं विना अनुपपन्न इति भवतु यन्न दुःखेन सम्भिन्नमित्यर्थवादसिद्धः स्वर्गो विधिप्रमाणकः विग्रहं विना विधेः कानुपपत्तिस्तामाह। न ह्यति। उद्दिश्य त्यागानुपपत्त्या चेतस्यारोहोऽङ्गीकार्य्य इत्यत्र श्रुतिमप्याह। यस्या इति। अतश्चेतस्यारोहार्थं विग्रहो द्रष्टव्यः। किञ्च कर्म्मप्रकरणपाठात् विग्रहप्रमितिः प्रयाजवत् कर्म्माङ्गत्वेनाङ्गीकार्य्यतां, विना कर्म्मापूर्वासिद्धेः। किञ्च सुप्रसन्नविग्रहदेवतां त्यक्त्वा शब्दमात्रं देवतेति भक्तिरयुक्तेत्याह। न च शब्देति। न चाकृतिमात्रं शब्दशक्यमस्तु किं विग्रहेणेति वाच्यं, निर्व्यक्त्याकृत्ययोगात्, अतः शब्दस्यार्थाकाङ्क्षायां मन्त्रादिप्रमितविग्रहोऽङ्गीकार्य्य इत्याह। तत्रेति। एवं मन्त्रार्थवादमूलकमितिहासादिकमपि विग्रहे मानमित्याह। इतिहासेति। प्रमाणत्वेन सम्भवदित्यर्थः। व्यासादीनां योगिनां देवतादिप्रत्यक्षमपीतिहासादेर्मूलमित्याह। प्रत्यक्षेति। व्यासादयो देवादिप्रत्यक्षशून्याः प्राणित्वादस्मदादित्यनुमानमतिप्रसङ्गेन दूषयति।

---

* प्रत्यक्षादीनि मो० का० वर्ध० पु० पाठः।

वैचित्र्यं प्रतिषेधेत्। इदानीमिव च नान्यदापि सार्वभौमः क्षत्रियोऽस्तीति ब्रूयात्, ततश्च राजसूयादिचोदना उपरुन्ध्यात्। इदानीमिव च कालान्तरेऽप्यव्यवस्थितप्रायान् वर्णाश्रमधर्मान् प्रतिजानीत ततश्च व्यवस्थाविधायिशास्त्रमनर्थकं कुर्यात्। तस्माद्धर्मोत्कर्षवशाच्चिरन्तना देवादिभिः प्रत्यक्षं व्यवजह्रुरिति स्मर्यते। अपि च स्मरन्ति स्वाध्यायादिष्टदेवतासम्प्रयोग इत्यादि। योगोऽप्यणिमाद्यैश्वर्यप्राप्तिफलकः स्मर्यमानो न शक्यते साहसमात्रेण प्रत्याख्यातुं। श्रुतिश्च योगमाहात्म्यं प्रत्याख्यापयति

"पृथ्व[प्ते]जोऽनिलखे समुत्थिते
पञ्चात्मके योगगुणे प्रवृत्ते।
न तस्य रोगो न जरा न मृत्युः
प्राप्तस्य योगाग्निमयं शरीरं" इति॥

ऋषीणामपि मन्त्रब्राह्मणदर्शिनां सामर्थ्यं नास्मदीयेन

यक्षित्यादिना। सर्वं घटाभिन्नं वस्तुत्वात् घटवदिति जगद्वैचित्र्यं नास्तीत्यपि स ब्रूयात्। तथा क्षत्रियाभावं वर्णाश्रमाभावं वर्णाश्रमाद्यव्यवस्थाञ्च ब्रूयात् निरङ्कुशबुद्धित्वात्। तथा च राजसूयादिशास्त्रस्य कृतादियुगधर्मव्यवस्थाशास्त्रस्य बाध इत्यर्थः। योगसूचार्थादपि देवादिप्रत्यक्षसिद्धिरित्याह। अपि चेति। मन्त्रजपात् देवसान्निध्यं तत्सम्भाषणं चेति सूचार्थः। योगमाहात्म्यस्य श्रुतिस्मृतिसिद्धत्वात् योगिनामस्ति देवादिप्रत्यक्षमित्याह। योग इति। पादतलादाजानोर्जानोरानाभेर्नाभेरग्रीवं ग्रीवायास्त्वकेशप्रदेशं ततस्ब्रह्मरन्ध्रं पृथिव्यादिपञ्चके समुत्थिते धारणाजाते योगगुणे चाणिमादिके प्रवृत्ते योगाभिव्यक्तं तेजोमयं शरीरं प्राप्तस्य योगिनो न रोगादिस्पर्श इत्यर्थः। चिकित्सादिप्रसिद्धिरपि विग्रहे मानमित्याह। श्लोकेति। अधिकरणार्थमुपसंहरति। तस्मादिति। चिन्तायाः फलमाह। क-

मामर्थ्येनोपमातुं युक्तं, तस्मात् समूलमितिहासपुराणं। लोकप्रसिद्धिरपि न सति सम्भवे निरालम्बनाध्यवसातुं युक्ता, तस्मादुपपन्नो मन्त्रादिभ्यो देवादीनां विग्रहवत्त्वाद्यवगमः। ततश्चार्थित्वादिसम्भवादुपपन्नो देवादीनामपि ब्रह्मविद्यायामधिकारः। क्रममुक्तिदर्शनान्यथैवमेवोपपद्यन्ते॥

शुगस्य तदनादरश्रवणात्तदाद्रवणात् सूच्यते हि॥ ३४॥

यथा मनुष्याधिकारनियममपोह्य देवादीनामपि विद्यास्वधिकार उक्तस्तथैव द्विजात्यधिकारनियमापवादेन शूद्रस्याप्यधिकारः स्यादित्येतामाशङ्कां निवर्त्तयितुं इदमधिकरणमारभ्यते। तत्र शूद्रस्याप्यधिकारः स्यादिति तावत् प्राप्तं, अर्थित्वसामर्थ्ययोः सम्भवात्, तस्माच्छूद्रो यज्ञेऽनवक्लृप्त इति-

---

मेति। एवमेव देवादीनां ब्रह्मविद्याधिकारे सत्येव देवत्वप्राप्तिद्वारा मुक्तिफलान्युपासनानि युज्यन्ते देवानामनधिकारे ज्ञानाभावात् क्रममुक्त्यर्थिनामुपासनेषु प्रवृत्तिर्न स्यात्, अतोऽधिकारनिर्णयात् प्रवृत्तिसिद्धिरिति भावः॥

शुगस्य सूच्यते हि। पूर्वेणास्य दृष्टान्तसङ्गतिमाह। यथेति। पूर्वत्र देवादीनां अधिकारसिद्ध्यर्थं मन्त्रादीनां भूतार्थे विग्रहादौ समन्वयोक्त्या वेदान्तानामपि भूतार्थे ब्रह्मणि समन्वयो दृष्टीकृतः, अत्रापि शूद्रशब्दस्य श्रौतस्य क्षत्रिये समन्वयोक्त्या स दृष्टीकृत इत्यधिकरणद्वयस्य प्रासङ्गिकस्यास्मिन् समन्वयाध्याये ऽन्तर्भाव इति मन्तव्यं। पूर्वपक्षे शूद्रस्याऽपि द्विजवद्वेदान्तश्रवणे प्रवृत्तिः, सिद्धान्ते तदभाव इति फलं, अत्र वेदान्तविचारो विषयः, स किं शूद्रमधिकरोति न वेति सम्भवासम्भवाभ्यां सन्देहे पूर्वपक्षमाह। तत्र शूद्रस्याधीत्यादिना। तस्मादनग्निमदनवक्लृप्तोऽसमर्थः। विद्यार्थिनि शूद्रशब्दप्रयो-

वत् शूद्रो विद्यायामनवक्लृप्त *इति निषेधाश्रवणात्। यच्च कर्मस्वनधिकारकारणं शूद्रस्यानग्नित्वं न तद्विद्यास्वधिकारस्यापवादकं। न ह्यावहनीयादिरहितेन विद्या वेदितुं न शक्यते। भवति च लिङ्गं शूद्राधिकारस्योपोद्बलकं, संवर्गविद्यायां हि जानश्रुतिं पौत्रायणं शुश्रूषुं शूद्रशब्देन परामृशति 'अहं हारेत्वा शूद्र तवैव सह गोभिरस्तु' इति। विदूरप्रभृतयश्च शूद्रयोनिप्रभवा अपि विशिष्टविज्ञानसम्पन्नाः स्मर्यन्ते, तस्मादधिक्रियते शूद्रो विद्यास्वित्येवं प्राप्ते ब्रूमः। न शूद्रस्याधिकारो वेदाध्ययनाभावात्। अधीतवेदो हि विदितवेदार्थो वेदा-

---

माल्लिङ्गादपि शूद्रस्याधिकार इत्याह। भवति चेति। जानश्रुतिः किल षट् शतानि गवां रथञ्च रैक्काय गुरवे निवेद्य मां शिक्षयेत्युवाच, ततो रैक्को विधुरः कल्यार्थी सन् इदमुवाच। अहेति निपातः खेदार्थः। हारेण निष्केण युक्त इत्वा गन्ता रथो हारेत्वा स च गोभिः सह हे शूद्र तवैवास्तु किमल्पेनानेन मम गार्हस्थ्यानुपयोगिनेति भावः। अर्थित्वादिसम्भवे श्रेयःसाधने प्रवृत्तिरुचिता स्वाभाविकत्वादिति न्यायोपेतात्लिङ्गादित्याह। तस्मादिति। सूत्राद्बहिरेव सिद्धान्तयति। न शूद्रस्याधिकार इत्यादिना। आपातेन विदितो वेदार्थो येन तस्येत्यर्थः। अध्ययनविधिना संस्कृतो वेदरूढ्युत्थमापातज्ञानञ्च वेदार्थविचारेषु शास्त्रीयं सामर्थ्यं तदभावात् शूद्रस्यार्थित्वादिसम्भवन्यायासिद्धेर्नास्ति वेदान्तविचाराधिकार इत्यर्थः। यद्वाध्ययनसंस्कृतेन वेदेन विदितो निश्चितो वेदार्थो येन तस्य वेदार्थेषु विधिष्वधिकारो नान्यस्य अनधीतवेदस्याऽपि, वेदार्थानुष्ठानाधिकारेऽध्ययनविधिवैयर्थ्यापातात्। अतः फलपर्यन्तब्रह्मविद्यासाधनेषु श्रवणादिविधिषु शूद्रस्यानधिकार इत्यर्थः। अधीतवेदार्थज्ञानवत्त्वरूपस्याध्ययनविधि-

---

* इति चेति सो० का० वर्ध० पु० पाठः।

र्थेष्वधिक्रियते, न च शूद्रस्य वेदाध्ययनमस्ति, उपनयनपूर्वकत्वाद्वेदाध्ययनस्य, उपनयनस्य च वर्णत्रयविषयत्वात्। यत्त्वर्थित्वं न तदसति सामर्थ्येऽधिकारकारणं भवति। सामर्थ्यमपि न लौकिकं केवलमधिकारकारणं भवति। शास्त्रीयेऽर्थे शास्त्रीयस्य सामर्थ्यस्यापेक्षितत्वात्। शास्त्रीयस्य च सामर्थ्यस्याध्ययननिराकरणेन निराकृतत्वात्। यच्चेदं शूद्रो यज्ञेऽनवक्लृप्त इति तत् न्यायपूर्वकत्वाद्विद्यायामप्यनवक्लृप्तत्वं द्योतयति, न्यायस्य साधारणत्वात्। यत् पुनः संवर्गविद्यायां शूद्रशब्दश्रवणं लिङ्गं मन्यसे न तल्लिङ्गं, न्यायाभावात्। न्यायोक्तौ हि लिङ्गदर्शनं द्योतकं भवति, न चात्र न्यायोऽस्ति। का-

---

लभ्यस्य सामर्थ्यस्याभावादिति न्यायस्य तुल्यत्वात् यच्चपदं वेदार्थोपलक्षणार्थमित्याह। न्यायस्य साधारणत्वादिति। तस्माच्छूद्र इत्येतच्छब्दपरामृष्टन्यायस्य यच्चब्रह्मविद्ययोस्तुल्यत्वादित्यर्थः। पूर्वोक्तं लिङ्गं दूषयति। यदिति। असामर्थ्यन्यायेनार्थित्वादिसम्भवन्यायस्य निरस्तत्वादित्यर्थः। ननु निषादः स्थपतिं याजयेदित्यत्राध्ययनाभावेऽपि निषादशब्दात् निषादस्थेष्टाविव शूद्रशब्दात् शूद्रस्य विद्यायामधिकारोऽस्त्वित्याशङ्क्य संवर्गविद्यायामधिकारमङ्गीकरोति। कामभिति। तद्विषयत्वात् तत्र श्रुतत्वादित्यर्थः। वस्तुतस्तु विधिवाक्यस्थत्वान्निषादशब्दोऽप्यधिकारिसमर्पकः, शूद्रशब्दस्तु विद्याविधिपरार्थवादस्थो नाधिकारिणं बोधयति, असामर्थ्यन्यायविरोधेनान्यपरशब्दस्य स्वार्थबोधित्वासम्भवात् इति मत्वाङ्गीकारं त्यजति। अर्थवादेति। तर्हि शूद्रशब्दस्यात्र श्रुतस्य कोऽर्थ इत्याशङ्क्य सूत्रेणार्थमाह। श्रूयते चेत्यादिना। जानश्रुतिर्नाम राजा निदाघसमये रात्रौ प्रासादतले सुष्वाप, तदा तदीयान्नदानादिगुणगणतोषिता ऋषयोऽस्य हितार्थं हंसा भूत्वा मनोरूपेण तस्योपरि आजग्मुः, तेषु मार्गाद्यो हंसोऽग्रेसरं हंसं उवाच, भो भो भद्राक्ष किं न पश्यसि

मञ्चायं शूद्रशब्दः संवर्गविद्यायामेवैकस्यां शूद्रमधिकुर्यात् तद्विषयत्वात् न सर्वासु विद्यासु, अर्थवादस्थत्वात् न तु क्वचिदप्ययं शूद्रमधिकर्त्तुमुत्सहते। शक्यते चायं शूद्रशब्दोऽधिकृतविषये योजयितुं। कथमित्युच्यते। कं वर एनमेतत् सन्तं सयुग्वानमिव *रैक्वमात्थेत्यस्माद्वंसवाक्यादात्मनोऽनादरं श्रुतवतो जानश्रुतेः पौत्रायणस्य शुगुत्पेदे तामृषी रैक्वः शूद्रशब्देनानेन सूचयांबभूवात्मनः परोक्षज्ञानस्य ख्यापनायेति गम्यते, जातिशूद्रस्यानधिकारात्। कथं पुनः शूद्रशब्देन शुगुत्पन्ना सूच्यते इति, उच्यते, तदा द्रवणाच्छुचमभिदुद्राव शुचा वाभिदुद्रुवे शुचा वा रैक्वमभिदुद्रावेति शूद्रावयवार्थसम्भवात् रूढार्थस्य चासम्भवात्। †दृश्यते चायमर्थोऽस्माख्यायिकायां॥

जानश्रुतेरस्य तेजः स्वर्गं व्याप्य स्थितं तत् त्वां धक्ष्यति न गच्छेति, तमग्नेसर उवाच, कमप्येनं वराकं विद्याहीनं सन्तं अरे सयुग्वानं युग्वा गन्त्री शकटी तया सह स्थितं रैक्वमिवैतद्वचनमात्थ। रैक्वस्य हि ब्रह्मिष्ठस्य तेजो दुरतिक्रमं नास्यानात्मज्ञस्येत्यर्थः। अस्मद्वचनात् खलो राजा शकटलिङ्गेन रैक्वं ज्ञात्वा विद्यावान् भविष्यतीति हंसानामभिप्रायः। कं उ अरे इति पदच्छेदः। उशब्दोऽप्यर्थः। तेषां हंसानामनादरवाक्यश्रवणात् अस्य राज्ञः शुगुत्पन्ना, सा शूद्रशब्देन रैक्वेन सूच्यते, हीति सूचान्वयः। श्रुतयौगिकार्थलाभे सति अनन्वितरूढ्यर्थस्याज्य इति न्यायद्योतनार्थो हिशब्दः। तदाद्रवणात् तया शुचा आद्रवणात्। शूद्रः शोकं प्राप्तवान्। शुचा वा कर्त्री राजा अभिदुद्रुवे प्राप्तः। शुचा वा करणेन रैक्वं गतवानित्यर्थः॥

---

* रैक्वमिति वर्ध० सो० पु० पाठः।

† स्पृश्यते इति सो० का० वर्ध० पु० पाठः।

क्षत्रियत्वगतेश्चोत्तरत्र चैत्ररथेन लिङ्गात् ॥ ३५ ॥

इतश्च न जातिशूद्रो जानश्रुतिः, यत्कारणं प्रकरण-*निरूपणेन क्षत्रियत्वमस्योत्तरत्र चैत्ररथेनाभिप्रतारिणा क्षत्रियेण समभिव्याहारात् लिङ्गात् गम्यते। उत्तरत्र हि संवर्गविद्यावाक्यशेषे चैत्ररथिरभिप्रतारी क्षत्रियः सङ्कीर्त्यते। अथ ह शौनकञ्च कापेयमभिप्रतारिणञ्च काक्षसेनिं सूदेन परिविश्यमानौ ब्रह्मचारी बिभिक्ष इति। चैत्ररथित्वं चाभिप्रतारिणः कापेययोगाद्वगन्तव्यं, कापेययोगो हि चैत्ररथस्यावगतः। एतेन वै चैत्ररथं कापेया अयाजयन्निति। †समानान्वययाजिनाञ्च प्रायेण समानान्वया याजका भवन्ति। तस्माच्चैत्ररथिर्नामैकः क्षत्रपतिरजायत इति च ‡क्षत्रजातित्वावगमात् क्षत्रियत्वमस्यावगन्तव्यं। तेन क्षत्रियेणाभिप्रतारिणा सह समा-

---

शूद्रशब्दस्य यौगिकत्वे लिङ्गमाह। क्षत्रियत्वेति। संवर्गविद्याविध्यनन्तरमर्थार्थवाद आरभ्यते। शुनकस्यापत्यं कपिगोत्रं पुरोहितमभिप्रतारिनामकं राजानं च कक्षसेनस्यापत्यं सूदेन परिविश्यमानौ तौ भोक्तुमुपविष्टौ वटुर्भिक्षितवानित्यर्थः। नन्वस्य चैत्ररथित्वं न श्रुतमित्यत आह। चैत्ररथित्वञ्चेति। एतेन द्विराचेणेति छान्दोग्यश्रुत्यैव पूर्वं चित्ररथस्य कापेययोग उक्तः। अभिप्रतारिणोऽपि तद्योगात् चैत्ररथवंश्यत्वं निश्चीयते। राजवंश्यानां हि प्रायेण पुरोहितवंश्या याजका भवन्तीत्यर्थः। नन्वस्त्वभिप्रतारिणः चैत्ररथित्वं तावता कथं

---

* निरूपणे इति वर्ध० का० सो० पु० पाठः।
† समानान्वयानाञ्चेति उक्त पु० पाठः।
‡ क्षत्रपतिरिति का० वर्ध० सो० पु० पाठः।

नायां विद्यायां सङ्कीर्त्तनं जानश्रुतेरपि क्षत्रियत्वं द्योतयति। समानानामेव हि प्रायेण समभिव्याहारा भवन्ति। क्षत्तृप्रेषणाद्यैश्वर्ययोगाच्च जानश्रुतेः क्षत्रियत्वावगतिः। अतो न *शूद्रस्याधिकारः॥

संस्कारपरामर्शात् तदभावाभिलापाच्च ॥ ३९ ॥

इतश्च न शूद्रस्याधिकारो यद्विद्याप्रदेशेषूपनयनादयः संस्काराः परामृश्यन्ते, तं होपनिन्ये अधीहि भगव इति होपसमाद ब्रह्मपरा ब्रह्मनिष्ठाः परं ब्रह्मान्वेषमाणा एष ह वै तत्सर्वं वक्ष्यतीति ते ह समित्पाणयो भगवन्तं पिप्पलादमुप-

---

क्षत्रियत्वं तत्राह। तस्मादिति। चित्ररथादित्यर्थः। क्षत्ता सूतः तस्य रैक्वान्वेषणाय प्रेषणं, अन्नगोदानादिकञ्च जानश्रुतेः क्षत्रियत्वे लिङ्गं। अत्र शूद्रशब्दो यौगिक एवेति न शूद्रस्याधिकार इति स्थितं॥

तत्र लिङ्गान्तरमाह। संस्कारेति। उपनयनं वेदग्रहणाङ्गं शूद्रस्य नास्तीति पूर्वमुक्तं इह विद्याग्रहणाङ्गस्योपनयनसंस्कारस्य सर्वत्र परामर्शात् शूद्रस्य तदभावान्न विद्याधिकार इत्युच्यते। भाष्ये आदिपदेनाध्ययनगुरुशुश्रूषादयो गृह्यन्ते। तं शिष्यमाचार्य उपनीतवानित्यर्थः। नारदोऽपि विद्यार्थी मन्त्रमुच्चारयन् सनत्कुमारमुपगत इत्याह। अधीति। उपदिशेति यावत्। ब्रह्मपरा वेदपारगाः, सगुणब्रह्मनिष्ठाः, परं निर्गुणं ब्रह्मान्वेषमाणाः, एष पिप्पलादः तज्जिज्ञासितं सर्वं वक्ष्यतीति निश्चित्य ते भरद्वाजादयः षट् ऋषयः तमुपगता इत्यर्थः। ननु वैश्वानरविद्यायां ऋषीन् राजा अनुपनीतैव विद्यामुवाचेति श्रुतेरनुपनीतस्यापि क्षत्रियस्य विद्याधिकार इत्यत आह। तानाहेति। ते ह समित्पाणयः पूर्वाह्णे प्रतिचक्रमिरे इति पूर्ववाक्ये ब्राह्मणा उपनय-

---

* जातिशूद्रस्येति का० वर्ध० सो० पु० पाठः।

सत्या इति च तान् ह्यनुपनीयैवेत्यपि प्रदर्शितैवोपनयनप्राप्ति-र्भवति। शूद्रस्य च संस्काराभावोऽभिलप्यते, शूद्रश्चतुर्थो वर्ण एकजातिरित्येकजातित्वस्मरणेन, न शूद्रे पातकं किञ्चिच्च संस्कारमर्हतीत्यादिभिश्च ॥

तदभावनिर्धारणे च प्रवृत्तेः ॥ ३७ ॥

इतश्च न शूद्रस्याधिकारो यत् सत्यवचनेन शूद्रत्वाभावे निर्द्धारिते जाबालं गौतम उपनेतुमनुशासितुञ्च प्रवृत्ते, नैतदब्राह्मणो विवक्तुमर्हति समिधं सोम्याहरोप त्वा नेष्ये न सत्यादगा इति श्रुतिलिङ्गात् ॥

नार्थमागता इति उपनयनप्राप्तिं दर्शयित्वा निषिध्यते। हीनवर्णो-नोत्तमवर्णा अनुपनीयैवोपदेष्टव्या इत्याचारज्ञापनार्थमित्यर्थः। एक-जातिः अनुपनीतः। पातकं अभक्ष्यभक्षणादिकं। सत्यकामः किल मातृपिटको जाबालां मातरमपृच्छत् किंगोत्रोऽहमिति, तं मातोवाच भर्तृसेवाव्यग्रतयाहमपि तव पितुर्गोत्रं न जानामि जाबाला तु नामा-हमस्मि सत्यकामो नाम त्वमसीति एतावज्जानामीति, ततः स जाबालो गौतममागत्य तेन किंगोत्रोऽसीति पृष्ट उवाच नाहं गोत्रं वेद्मि न माता वेत्ति परन्तु मे माता कथितं उपनयनार्थमाचार्यं गत्वा सत्य-कामो जाबालोऽस्मीति ब्रूहीति। अनेन सत्यवचनेन तस्य शूद्रत्वाभा-वो निर्धारितः। अब्राह्मण एतत् सत्यं विविच्य वक्तुं नार्हतीति नि-र्धार्य, हे सौम्य सत्यात् त्वन्नागाः सत्यं न त्यक्तवानसि, अतस्त्वामुपनेष्ये तदर्थं समिधमाहरेति ॥

गौतमस्य प्रवृत्तेश्च लिङ्गात् न शूद्रस्याधिकार इत्याह। तद-भावेति ॥

अवणाध्ययनार्थप्रतिषेधात् *स्मृतेश्च ॥ ३८ ॥

एतश्च न शूद्रस्याधिकारो यदस्य स्मृतेः अवणाध्ययनार्थप्रतिषेधो भवति वेदश्रवणप्रतिषेधो वेदाध्ययनप्रतिषेधः तदर्थज्ञानानुष्ठानयोश्च प्रतिषेधः शूद्रस्य स्मर्यते। श्रवणप्रतिषेधस्तावदस्य वेदमुपशृण्वतस्त्रपुजतुभ्यां श्रोत्रप्रतिपूरणमिति, पद्यु ह वा एतत् श्मशानं यच्छूद्रस्तस्मात् शूद्रसमीपे नाध्येतव्यमिति च। अत एवाध्ययनप्रतिषेधो यस्य हि समीपेऽपि नाध्येतव्यं भवति स †कथं श्रुतिमधीयीत। भवति ‡चोच्चारणे जिह्वाच्छेदो धारणे शरीरभेद इति। अत एव चार्थादर्थज्ञानानुष्ठानयोः प्रतिषेधो भवति। न शूद्राय मतिं दद्यादिति द्विजातीनामध्ययनमिज्या दानमिति च। येषां पुनः पूर्वकृतसंस्कारवशात् विदुरधर्मव्याधप्रभृतीनां ज्ञानोत्पत्तिस्तेषां न शक्यते फलप्राप्तिः प्रतिबद्धुं, ज्ञानस्यैकान्तिकफलत्वात्। आवयेच्चतुरो वर्णानिति चेतिहासपुराणाधिगमे

स्मृत्या श्रवणादिनिषेधाच्च नाधिकार इत्याह। अवणेति। अस्य शूद्रस्य द्विजैः पठ्यमानं वेदं प्रमादाच्छृण्वतः सीसलाक्षाभ्यां तप्ताभ्यां श्रोत्रद्वयपूरणं प्रायश्चित्तं कार्यमित्यर्थः। पद्यु पादयुक्तं सञ्चरिष्णुरूपमिति यावत्। भवति च स्मृतिरिति शेषः। मतिं वेदार्थज्ञानं। दानं नित्यं निषिध्यते शूद्रस्य नैमित्तिकन्तु दानमस्त्येव। यदुक्तं विदुरादीनां ज्ञानित्वं दृष्टमिति तत्राह। येषामिति। सिद्धानां सिद्धे-

---

* स्मृतेश्चास्येति सो० पु० पाठः।
† कथमश्रुतमिति सो० वर्धे० का० पु० पाठः।
‡ वेदोदाहरणे इति उक्त पु० पाठः।

चातुर्वर्ण्याधिकारस्मरणात्। वेदपूर्वकस्तु नास्त्यधिकारः शूद्राणामिति स्थितं॥

कम्पनात्॥ ३९॥

अवसितः प्रासङ्गिकोऽधिकारविचारः, प्रकृतामेव इदानीं वाक्यार्थविचारणां वर्तयिष्यामः। यदिदं किञ्च जगत् सर्वं प्राण एजति निःसृतं महद्भयं वज्रमुद्यतं य एतद्विदुरमृतास्ते भवन्तीति। एतद्वाक्यं एजृ कम्पन इति धात्वर्थानुगमात् लक्षितं। अस्मिन् वाक्ये सर्वमिदं जगत् प्राणाश्रयं स्यन्दते। महच्च किञ्चिद्भयकारणं वज्रशब्दितं उद्यतं, तद्विज्ञानाच्चामृतत्वप्राप्तिरिति श्रूयते। तत्र कोऽसौ प्राणः किञ्च तद्भयानकं वज्रमित्यप्रतिपत्तेर्विचारे क्रियमाणे प्राप्तं तावत् प्रसिद्धेः पञ्चवृत्तिर्वायुः प्राण इति, प्रसिद्धेरेव चाग्रनिर्वज्रं स्यादायोस्येदं माहात्म्यं संकीर्त्यते। कथं सर्वमिदं जगत् पञ्चवृत्तौ

र्दुरपह्नवत्वेऽपि साधकैः श्रुद्धैः कथं ज्ञानं लब्धव्यमित्यत आह। आवर्येदिति॥

कम्पनात्। अस्यापि प्रासङ्गिकत्वमाशङ्क्याह। अवसित इति। समाप्त इत्यर्थः। काठकं पठति। यदिदमिति। सर्वं जगत् प्राणात् निःसृतं उत्पन्नं प्राणे चिदात्मनि प्रेरके सति एजति चेष्टते, तच्च प्राणाख्यं कारणं महद्ब्रह्म बिभेत्यस्मादिति भयं। तस्मिन् भयहेतुत्वे दृष्टान्तमाह। वज्रमिति। यथोद्यतं वज्रं भयं तथेत्यर्थः। यच्च तत्प्राणाख्यं ब्रह्म निर्विशेषं विदुस्ते मुक्ता भवन्तीत्याह। य इति। नन्वस्मिन् सूत्रे कथमिदं वाक्यमुदाहृतमित्यत आह। एतदिति। एजत्यर्थस्य सूचितत्वात् एजतिपदयुक्तं वाक्यं उदाहृतमित्यर्थः। प्रासङ्गिकाधिकारचिन्तयास्य सङ्गतिर्नापेक्षितेति शब्दादेरप्रमित इत्यनेनोच्यते। तत्राकृष्टवाक्ये

वायौ प्राणशब्दिते प्रतिष्ठायैजति वायुनिमित्तमेव च महद्भयानकं *वज्रमुत्पद्यते। वायौ हि पर्य्यन्यभावेन विवर्त्तमाने विद्युत्स्तनयित्नुवृष्ट्यग्नयो विवर्त्तन्त इत्याचक्षते। वायुविज्ञानादेव चेदममृतत्वं। तथा हि श्रुत्यन्तरं वायुरेव व्यष्टिर्वायुः समष्टिरप पुनर्मृत्युञ्जयति य एवं वेदेति, तस्मादायुरर्थमिह प्रतिपत्तव्य इत्येवं प्राप्ते ब्रूमः। ब्रह्मैवेदमिह प्रतिपत्तव्यं, कुतः पूर्वोत्तरालोचनात्। पूर्वोत्तरयोर्हि ग्रन्थभागयोर्ब्रह्मैव निर्दिश्यमानमुपलभामहे, इहैव कथमकस्मादन्तराले वायुं निर्दिश्यमानं प्रतिपद्येमहि। पूर्वत्र तावत्

"तदेव शुक्रन्तद्ब्रह्म तदेवामृतमुच्यते।

तस्मिँल्लोकाः श्रिताः सर्वे तदु नात्येति कश्चन"॥ इति।

ब्रह्मनिर्दिष्टं तदेवेहापि सन्निधानात् जगत् सर्वं प्राण एजतीति च लोकाश्रयत्वप्रत्यभिज्ञानान्निर्दिष्टमिति गम्यते। प्राणशब्दो

जीवानुवादो ब्रह्मैक्यज्ञानार्थ इत्युक्तं, न तथेह प्राणानुवाद ऐक्यज्ञानार्थः सम्भवति, प्राणस्वरूपेण कल्पितस्यैक्यायोगात्, अतः प्राणोपास्तिपरं वाक्यमिति प्रत्युदाहरणेन पूर्वपक्षयति। प्रसिद्धेः पञ्चवृत्तिरिति। नन्वत एव प्राण इत्यादौ ब्रह्मणि लिङ्गात् प्राणश्रुतिर्नीता, अत्रापि सर्वचेष्टाभयहेतुत्वं ब्रह्मलिङ्गमस्तीति नास्ति पूर्वपक्षावसरो गतार्थत्वादित्यत आह। वायोश्चेति। प्रतिष्ठाय स्थितिं लब्ध्वा प्राणे वायो निमित्ते जगच्चलतीति प्रसिद्धं, अतः स्पष्टं ब्रह्मलिङ्गं नास्तीति भावः। वज्रलिङ्गाच्च वायुरित्याह। वायुरिति। व्यष्टिर्विशेषः समष्टिः सामान्यं। श्रुत्याद्दृष्टिरेव सिद्धान्तं प्रतिजानीते। ब्रह्मैवेति। पूर्वोत्तरवाक्यैकवाक्यतानुगृहीतं सर्वाश्रयत्वं लिङ्गं वाक्यभेदकप्राण-

---

* वज्रमुद्यम्यते इति का० सो० वर्ध० पु० पाठः।

ऽप्ययं परमात्मन्येव प्रयुक्तः, प्राणस्य प्राणमिति दर्शनात्, एजयित्वमपीदं परमात्मन एवोपपद्यते न वायुमात्रस्य, तथाचोक्तं,

"न प्राणेन नापानेन मर्त्यो जीवति कश्चन।
इतरे न तु जीवन्ति यस्मिन्नेतावुपाश्रितौ" ॥ इति।

उत्तरत्रापि,

"भयादस्याग्निस्तपति भयात्तपति सूर्यः।
भयादिन्द्रश्च वायुश्च मृत्युर्धावति पञ्चमः" ॥ इति।

ब्रह्मैव निर्देक्ष्यते न वायुः, सवायुकस्य जगतो भयहेतुत्वाभिधानात् तदैवेहापि सन्निधानात् महद्भयं वज्रमुद्यतमिति च भयहेतुत्वप्रत्यभिज्ञानान्निर्दिष्टमिति गम्यते। वज्रशब्दोऽप्ययम्भयहेतुत्वसामान्यात् प्रयुक्तः, यथा हि वज्रमुद्यतं ममैव शिरसि निपतेत् यद्यहमस्य शासनं न कुर्यामित्यनेन भयेन जनो नियमेन राजादिशासने प्रवर्तते। एवमिदमग्निवायुसूर्यादिकं जगदस्मादेव ब्रह्मणो बिभ्यन्नियमेन स्वव्यापारे प्रवर्तते इति भयानकं वज्रोपमितं ब्रह्म। तथा च ब्रह्मविषयं श्रुत्यन्तरं,

"भीषास्माद्वातः पवते भीषोदेति सूर्यः।
भीषास्मादग्निश्चेन्द्रश्च मृत्युर्धावति पञ्चमः" ॥

श्रुतेर्बाधकमित्याह। पूर्ववेत्यादिना। सुखं स्वप्रकाशं। तदु नास्येति ब्रह्मानाश्रितः कोऽपि लोको नास्येवेत्युक्तार्थः। सौत्रलिङ्गं व्याचष्टे। एजयित्वमिति। सवायुकस्य सर्वस्य कम्पनश्रवणादपि प्राणः परात्मैवेत्यर्थः। ब्रह्मणि वज्रशब्दः कथमित्याशङ्क्य गौणमित्याह। वज्रशब्द इति। बृहदारण्यके वायुरेव व्यष्टिरित्यत्रापुनर्मृत्युमिति अपमृत्युजयरूपमापेक्षिकममृतत्वमुच्यते न मुख्यामृतत्वं। तत्रैव वायू-

दृत्यमृतत्वफलश्रवणादपि ब्रह्मैवेदमिति गम्यते। ब्रह्मज्ञानाद्ध्यमृतत्वप्राप्तिः, तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनायेति मन्त्रवर्णात्। यत्तु वाय्वादिविज्ञानात् क्वचिदमृतत्वमभिहितं तदापेक्षिकं तत्रैव प्रकरणान्तरकरणेन परमात्मानमभिधाय अतोऽन्यदार्तमिति वाय्वादेरार्त्तत्वाभिधानात्। प्रकरणादप्यत्र परमात्मनिश्चयः।

"अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात् कृताकृतात्।
अन्यत्र भूताद् भव्याच्च यत् तत्पश्यसि तद्वद"॥

इति परमात्मनः पृष्टत्वात्॥

ज्योतिर्दर्शनात्॥ ४०॥

एष सम्प्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यत इति श्रूयते, तत्र संशय्यते किं ज्योतिःशब्दं चक्षुर्विषयं तमोऽपहं तेजः किं वा परं ब्रह्मेति,

---

प्राप्तिप्रकरणं समाप्याथ हैनमुषस्तः पप्रच्छेति ज्ञेयात्मानमुक्ता वाय्वादेर्नाग्नित्वोक्तेरित्याह। यत्तु वाय्वित्यादिना। तस्मात् काठकवाक्यं ज्ञेये समन्वितमिति सिद्धं॥

ज्योतिर्दर्शनात्। छान्दोग्ये प्रजापतिविद्यावाक्यमाह। एष इति। परंज्योतिःश्रुतिभ्यां संशयमाह। तत्रेति। घटादिविषयावरकतमोनाशकं सौरमित्यर्थः। पूर्वत्र ब्रह्मप्रकरणस्यानुग्राहकः सर्वशब्दसङ्गोचाद्ययोगोऽस्तीति। प्राणश्रुतिर्ब्रह्मणि नेता, न तथात्र य आत्मापहतपाप्मेति प्रकरणस्यानुग्राहकं पश्याम इति प्रत्युदाहरणेन पूर्वपक्षतामाह। प्रसिद्धमेवेत्यादिना। पूर्वपक्षे सूर्योप्राप्तिः सिद्धान्ते ब्रह्मज्ञानान्मुक्तिरिति फलं। ननु ज्योतिरधिकरणे ज्योतिःशब्दस्य ब्रह्मणि वृत्तेरुक्तत्वात् कथं पूर्वपक्ष इत्यत आह। ज्योतिरिति। तत्र गायत्रीवाक्ये

किं तावत् प्राप्तं, प्रसिद्धमेव तेजो ज्योतिःशब्दमिति, कुतः तत्र ज्योतिःशब्दस्य रूढत्वात्। ज्योतिश्चरणाभिधानादित्यत्र हि *प्रकरणात् ज्योतिःशब्दः स्वार्थं परित्यज्य ब्रह्मणि वर्तते। न चेह तद्वत् किञ्चित् स्वार्थपरित्यागे कारणं दृश्यते। तथा च नाडीखण्डे, अथ यत्रैतदस्मात् शरीरादुत्क्रामत्यथैतैरेव रश्मिभिरूर्ध्वमाक्रमत इति मुमुक्षोरादित्यप्राप्तिरभिहिता, तस्मात् प्रसिद्धमेव तेजो ज्योतिःशब्दवाच्यमिति, एवं प्राप्ते ब्रूमः। परमेव ब्रह्म ज्योतिःशब्दं, कस्मादृश्यनात्। तस्य हीह प्रकरणे वक्तव्यत्वेनानुवृत्तिर्दृश्यते। य आत्मापहतपाप्मेत्यपहतपाप्मत्वादिगुणकस्यात्मनः प्रकरणादावन्वेष्टव्यत्वेन विजिज्ञासितव्यत्वेन च प्रति-

---

प्रकृतब्रह्मपरामर्शकयच्छब्दसामानाधिकरण्यात् स्वार्थत्यागः कृतस्तथाच स्वार्थत्यागे हेत्वदर्शनात् पूर्वपक्ष इत्यर्थः। ज्योतिःश्रुतेरनुग्राहकत्वेनार्चिरादिमार्गस्थत्वं लिङ्गमाह। तथा चेति। ता वा एता हृदयस्य नाड्यः कण्ठकपालादीनां रश्मीनाञ्च मिथःसंश्लेषमुक्ता अथ संज्ञालोपानन्तरं यत्र काले एतन्मरणं यथा स्यात्तथोत्क्रामति अथ तदा एतैर्नाडीसंश्लिष्टरश्मिभिरूर्ध्वं सन्नुपरि गच्छति, मत्वादित्यं ब्रह्मलोकद्वारभूतं गच्छति इत्यभिहितं, तथैवात्रापि शरीरात् समुत्थाय मत्वा परं ज्योतिरादित्याख्यमुपसम्पद्य तद्द्वारा ब्रह्मलोकं गत्वा स्वरूपेणाभिनिष्पद्यत इति वक्तव्यं। समुत्थायोपसम्पद्येति क्त्वाश्रुतिभ्यां ज्योतिषोऽर्चिरादिमार्गस्थत्वभानादित्यर्थः। अतो मार्गस्थस्यैवोपास्याक्रममुक्तिपरं वाक्यमिति प्राप्ते सिद्धान्तयति। एवमिति। आख्येयत्वेनोपक्रान्त आत्मैवात्र ज्योतिःशब्देन आख्येय इति ज्योतिर्वाक्येनैकवाक्यता प्रयोजकप्रकरणानुगृहीता, उत्तमपुरुषश्रुत्या वाक्यभेदैक-

---

* कारणादिति सो० वर्ध० का० पु० पाठः।

ज्ञानादेतन्त्वेव ते भूयोऽनुव्याख्यास्यामीति चानुसन्धानात्, अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशत इति च अशरीरतायै ज्योतिःसम्पत्तेरस्याभिधानात् ब्रह्मभावाच्चान्यथाशरीरतानुपपत्तेः, परं ज्योतिः स उत्तमः पुरुष इति च विशेषणात्। यत्तूक्तं मुमुक्षोरादित्यप्राप्तिरभिहितेति, न चासावात्यन्तिको मोक्षो गत्युत्क्रान्तिसम्बन्धात्। न हि आत्यन्तिके मोक्षे गत्युत्क्रान्ती स्त इति वक्ष्यामः॥

आकाशोऽर्थान्तरत्वादिव्यपदेशात्॥ ४१॥

आकाशो ह वै नाम नामरूपयोर्निर्वहिता ते यदन्तरा तद् ब्रह्म तदमृतं स आत्मेति श्रूयते। तत् किमाकाशशब्दं परं ब्रह्म किं वा प्रसिद्धमेव भूताकाशमिति विचारे भूतपरिग्रहो

ज्योतिःश्रुतिर्बाध्येति भावः। अशरीरत्वफललिङ्गात् ब्रह्मैव ज्योतिर्न सूर्य इत्याह। अशरीरमिति। न च सूर्यप्राप्त्या क्रमेणाशरीरत्वं स्यादिति वाच्यं, परत्वेन विशेषितस्य ज्योतिष एव स उत्तम इति परामर्शेनाशरीरत्वनिश्चयादित्याह। परमिति। पूर्वोक्तलिङ्गं दूषयति। यत्त्विति। नाडीखण्डे दहरोपासकस्य या सूर्यप्राप्तिरुक्ता स नामाक्षर इति युक्ता सूर्योक्तिः, अत्र तु प्रजापतिवाक्ये निर्गुणविद्यायामर्चिरादिगतिस्मृसूर्यस्थानन्वयादनर्थकत्वात् श्रुतिव्यत्यासेन स्वरूपं साक्षात्कृत्य परं ज्योतिस्तदेवोपसम्पद्यत इति व्याख्येयमितिभावः॥

आकाशो व्यपदेशात्। छान्दोग्यमुदाहरति। आकाश इति। यथोपक्रमबलात् ज्योतिःश्रुतिबाधस्तथाकाशोपक्रमात् ब्रह्मादिशब्दबाध इति दृष्टान्तेन पूर्वपक्षयति। भूतेति। भूतैर्गुणैराकाशोपात्तिर्निर्गुण-

युक्तः, आकाशशब्दस्य तस्मिन् रूढत्वात्, नामरूपनिर्वहणस्य चावकाशदानद्वारेण तस्मिन् योजयितुं शक्यत्वात्। स्रष्टृत्वादेश्च स्पष्टस्य ब्रह्मलिङ्गस्याश्रवणात् इत्येवं प्राप्त इदमभिधीयते। परमेव ब्रह्मेहाकाशशब्दं भवितुमर्हति, कस्मात्, अर्थान्तरत्वादिव्यपदेशात्, ते यदन्तरा तद्ब्रह्मेति हि नामरूपाभ्यामर्थान्तरभूतमाकाशं व्यपदिशति। न च ब्रह्मणोऽन्यन्नामरूपाभ्यामर्थान्तरं सम्भवति, सर्वस्य विकारजातस्य नामरूपाभ्यामेव व्याकृतत्वात्। नामरूपयोरपि निर्वहणं निरङ्कुशं न ब्रह्मणोऽन्यत्र सम्भवति। अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति ब्रह्मकर्तृत्वश्रवणात्। ननु जीवस्यापि प्रत्यक्षं नामरूपविषयं निर्वाढृत्वमस्ति। वाढमस्ति अभेदस्त्वत्र विवक्षितः। नामरूपनिर्वहणाभिधानादेव च स्रष्टृत्वादि ब्रह्मलिङ्गमभिहितं भवति। तत्

ब्रह्मज्ञानं चेत्युभयत्र फलं। आकाशस्तल्लिङ्गादित्यनेन यौगरूढ्यमाशङ्क्य तदुदत्र स्पष्टलिङ्गाश्रवणादिति परिहरति। स्रष्टृत्वादेश्चेति। वै नामेति प्रसिद्धिलिङ्गस्याकाशश्रुतेश्च वाक्यशेषगताभ्यां ब्रह्मात्मश्रुतिभ्यामनेकलिङ्गोपेताभ्यां बाधो युक्तः। यत्र बलप्रमाणसंवादस्तत्र वाक्यस्य तात्पर्यमिति निर्णयादिति सिद्धान्तयति। परमेवेत्यादिना। नामरूपे शब्दार्थौ, तदन्तःपातिनस्तद्भिन्नत्वं तत्कर्तृत्वं चायुक्तमित्यर्थः। नामादिकर्तृत्वं न ब्रह्मलिङ्गं जीवस्यत्वादिति शङ्कते। नन्विति। अनेन जीवेनेत्यत्र जीवस्य ब्रह्माभेदेन कर्तृत्वमुच्यते साक्षादयोगादिति परिहरति। वाढमिति। यच्चोक्तं स्पष्टं लिङ्गं नास्तीति तत्राह। नामेति। तर्हि पुनरुक्तिस्तत्राह। आकाशेति। तस्यैव साधकोऽयं

ब्रह्म तदमृतं म आत्मेति च ब्रह्मवादस्य लिङ्गानि। आकाशस्तल्लिङ्गादित्यस्यायं प्रपञ्चः॥

सुषुप्त्युत्क्रान्त्योर्भेदेन॥ ४२॥

व्यपदेशादित्यनुवर्तते, बृहदारण्यके षष्ठे प्रपाठके कतम आत्मेति योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुष इत्युपक्रम्य भूयानात्मविषयः प्रपञ्चः कृतः। तत् किं संसारिस्वरूपमात्रान्वाख्यानपरं वाक्यमुतामंसारिस्वरूपप्रतिपादनपरमिति *विषयः, किं तावत् प्राप्तं संसारिस्वरूपमात्रविषयमेवेति। कुतः, उपक्रमोपसंहाराभ्यां। उपक्रमे योऽयं विज्ञानमयः प्राणेष्विति शारीरलिङ्गात्, उपसंहारे च स वा एष महानज आत्मा योऽयं विज्ञानमयः प्राणेष्विति तदपरित्यागान्मध्येऽपि बुद्ध्यान्ताद्यवस्थोपन्यासेन तस्यैव प्रपञ्चनादित्येवं प्राप्ते ब्रूमः। परमेश्वरोपदेशपरमेवेदं वाक्यं न शारीरमात्रान्वाख्यानपरं, क-

---

विकारः। अत्राकाशशब्दस्य ब्रह्मणि वृत्तिं सिद्धवत्कृत्य तत्र संशयादिप्रवृत्तेरुक्तत्वादिति न पौनरुक्त्यमिति भावः॥

सुषुप्त्युत्क्रान्त्योर्भेदेन। अहंधीगम्येषु कतम आत्मेति जनकप्रश्ने याज्ञवल्क्य आह। योऽयमिति। विज्ञानं बुद्धिस्तन्मयस्तत्प्रायः, सप्तमी व्यतिरेकार्था प्राणबुद्धिभ्यां भिन्न इत्यर्थः। वृत्तेरज्ञानाच्च भेदमाह। अन्तर्ज्योतिरिति। पुरुषः पूर्ण इत्यर्थः। उभयलिङ्गानां दर्शनात् संशयमाह। तत् किमिति। पूर्वत्र नामरूपाभ्यां भेदोक्तेराकाशो ब्रह्मेत्युक्तं तदयुक्तं, प्राज्ञेनात्मना सम्परिष्वक्त इति अभिन्नेऽपि जीवात्मनि भेदोक्तिवदौपचारिकभेदोक्तिसम्भवादित्याक्षेपसङ्गतिः। पूर्व-

---

* विषयस्थाने संशय इति वर्ध० पु० पाठः।

स्मात्, सुषुप्तावुत्क्रान्तौ च शारीरात् भेदेन परमेश्वरस्य व्यपदेशात्। सुषुप्तौ तावदयं पुरुषः प्राज्ञेनात्मना सम्परिष्वक्तो न बाह्यं किञ्चन वेद नान्तरमिति शारीराङ्गेन परमेश्वरं व्यपदिशति। तत्र पुरुषः शारीरः स्यात्तस्य वेदितृत्वात् बाह्याभ्यन्तरवेदनप्रसङ्गे सति तत्प्रतिषेधसम्भवात्। प्राज्ञः परमेश्वरः, सर्वज्ञत्वलक्षणया प्रज्ञया नित्यमवियोगात् तथोत्क्रान्तावप्ययं शारीर आत्मा प्राज्ञेनात्मनान्वारूढ उत्सर्ज्जन् यातीति जीवाङ्गेन *व्यपदेशात् परमेश्वरं व्यपदिशति, तत्रापि शारीरो जीवः स्यात् शरीरस्वामित्वात्। प्राज्ञस्तु स एव परमेश्वरः, तस्मात् सुषुप्त्युत्क्रान्त्योर्भेदेन व्यपदेशात् परमेश्वर एवात्र विवक्षित इति गम्यते। यदुक्तमाद्यन्तमध्येषु शारीरलिङ्गात् तत्परत्वमस्य वाक्यस्येति, अत्र ब्रूमः। उपक्रमे तावत् योऽयं विज्ञानमयः प्राणेष्विति न संसारिस्वरूपं विवक्षितं,

---

पक्षे कर्म्मकर्तृजीवस्तुतिः सिद्धान्ते जीवानुवादेन ततः कल्पितभेदभिन्नस्य प्राज्ञस्य परमात्मनः स्वरूपैक्यप्रमितिरिति फलं, बुद्धान्तो जाग्रदवस्था। आदिमध्यावसानेषु जीवोक्तेर्जीवस्तावकमिदं वाक्यमिति प्राप्ते सिद्धान्तयति। परमेश्वरेत्यादिना। वाक्यस्य जीवस्तावकत्वे जीवाङ्गेन प्राज्ञस्याज्ञातस्योक्तेरसङ्गता स्यात्, अतो ज्ञाताज्ञातसन्न्यायेन ज्ञातानुवादेनाज्ञातं प्रतिपादनीयं अपूर्वं वाक्यतात्पर्यमिति न्यायादिति सिद्धान्ततात्पर्यं। पुरुषः शरीरं प्राज्ञो जीव इति भ्रान्तिं वारयति। तत्र पुरुष इत्यादिना। देहस्य वेदनाप्रसक्तेर्निषेधायोगात् पुरुषो जीव एव, प्राज्ञस्तु रूढ्या पर एवेत्यर्थः। अन्वारूढोऽधिष्ठितः, उत्सर्ज्जन्

---

* व्यपदेशादिति वर्धः का० पु० नास्ति।

किं तर्ह्यनूद्य संसारिस्वरूपं परेण ब्रह्मणाऽस्यैकतां विवक्षति, यतो ध्यायतीव लेलायतीवेत्येवमाद्युत्तरग्रन्थप्रवृत्तिः संसारिधर्मनिराकरणपरा लक्ष्यते। तथोपसंहारेऽपि यथोपक्रममेवोपसंहरति। स वा एष महानज आत्मा योऽयं विज्ञानमयः प्राणेष्विति। योऽयं विज्ञानमयः प्राणेषु संसारी लक्ष्यते स वा एष महानज आत्मा परमेश्वर एवास्माभिः प्रतिपादित इत्यर्थः। यस्तु मध्ये बुद्ध्यान्ताद्यवस्थोपन्यासात् संसारिस्वरूपविवक्षां मन्यते स प्राचीमपि दिशं प्रस्थापितः प्रतीचीमपि दिशं प्रतिष्ठेत, यतो न बुद्ध्यान्ताद्यवस्थोपन्यासेनावस्थावत्त्वं संसारित्वं वा विवक्षितं, किं तर्ह्यवस्थारहितत्वमसंसारित्वञ्च विवक्षति। कथमेतदवगम्यते। यदत ऊर्द्धं विमोचायैव ब्रूहीति पदे पदे पृच्छति, यच्चानन्वागतत्वेन भवति असङ्गो ह्ययं पुरुष इति पदे पदे प्रतिवक्ति। अनन्वागतं पुण्येनानन्वागतं पापेन तीर्णो हि तदा सर्वान्

घोरान् शब्दान् मुञ्चन्, बुद्धौ ध्यायन्त्यां ध्यायतीव चलन्त्यां चलतीव। वस्तुतः सर्वविक्रियाशून्य इत्युक्तेर्न संसारित्वं तात्पर्यमित्याह। यत इति। उपक्रमवत् उपसंहारवाक्येऽप्यैक्यं विवक्षितमित्याह तथेति। व्याचष्टे। योऽयमिति। अवस्थोपन्यासस्य त्वमर्थशुद्धिद्वारैक्यपरत्वात् न जीवलिङ्गत्वमित्याह। यतो न बुद्ध्यान्तेतिप्रश्नोत्तराभ्यामसंसारित्वं गम्यत इत्याह। यदत ऊर्द्धमिति। कामादिविवेकानन्तरमित्यर्थः। भवतीति। चेति, यद्यस्मादपि तस्मादवगम्यत इति योजना। ते।वस्थाधर्मैणानन्वागतोऽस्पृष्टो भवति असङ्गत्वात्। सुषु-

शोकान् हृदयस्य भवतीति च, तस्मादसंसारिस्वरूपप्रतिपादनपरमेवैतद्वाक्यमित्यवगन्तव्यं ॥

पत्यादिशब्देभ्यः ॥ ४३ ॥

इतश्चासंसारिस्वरूपप्रतिपादनपरमेवैतद्वाक्यमित्यवगन्तव्यं। यदस्मिन् वाक्ये पत्यादिशब्दा असंसारिस्वरूपप्रतिपादनाः संसारिस्वरूपप्रतिषेधनाश्च भवन्ति। स सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिरित्येवंजातीयका असंसारिस्वभावप्रतिपादनपराः। स न साधुना कर्मणा भूयान्नो एवासाधुना कनीयानित्येवंजातीयकाः संसारिस्वभावप्रतिषेधनपरास्तस्मादसंसारी परमेश्वर इहोक्त इति गम्यते ॥ * ॥

इति श्रीमच्छारीरकमीमांसाभाष्ये श्रीमच्छङ्करभगवत्पादकृतौ प्रथमाध्यायस्य तृतीयः पादः ॥ * ॥

भावप्यात्मतत्त्वं पुण्यपापाभ्यामस्पृष्टं भवति। हि यस्मात् आत्मा सुषुप्तौ सर्वशोकातीतः तस्मात् हृदयस्यैव सर्वशोका इति श्रुत्यर्थः ॥

वाक्यस्य ब्रह्मात्मैक्यपरत्वे हेत्वन्तरमाह। पत्यादीति। सूत्रं व्याचष्टे। इतश्चेति। वशी स्वतन्त्रोऽपराधीन इति यावत्। ईशानो नियमनशक्तिमान्। शक्तेः कार्यमाधिपत्यमिति भेदः। तस्माच्छोधितत्वमर्थैक्ये षष्ठाध्यायसमन्वय इति सिद्धं ॥ ※ ॥

इति श्रीमच्छारीरकमीमांसाव्याख्यायां भाष्यरत्नप्रभायां प्रथमाध्याये तृतीयः पादः समाप्तः ॥ ※ ॥

ॐ नमः परमात्मने।

आनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्त-गृहीतेर्दर्शयति च ॥ १ ॥

ब्रह्मजिज्ञासां प्रतिज्ञाय ब्रह्मणो लक्षणमुक्तं जन्माद्यस्य यत इति, तल्लक्षणं प्रधानस्यापि समानमित्याशङ्क्य तदशब्दत्वेन निराकृतमीक्षतेर्नाशब्दमिति, गतिसामान्यञ्च वेदान्तवाक्यानां ब्रह्मकारणवादं प्रति विद्यते न प्रधानकारणवादं प्रतीति प्रपञ्चितं गतेन ग्रन्थेन। इदन्त्विदानीमवशिष्टमाशङ्क्यते। यदुक्तं प्रधानस्याशब्दत्वं तदसिद्धं, कासुचिच्छाखासु प्रधानसमर्पणाभासानां शब्दानां श्रूयमानत्वात्। अतः प्रधानस्य कारणत्वं वेदसिद्धमेव महद्भिः परमर्षिभिः कपिल-

---

ॐ ब्रह्मणे नमः।

अव्यक्तेशमजं पद्मजनाधारं च कारणं ॥
वेदितव्यं प्रियं वन्दे प्रकृतिं पुरुषं परं ॥ १ ॥

*अस्मिन् पादेऽधिकरणत्रयस्येत्यधिकरणेन सङ्गतिं वक्तुं वृत्तमनुवदति। ब्रह्मेति। तदशब्दत्वेन प्रधानस्य वैदिकशब्दशून्यत्वेनेत्यर्थः। ईक्षत्यधिकरणे गतिसामान्यमशब्दत्वञ्च प्रतिज्ञातं, तत्र ब्रह्मणि वेदान्तानां गतिसामान्यं प्रपठितं, अधुना प्रधानस्याशब्दत्वमसिद्धमित्याशङ्क्य निरूप्यत इत्याक्षेपसङ्गतिः। तेनाशब्दत्वनिरूपणेन ब्रह्मणि वेदान्तानां समन्वयो दृढीकृतो भवतीत्यध्यायसङ्गतिरप्यधिकरणत्रयस्य ज्ञेया। अत्राव्यक्तपदं विषयः। तत् किं प्रधानपरं पूर्वोक्तशरीरपरं वेति स्मृतिप्रकरणाभ्यां संशये पूर्वमप्रसिद्धब्रह्मपरत्वं यथा

---

* आनुमानिकमिति भा० पु० वर्त्तते।

प्रकृतिभिः परिगृहीतमिति प्रसज्यते। तद्यावत्तेषां शब्दानामन्यपरत्वं न प्रतिपाद्यते, तावत् सर्वज्ञं ब्रह्म जगतः कारणमिति प्रतिपादितमप्याकुलीभवेत्, अतस्तेषामन्यपरत्वं दर्शयितुं परः सन्दर्भः प्रवर्तते। आनुमानिकमपि अनुमाननिरूपितमपि प्रधानमेकेषां शाखिनां शब्दवदुपलभ्यते। काठके हि पठ्यते, महतः परमव्यक्तमव्यक्तात् पुरुष पर इति। तच्च य एव यन्नामानो यत्क्रमकाश्च महदव्यक्तपुरुषाः स्मृतिप्रसिद्धास्त एवेह प्रत्यभिज्ञायन्ते, तच्चाव्यक्तमिति स्मृतिप्रसिद्धेः शब्दादिहीनत्वाच्च न व्यक्तमव्यक्तमिति व्युत्पत्तिसम्भवात् स्मृतिप्रसिद्धं प्रधानमभिधीयतेऽतस्तस्य शब्दवत्त्वादशब्दत्वमुपपन्नं, तदेव च जगतः कारणं, श्रुतिस्मृतिन्यायप्रसिद्धिभ्य इति चेत्, नैतदेवं। न ह्येतत्काठकवाक्यं स्मृतिप्रसिद्धयोर्महदव्यक्तयोरस्तित्वपरं। न ह्यत्र यादृशं स्मृतिप्रसिद्धं स्वतन्त्रं कारणं त्रिगुणं

षष्ठाध्यायस्य दर्शितं तदव्यक्तपदमप्रसिद्धप्रधानपरमिति पूर्वपक्षयति। आनुमानिकमिति। अपिशब्दात् ब्रह्माङ्गीकारेणायमशब्दत्वाक्षेप इति सूचयति। तथा च ब्रह्मप्रधानयोर्विकल्पेन कारणत्वात् ब्रह्मण्येव वेदान्तानां समन्वय इति नियमासिद्धिः फलं सिद्धान्ते नियमसिद्धिरिति विवेकः। पदविचारत्वादधिकरणानामेतत्पादसङ्गतिर्बाधा, स्मार्त्तक्रमरूढिभ्यां अव्यक्तशब्दः प्रधानपरः। शब्दस्पर्शादिशून्यत्वेन योगसम्भवाच्चेत्याह। शब्दादीति। प्रधानस्य वैदिकशब्दवाच्यत्वे का क्षतिरित्यत आह। तदेवेति। अजामेकामित्याद्या श्रुतिः, हेतुः प्रकृतिरुच्यते इत्याद्या स्मृतिः, यदल्पं तच्छाखप्रकृतिकमितिन्यायः, ततो ब्रह्मैव कारणमिति मतक्षतिरितिभावः। सूत्रे नञर्थं

प्रधानं तादृशं प्रत्यभिज्ञायते, शब्दमात्रं ह्यत्राव्यक्तमिति प्रत्यभिज्ञायते, स च शब्दो न व्यक्तमव्यक्तमिति यौगिकत्वाद्-न्यस्मिन्नपि सूक्ष्मे दुर्लक्ष्ये च प्रयुज्यते, न चायं कस्मिंश्चिद्रूढः। या तु प्रधानवादिनां रूढिः सा तेषामेव पारिभाषिकी सतो न वेदार्थनिरूपणे कारणभावं प्रतिपद्यते। न च क्रममात्रसामान्यात् समानार्थप्रतिपत्तिर्भवत्यसति तद्रूपप्रत्यभिज्ञाने। न ह्यस्थाने गां पश्यन्नश्वोऽयमित्यमूढोऽध्यवस्यति। प्रकरणनिरूपणायां चात्र न परपरिकल्पितं प्रधानं प्रतीयते, शरीररूपकविन्यस्तग्रहीतेः। शरीरं ह्यत्र रथरूपकविन्यस्तमव्यक्तशब्देन

वदन् सिद्धान्तयति। नैतदिति। प्रधानं वैदिकं नेत्यत्र तात्पर्याभावं हेतुमाह। न हीति। ननु प्रधानस्याप्रत्यभिज्ञानाद्वैदिकत्वमित्यत आह। न ह्यत्रेति। ननु शब्दप्रत्यभिज्ञायामर्थोऽपि प्रत्यभिज्ञायते इत्याशङ्क्य यौगिकाच्छब्दादसति नियामके नार्थविशेषधीरित्याह। स चेति। रूढ्या तद्धीरित्याशङ्क्य रूढिः किं लौकिकी स्मार्ती वा, नाद्य इत्याह। न चेति। द्वितीयं प्रत्याह। या त्विति। पुरुषसङ्केतो नानादिवेदार्थनिर्णयहेतुः, पुंमतेर्विचित्रत्वादित्यर्थः। यत्तु स्मार्तक्रमप्रत्यभिज्ञया क्रमिकार्थः स्मार्त एवेति तत्राह। न च क्रमेति। स्थानात् तद्रूपप्रत्यभिज्ञानशङ्कायामसतीत्यनन्वयान्नञो व्यत्यासेनातद्रूपस्य तद्रूपविरुद्धस्य प्रत्यभिज्ञाने सतीत्यर्थः। पूर्वज्ञातरूपार्थस्य स्थाने तद्विरुद्धार्थज्ञाने सति तस्य धीर्नास्तीत्यत्र दृष्टान्तमाह। न हीति। प्रकृते नास्ति विरुद्धज्ञानं इत्याशङ्क्य प्रकरणाच्छरीरज्ञानमस्तीत्याह। प्रकरणेति। शरीरमेव रूपकेण रथसादृश्येन विन्यस्तं शरीररूपकविन्यस्तं, तस्य पूर्ववाक्ये आत्मबुद्धेर्मध्यस्थानपतितस्यात्रापि मध्यस्थेनाव्यक्तशब्देन ग्रहणान्न प्रधानस्य वैदिकत्वमिति सूत्रार्थः। स्मार्तक्रमः किमिति त्यक्त्वा इत्या-

परिगृह्यते। कुतः प्रकरणात् परिशेषाच्च। तथा ह्यनन्तरातीतो ग्रन्थ आत्मशरीरादीनां रथिरथादिरूपकल्पनां दर्शयति।

"आत्मानं रथिनं विद्धि शरीरं रथमेव तु।
बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च॥
इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान्।
आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः" ॥ इति।

तैश्चेन्द्रियादिभिरसंयतैः संसारमधिगच्छति। संयतैस्त्वध्वनः पारं तद्विष्णोः परमं पदमाप्नोतीति दर्शयित्वा, किं तदध्वनः पारं विष्णोः परमं पदमित्यस्यामाङ्गायां तेभ्य एव प्रकृतेभ्य इन्द्रियादिभ्यः परत्वेन परमात्मानमध्वनः पारं तत् विष्णोः परमं पदं दर्शयति॥

"इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः।
मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः॥
महतः परमव्यक्तमव्यक्तात् पुरुषः परः।
पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः"॥ इति॥

ग्रहञ्च श्रौतक्रमस्य प्रकरणाद्यनुग्रहेण बलवत्त्वादित्याह। कुत इत्यादिना। तदुभयं विवृणोति। तथा हीति। रूपकल्पनाः सादृश्यकल्पना। ग्रग्रहोऽश्वरसना। यदा बुद्धिसारथिर्विवेकी तदा मनसेन्द्रियहयान् विषमविषयमार्गादाकर्षति। यद्यविवेकी तदा मनोरसनाबद्धांस्तान् प्रवर्तयतीति मनसः ग्रग्रहत्वं युक्तं। तेषु हयेषु, गोचरान् मार्गान्। ननु स्वतश्चिदात्मनो भोगसम्भवात् किं रथादिनेत्यत आह। आत्मेति। आत्मा देहः, देहादिसङ्घकल्पनया भोक्तृत्वं न स्वतोऽसङ्गत्वादित्यर्थः। अधुना

तत्र य एवेन्द्रियादयः पूर्वस्यां रथरूपककल्पनायामश्वादिभावेन प्रकृतास्ते एवेह परिगृह्यन्ते। प्रकृतहानाप्रकृतप्रक्रियापरिहाराय। तत्रेन्द्रियमनोबुद्धयस्तावत् पूर्वत्रेह च समानशब्दा एव, अर्थास्तु ये शब्दादयो विषया इन्द्रियहयगोचरत्वेन निर्दिष्टास्तेषां चेन्द्रियेभ्यः परत्वं इन्द्रियाणां च ग्रहत्वं विषयाणामतिग्रहत्वमिति श्रुतिप्रसिद्धेः विषयेभ्यश्च मनसः परत्वं, मनोमूलत्वाद्विषयेन्द्रियव्यवहारस्य, मनसस्तु परा बुद्धिः, बुद्धिं ह्यारुह्य भोग्यजातं भोक्तारमुपसर्पति, बुद्धेरात्मा महान् परो यः स आत्मानं रथिनं विद्धीति रथित्वेनोपक्षिप्तः, कुतः, आत्मशब्दात् भोक्तुश्च भोगोपकरणात् परत्वोपपत्तेः। महत्त्वं चास्य स्वामित्वादुपपन्नं। अथ वा,

"मनो महान् मतिर्ब्रह्मा पूर्बुद्धिः ख्यातिरीश्वरः।
प्रज्ञा संविच्चितिश्चैव स्मृतिश्च परिपठ्यते" ॥ इति स्मृतेः।

रथादिभिर्गन्तव्यं वदन् आकाङ्क्षापूर्वकमुत्तरवाक्यमादत्ते। तैश्चेत्यादिना। शरीरस्य प्रकृतत्वेऽपि अव्यक्तपदेन प्रधानं गृह्यतामित्यत आह। तत्र य एवेति। एवं प्रकरणं शोधयित्वा शरीरस्य परिशेषतामानयति। तत्रेन्द्रियेत्यादिना। अर्थानां पूर्वमनुक्तिशङ्कां वारयन् परत्वमुपपादयति। अर्था इति। गृह्णन्ति पुरुषमिति ग्रहा इन्द्रियाणि। तेषां ग्रहत्वं विषयाधीनं। असति विषये तेषामकिञ्चित्करत्वात्, ततो ग्रहेभ्यः श्रेष्ठा अतिग्रहा विषया इति बृहदारण्यके अवगात्। परत्वं श्रैष्ठ्याभिप्रायं, न त्वान्तरत्वेनेति भावः। सविकल्पकं ज्ञानं मनः, निर्विकल्पकं निश्चयात्मिका बुद्धिः, आत्मशब्दात् स एव बुद्धेः परः, प्रत्यभिज्ञायत इति शेषः। हिरण्यगर्भाभेदेन ब्रह्मादिपदवेद्या समष्टिबुद्धिः महानित्याह। अथवेति। मननशक्तिर्व्यापिनी भाविनिश्चयः

"यो ब्रह्माणं विदधाति पूर्वं
यो वै वेदांश्च प्रहिणोति तस्मै"। इति च श्रुतेः।

या प्रथमजस्य हिरण्यगर्भस्य बुद्धिः सा सर्वासां बुद्धीनां परमा प्रतिष्ठा सेह महानात्मेत्युच्यते। सा च पूर्वत्र बुद्धिग्रहणेनैव गृहीता सती हिरुक् दृष्टोपदिश्यते, तस्या अपि अस्मदीयाभ्यो बुद्धिभ्यः परत्वोपपत्तेः। एतस्मिंस्तु पक्षे परमात्मविषयेणैव परेण पुरुषग्रहणेन रथिन आत्मनो ग्रहणं द्रष्टव्यं, परमार्थतस्तु परमात्मविज्ञानात्मनोर्भेदाभावात्। तदेवं शरीरमेवैकं परिगृह्यते, तेषु इतराणीन्द्रियादीनि प्रकृतान्येव परमपददिदर्शयिषया समनुक्रामन् परिगृह्यमाणेनेहानेनाव्यक्तशब्देन परिगृह्यमाणं प्रकृतं शरीरं दर्शयतीति गम्यते। शरीरेन्द्रियमनोबुद्धिविषयवेदनासंयुक्तस्य ह्यविद्यावतो भोक्तुः शरीरादीनां रथादिरूपककल्पनया संसारमोक्षगतिनिरूपणेन प्रत्यगात्मब्रह्मावगतिरिह विवक्षिता। तथा च,

"एष सर्वेषु भूतेषु गूढात्मा न प्रकाशते।
दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः"॥ इति।

ब्रह्मा आत्मा भोग्यवर्गाश्रयः तात्कालिकनिश्चयः कीर्तिशक्तिः नियमनशक्तिः त्रैकालनिश्चयः, संविदभिव्यञ्जिका चिदध्यक्षातीतसर्वार्थग्राहिणी समष्टिबुद्धिरित्यर्थः। हिरण्यगर्भस्येयं बुद्धिरस्तीत्यत्र श्रुतिमाह। य इति। नन्वप्रकृता सा कथमुच्यते तदुक्तौ च प्रधानेन किमपराद्धमित्यत आह। सा चेति। हिरुक् पृथक्। पूर्वं व्यष्टिबुद्धिभेदेनोक्तात्र ततो भेदेन परत्वमुच्यत इत्यर्थः। तर्हि रथरथिनौ द्वौ

वैष्णवस्य परमपदस्य दुरवगमत्वमुक्त्वा तदवगमार्थं योगं दर्शयति।

"यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेज्ज्ञान आत्मनि।
ज्ञानमात्मनि* नियच्छेत्तद्यच्छेच्छान्त आत्मनि"॥ इति।

एतदुक्तं भवति वाचं मनसि संयच्छेत्। वागादिबाह्येन्द्रियव्यापारमुत्सृज्य मनोमात्रेणावतिष्ठेत। मनोऽपि विषयविकल्पाभिमुखं विकल्पदोषदर्शनेन ज्ञानशब्दोदितायां बुद्धावध्यवसायस्वभावायां धारयेत्। तामपि बुद्धिं महत्यात्मनि भोक्तर्यव्यायां वा बुद्धौ सूक्ष्मतापादनेन नियच्छेत् महान्तं त्वात्मानं शान्त आत्मनि प्रकरणवति परस्मिन् पुरुषे परस्यां काष्ठायां प्रतिष्ठापयेदिति। तदेवं पूर्वापरालोचनायां नास्त्यत्र परपरिकल्पितस्य प्रधानस्यावकाशः॥

सूक्ष्मन्तु तदर्हत्वात्॥ २॥

उक्तमेतत् प्रकरणपरिशेषाभ्यां शरीरमव्यक्तशब्दं न प्रधा-

परिशिष्टौ स्यातां नेत्याह। एतस्मिंस्त्विति। अतो रथ एव परिशिष्ट इत्याह। तदेवमिति। तेषु पूर्वोक्तेषु षट्पदार्थेष्वित्यर्थः। परिशेषस्य फलमाह। इतराणीति। वेदोऽयमिति शेषः। दर्शयति चेति सूत्रभागो व्याख्यातः। किञ्च ब्रह्मात्मैकत्वपरे ग्रन्थे भेदवादिनां प्रधानस्यावकाशो नास्तीत्याह। शरीरेत्यादिना। भोगो वेदना काठकग्रन्थस्यैक्यतात्पर्ये गूढत्वज्ञेयत्वज्ञानहेतुयोगविषयः। लिङ्गानि सन्तीत्याह। तथा चैष इत्यादिना। अग्र्या समाधिपरिपाकजा। वागित्यत्र द्वितीयालोपश्छान्दसः, मनसीति दैर्घ्यं च॥

ग्रन्थोत्तरत्वेन सूत्रं व्याचष्टे। उक्तमेतदित्यादिना। कार्यकारणयो-

---

* महतीत्यधिकं का० वर्ष० पु० वर्तते।

नमिति, इदमिदानीमाशङ्क्यते कथमव्यक्तशब्दार्हत्वं शरीरस्य, यावता स्थूलत्वात् स्पष्टतरमिदं शरीरं व्यक्तशब्दार्हं अस्पष्टवचनस्त्वव्यक्तशब्द इति। अत उत्तरमुच्यते। सूक्ष्मान्विह कारणात्मना शरीरं विवक्ष्यते, सूक्ष्मस्याव्यक्तशब्दार्हत्वात्। यद्यपि स्थूलमिदं शरीरं न स्वयमव्यक्तशब्दमर्हति तथापि तस्य तारम्भकं भूतसूक्ष्ममव्यक्तशब्दमर्हति, प्रकृतिशब्दश्च विकारे दृष्टः, यथा गोभिः श्रीणीत मत्सरं इति। तथा श्रुतिश्च तद्धेदं तर्ह्यव्याकृतमासीदिति। इदमेव व्याकृतं नामरूपविभिन्नं जगत् प्रागवस्थायां परित्यक्तव्याकृतनामरूपं बीजशक्त्यवस्थमव्यक्तशब्दं योग्यं दर्शयति॥

तदधीनत्वादर्थवत्॥ ३॥

अत्राह, यदि जगदिदमनभिव्यक्तनामरूपं बीजात्मकं प्रागवस्थमव्यक्तशब्दार्हमभ्युपगम्येत, तदात्मना च शरीरस्याप्यव्यक्तशब्दार्हत्वं प्रतिज्ञायेत। स एव तर्हि प्रधानकारणवाद एवं

रूपेदान्मूलप्रकृतिवाचकाव्यक्तशब्देन विकारो लक्ष्यत इत्यर्थः। गोभिर्गविकारैः पयोभिर्मत्सरं सोमं श्रीणीत मिश्रितं कुर्यादिति यावत्। शृणक इति धातोर्लोटि मध्यमपुरुषबहुवचनमेतत। अव्यक्तात्मना कार्यस्याव्यक्तशब्दयोग्यत्वे मानमाह। श्रुतिश्चेति। तर्हि प्रागवस्थायामिदं जगदव्याकृतमासीत् ह किलेत्यर्थः। बीजरूपा शक्तिः संस्कारस्तदवस्थं॥

अपसिद्धान्तशङ्कोत्तरत्वेन सूत्रं व्याचष्टे। अत्राहेत्यादिना। तर्हि तदा, एवं सति सूक्ष्मशब्दितप्रागवस्थाभ्युपगमे सति। ईश्वरे कल्पि-

सत्यापद्येत। अस्त्येव जगतः प्रागवस्थायाः प्रधानत्वेनाभ्युपगमादिति। अत्रोच्यते, यदि वयं स्वतन्त्रां कां चित् प्रागवस्थां जगतः कारणत्वेनाभ्युपगच्छेम प्रसज्ज्येम तदा प्रधानकारणवादं परमेश्वराधीना त्वियमस्माभिः प्रागवस्था जगतोऽभ्युपगम्यते न स्वतन्त्रा। सा चावश्यमभ्युपगन्तव्या अर्थवती हि सा। न हि तया विना परमेश्वरस्य स्रष्टृत्वं सिध्यति, शक्तिरहितस्य तस्य प्रवृत्त्यनुपपत्तेः। मुक्तानाञ्च पुनरनुत्पत्तिः, विद्यया तस्या बीजशक्तेर्दाहात्। अविद्यात्मिका हि सा बीजशक्तिरव्यक्तशब्दनिर्देश्या परमेश्वराश्रया मायामयी महासुषुप्तिर्यस्यां स्वरूपप्रतिबोधरहिताः शेरते संसारिणो जीवाः। तदेतदव्यक्तं क्वचिदाकाशशब्दनिर्दिष्टं, एतस्मिन्नु खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्चेति श्रुतेः। क्वचिदक्षरशब्देादितं, अक्षरात् परतः पर इति श्रुतेः। क्वचिन्मायेति सूचितं, मायां तु प्रकृतिं विद्यान्मायिनन्तु महेश्वरमिति मन्त्र-

---

ता तन्नियम्येत्यङ्गीकारान्नापसिद्धान्तमित्याह। अत्रोच्यत इत्यादिना। कूटस्थब्रह्मणः स्रष्टृत्वसिद्ध्यर्थं अविद्या स्वीकार्येत्युक्तं बन्धमुक्तिव्यवस्थार्थमपि सा स्वीकार्येत्याह। मुक्तानामिति। यन्नाशान्मुक्तिः सा स्वीकार्या तां विनैव स्रष्टा मुक्तानां पुनर्बन्धापत्तिरित्यर्थः। तस्याः परकल्पितसत्यस्वतन्त्रप्रधानाद्वैलक्षण्यमाह। अविद्यादिना। मयामयी प्रसिद्धमायोपमिता लोके मायाविनो मायावत् परतन्त्रेत्यर्थः। जीवभेदोपाधित्वेनापि सा स्वीकार्येत्याह। महासुषुप्तिरिति। बुध्याद्युपाधिभेदाज्जीवा इति बह्वुक्तिः। अविद्यायां श्रुतिमप्याह। तदेतदिति। आकाशहेतुत्वादाकाशः। ज्ञानं विना अन्ताभावादक्षरं। विचित्रकारित्वान्मायेति भेदः

वर्णात्। अव्यक्ता हि सा माया तत्त्वान्यत्वनिरूपणस्याशक्यत्वात्। तदिदं महतः परमव्यक्तमित्युक्तं अव्यक्तप्रभवत्वान्महतः, यदा हैरण्यगर्भो बुद्धिर्महान्, यदा तु जीवो महांस्तदाप्यव्यक्ताधीनत्वाज्जीवभावस्य महतः परमव्यक्तमित्युक्तं। अविद्या ह्यव्यक्तं, अविद्यावत्त्वे च जीवस्य सर्वः संव्यवहारः सन्ततो वर्तते। तच्चाव्यक्तगतं महतः परत्वमभेदोपचारात् तद्विकारे शरीरे परिकल्प्यते। सत्यपि शरीरवदिन्द्रियादीनां तद्विकारत्वाविशेषे शरीरस्यैवाभेदोपचाराद्व्यक्तशब्दत्वेन ग्रहणं इन्द्रियादीनां स्व शब्देरेव गृहीतत्वात्, परिशिष्टत्वाच्च शरीरस्य। अन्ये तु वर्णयन्ति, द्विविधं हि शरीरं स्थूलं सूक्ष्मञ्च। स्थूलं यदिदमुपलभ्यते। सूक्ष्मं यदुत्तरत्र वक्ष्यते, तदन्तरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्यामिति। तच्चोभयमपि शरीरमविशेषात्, पूर्वं रथत्वेन संकीर्तितं, इह तु सूक्ष्ममव्यक्तशब्देन परिगृह्यते

इदानीमविद्याया ब्रह्माभेदान्यत्वाभ्यामनिर्वाच्यत्वेनाव्यक्तशब्दार्हत्वमाह। अव्यक्तेति। तस्य महत्परत्वं कथमित्यत आह। तदिदमिति। यदा बुद्धिर्महांस्तदा तद्धेतुत्वात् परत्वमित्यन्वयः। प्रतिबिम्बस्योपाधिपरतन्त्रत्वादुपाधेः प्रतिबिम्बात् परत्वमाह। यदा त्विति। हेतुं स्फुटयति। अविद्येति। अव्यक्तस्य परत्वेऽपि शरीरस्य किं जातं तदाह। तच्चेति। नन्विन्द्रियादीनामप्यव्यक्ताभेदादव्यक्तत्वं परत्वञ्च किमिति नोच्यते तत्राह। सत्यपीति। सूचदयस्य वृत्तिकृद्व्याख्यानमुत्थापयति। अन्ये त्विति। पञ्चीकृतभूतानां सूक्ष्मा अवयवाः स्थूलदेहारम्भकाः। सूक्ष्मशरीरं प्रति जीवः लिङ्गस्याश्रयत्वेन नियतमस्तीति वक्ष्यते। देहान्तरप्राप्तौ तेन युक्तो गच्छति परलोकमित्यर्थः। कथं तस्य महतो जीवात् परत्वं इत्या-

सूक्ष्मस्याव्यक्तशब्दार्हत्वात् तदधीनत्वाच्च बन्धमोक्षव्यवहारस्य जीवात्तस्य परत्वं, यथा अर्थाधीनत्वादिन्द्रियव्यापारस्येन्द्रियेभ्यः परत्वमर्थानामिति। तैरेतदव्यक्तमविशेषेण शरीरद्वयस्य पूर्वत्र रथत्वेन सङ्कीर्तितत्वात्, समानयोः प्रकृतत्वपरिशिष्टत्वयोः कथं सूक्ष्ममेव शरीरमिह गृह्यते न पुनः स्थूलमपीति। आम्नातस्यार्थं प्रतिपत्तुं प्रभवामो नाम्नातं पर्यनुयोक्तुं, आम्नातञ्चाव्यक्तपदं सूक्ष्ममेव प्रतिपादयितुं शक्नोति नेतरद्व्यक्तत्वात् तस्येति चेत् न एकवाक्यताधीनत्वादर्थप्रतिपत्तेः। न हीमे पूर्वोत्तरे आम्नाते एकवाक्यतामनापद्य कञ्चिदर्थं प्रतिपादयतः, प्रकृतहानाप्रकृतप्रक्रियाप्रसङ्गात्। न चाकाङ्क्षामन्तरेणैकवाक्यताप्रतिपत्तिरस्ति, तत्राविशिष्टायां शरीरद्वयस्य ग्राह्यत्वाकाङ्क्षायां यथाकाङ्क्षं सम्बन्धेऽभ्युपगम्यमाने एकवाक्यतैव बाधिता

शङ्क्य द्वितीयसूत्रं व्याचष्टे। तदधीनत्वाच्चेति। अर्थवदिति सूत्रस्थदृष्टान्तमाह। यथेति। तद्व्याख्यानं दूषयति। तैरिति। अव्यक्तपदबलात् प्रकृतमपि स्थूलं त्यज्यत इति शङ्कते। आम्नातस्येति। एकार्थबोधकानां शब्दानां मिथ आकाङ्क्षाया एकस्यां बुद्धावारूढत्वमेकवाक्यता, तव मते तस्या अभावात् कुतोऽर्थबोध इति समाधत्ते। नेति। तां विनापि अर्थधीः किं न स्यादित्यत आह। न हीति। शरीरशब्देन रूढ्या स्थूलं प्रकृतं तस्य हानिरप्रकृतस्य भूतसूक्ष्मस्याव्यक्तपदेन ग्रहणमन्याय्यं स्यादित्यर्थः। अस्त्येकवाक्यतेत्यत आह। न चेति। ततः किं तत्राह। तत्रेति। आकाङ्क्षया वाक्यैकवाक्यत्वे सति प्रकृतं शरीरद्वयमव्यक्तपदेन ग्राह्यं आकाङ्क्षायास्तुल्यत्वादितिभावः। अनात्मनः

भवति कुत आत्मातत्त्वार्थस्य प्रतिपत्तिः। न चैवं मन्तव्यं दुःशोधत्वात् सूक्ष्मस्यैव शरीरस्येह ग्रहणं, स्थूलस्य तु दृष्टबीभत्सतया सुशोधत्वाद्ग्रहणमिति। यतो नैवेह शोधनं कस्यचिद्विवक्ष्यते, न ह्यत्र शोधनविधायि किञ्चिदाख्यातमस्ति अनन्तरनिर्दिष्टत्वात्तु किं तद्विष्णोः परमं पदमिति इदमिह विवक्ष्यते। तथा हि इदमस्मात् परमिदमस्मात् परमित्युक्ता पुरुषान्न परं किञ्चिदित्याह। सर्वथापि त्वानुमानिकनिराकरणोपपत्तेस्तथानामास्तु न नः किञ्चिच्छिद्यते॥

ज्ञेयत्वावचनाच्च॥ ४॥

ज्ञेयत्वेन च साङ्ख्यैः प्रधानं स्मर्यते गुणपुरुषान्तरज्ञानात् कैवल्यमिति वदद्भिः, न हि गुणस्वरूपमज्ञात्वा गुणेभ्यः पुरुष-

---

स्वयः शुद्धिः तदर्थं सूक्ष्ममेवाकाङ्क्षितं ग्राह्यं। तस्य सूक्ष्मत्वेनात्माभेदेन गृहीतस्य दुःशोधत्वात्। स्थूलस्य दृष्टदौर्गन्ध्यादिना लशुनादिवत् *अनात्मत्वधीवैराग्ययोः सुलभत्वादिति शङ्कते। न चेति। दृष्टा बीभत्सा घृणा यस्मिन् तस्य भावस्तत्तयेत्यर्थः। दूषयति। यत इति। वैराग्याय शुद्धिरत्र न विवक्षिता विध्यभावात् किन्तु वैष्णवं परमं पदं विवक्षितमिति तद्दर्शनार्थं प्रकृतं स्थूलमेवाव्यक्तपदेन ग्राह्यमिति भावः। किञ्च सूक्ष्मस्य लिङ्गान्तःपातिन इन्द्रियादिग्रहणेनैव ग्रहणान्न पृथक् अव्यक्तशरीरपदाभ्यां ग्रहः। अभ्युपेत्याह। सर्वथेति। स्थूलस्य सूक्ष्मस्य वा ग्रहेऽपीत्यर्थः। तथा नामेति। सूक्ष्ममेवाव्यक्तमस्त्वित्यर्थः॥

अत्राव्यक्तं प्रधानं नेत्यत्र हेत्वन्तरार्थं सूत्रं। ज्ञेयत्वेति। सत्त्वादिगुणरूपात् प्रधानात् पुरुषस्यान्तरं †भेदस्तज्ज्ञानादित्यर्थः। न हि गुण्यमिति च वदद्भिः प्रधानं ज्ञेयत्वेन स्मर्यते इति सम्बन्धः। न केवलं

---

* अनात्मधीति सो० २ टी०। † भेदस्तज्ज्ञानादिति सो० २ टी०।

स्यान्तरं ग्रक्यं ज्ञातुमिति। क्वचिच्च विभक्तिविशेषप्राप्तये प्रधानं ज्ञेयमिति स्मरन्ति। न चेदमिहाव्यक्तं ज्ञेयत्वेनोच्यते, पदमात्रं ह्यव्यक्तशब्दो नेहाव्यक्तं ज्ञातव्यमुपासितव्यं चेति वाक्यमस्ति। न चानुपदिष्टं पदार्थज्ञानं पुरुषार्थमिति ग्रक्यं प्रतिपत्तुं, तस्मादपि नाव्यक्तशब्देन प्रधानमभिधीयते। अस्माकन्तु रथरूपकल्पनशरीराद्यनुसरणेन विष्णोरेव परमं पदं दर्शयितुमयमुपन्यास इत्यनवद्यं॥

वदतीति चेन्न प्राज्ञो हि प्रकरणात्॥ ५॥

अत्राह साङ्ख्यो ज्ञेयत्ववचनादित्यसिद्धं कथं श्रूयते ह्युत्तरत्राव्यक्तशब्देोदितस्य प्रधानस्य ज्ञेयत्ववचनं।

"अशब्दमस्पर्शमरूपमव्ययं
तथारसं नित्यमगन्धवच्च यत्।
अनाद्यनन्तं महतः परं ध्रुवं
निचाय्य तं मृत्युमुखात् प्रमुच्यते"॥ इति

भेदप्रतियोगित्वेन प्रधानस्य ज्ञेयत्वं तैरिष्टं किन्तु तस्योपासनयाऽपि-मादिप्राप्तयेऽपीत्याह। क्वचिच्चेति। ज्ञानविधभावेऽप्यव्यक्तपदजन्यज्ञान-गम्यत्वमार्थिकं ज्ञेयत्वमस्तीत्यत आह। न चानुपदिष्टमिति। उप-दिष्टं हि ज्ञानं फलवदिति ज्ञातुं शक्यं निष्फलस्योपदेशायोगादव्य-क्तस्य च ज्ञानानुपदेशात् सफलज्ञानगम्यत्वासिद्धिरित्यर्थः। फलित-माह। तस्मादिति। साङ्ख्योक्तसफलज्ञानगम्यत्ववचनाच्चेत्यर्थः। ननु शरीरस्यापि ज्ञेयत्वानुक्तेः कथमिह ग्रहणं तत्राह। अस्माकन्त्विति। अस्मन्मते विष्ण्वाख्यपदस्यैकस्यैव ज्ञेयत्वात् तद्दर्शनार्थमव्यक्तपदेन शरीरोपन्यासो युक्त इत्यर्थः॥

साधारणशब्दमाचान्न प्रधानस्य प्रत्यभिज्ञा स्मार्त्तलिङ्गस्यानुत्या नि-

अत्र हि यादृशं शब्दादिहीनं प्रधानं महतः परं स्मृतौ निरूपितं तादृशमेव निचाय्यत्वेन निर्दिष्टं, तस्मात् प्रधानमेवेदं तदेवाव्यक्तशब्दनिर्दिष्टमिति, अत्र ब्रूमः। नेह प्रधानं निचाय्यत्वेन निर्दिष्टं, प्राज्ञो हीह परमात्मा निचाय्यत्वेन निर्दिष्ट इति गम्यते। कुतः प्रकरणात्। प्राज्ञस्य हि प्रकरणं विततं वर्तते,

"पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः"।

इत्यादि निर्देशात्।

"एष सर्वेषु भूतेषु गूढात्मा न प्रकाशते"।

इति च दुर्ज्ञानत्ववचनेन तस्यैव ज्ञेयत्वाकाङ्क्षणात्। "यच्छेद्वाङ्मनसी प्राज्ञः" इति च तज्ज्ञानायैव रागादिसंयमस्य विहितत्वात् मृत्युमुखप्रमोक्षणफलत्वाच्च। न हि प्रधानमात्रं निचाय्य मृत्युमुखात् प्रमुच्यत इति साङ्ख्यैरिष्यते। चेतनात्मविज्ञानाद्धि मृत्युमुखात् प्रमुच्यत इति तेषामभ्युपगमः। सर्वेषु च वेदान्तेषु प्राज्ञस्यैवात्मनोऽशब्दादिधर्मत्वमभिलप्यते, तस्मान्न प्रधानस्याच्च ज्ञेयत्वमव्यक्तशब्दनिर्दिष्टत्वं वा॥

त्रयाणामेव चैवमुपन्यासः प्रश्नश्च॥ ६॥

इतश्च न प्रधानस्याव्यक्तशब्दवाच्यत्वं ज्ञेयत्वं वा यस्मात् त्रयाणामेव पदार्थानामग्निजीवपरमात्मनामस्मिन् ग्रन्थे कठव-

---

यामकामाभावादिति तात्पर्यलिङ्गोक्तिमाशङ्क्य निषेधति। वदतीति। अत्र हि तादृशमेव निर्दिष्टमित्यन्वयः, स्पष्टमन्यत्॥

किञ्चात्र कठवल्ल्यां प्रधानस्य प्रश्नोत्तरयोरसत्त्वान्न ग्रहणमित्याह। त्रयाणामिति। मृत्युना नचिकेतसमति त्रीन् वरान् वृणीष्वेत्युक्तेः

स्त्रीषु वरप्रदानसामर्थ्यादक्रव्यतयोपन्यासो दृश्यते, तद्विषय एव च प्रश्नः, नातोऽन्यस्य प्रश्नः उपन्यासो वास्ति। तत्र तावत्

"स त्वमग्निं स्वर्ग्यमध्येषि मृत्यो प्रब्रूहि तं श्रद्दधानाय मह्यं"

इत्यग्निविषयः प्रश्नः।

"येयं प्रेते विचिकित्सा मनुष्येऽस्तीत्येके नायमस्तीति चैके।
एतद्विद्यामनुशिष्टस्त्वयाहं वराणामेष वरस्तृतीयः" ॥

इति जीवविषयः।

"अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात् कृताकृतात्।
अन्यत्र भूताच्च भव्याच्च यत् तत्पश्यसि तद्वद" ॥

इति परमात्मविषयः। प्रतिवचनमपि

"लोकादिमग्निं तमुवाच तस्मै या इष्टका यावतीर्वा यथा वा"

इत्यग्निविषयं।

"हन्त त इदं प्रवक्ष्यामि गुह्यं ब्रह्म सनातनं।
यथा च मरणं प्राप्यात्मा भवति गौतम" ॥

त्रयाणामेव प्रश्नो नचिकेतसा कृतः उपन्यासश्च मृत्युना कृतो नान्यस्येत्यर्थः। प्रश्नत्रयं क्रमेण पठति। तत्र तावदिति। हे मृत्यो स मह्यं दत्तवरत्वं स्वर्गहेतुमग्निं स्मरसि प्रेते मृते देहादन्योऽस्ति न वेति संशयोऽस्ति अत एतदात्मतत्त्वं सन्दिग्धं जानीयामित्यर्थः। क्रमेणोत्तरत्रयमाह। प्रतिवचनमपीति। लोकहेतुविराडात्मनोपास्यत्वाल्लोकादिसिद्धोऽग्निस्तं मृत्युरुवाच। नचिकेतसे याः स्वरूपतो यावतीः संख्यातो यथावा क्रमेणाग्निश्चीयते तत्सर्वमुवाचेत्यर्थः। हन्तेदानीं ब्रह्म वक्ष्यामीति ब्रह्मवाक्येन जीवप्रश्नाद्यवहितमपि यथा च मरणं प्राप्येत्यादि वाक्यं जीवविषयमुत्तरयोग्यत्वादित्यर्थः। वाक्यार्थस्तु आत्ममरणं प्राप्य यथा भवति तथा वक्ष्यामीति प्रतिज्ञातमाह। योनिमिति। चराचरदेहप्राप्तौ निमित्तमाह। यथेति। श्रुतमुपासनं। सूत्रे

"योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः।
स्थाणुमन्येऽनुसंयन्ति यथा कर्म यथा श्रुतं" ॥ इति

व्यवहितं जीवविषयं। "न जायते म्रियते वा विपश्चिदित्यादि बहुप्रपञ्चं परमात्मविषयं। नैवं प्रधानविषयः प्रश्नोऽस्ति अपृष्टत्वादनुपन्यसनीयत्वं तस्येति। अत्राह, योऽयमात्मविषयः प्रश्नो येयं प्रेते विचिकित्सा मनुष्य इति किं स एवायमन्यत्र धर्मादन्यत्राधर्मादिति पुनरनुक्ष्यते, किं वा ततोऽन्योऽयमपूर्वः प्रश्नः उत्थाप्यते इति। किञ्चातः स एवायं प्रश्नः पुनरनुक्ष्यते इति यद्युच्येत तदा द्वयोरात्मविषययोः प्रश्नयोरेकतापत्तेरग्निविषय आत्मविषयश्च द्वावेव प्रश्नावित्यतो न वक्तव्यं त्रयाणां प्रश्नोपन्यासाविति। अथान्योऽयमपूर्वः प्रश्नः उत्थाप्यत इति यद्युच्येत ततो यथैव वरप्रदानव्यतिरेकेण प्रश्नकल्पनायामदोषः, एवं प्रश्नव्यतिरेकेणापि प्रधानोपन्यासकल्पनायामदोषः स्यादिति, अत्रोच्यते। नैवं वयमिह वरप्रदानव्यतिरेकेण प्रश्नं कञ्चित् कल्पयामः, वाक्योपक्रमसामर्थ्यात्। वरप्रदा-

---

आद्यशब्दकारो यत इत्यर्थे। एवञ्च त्रयाणामेवोपन्यासः प्रश्नश्च यतः अतो न प्रधानं अव्यक्तमिति योजना। उक्तार्थे सूत्रमाक्षिपति। अत्राहेति। एकः प्रश्नः द्वौ प्रश्नौ वेति पक्षद्वये फलितं पृच्छति। किञ्चात इति। सप्तम्यर्थे तसिः। अत्र च पक्षद्वयेऽपि किमित्यर्थः। प्रश्नैक्ये सूत्रासङ्गतिः, भेदे प्रधानस्य श्रौतत्वसिद्धिरिति पूर्ववाद्याह। स एवेत्यादिना। प्रश्नैक्यपक्षमादाय सिद्धान्त्याह। अत्रोच्यत इति। येन प्रधानसिद्धिः स्यादिति शेषः। चतुर्थप्रश्नकल्पने वरचित्तोपक्रमविरोधः स्यादिति विवृणोति। वरेत्यादिना। वरप्रदानमुपक्रमो यस्याः सा प्रहि-

नोपक्रमा हि मृत्युनचिकेतःसंवादरूपा वाक्यप्रवृत्तिराम्नायेः कठवल्लीनां लक्ष्यते। मृत्युः किल नचिकेतसे पित्रा प्रहिताय त्रीन् वरान् प्रददौ, नचिकेताः किल तेषां प्रथमेन वरेण पितुः सौमनस्यं वव्रे, द्वितीयेनाग्निविद्यां, तृतीयेनात्मविद्यां, येयं प्रेत इति वराणामेष वरस्तृतीय इति लिङ्गात्। तत्र यद्यन्यच्च धर्मादित्यन्योऽयमपूर्वः प्रश्न उत्थाप्येत ततो वरप्रदानव्यतिरेकेणापि प्रश्नकल्पनाद्वाक्यं बाध्येत। ननु प्रष्टव्यभेदादपूर्वोऽयं प्रश्नो भवितुमर्हति, पूर्वो हि प्रश्नो जीवविषयः, येयं प्रेते विचिकित्सा मनुष्येऽस्ति नास्तीति विचिकित्साभिधानात्, जीवश्च धर्मादिगोचरत्वान्नान्यच्च धर्मादिति प्रश्नमर्हति, प्राज्ञस्तु धर्माद्यतीतत्वादन्यच्च धर्मादिति प्रश्नमर्हतीति, प्रश्नच्छाया च न समाना लक्ष्यते पूर्वस्यास्तित्वनास्तित्वविषयत्वादुत्तरस्य धर्माद्यतीतवस्तुविषयत्वाच्च, तस्मात् प्रत्यभिज्ञानाभावात् प्रश्नभेदः, न पूर्वस्यैवोत्तरत्वानुकर्षणमिति चेत् न, जीवप्राज्ञयोरेकत्वाभ्यु-

---

ताय यमलोकं प्रति प्रेषिताय इतः पुनः मर्त्यलोकं प्राप्तस्य स मे पिता यथा पूर्वं सुमनाः स्यादिति प्रथमं वव्रे। ननु द्वितीयवरो जीवविद्या तृतीयो ब्रह्मविद्येति प्रश्नभेदः किं न स्यादित्यत आह। येयमिति। प्रेते इत्युपक्रम्य तृतीयत्वोक्तिलिङ्गाज्जीवात्मविद्यैव तृतीयो वर इत्यर्थः। एवं वाक्योपक्रमे सति प्रश्नान्तरं न युक्तमित्याह। तत्रेति। मरणधर्माद्यस्पर्शलिङ्गाभ्यां प्रष्टव्ययोर्जीवेश्वरयोर्भेदात् प्रश्नभेदसिद्धेर्वाक्यबाधो युक्त इति प्रसङ्गते। नन्वित्यादिना। गोचरत्वादाश्रयत्वात्। न केवलं प्रष्टव्यभेदात् प्रश्नभेदः किन्तु प्रश्नवाक्ययोः सादृश्याभावादपीत्याह। प्रश्नच्छायेति। प्रष्टव्यभेदोऽसिद्ध इति परिहरति। नेत्यादिना। किञ्च ब्रह्मप्रश्ने जन्मादिनिषेधेन जीवस्वरूपं वदन् यमस्तयोरैक्यं सूच-

पगमात्। भवेत् प्रष्टव्यभेदात् प्रश्नभेदो यद्यन्यो जीवः प्राज्ञात् स्यात्, न त्वन्यत्वमस्ति तत्त्वमसीत्यादिश्रुत्यन्तरेभ्यः। इह चान्यत्र धर्मादित्यस्य प्रश्नस्य प्रतिवचनं न जायते म्रियते वा विपश्चिदिति जन्ममरणप्रतिषेधेन प्रतिपाद्यमानं शारीरपरमेश्वरयोरभेदं दर्शयति। सति हि प्रसङ्गे प्रतिषेधो भागी भवति। प्रसङ्गश्च जन्ममरणयोः शरीरसंस्पर्शाच्छारीरस्य भवति न परमेश्वरस्य। तथा

"स्वप्नान्तं जागरितान्तञ्च उभौ येनानुपश्यति।
महान्तं विभुमात्मानं मत्वा धीरो न शोचति"॥

इति स्वप्नजागरितदृशो जीवस्यैव महत्त्वविभुत्वविशेषणस्य मननेन शोकविच्छेदं दर्शयन् न प्राज्ञादन्यो जीव इति दर्शयति। प्राज्ञविज्ञानाद्धि शोकविच्छेद इति वेदान्तसिद्धान्तः। तथा,

"यदेवेह तदमुत्र यदमुत्र तदन्विह।
मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति"॥ इति

यतीत्याह। इह चान्यत्रेति। तन्निषेधवाक्ये जीवोक्तिरसिद्धेत्यत आह। सतीति। भागी युक्तः, तस्मादविद्यया जीवस्य प्राप्तजन्मादिनिषेधेन स्वरूपमुक्तमित्यर्थः। किञ्च जीवो ब्रह्माभिन्नः मोक्षहेतुज्ञानविषयत्वात् ब्रह्मवादित्याह। तथा स्वप्नेति। अन्तोऽवस्था येन साक्षिणा प्रमाता पश्यति तमात्मानमिति सम्बन्धः। द्रष्टारप्रयोजकत्वमाशङ्क्य तमेव विदित्वत्यादि श्रुतिविरोधमाह। प्राज्ञेति। किञ्चाभेदमुक्त्वा भेदस्य निन्दितत्वादभेद एव सत्य इत्याह। तथेति। इह देहे यच्चैतन्यं तदेवामुत्र सूर्यादौ, एवमिहाखण्डैकरसे ब्रह्मणि यो नानेव मिथ्या भेदं पश्यति स भेददर्शी मरणान्मरणं प्राप्नोति भयान्न मुच्यत इत्यर्थः। किञ्च जीवप्रश्नानन्तरं तं दुर्दर्शमिति यदुत्तरमुवाच तेनाप्युत्तरेणाभेदो गम्यत इति सम्बन्धः।

जीवप्राज्ञभेददृष्टिमपवदति। तथा जीवविषयस्यास्तित्वनास्तित्वप्रश्नस्यानन्तरं अन्यं वरं नचिकेतो वृणीष्वेत्यारभ्य मृत्युना तैस्तैः कामैः प्रलोभ्यमानोऽपि नचिकेता यदा न चचाल तदैनं मृत्युरभ्युदयनिःश्रेयसविभागप्रदर्शनेन विद्याविद्याविभागप्रदर्शनेन च विद्याभीप्सिनं नचिकेतसं मन्ये न त्वा कामा बहवोऽलोलुपन्तेति *प्रश्नस्य प्रश्नमपि तदीयं प्रशंसन् यदुवाच

"तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणं।
अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति"॥

इति। तेनापि जीवप्राज्ञयोरभेद एवेह विवक्षित इति गम्यते। यत्प्रश्ननिमित्ताच्च प्रशंसां महतीं मृत्योः प्रत्यपद्यत नचिकेता यदि तं विहाय प्रशंसानन्तरमन्यमेव प्रश्नमुपक्षिपेत् अस्थान एव सा सर्वा प्रशंसा प्रसारिता स्यात्, तस्माद्येयं प्रेते इत्यस्यैव प्रश्नस्यैतद-

---

प्रश्नप्रश्नयोः प्रशंसयापि लिङ्गेन एतस्य दौर्लभ्यत्वद्योतनात् ब्रह्मत्वसिद्धिरित्याह। अन्यं वरमित्यादिना। पुत्रादिकं वृणीष्वेत्युक्तोऽपि विषयांस्तुच्छीकृत्यात्मज्ञानात् न चचाल नान्यत्तस्मान्नचिकेता वृणीत इति श्रवणात्। तदा सन्तुष्टो यमोऽन्यच्छ्रेयोऽन्यदुतैव प्रेय इति भोगापवर्गमार्गयोर्वैलक्षण्यप्रतिपत्तेरयमे ते विपरीते विषूची अविद्या या च विद्येति दर्शितवानित्यर्थः। प्रेयः प्रियतमं स्वर्गादिकं विषूची विरुद्धफले, अविद्या कर्म्म, विद्या तत्त्वधीः, विद्याभीप्सिनं विद्यार्थिनं त्वामहं मन्ये यतः त्वा त्वां बहवोऽपि कामाः पुत्रादयो मया दीयमाना दुर्लभा अपि नालोलुपन्त लोभवन्तं न कृतवन्त इति प्रष्टारं स्तुत्वा प्रश्नमपि त्वादृङ्नो भूयान्नचिकेतः प्रष्टेति स्तुवन्नित्यत्तरार्थः। इयं प्रशंसा प्रश्नभेदपक्षे न घटत इत्याह। यत्प्रश्नेति। यत्प्रश्नेन स्तुतिं लब्धवान् तं प्रश्नं वि-

---

* प्रश्नस्य प्रश्नमपि प्रशंसन्नुवाचेति वर्धः का० पु० पाठः।

नुकर्षणमन्यच्च धर्मादिति। यत्तु प्रश्नच्छायावैलक्षण्यमुक्तं तद्दूषणं, तदीयस्यैव विशेषस्य पुनः पृच्छ्यमानत्वात्। पूर्वत्र हि देहादिव्यतिरिक्तस्यात्मनोऽस्तित्वं पृष्टं उत्तरत्र तु तस्यैवासंसारित्वं पृच्छ्यत इति। यावद्धविद्या न निवर्तते तावद्धर्मादिगोचरत्वं जीवस्य जीवत्वं च न निवर्तते। तन्निवर्त्तनेन तु प्राज्ञ एव तत्त्वमसीति श्रुत्या प्रत्याय्यते। न चाविद्यावत्त्वे तदपगमे च वस्तुनः कश्चिद्विशेषोऽस्ति। यथा कश्चित् सन्तमसे पतितां काञ्चिद्रज्जुमहिं मन्यमानो भीतो वेपमानः पलायते, तञ्चापरो ब्रूयात् माभैषीः नायमहीरज्जुरेवेति, स च तदुपश्रुत्याहिकृतं भयमुत्सृजेद्वेपथुं पलायनञ्च, न चाहिबुद्धिकाले तदपगमकाले च वस्तुनः कश्चिद्विशेषः स्यात्, तथैवैतदपि द्रष्टव्यं। ततश्च न जायते म्रियते वेत्येवमाद्यपि भवति *अस्तित्वनास्तित्वप्रश्नस्य प्रतिवचनं। सूत्रन्त्वविद्याकल्पितजीवप्राज्ञभेदापेक्षया योजयितव्यं। एकत्वेऽपि ह्यात्मविषयस्य प्रश्नस्य प्रायणावस्थायां व्यतिरिक्तास्तित्वमात्रविचिकित्सनात् कर्त्तृत्वादिसंसारस्वभावा-

---

हाय यद्यन्यमेवोत्थापयेत् तर्ह्यनवसरे स्तुतिः कृता स्यादित्यर्थः। तस्मादिति प्रश्नभेदाभावादित्यर्थः। प्रश्नवाक्यक्यक्ष्योः सादृश्याभावात् प्रश्नभेद इत्युक्तं निरस्यति। यत्त्वित्यादिना। धर्म्माद्याश्रयस्य जीवस्य ब्रह्मत्वं कथमित्यत आह। यावदिति। अविद्यानाशानन्तरं ब्रह्मत्वं चेदागन्तुकमनित्यञ्च स्यादित्यत आह। न चाविद्यावत्त्व इति। जीवस्य ब्रह्मत्वे स्वाभाविके सति ब्रह्मप्रश्नस्य यदुत्तरं तज्जीवप्रश्नस्यापि भवतीति लाभं दर्शयति, ततश्च न जायत इति जीवब्रह्मैक्ये चयाया-

---

* अस्तित्वप्रश्नस्येति वर्ध० का० पु० पाठः।

नपोहनाच्च पूर्वस्य पर्यायस्य जीवविषयत्वमुत्प्रेक्ष्यते, उत्तरस्य तु धर्माद्यत्ययसङ्कीर्तनात् प्राज्ञविषयत्वमिति, ततश्च युक्ताग्निजीवपरमात्मकल्पना। प्रधानकल्पनायां तु न वरप्रदानं न प्रश्नो न प्रतिवचनमिति वैषम्यं स्यात्॥

महद्वच्च॥ ७॥

यथा महच्छब्दः साङ्ख्यैः सत्तामात्रेऽपि प्रथमजे प्रयुक्तो न तमेव वैदिकेऽपि प्रयोगेऽभिधत्ते, "बुद्धेरात्मा महान् परः" "महान्तं विभुमात्मानं" "वेदाहमेतं पुरुषं महान्तं" इत्येवमादौ आत्मशब्दप्रयोगादिभ्यो हेतुभ्यः, तथाव्यक्तशब्दोऽपि न वैदिके प्रयोगे प्रधानमभिधातुमर्हति। अतश्च नास्यानुमानिकस्य *स्मार्त्तस्य शब्दवत्त्वं॥

मिति सूत्रं कथमित्यत आह। सूत्रयन्निति। कल्पितभेदात् प्रश्नभेदकल्पनेत्याह। ततश्चेति। परमात्मनः सकाशात् प्रधानस्य वैषम्यमनात्मत्वेन तृतीयवरान्तर्भावायोगादिति भावः॥

औतोऽव्यक्तशब्दो न साङ्ख्यासाधारणतत्त्वगोचरः वैदिकशब्दत्वान्महच्छब्दवदित्याह। महद्वच्चेति। सूत्रं व्याचष्टे। यथेत्यादिना। न चाकाशादिशब्दे व्यभिचारः। आकाशादेर्मतान्तरसाधारणत्वेन साङ्ख्यासाधारणतत्त्वासिद्धेः साध्यस्यापि सत्त्वादिति मन्तव्यं। सत्त्वामात्रेण सत्त्वप्रधानप्रकृतेराद्यपरिणामे निर्विकल्पकबुद्धाविति यावत्। आत्मा महानित्यात्मशब्दप्रयोगात्, तं मत्वा न शोचति तमसः परस्तादित्यादिना शोकात्ययतमःपरत्वादिभ्यश्च महच्छब्दः साङ्ख्यतत्त्वं नाभिधत्ते इति सम्बन्धः। अधिकरणार्थमुपसंहरति। अतश्चेति॥

---

* स्मार्त्तस्येति वर्ध० का० पु० नास्ति।

चमसवदविशेषात्॥ ८॥

पुनरपि प्रधानवादी अजशब्दत्वं प्रधानस्यासिद्धमित्याह, कस्मात् मन्त्रवर्णात्,

"अजामेकां *रोहितशुक्लकृष्णां
बह्वीः प्रजाः सृजमानां सरूपाः।
अजो ह्येको जुषमाणोऽनुशेते
जहात्येनां भुक्तभोगामजोऽन्यः"॥ इति।

अत्र हि मन्त्रे रोहितशुक्लकृष्णशब्दैरजःसत्त्वतमांस्यभिधीयन्ते। रोहितं रजः रञ्जनात्मकत्वात्, शुक्लं सत्त्वं प्रकाशात्मकत्वात्, कृष्णं तमः आवरणात्मकत्वात्। तेषां साम्यावस्थावयवधर्मैर्व्यपदिश्यते रोहितशुक्लकृष्णेति। न जायत इति चाजा स्यात्, मूलप्रकृतिरविकृतिरित्यभ्युपगमात्। नन्वजाशब्दः छागायां रूढः। बाढं, सा तु रूढिरिह नाश्रयितुं शक्या विद्याप्रकरणात्, सा च बह्वीः †प्रजास्त्रैगुण्यान्विता जनयति, तां प्रकृतिं अजो ह्येकः पुरुषः जुषमाणः प्रीयमाणः सेवमानो

चमसवदविशेषात। अत्राजापदं विषयः, तत् किं प्रधानपरं मायापरं वेति रूढार्थासम्भवात् संशये पूर्ववत्राद्यशब्दमात्रेण प्रधानस्याप्रत्यभिज्ञायामप्यत्र त्रिगुणत्वादिलिङ्गोपेतादजापदात् प्रत्यभिज्ञास्तीति प्रत्युदाहरणेन पूर्वपक्षयति। पुनरपीति। फलं पूर्वपक्षे ब्रह्मणि समन्वयासिद्धिः, सिद्धान्ते तत्सिद्धिरिति पूर्ववद्दृश्यं। रागहेतुत्वादिगुणयोगात् लोहितादिशब्दैरजत्वादिगुणलाभेऽपि कथं प्रधानलाभस्तत्राह। तेषां साम्येति। अवयवाः प्रधानस्य रजआ-

---

* लोहितेति वर्ध० का० सो० पु० पाठः।

† प्रजास्त्रैगुण्यात्मिका इति उक्त पु० पाठः।

वाऽनुशेते, तामेवाविद्ययात्मत्वेनोपगम्य सुखी दुःखी मूढोऽहमित्यविवेकितया संसरति, अन्यः पुनः अजः पुरुषः उत्पन्नविवेकज्ञानो विरक्तो जहाति एनां प्रकृतिं भुक्तभोगां कृतभोगापवर्गां परित्यजति मुच्यत इत्यर्थः, तस्मात् श्रुतिमूलैव प्रधानादिकल्पना कापिलानामित्येवं प्राप्ते ब्रूमः। नानेन मन्त्रेण श्रुतिमूलत्वं साङ्ख्यवादस्य शक्यमाश्रयितुं। न ह्ययं मन्त्रः स्वातन्त्र्येण कञ्चिदपि वादं समर्थयितुमुत्सहते। सर्वत्रापि यया कयाचित् कल्पनयाऽजात्वादिसम्भवादनोपपत्तेः साङ्ख्यवाद एवेहाभिप्रेत इति विशेषावधारणकारणाभावात् चमसवत्। यथा हि, अर्वाग्बिलश्चमस ऊर्ध्वबुध्न इत्यस्मिन्मन्त्रे स्वातन्त्र्येणायंनामायौ चमसोऽभिप्रेत इति न शक्यते *नियन्तुं, सर्वत्रापि यथाकथञ्चिदर्वाग्बिलत्वादिकल्पनोपपत्तेः। एवमिहापि विशेषोऽजामेकामित्यस्य मन्त्रस्य नास्मिन्मन्त्रे प्रधानमे-

---

दयस्तेषां धर्मा रञ्जकत्वादयः तैर्निमित्तैर्लोहितादिशब्दैः प्रधानमुच्यत इत्यर्थः। गुणाभेदात् प्रधानलाभ इति भावः। तत्राजाशब्दं योजयति। नेति। रूढ्यैवागमपहरतीति न्यायेन शङ्कते। नन्विति। रूढ्यसम्भवाद्योग आश्रयणीय इत्याह। बाढमिति। अजाशब्दितप्रकृतित्वपुरुषभेदलिङ्गाभ्यामपि प्रधानप्रत्यभिज्ञेत्याह। सा चेत्यादिना। प्रजायन्त इति प्रजाः महदादयः। त्रैगुण्यं सुखदुःखमोहाः। अनुशयनं विहरणमिति। तामेवाविद्ययेति। अविवेकेनेत्यर्थः। विषयधर्मोभोगः गुणाभिन्नात्मख्यातिरपवर्गः। सिद्धान्तयति। एवं प्राप्त इति। मायादावपि साधारण्यान्मन्त्रादिशेषार्थग्रहो न युक्तः विशेषग्रहहेतोः प्रकरणादेरभावादिति हेतुं व्याख्याय दृष्टान्तं व्याचष्टे। चमसवदिति।

---

* निरूपयितुमिति वर्ध० का० पु० पाठः।

वाजाभिप्रेतेति शक्यते नियन्तुं। तत्र त्विदं तच्छिर एष ह्यर्वाङ्विलश्चमस ऊर्ध्वबुध्न इति वाक्यशेषाच्चमसविशेषप्रतिपत्तिर्भवति, इह पुनः केयमजा प्रतिपत्तव्येति अत्र ब्रूमः॥

*ज्योतिरुपक्रमा तु तथा ह्यधीयत एके॥ ९॥

परमेश्वरादुत्पन्ना ज्योतिःप्रमुखा तेजोऽबन्नलक्षणा चतुर्विधभूतग्रामस्य प्रकृतिभूतेयमजा प्रतिपत्तव्या। तुशब्दोऽवधारणार्थः। भूतत्रयलक्षणैवेयमजा विज्ञेया न गुणत्रयलक्षणा। कस्मात्। तथा ह्येके शाखिनस्तेजोऽबन्नानां परमेश्वरादुत्पत्तिमाम्नाय तेषामेव रोहितादिरूपतामामनन्ति 'यदग्नेरोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्य' इति। तान्येवेह तेजोऽबन्नानि प्रत्यभिज्ञायन्ते, रोहितादिशब्दसामान्यात्,

---

सर्वत्रगिरिगुहादावपि। उत्तरसूत्रं व्यावर्त्याशङ्कामाह। तत्र त्विदमिति॥

चतुर्विधस्य जरायुजाण्डजस्वेदजोद्भिज्जरूपस्येत्यर्थः। स्मृत्युक्ता कुतो न याह्येति शङ्क्यते। कस्मादिति। श्रुतेः श्रुत्यन्तरादर्थग्रहो युक्तः। साजात्यान्मूलानपेक्षत्वाच्चेत्याह। तथा ह्येति। शाखिनश्छान्दोगाः। किञ्च रोहितादिशब्दैरपि द्रव्यलक्षणा न्याय्या अव्यवधानात् न तु रञ्जनीयत्वादिगुणव्यवहिता सत्त्वादिगुणलक्षणेत्याह। रोहितादीनाहेति। ननु शाखान्तरेण शाखान्तरस्यमन्त्रस्य निर्णयः कथमित्यत आह। असन्दिग्धेनेति। सर्वशाखाप्रत्ययन्यायादिति भावः। यथा शाखान्तरवाक्यान्न प्रधानग्रहस्तथेहापि श्वेताश्वतरोपनिषदि मायाप्रकरणान्न तद्ग्रह इत्याह। तथेति। कठ्यादौ किं सहायं ब्रह्मेति विमृश्यते, ब्रह्मवादिनो ध्यानाख्ययोगेन परमात्मानमनुप्रविष्टाः सन्तः तत्रैव देवस्यात्मभूतामैक्येनाध्यस्तां परतन्त्रां मायां

---

* ज्योतिरुपक्रमात्विति वर्ध० का० सो० पु० अशुद्धं।

रोहितादीनाञ्च शब्दानां रूपविशेषेषु मुख्यत्वात्, भाक्तत्वाच्च गुणविषयत्वस्य, असन्निधेन च सन्निधस्य निगमनं न्याय्यं मन्यन्ते, तथेहापि ब्रह्मवादिनो वदन्ति किं कारणं ब्रह्मेत्युपक्रम्य ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढामिति, पारमेश्वर्याश्च शक्तेः समस्तजगद्विधायिन्या वाक्योपक्रमेऽवगमात्, वाक्यशेषेऽपि

'मायान्तु प्रकृतिं विद्यान्मायिनन्तु महेश्वरं'। इति।

यो योनिं योनिमधितिष्ठत्येक इति च तस्या एवावगमात्, न स्वतन्त्रा काचित् प्रकृतिः प्रधानं नामाजामन्त्रेणाम्नायत इति शक्यते वक्तुं। प्रकरणात् तु सैव दैवी शक्तिरव्याकृतनामरूपा नामरूपयोः प्रागवस्थानेनापि मन्त्रेणाम्नायत इत्युच्यते। तस्याश्च *स्वविकारविषयेण त्रैरूप्येण त्रैरूप्यमुक्तं। कथं पुनस्तेजोऽबन्नानां त्रैरूप्येण त्रिरूपाऽजा प्रतिपत्तुं शक्यते।

सत्त्वादिगुणवतीं ब्रह्मणः सहायमपश्यन्नित्यन्वयः। मायाया एकत्वेऽपि तदंशानां जीवोपाधीनां तत्तत्सङ्घातयोनीनां अविद्याख्यानां भेदादीक्षा, अव्याकृते अनभिव्यक्ते नामरूपे यस्यां सा। अनेन तद्वेदं तर्ह्यव्याकृतमासीदिति श्रुत्यन्तरप्रसिद्धिरुक्ता। तस्यां शक्तौ व्यक्ताव्यक्तकार्यलिङ्गकानुमानं सूचयति। नामेति। मायाया रोहितादिरूपवत्त्वं कथमित्यत आह। तस्या इति। विषयः आश्रयः, एवं प्रकरणबलान्मायैव अजेति भाष्यकृन्मतं। छान्दोग्यश्रुत्या तेजोऽबन्नलक्षणाऽवान्तरप्रकृतिरजेति सूचकृन्मतेनोत्तरसूचव्याख्यां शङ्कते। कथमिति। किं तेजोऽबन्नेष्वजाशब्दो रूढः न जायत इति यौगिको वा नाद्यस्तेष्वजात्वजातेरसत्त्वादित्याह। यावतेति। यत इत्यर्थः। अतो न रूढ

---

* विकारविषयेणेति वर्ध० का० पु० पाठः।

यावता न तावत्तेजोऽबन्नेष्वजाकृतिरस्ति, न च तेजोऽबन्नानां जातिश्रवणाद्जातिनिमित्तोऽप्यजाशब्दः सम्भवतीति अत उत्तरं पठति॥

कल्पनोपदेशाच्च मध्वादिवदविरोधः॥ १०॥

नायमजाकृतिनिमित्तोऽजाशब्दो नापि यौगिकः किं तर्हि कल्पनोपदेशोऽयं अजारूपकक्रृप्तिस्तेजोऽबन्नलक्षणायाश्चराचरयोनेरुपदिश्यते। यथा हि लोके यदृच्छया काचिदजा लोहितशुक्लकृष्णवर्णा स्यात् बह्वर्करा स्वरूपवर्करा च तां च कश्चिदजो जुषमाणोऽनुशयीत कश्चिच्चैनां भुक्तभोगां जहात्येवमियमपि तेजोऽबन्नलक्षणा भूतप्रकृतिस्त्रिवर्णा बह्वी सरूपं चराचरलक्षणं विकारजातं जनयति, अविदुषा च चेतनेनोपभुज्यते, विदुषा च परित्यज्यते इति। न च इदमाशङ्कितव्यमेकः चेतनोऽनुशेतेऽन्यो जहातीति, अतः चेतनभेदः पारमार्थिकः परेषामिष्टः प्राप्नोतीति। न हीयं चेतनभेदप्रतिपिपादयिषा

इति शेषः। न द्वितीय इत्याह। न चेति। जातिर्जन्म अजातिरजन्म॥

लौकिकयाऽजाशब्दसादृश्यकल्पनया तेजोऽबन्नानामजात्वोपदेशाद्यौगोऽयं शब्द इति परिहरति। कल्पनेति। अनियमो यदृच्छा। वर्करो बालपशुः। यदुक्तं जीवभेदेन प्रधानवादप्रत्यभिज्ञेति तन्नेत्याह। न चेदमिति। व्यवस्थार्थो भेदोऽप्यर्थात् प्रतिपाद्यत इत्याह। प्रसिद्धत्विति। सत्य एव प्रसिद्ध इत्यत आह। भेदस्त्विति। कल्पनोपदेशे दृष्टान्तं व्याचष्टे। मध्विति। न च योगस्य मुख्यवृत्तित्वात् तेन प्रधानग्रहो न्याय्य इति वाच्यं रूढार्थानपेक्षायोगात् तदाश्रितगुणलक्षणाया बलीय-

किन्तु बन्धमोक्षव्यवस्थाप्रतिपिपादयिषैवैषा। प्रसिद्धन्तु भेदं अनूद्य बन्धमोक्षव्यवस्था प्रतिपाद्यते, भेदस्तु उपाधिनिमित्तो मिथ्याज्ञानकल्पितो न पारमार्थिकः,

"एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा" इत्यादिश्रुतिभ्यः। मध्वादिवत् यथादित्यस्यामधुनो मधुत्वं वाचस्याधेनोर्धेनुत्वं द्युलोकादीनां चानग्नीनामग्नित्वं इत्येवंजातीयकं कल्प्यते, एवमिदमनजाया अजात्वं कल्प्यत इत्यर्थः, तस्मादविरोधस्तेजोऽबन्नेष्वजाशब्दप्रयोगस्य ॥

न संख्योपसंग्रहादपि नानाभावादतिरेकाच्च ॥ ११ ॥

एवं परिच्छेतेऽप्यजामन्ते पुनरप्यन्यस्मान्मन्त्रात् साङ्ख्यः प्रत्यवतिष्ठते, यस्मिन् पञ्चपञ्चजना आकाशश्च प्रतिष्ठितः तमेवमन्य आत्मानं विद्वान् ब्रह्मामृतोऽमृतमिति, अस्मिन्मन्त्रे पञ्चपञ्चजना इति पञ्चसङ्ख्याविषयाऽपरा पञ्चसङ्ख्या श्रूयते पञ्चशब्द-

---

स्वादुगवत्त्वौ हि रूढिराश्रिता भवति। तथा च रोहितादिशब्दसमभिव्याहारानुगृहीतया रूढ्याश्रितया गुणवृत्त्या प्रधाने योगं बाधित्वाऽवान्तरप्रकृतिरजाशब्देन ग्राह्या यथा मध्वादिशब्दैः प्रसिद्धमध्वाद्याश्रितगुणलक्षणया आदित्यादयो गृह्यन्ते तद्वत्, तस्मादशब्दं प्रधानमिति सिद्धं ॥

न संख्योपसंग्रहात्। पञ्चजनशब्दः सांख्यतत्त्वपरोऽन्यपरो वेति योगरूढ्योरनिश्चयात् संशये यथा तत्त्वविद्याधिकारे कामायां तात्पर्याभावादजापदे रूढिर्व्यागस्तथा पञ्चमनुष्येषु तात्पर्याभावाज्जनशब्देन रूढिं त्यक्त्वा तत्त्वानि ग्राह्याणीति दृष्टान्तसङ्गतिं सूचयन् मन्त्रम्

दयदर्शनात् त एते पञ्च पञ्चकाः पञ्चविंशतिः सम्पद्यन्ते। तथा च पञ्चविंशतिसङ्ख्या यावन्तः सङ्ख्येया आकाङ्क्ष्यन्ते तावन्त्येव च तत्त्वानि साङ्ख्यैः सङ्ख्यायन्ते।

"मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त।
षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः"॥ इति।

तया स्मृतिप्रसिद्धया पञ्चविंशतिसङ्ख्या तेषां स्मृतिप्रसिद्धानां पञ्चविंशतितत्त्वानामुपसंग्रहात् प्राप्तं *तावत् श्रुतिमत्त्वमेव प्रधानादीनां, ततो ब्रूमः। न सङ्ख्योपसंग्रहादपि प्रधा-

---

दाहृत्य पूर्वपक्षयति। एवमित्यादिना। फलं पूर्ववत्, प्राणश्चक्षुःश्रोत्रान्नमनांसि वाक्यशेषस्थाः पञ्चजनाः पञ्च, तत्र चत्वारः स्रुचं अन्नं विराट तयोः कारणमव्याकृतमाकाशश्च यस्मिन्नध्यस्तस्तमेवात्मानममृतं ब्रह्म मन्ये तस्मान्मननात् विद्वानहममृतोऽस्मीति मन्त्रदृशो वचनं। नन्वस्तु पञ्चत्वविशिष्टेषु पञ्चजनेषु पुनः पञ्चत्वान्वयात् पञ्चविंशतिसंख्याप्रतीतिस्तावता कथं सांख्यतत्त्वग्रह इत्याशङ्क्य संख्याया धर्म्याकाङ्क्षायां तत्त्वानि ग्राह्याणीत्याह। तयेति। जगतो मूलभूता प्रकृतिस्त्रिगुणात्मकं प्रधानमनादित्वादविकृतिः कस्यचित् कार्यं न भवतीत्यर्थः। महदहङ्कारपञ्चतन्मात्राणि इति सप्त प्रकृतयो विकृतयश्च, तत्र महान् प्रधानस्य विकृतिरहङ्कारस्य प्रकृतिः अहङ्कारः तामसः पञ्चतन्मात्राणां शब्दादीनां प्रकृतिः सात्त्विक एकादशेन्द्रियाणां, पञ्च तन्मात्राश्च पञ्चानां स्थूलभूतानामाकाशादीनां प्रकृतयः, पञ्च स्थूलभूतान्येतान्येकादशेन्द्रियाणि चेति षोडशसंख्याको गणो विकार एव न प्रकृतिः, तत्त्वान्तरोपादानत्वाभावात्, पुरुषस्तूदासीन इति साङ्ख्यकारिकार्थः। सङ्ख्या तत्त्वानामुपसंग्रहात् शब्दवत्त्वमिति प्राप्ते सिद्धान्तयति। नेति। नानात्वमिष्टमित्यत आह। नैषामिति। पञ्चसु पञ्चसु साधारणस्येतरपञ्चकाद्यारब्धस्य धर्मस्याभावो नानात्वं विवक्षितमित्यर्थः। यद्यपि ज्ञानकर्मेन्द्रियेषु दशसु ज्ञानकरणत्वं कर्मकरण-

---

* तावदित्यस्य स्थाने हि पुनरिति का० सो० वर्ध० पु०।

नादीनां श्रुतिमत्त्वं प्रत्याशा कर्त्तव्या, कस्मात्, नानाभावात्। नाना ह्येतानि पञ्चविंशतितत्त्वानि, नैषां पञ्चत्वं पञ्चत्वं साधारणो धर्मोऽस्ति, येन पञ्चविंशतेरन्तराखेऽपराः पञ्च पञ्च सङ्ख्या निविशेरन्, न ह्येकनिबन्धनमन्तरेण नानाभूतेषु द्वित्वादिकाः सङ्ख्या निविशन्ते। अथोच्येत पञ्चविंशतिसङ्ख्येवेयमवयवद्वारेणोपलक्ष्यते*। यथा,

"पञ्च सप्त च वर्षाणि नववर्षशतक्रतुः"। इति।

द्वादशवार्षिकीमनावृष्टिं कथयन्ति तद्वदिति, तदपि नोपपद्यते। अयमेवास्मिन् पक्षे दोषो यत्तत्क्षणात्क्षयणीया स्यात्। यस्मात्र पञ्चशब्दो जनशब्देन समस्तः पञ्चजना इति, भाषिकेण स्वरेणैकपदत्वनिश्चयात्। प्रयोगान्तरे च पञ्चानां लाप-

---

त्वञ्च पञ्चकद्वयेऽस्ति पञ्चतन्मात्रासु पञ्चसु स्थूलप्रकृतित्वञ्च तथापि यस्मिन् नित्यात्मन आकाशस्य च पृथगुक्तेः सत्त्वरजस्तमोमहदहङ्काराः पञ्च कर्त्तव्याः मनश्चत्वारि भूतानि च पञ्चास्मिन् पञ्चकद्वये मिथोऽनुवृत्तेतरपञ्चकव्यावृत्तधर्मो नास्तीत्यभिप्रायः। माध्वित्वत आह। येनेति, धर्मेणेत्यर्थः। तदेव स्फुटयति। न ह्रीति। महासङ्ख्यायामवान्तरसङ्ख्याः प्रविशन्ति, यथा द्वात्रिंशौ सप्त सप्तर्षयोऽष्टौ वसवश्चेति प्रजापतिः सप्तदशेत्यत्रात्रिंशदादिकमादाय द्वित्वादयः प्रविशन्ति नान्यथेत्यर्थः। पञ्चशब्दद्वयेनास्य वाच्यस्य न्यूनसंख्यादारेण तद्व्याप्या महासंख्यैव लक्ष्यत इति सदृष्टान्तं प्रकटते। अथेति। मुख्यार्थस्य वक्ष्यमाणत्वाल्लक्षणा न युक्तेति परिहरति। तदपि नेति। पञ्चजनशब्दयोरसमासमङ्गीकृत्य पञ्चविंशतिसंख्याप्रतीतिर्निरस्ता सम्प्रति समासनिश्चयान्न तन्नतीतिरित्याह। परश्चेति। समासहेतुमाह। भाषिकेणेति। अयमर्थः। अस्मिन्मन्त्रे प्रथमः पञ्चशब्दः आद्युदात्तः। द्वितीयः सर्वानुदात्तः।

---

* लक्ष्यत इति का० वर्ष० पु० पाठः।

ञ्जनानामित्येकपदैकस्वर्यैकविभक्तिकत्वावगमात्, समस्तत्वाच्च न वीप्सा पञ्च पञ्चेति। *तेन न पञ्चकदयग्रहणं पञ्चपञ्चेति, न च पञ्चसङ्ख्याया एकस्याः पञ्चसङ्ख्याऽपरया विशेषणं पञ्चपञ्चका इति, उपसर्जनस्य विशेषणेनासंयोगात्। नन्वापन्नपञ्चसङ्ख्याका जना एव पुनः पञ्चसङ्ख्या विशेष्यमाणाः पञ्चविंशतिः प्रत्येष्यन्ते। यथा पञ्चपञ्च पूल्य इति पञ्चविंशतिः पूलाः प्रतीयन्ते

जनशब्दस्यान्तोदात्तः। तथा च न द्वितीयपञ्चजनशब्दयोः समासं विनान्त्यस्याकारस्योदात्तत्वं पूर्वेषामनुदात्तत्वञ्च घटते। "समासस्य"[पा०६।१।२२३] इति सूत्रेण समासस्यान्तोदात्तविधानात् "अनुदात्तं पदमेकवर्जं", पा०६।१।१५८]इति च सूत्रेण यस्मिन् पदे उदात्तः स्वरितो वा यस्य वर्णस्य विधीयते तमेकं वर्ज्जयित्वावशिष्टं तत्पदं अनुदात्तं भवतीति विधानादेव मान्त्रिकान्तोदात्तस्वरेणैकपदत्वनिश्चयः। भाषिकाख्ये तु शतपथब्राह्मणस्वरविधायकग्रन्थे "स्वरितोऽनुदात्तो वा"इति सूत्रेण यो मन्त्रदर्शायां अनुदात्तः स्वरितो वा स ब्राह्मणदर्शायामुदात्तो भवतीति अपवाद आश्रितः, तथा चान्त्यादाकारात् पूर्वेषामनुदात्तानामुदात्तत्वं ब्राह्मणावस्थायां प्राप्तं, "उदात्तमनुदात्तमनन्त्यं" इति सूत्रेण मन्त्रदर्शायां उदात्तस्यान्त्यस्य परत्वमतयोच्चार्यमाणस्यानुदात्तत्वं विहितं, तथा चात्र नकारादुपरितन आकार आकारश्चेत्यनेन श्लिष्टतया पठ्यमानोऽनुदात्तो भवति, अयं मन्त्रानुदात्तस्वरः भाषिकस्तेन ब्राह्मणस्वरेणैकपदत्वं निश्चीयत इति। प्रकटार्थकारैस्तु पाठकप्रसिद्धान्तोदात्तस्वरो-भाषिक इति व्याख्यातं, तद्व्याख्यानं कल्पतरुकारैर्दूषितं। अन्तानुदात्तं हि समाम्नातारः पञ्चजनशब्दमधीयत इति पाठकप्रसिद्धिरसिद्धेति। तथा च पञ्चपञ्चजना इति मान्त्रिकान्तोदात्तः स्वरः यस्मिन् पञ्चपञ्चजना इत्यन्तानुदात्तो ब्राह्मणस्वर इति विभागः, उभयत्रापि ऐकपद्यात् समाससिद्धिरिति। तैत्तिरीयकप्रयोगादप्येकपदत्वमि-

---

* तेनेति वर्ध० का० पु० पाठः।

तद्वत्, नेति ब्रूमः, युक्तं यत्पञ्चपूलीशब्दस्य समाहाराभिप्रायत्वात् कतीति सत्यां भेदाकाङ्क्षायां पञ्चपञ्च पूल्य इति विशेषणं, इह तु पञ्चजना इत्यादित एव भेदोपादानात् कतीति असत्यां भेदाकाङ्क्षायां न पञ्चपञ्चजना इति विशेषणं भवेत्, भवदपीदं विशेषणं पञ्चसङ्ख्याया एव भवेत्, तच्च चोक्तो दोषः, तस्मात् पञ्चपञ्चजना इति न पञ्चविंशतितत्त्वाभिप्रायं, अतिरेकाच्च न पञ्चविंशतितत्त्वाभिप्रायं, अतिरेको हि भवत्यात्माकाशाभ्यां पञ्चविंशतिसङ्ख्यायाः। आत्मा तावदिह प्रतिष्ठां

त्याह। प्रयोगान्तरे चेति। आज्यत्वा त्वां पञ्चानां पञ्चजनानां देवविशेषाणां यन्त्राय धर्त्राय ग्रहीष्यामि इत्याज्यग्रहणमन्त्रशेषः। देवतानां कर्मणि यन्त्रवदवस्थितं शरीरं तदेव धर्त्रं इहामुत्रभोगाधारत्वात्तस्मै, तस्यावैकल्यार्थमिति यजमानोक्तिः, अस्तु समासस्ततः किमत्यत आह। समस्तत्वाच्चेति। आवृत्तिर्वीप्सा तदभावे पञ्चकद्वयाग्रहणात् पञ्चविंशतिसंख्याप्रतीतिरसिद्धेति भावः। जनपञ्चकमेकं पञ्चकानां पञ्चकं द्वितीयमिति पञ्चकद्वयं तस्य पञ्चपञ्चेति ग्रहणं नेत्यक्षरार्थः। किञ्चासमस्तपक्षेऽपि किं पञ्चशब्दद्वयोक्तयोः पञ्चत्वयोः परस्परान्वयः किं वातयोः शुद्धजनैरन्वयः अथवा पञ्चत्वविशिष्टैर्जनैरपरपञ्चत्वस्यान्वयः। नाद्य इत्याह। न च पञ्चसंख्याया इति। विशेषणमन्वयः। अनन्वये हेतुमाह। उपसर्जनस्येति। अप्रधानानां सर्वेषां प्रधानेन विशेष्येणैवान्वयो वाच्यः, गुणानां परस्परान्वये वाक्यभेदापातादित्यर्थः। द्वितीये दशसंख्याप्रतीतिः स्यात् न पञ्चविंशतिसंख्याप्रतीतिः। तृतीयमुत्थापयति। नन्विति। पञ्चत्वविशिष्टेषु पञ्चत्वान्तरान्वये विशेषणीभूतपञ्चत्वेऽपि पञ्चत्वान्वयात् पञ्चविंशतित्वप्रतीतिरित्यर्थः। दृष्टान्तवैषम्येण परिहरति। नेति ब्रूम इति। पञ्चानां पूलानां समाहार इत्यत्र संख्यापूर्वो द्विगुरिति समासो विहितः। ततो "द्विगोः" [पा०४।१।२१] इति सूत्रेण

प्रत्याधारत्वेन निर्दिष्टः, यस्मिन्निति सप्तमीसूचितस्य "तमेवमन्य आत्मानं" इत्यात्मत्वेनानुकर्षणात्। आत्मा च चेतनः पुरुषः स च पञ्चविंशतावन्तर्गत एवेति न तस्यैवाधारत्वमाधेयत्वं च युज्येत, अर्थान्तरपरिग्रहे वा तत्त्वसङ्ख्यातिरेकः सिद्धान्तविरुद्धः प्रसज्येत। तथा "आकाशश्च प्रतिष्ठितः" इत्याकाशस्यापि पञ्चविंशतावन्तर्गतस्य न पृथगुपादानं न्याय्यं, अर्थान्तरपरिग्रहे चोक्तं दूषणं। कथञ्च सङ्ख्यामात्रश्रवणे सत्यश्रुतानां पञ्चविंशतितत्त्वानामुपसंग्रहः प्रतीयेत, जनशब्दस्य तत्त्वेष्वरूढत्वात्, अर्थान्तरोपसंग्रहेऽपि सङ्ख्योपपत्तेः। कथं तर्हि पञ्चपञ्च-

---

ङीषो विधानात् समाहारप्रतीतौ समाहाराः कतीत्याकाङ्क्षायां सत्यां पञ्चेतिपदान्तरान्वयो युक्तः, पञ्चजना इत्यत्र तु ङीबन्तत्वाभावेन समाहारस्याप्रतीतेः जनानाञ्चादित एव पञ्चत्वोपादानात् संख्याकाङ्क्षया असत्त्वात्पञ्चेति पदान्तरं नान्वेति आकाङ्क्षाधीनत्वादन्वयस्येत्यर्थः। भेदो विशेषणं। ननु जनानां निराकाङ्क्षत्वेऽपि तद्विशेषणीभूतपञ्चत्वानि कतीत्याकाङ्क्षायां पञ्चत्वान्तरं विशेषणं भवत्वित्याशङ्क्यते। भवदपीति। नोपसर्जनस्योपसर्जनान्तरेणान्वयः किन्तु प्रधानेनैवेति नोपसर्जनन्यायविरोध उक्त इति परिहरति। तत्र चेति। एवं नानाभावादिति व्याख्यायातिरेकाच्चेति व्याचष्टे। अतिरेकाच्चेत्यादिना। अतिरेकः आधिक्यं जनशब्दितपञ्चविंशतितत्त्वेषु आत्मान्तर्भूतो न वा नाद्य इत्युक्त्वा द्वितीये दोषमाह। अर्थान्तरेति। तथाकाशं विकल्प्य दूषयति। तथेति। उक्तो दोषः सङ्ख्याधिक्यं। पञ्चविंशतिजना आत्माकाशौ चेति सप्तविंशतिसङ्ख्या स्यादित्यर्थः। न च सत्त्वरजस्तमसां एथग्गणनया सेयमिति वाच्यं, आकाशस्य एथगुक्तिवैयर्थ्यात् यस्मिन्निति आत्मनि तत्त्वानां प्रतिष्ठोक्तिविरोधात्तव मते स्वतन्त्रप्रधानस्यैवानाधारत्वान्नेह

जना इति, उच्यते, दिक्सङ्ख्ये संज्ञायामिति विशेषस्मरणात् संज्ञायामेव पञ्चशब्दस्य जनशब्देन समासः, ततश्च रूढत्वाभिप्रायेणैव केचित् पञ्चजना नाम विवक्ष्यन्ते, न साङ्ख्यतत्त्वाभिप्रायेण, ते कतीत्यस्यामाकाङ्क्षायां पुनः पञ्चेति प्रयुज्यते, पञ्चजना नाम केचित्, ते च पञ्चेत्यर्थः सप्तर्षयः सप्तेति यथा। के पुनस्ते पञ्चजना नामेति तदुच्यते॥

प्राणादयो वाक्यशेषात्॥ १२॥

यस्मिन् पञ्च पञ्चजना इत्यत उत्तरस्मिन्मन्त्रे ब्रह्मस्वरूपनिरूपणाय प्राणादयः पञ्च निर्दिष्टाः "प्राणस्य प्राणमुत चक्षुषश्च-

---

नानास्तीति वाक्यशेषविरोधाच्च तव सत्यद्वैतवादित्वात्। किञ्च पञ्चविंशतिसङ्ख्याप्रतीतावपि न सांख्यतत्त्वानां ग्रहणमित्याह। कथञ्चेति। किं जनशब्दात्तत्त्वग्रहः उतासंख्येयेति कथंशब्दार्थः। नाद्य इत्याह। जनेति। न द्वितीय इत्याह। अर्थान्तरेति। किन्तदर्थान्तरं यदर्थकमिदं वाक्यमिति पृच्छति। कथमिति। पञ्च च ते जनाश्चेति कर्मधारयादिसमासान्तरात् संज्ञासमासस्य प्रोक्त्या बलवत्त्वं तावदाह। उच्यत इति। दिग्वाचिनः संख्यावाचिनश्च शब्दाः संज्ञायां गम्यमानायां सुबन्तेनोत्तरपदेन समस्यन्ते यथा दक्षिणाग्निः सप्तर्षय इत्यादि। अयञ्च समासस्तत्पुरुषभेदः पञ्चजनशब्दस्य संज्ञात्वमुक्त्वा संज्ञिकथनार्थं सूत्रं गृह्णाति। के पुनस्त इति॥

श्रुतौ जनशब्दोऽप्यर्थः। ये प्राणादिप्रेरकं तत्साक्षिणमात्मानं विदुस्ते ब्रह्मविद इत्यर्थः। पञ्चजनशब्दस्य प्राणादिषु कथा रूढ्या प्रयोग इति शङ्कते। कथं पुनरिति। यथा तव तत्त्वेषु जनशब्दस्य लक्षणया प्रयोगस्तथा मम प्राणादिषु पञ्चजनशब्दस्य लक्षणयेत्याह। तत्त्वेष्विति। तर्हि रूढ्यतिक्रमसाम्यात्तत्त्वान्येव ग्राह्याणीत्यत आह। समाने त्विति। सन्निहितसजातीयानपेक्षश्रुतिस्था एव ग्राह्याः न

बृहत श्रोत्रस्य श्रोत्रमन्नस्यान्नं मनसो ये मनो विदुः" इति, तेऽत्र वाक्यशेषगताः सन्निधानात् पञ्चजना विवक्ष्यन्ते। कथं पुनः प्राणादिषु जनशब्दप्रयोगः, तत्त्वेषु वा कथं जनशब्दप्रयोगः, समानेतु प्रसिद्धातिक्रमे वाक्यशेषबलात् प्राणादय एव गृहीतव्या भवन्ति, जनसम्बन्धाच्च प्राणादयो जनशब्दभाजो भवन्ति। जनवचनश्च पुरुषशब्दः प्राणेषु प्रयुक्तः, "ते वा एते पञ्च ब्रह्मपुरुषाः" इति, अत्र "प्राणो ह पिता प्राणो ह माता" इत्यादि च ब्राह्मणं। समासबलाच्च समुदायस्य रूढत्वमविरुद्धं। कथं पुनरमनि प्रथमप्रयोगे रूढिः शक्याश्रयितुं। शक्योद्भिदादिवदित्याह। प्रसिद्धार्थसन्निधानेन ह्यप्रसिद्धार्थः शब्दः प्रयुज्यमानः समभि-

---

तु व्यवहितविजातीयसापेक्षस्मृतिस्था इत्यर्थः। लक्षणाबीज सम्बन्धमाह। जनेति। जनः पञ्चजन इति पर्यायः, पुरुषमित्यादिशब्दवच्च पञ्चजनशब्दस्य प्राणादिलक्षकत्वं युक्तमित्याह। जनवचनश्चेति। ननु जायन्त इति जनाः महदादयः जनकत्वाज्जनः प्रधानमिति। यागसम्भवे किमिति रूढिमाश्रित्य लक्षणाप्रयास इत्यत आह। समासेति। यथा अश्वकर्णशब्दस्य वर्णसमुदायस्य वृक्षे रूढिरेवं पञ्चजनशब्दस्य रूढिरेव नावयवशक्त्यात्मको याग इत्यर्थः। पूर्वकालिकप्रयोगाभावान्न रूढिरित्याक्षिपति। कथमिति। सुः पुमासः पञ्चजना इत्यमरकोषादौ प्रयोगोऽस्त्येव, तद्भावमङ्गीकृत्याप्याह। शक्येति। जनसम्बन्धाच्चेति पूर्वभाष्ये नरेषु पञ्चजनशब्दस्य रूढिमाश्रित्य प्राणादिषु लक्षणोक्ता इह तु प्रौढवादेन प्राणादिषु रूढिरुच्यत इति मन्तव्यं। संगृहीतं विवृणोति। प्रसिद्धत्यादिना। उद्भिदा यजेत पशुकाम इत्यत्रोद्भित्पदं विधेयगुणार्थकं कर्मनामधेयं वेति संशये खनिचादावुद्भिन्पदस्य प्रसिद्धेर्यागनामत्वे प्रसिद्धिविरोधात् ज्योतिष्टोमे

व्याहारात् तद्विषयो नियम्यते यथोद्भिदा यजेत, यूपं छिनत्ति, वेदिं करोतीति, तथाऽयमपि पञ्चजनशब्दः समासान्वाख्यानादवगतसंख्याभावः संख्याकाङ्क्षी वाक्यशेषसमभिव्याहृतेषु प्राणादिषु वर्त्तिष्यते। कैश्चित्तु देवाः पितरो गन्धर्वा असुरा रक्षांसि च पञ्च जना व्याख्याताः। अन्यैश्चत्वारो वर्णा निषादपञ्चमाः परिगृहीताः। क्वचिच्च यत् पाञ्चजन्यया विशेति प्रजापरः प्रयोगः पञ्चजनशब्दस्य दृश्यते तत्परिग्रहेऽपीह न कश्चिद्विरोधः। आचार्यस्तु न पञ्चविंशतेस्तत्त्वानामिह प्रतीतिरस्तीत्येवंपरतया प्राणादयो वाक्यशेषादिति जगाद। भवेयुस्तावत् प्राणादयः

गुणविधिरिति प्राप्ते राद्धान्तः। यजेत यागेनेष्टं भावयेदित्यर्थः। तत्रोद्भिदेत्यप्रसिद्धस्य तृतीयान्तस्य यागेनेत्यनेन प्रसिद्धार्थकेन सामानाधिकरण्येन तन्नामत्वं निश्चीयते, उद्भिनत्ति पशून् साधयतीति प्रसिद्धेरविरोधादप्रकृतज्योतिष्टोमे गुणविध्ययोगात् तद्विधौ चोद्भिदाख्यगुणवता यागेनेति मत्वर्थसम्बन्धलक्षणाप्रसङ्गाच्चेति कर्मनामैवोद्भित्पदं। तथा छिनत्तीति प्रसिद्धार्थकछेदनयोग्यार्थकशब्दसमभिव्याहाराद्दारुविशेषो यूपशब्दार्थः। करोतीति समभिव्याहाराद्वेदिशब्दार्थः संस्कारयोग्यस्खण्डिलविशेष इति गम्यते, तथा प्रसिद्धार्थकप्राणादिशब्दसमभिव्याहारात् पञ्चजनशब्दः प्राणाद्यर्थक इति निश्चीयत इत्यर्थः। एकदेशिनां संमतिद्वयमाह। कैश्चिदित्यादिना। सूत्र्यां ब्राह्मणाज्जातो निषादः। अन्यैः पञ्चजनशब्दस्यार्थान्तरमाह। क्वचिच्चेति। पाञ्चजन्यया प्रजया विशतीति विट् तया विशा पुरुषरूपयेन्द्रस्याकाङ्क्षार्थं घोषाः श्रुत्वा इति यत्तदुक्तं घोषातिरेकेणेन्द्राकाङ्क्षानायोगादिति श्रुत्यनुसारेण प्रजामात्रग्रहेऽपि न विरोध इत्यर्थः। सूत्रविरोधमाशङ्क्याह। आचार्यस्त्विति। अतः सांख्यतत्त्वातिरिक्तयत्-

पञ्चजना माध्यन्दिनानां येऽन्नं प्राणादिष्वामनन्ति काण्वानान्तु कथं प्राणादयः पञ्चजना भवेयुः येऽन्नं प्राणादिषु नामनन्तीति अत उत्तरं पठति॥

*ज्योतिषैकेषामसत्यन्ने॥ १३॥

असत्यपि काण्वानामन्ने ज्योतिषा तेषां पञ्चसङ्ख्या पूर्यते। तेऽपि हि यस्मिन् पञ्च पञ्चजना इत्यतः पूर्वस्मिन्मन्त्रे ब्रह्मस्वरूपनिरूपणायैव ज्योतिरधीयते "तद्देवा ज्योतिषां ज्योतिः" इति। कथं पुनरुभयेषामपि तुल्यवदिदं ज्योतिः पठ्यमानं समानमन्त्रगतया पञ्चसङ्ख्यया केषाञ्चिद्गृह्यते केषाञ्चिन्नेति, अपेक्षाभेदादित्याह। माध्यन्दिनानां हि समानमन्त्रपठितप्राणादिपञ्चजनलाभात् नास्मिन्मन्त्रान्तरपठिते ज्योतिषि अपेक्षा भवति तदलाभात्तु काण्वानां भवत्यपेक्षा, अपेक्षाभेदाच्च समानेऽपि

किञ्चित्परतया पञ्चजनशब्दव्याख्यायामविरोध इति भावः। शङ्कोत्तरत्वेन सूत्रं गृह्णाति। भवेयुरिति॥

ज्योतिषां सूर्यादीनां ज्योतिस्तद्ब्रह्म देवा उपासत इत्यर्थः। नन्विदं षष्ठ्यन्तज्योतिःपदोक्तं सूर्यादिकं ज्योतिः शाखादयेऽप्यस्ति तत्काण्वानां पञ्चत्वपूरणाय गृह्यते नान्येषामिति विकल्पो न युक्त इति शङ्कते। कथं पुनरिति। आकाङ्क्षाविशेषादिकल्पो युक्त इत्याह सिद्धान्ती। अपेक्षेति। यथा त्रिरात्रे षोडशिनं गृह्णाति न गृह्णातीति वाक्यभेदादिकल्पस्तद्वच्छाखाभेदेनाह, न पाठापाठाभ्यां ज्योतिषो विकल्प इत्यर्थः। ननु क्रियायां विकल्पो युक्तः न वस्तुनीति चेत्, सत्यं, अत्रापि शाखाभेदेन साऽन्ना ज्योतिःसहिता वा पञ्च प्राणादयो यत्र प्रतिष्ठि-

---

* ज्योतिषैवैकेषामिति वर्ध० पु० पाठः।

मन्त्रे ज्योतिषो ग्रहणाग्रहणे, यथा समानेऽप्यतिरात्रे वचनभेदात् षोडशिनो ग्रहणाग्रहणे तद्वत्। तदेवं न तावत् श्रुतिप्रसिद्धिः काचित् प्रधानविषयास्ति, स्मृतिन्यायप्रसिद्धौ तु परिहरिष्यते॥

कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः॥ १४॥

प्रतिपादितं ब्रह्मणो लक्षणं, प्रतिपादितं ब्रह्मविषयं गतिसामान्यं वेदान्तवाक्यानां, प्रतिपादितञ्च प्रधानस्याशब्दत्वं। तच्चेदमपरमाशङ्क्यते। न जन्मादिकारणत्वं ब्रह्मणो ब्रह्मविषयं वा गतिसामान्यं वेदान्तवाक्यानां प्रतिपादयितुं शक्यं, कस्मात्, विगानदर्शनात्, प्रतिवेदान्तं ह्यन्यान्या सृष्टिरुपलभ्यते क्रमादिवैचित्र्यात्, तथा हि क्वचिदात्मन आकाशः समभूत इत्याकाशादिका सृष्टिराम्नायते,[1] क्वचित्तेजआदिका तत्तेजोऽसृजतेति,[2] क्वचित्प्राणादिका स प्राणमसृजत प्राणाच्छ्रद्धा-

---

तात्तन्मनसाऽनुद्रष्टव्यमिति ध्यानक्रियायां विकल्पोपपत्तिरित्यनवद्यं। उक्तं प्रधानस्याशब्दत्वमुपसंहरति। तदेवमिति। तथापि स्मृतियुक्तिभ्यां प्रधानमेव जगत्कारणमित्यत आह। स्मृतीति॥

कारणत्वेन चाकाशादिषु यथा व्यपदिष्टोक्तेः। पूर्वग्रन्थेनास्य सङ्गतिं वक्तुं वृत्तमनुवदति। प्रतिपादितमिति। अधिकरणत्रयेण प्रधानस्याश्रौतत्वोक्त्या जगत्कारणत्वलक्षणेन ब्रह्मण एव बुद्धिस्थता, तस्मिन्नेव बुद्धिस्थे निर्विशेषे ब्रह्मणि वेदान्तानां समन्वय इति साधितं पूर्वसूत्रसन्दर्भेण। तत्र लक्षणसमन्वययोरसिद्धिरेव श्रुतीनां विरोधदर्शनादित्याक्षेपरूपान्तेनास्य सङ्गतिमाह। तत्रेति। न चाविरो-

मिति,[3] क्वचित् अक्रमेव लोकानामुत्पत्तिराम्नायते स इमाँ-
ल्लोकानसृजताम्भो मरीचिर्मरमाप इति,[4] तथा क्वचिदसत्पू-
र्विका सृष्टिः पठ्यते, असद्वा इदमग्र आसीत् ततो वै सदजाय-
तेति, असदेवेदमग्र आसीत् तत्सदासीत् तत्समभवदिति
च,[5] क्वचिदसद्वादनिराकरणेन सत्पूर्विका प्रक्रिया प्रतिज्ञायते
तद्धैक आहुरसदेवेदमग्र आसीदित्युपक्रम्य, कुतस्तु खलु सोम्यैवं
स्यादिति होवाच कथमसतः सज्जायेतेति, सदेव सोम्येदमग्र
आसीदिति,[6] क्वचित् स्वयंकर्तृकैव व्याक्रिया जगतो निगद्यते,

धचिन्तायाः द्वितीयाध्याये सङ्गतिर्नास्मिन्नध्याये इति वाच्यं, सिद्धे सम-
न्वये स्मृत्यादिमानान्तरविरोधनिरासस्य द्वितीयाध्यायार्थत्वात् तत्-
दवाच्यजगत्कारणवादिश्रुतीनां मिथो विरोधाद्वाच्यार्थानिश्चयेन लक्ष्ये
समन्वयासिद्धौ प्राप्तायां तत्साधकाविरोधचिन्तायाः अत्रैव सङ्गत-
त्वात्। न चैवं सृष्टिश्रुतीनामप्यविरोधोऽत्रैव चिन्तनीय इति वाच्यं,
स्वप्नवत् कल्पितसृष्टौ विरोधस्यैवाभावात्। किमर्थं तर्हि द्वितीये
तच्चिन्तनं, स्थूलबुद्धिसमाधानार्थं इति ब्रूमः। इह तु सूक्ष्मदृशां
वाक्यार्थे समन्वयज्ञानाय तत्तदर्थश्रुतिविरोधः परिहियते। यद्य-
पि तत्तदर्थश्रुतिविरोधोऽत्र परिहर्तव्यः तथापि प्रथमसूत्रेण बन्ध-
मिथ्यात्वसूचनादविरोधः प्रसिद्धः, प्रपञ्चस्तु स्थूलबुद्धिसमाधानप्रसङ्गेन
भविष्यतीति मन्यते सूत्रकारः। अत्र जगत्कारणश्रुतयो विषयस्थाः किं
ब्रह्मणि मानं न वेति संशयेऽन्नज्योतिषोः संख्यादृष्टिक्रियायां विकल्पे-
ऽपि कारणे वस्तुन्यसदा सदा कारणमित्यादिविकल्पसम्भवादप्रामाण्य-
मिति प्रत्युदाहरणेन पूर्वपक्षयन्नुक्ताक्षेपं विशदयति। प्रतिवेदान्तमित्या-
दिना। वेदान्तानां समन्वयसाधनाच्छास्त्रयोनिसङ्गतिः। असदादिपदानां
सत्कारणे समन्वयोक्तेः पादसङ्गतिः, पूर्वपक्षे समन्वयासिद्धिः फलं,

नन्वेदं तर्ह्यव्याकृतमासीत् तन्नामरूपाभ्यामेव व्याक्रियत इति। एवमनेकधा विप्रतिपत्तेः वस्तुनि च विकल्पस्यानुपपत्तेर्न वेदान्तवाक्यानां जगत्कारणावधारणपरता न्याय्या, स्मृतिन्यायप्रसिद्धिभ्यां तु कारणान्तरपरिग्रहो न्याय्य इति। एवं प्राप्ते ब्रूमः। सत्यपि प्रतिवेदान्तं सृज्यमानेष्वाकाशादिषु क्रमादिद्वारके विगाने न स्रष्टरि किञ्चिद्विगानमस्ति, कुतः, यथाव्यपदिष्टोक्तेः। यथाभूतो ह्येकस्मिन् वेदान्ते सर्वज्ञः सर्वेश्वरः सर्वात्मकोऽद्वितीयः कारणत्वेन व्यपदिष्टः, तथाभूत एव वेदान्तान्तरेष्वपि व्यपदिश्यते, तद्यथा, सत्यं ज्ञानमनन्तं ब्रह्मेति, अत्र तावज्ज्ञानशब्देन परेण च तद्विषयेण कामयितृत्ववचनेन चेतनं

सिद्धान्ते तत्सिद्धिरिति विवेकः। क्रमाक्रमाभ्यां सृष्टिविरोधं तावद्दर्शयति। तथा हि क्वचिदित्यादिना। स परमात्मा लोकानसृजत अम्भःशरीरप्रचुरस्वर्गलोकोऽम्भःशब्दार्थः। सूर्यरश्मिव्याप्तोऽन्तरीक्षलोको मरीचयः। मरो मर्त्यलोकः। अब्बुद्बुदाः पातालसोकाः आप इति श्रुत्यर्थः। सृष्टिविरोधमुक्त्वा कारणविरोधमाह। तथेति। असदनभिव्यक्तनामरूपात्मकं कार्यं, ततः कारणात् सदभिव्यक्तं। एतदुक्त्यर्थं छान्दोग्यवाक्यमाह। असदेवेति। किं शून्यमेव नेत्याह। तत्सदिति। अबाधितं ब्रह्मैवासीदित्यर्थः। तद्ब्रह्मात्मना स्थितं जगत् सृष्टिकाले सम्यगभिव्यक्तमभवत्। प्रक्रिया सृष्टिः। तत्तत्र कारणे एके बाह्यास्तेषां मतं। श्रुतिरेव दूषयति। कुत इति। कुतएवंपदयोरर्थमाह। कथमिति। स्वमतमाह। सदिति। तदिदं जगद्ब्रह्म किंच तर्हि प्राक्काले ऽव्याकृतं कारणात्मकमासीत्। श्रुतीनां विरोधमुपसंहरति। एवमिति। किमत्र न्याय्यमित्याशङ्क्य मानान्तरसिद्धप्रधानलक्षकत्वं वेदान्तानां न्याय्यमित्याह। स्मृतीति। तत्र

ब्रह्म न्यरूरूपदपरप्रयोज्यत्वेनेश्वरं कारणमब्रवीत्। तद्विषयेणैव परेणात्मशब्देन शरीरादिकोशपरम्परया चान्तरनुप्रवेशनेन सर्वेषां नः प्रत्यगात्मानं निरधारयत्, बहु स्यां प्रजायेयेति चात्मविषयेण बहुभवनाशंसनेन सृज्यमानानां विकाराणां स्रष्टुरभेदमभाषत, तथेदं सर्वमसृजत यदिदं किञ्चेति समस्त-जगत्सृष्टिनिर्देशेन प्राक् सृष्टेरद्वितीयं स्रष्टारमाचष्टे, तदत्र य-ल्लक्षणं ब्रह्म कारणत्वेन विज्ञातं तल्लक्षणमेवान्यत्रापि विज्ञायते। सदेव सोम्येदमग्र आसीत्, एकमेवाद्वितीयं, तदैक्षत बहु स्यां प्रजायेयेति, तत्तेजोऽसृजतेति, तथा आत्मा वा इदमेक एवाग्र आसीन्नान्यत् किञ्चन मिषत् स ऐक्षत लोकान्नु सृजा इति च, एव-जातीयकस्य कारणस्वरूपनिरूपणपरस्य वाक्यजातस्य प्रतिवेदा-न्तमविगीतार्थत्वात्। कार्यविषयन्तु विगानं दृश्यते क्वचिदाका-

---

स्रष्टौ, विरोधमङ्गीकृत्य प्रस्तुत्य विरोधं परिहरति। सत्यमीति। आका-शादिषु ब्रह्मणः कारणत्वे विरोधो नैवास्तीति प्रतिज्ञायां हेतुमाह। कुत इति। यथाभूतत्वेमेवाह। सर्वज्ञ इति। कारणस्य सर्वज्ञ-त्वादिकं प्रतिवेदान्तं दृश्यत इत्याह। तद्यथेत्यादिना। तद्विषयेण ब्रह्मविषयेण, चेतनं सर्वज्ञं, तदात्मानं स्वयमकुरुतेति श्रुतेरपरप्रयो-ज्यत्वं। तस्माद्वा एतस्मादात्मन इति प्रत्यगात्मत्वं स्वस्य बहुरूपत्वका-मनया स्थितिकालेऽप्यद्वितीयत्वं। यथा तैत्तिरियके सर्वज्ञत्वादिकं कार-णस्य तथा छान्दोग्यादावपि दृश्यते इत्याह। तदत्र यल्लक्षणमिति, मिषत्सव्यापारं अविगीतार्थत्वादविरुद्धार्थकत्वात् कारणे नास्ति वि-प्रतिपत्तिरिति शेषः, तथापि कार्ये विरोधात् कारणेऽपि विरोधः स्या-दित्याशङ्क्य निषेधति। कार्यविषयन्त्वित्यादिना। स्वप्नसृष्टीनां प्रत्यङ्-

ग्रादिका सृष्टिः क्वचित्तेजग्रादिकेत्येवंजातीयकं। न च कार्यविषयेण विगानेन कारणमपि ब्रह्म सर्ववेदान्तेष्वविगीतमधिगम्यमानमविवक्षितं भवितुमर्हतीति शक्यते वक्तुं, अतिप्रसङ्गात्। समाधास्यति चाचार्यः कार्यविषयं विगानं न वियदश्रुतेरित्यारभ्य। भवेदपि कार्यस्य विगीतत्वं *अप्रतिपाद्यमानत्वात्, न ह्ययं सृष्ट्यादिप्रपञ्चः प्रतिपिपादयिषितः। न हि तत्प्रतिबद्धः कश्चित् पुरुषार्थो दृश्यते श्रूयते वा, न च कल्पयितुं शक्यते। उपक्रमोपसंहाराभ्यां तत्र तत्र ब्रह्मविषयैर्वाक्यैः साकमेकवाक्यताया गम्यमानत्वात्। दर्शयति च सृष्ट्यादिप्रपञ्चस्य ब्रह्मप्रतिपत्त्यर्थतां, अन्नेन सोम्य शुङ्गेनापोमूलमन्विच्छद्भिः सोम्य शुङ्गेन तेजोमूलमन्विच्छ तेजसा सोम्य शुङ्गेन सन्मूलमन्विच्छेति। मृदादिदृष्टान्तैश्च कार्यस्य कारणेनाभेदं वदितुं

मन्यथात्वेन सोऽहमिति प्रत्यभिज्ञायमाने द्रष्टर्यपि नानात्वं प्रसज्येतेत्याह। अतिप्रसङ्गादिति। सृष्टिविरोधमङ्गीकृत्य सृष्टौ न विरोध इत्युक्तं अधुनाङ्गीकारं त्यजति। समाधास्यति चेति। किमर्थं तर्हि श्रुतयः सृष्टिमन्यथान्यथा वदन्तीत्याशङ्क्य सृष्टावतात्पर्यज्ञापनायेत्याह। भवेदित्यादिना। अतात्पर्यार्थविरोधो न दोषायेत्यतात्पर्यं साधयति। न ह्येति। फलवद्ब्रह्मवाक्यशेषत्वेन सृष्टिवाक्यानामर्थवत्त्वसम्भवान्न स्वार्थे पृथक् फलं कल्प्य वाक्यभेदापत्तेरित्याह। न च कल्पयितुमिति। न्यायादेकवाक्यत्वं सिद्धं श्रुतिरपि दर्शयन्तीत्याह। दर्शयति चेति। शुङ्गेन कार्येण लिङ्गेन कारणब्रह्मज्ञानार्थत्वं सृष्टिश्रुतीनामुक्त्वा कारणस्याद्वयत्वज्ञानं फलान्तरमाह। मृदादीति। एवं निष्फलायामन्यार्थायां सृष्टौ तात्पर्याभावादविरोधो न दोष इत्यत्र

---

*अप्रतिपाद्यत्वादिति का० वर्ध० पु० पाठ.।

सृष्ट्यादिप्रपञ्चः आव्यत इति गम्यते। तथा च सम्प्रदायविदो वदन्ति,

"मृल्लोहविस्फुलिङ्गाद्यैः सृष्टिर्या चोदितान्यथा।
उपायः सोऽवताराय नास्ति भेदः कथञ्चन"॥ इति।

ब्रह्मप्रतिपत्तिसम्बद्धं* तु फलं श्रूयते "ब्रह्मविदाप्नोति परं" "तरति शोकमात्मवित्" "तमेव विदित्वा अतिमृत्युमेति" इति च। प्रत्यक्षावगमं चेदं फलं "तत्त्वमसि" इत्यसंसार्यात्मत्वप्रतिपत्तौ सत्यां संसार्यात्मत्वव्यावृत्तेः। यत् पुनः कारणविषयं विज्ञानं दर्शितं "असद्वा इदमग्र आसीत्" इत्यादि तत् परिहर्तव्यं। अत्रोच्यते।

†समाकर्षात्॥ १५॥

असद्वा इदमग्र आसीदिति नाचासन्निरात्मकं कारणत्वेन श्राव्यते। यतोऽसन्नेव स भवत्यसत् ब्रह्मेति वेद चेदस्ति ब्रह्मेति चेद्वेद सन्तमेनं ततो विदुरित्यसद्वादापवादेनास्तित्व-

---

वृद्धसम्मतिमाह। तथा चेति। अन्यथान्यथेति वीप्सा द्रष्टव्या। अवतारायेति ब्रह्मधीजन्मने, अतस्तदन्यथात्वेऽपि ब्रह्मणि न भेदः क्षयेण विज्ञानमित्यर्थः। ब्रह्मज्ञानस्य सृष्टिप्रपञ्चमिथ्यात्वमुक्तन्तन्निर्वाहाय तस्य फलमाह। ब्रह्मेति। मृत्युमत्येतीत्यन्वयः। एवं सृष्टिद्वारकं विरोधमुत्सूत्रं समाधाय कारणस्य सदसत्त्वादिना साक्षाच्छ्रुतिविरोधनिरासार्थं सूत्रमादत्ते। यत पुनरिति। यतोऽस्तित्वलक्षणं ब्रह्म निर्धार्य तस्मिन्नेव श्लोकमुदाहरति अतोऽत्र श्लोके निरात्मकमसन्न आव्यत इति योजना। तत् तत्र सदात्मनि श्लोको मन्त्रो भवति।

सदात्मसमाकर्षादतीन्द्रियार्थकासत्पदेन ब्रह्म लक्ष्यत इत्याह।

---

* सम्बद्धमित्यस्य स्थाने प्रतिबद्धमिति का० वर्ध० पु० पाठः।
† समाकर्षणादिति वर्ध०।

लक्षणं ब्रह्मान्नमयादिकोशपरम्परया प्रत्यगात्मानं निर्धार्य सोऽकामयतेति तमेव प्रकृतं समाकृष्य सप्रपञ्चां सृष्टिं तस्मात् आवर्यित्वा तत् सत्यमित्याचक्षत इति चोपसंहृत्य तदप्येष श्लोको भवति इति तस्मिन्नेव प्रकृतेऽर्थे श्लोकमिममुदाहरत्यसदा इदमग्र आसीदिति। यदि त्वमन्निरात्मकमस्मिन् श्लोकेऽभिप्रेयेत ततोऽन्यसमाकर्षणेऽन्यस्योदाहरणादसम्बद्धं वाक्यमापद्येत। तस्मान्नामरूपव्याकृतवस्तुविषयः प्रायेण सच्छब्दः प्रसिद्ध इति तद्व्याकरणाभावापेक्षया प्रागुत्पत्तेः सदेव ब्रह्मासदिवासीदित्युपचर्यते। एषैवासदेवेदमग्र आसीदित्यत्रापि योजना, तत् सदासीदिति समाकर्षणात्। अत्यन्ताभावाभ्युपगमे हि तत् सदासीदिति किं समाकृष्येत। तद्धैक आहुरसदेवेदमग्र आसीदित्यत्रापि न श्रुत्यन्तराभिप्रायेणायमेकीयमतोपन्यासः क्रियायामिव वस्तुनि विकल्पस्यासम्भवात्। तस्माच्छ्रुतिपरिगृहीतसत्यचन्द्रार्कायैवायं मन्दमतिपरिकल्पितस्यासत्यचन्द्रोपन्यस्य निरास इति द्रष्टव्यं। तद्धेदं तर्ह्यव्याकृतमासीदित्य-

---

तस्मादिति। न च प्रधानमेव लक्ष्यतामिति वाच्यं। चेतनार्थकब्रह्मादिशब्दानामनेकेषां लक्षणागौरवादिति भावः। तित्तिरिश्रुतौ सूचं योजयित्वा छान्दोग्यादौ योजयति। एषैवेति। सदेकार्थकतत्पदेन पूर्वोक्तासतः समाकर्षान्न शून्यत्वमित्यर्थः। नन्वसत्पदलक्षणा न युक्ता श्रुतिभेदे च स्वमतभेदेनोदितानुदितहोमवद्विकल्पस्य दर्शितत्वादित्यत आह। तद्धैक इति। एके शाखिन इत्यर्थो न भवति, किन्तु अनादिसंसारचक्रस्था वेदवाह्या इत्यर्थः। शून्यनिरासेन श्रुतिभिः सदादस्यवेद्यत्वात्तासां विरोधस्फूर्त्तिनिरासाय लक्षणा युक्तेति भावः। यदुक्तं क्वचिदकर्तृका सृष्टिः कथितेति तन्नेत्याह। तद्धेदमिति।

चापि न निरध्यक्षस्य जगतो व्याकरणं कथ्यते। स एष इह प्रविष्ट आनखाग्रेभ्य इत्यध्यक्षस्य व्याकृतकार्यानुप्रवेशित्वेन समाकर्षात् निरध्यक्षे व्याकरणाभ्युपगमे ह्यनन्तरेण प्रकृतावलम्बिना स इत्यनेन सर्वनाम्ना कः कार्यानुप्रवेशित्वेन समाकृष्येत। चेतनस्य चायमात्मनः शरीरेऽनुप्रवेशः श्रूयते, अनुप्रविष्टस्य चेतनत्वश्रवणात्, "पश्यंश्चक्षुः शृण्वन् श्रोत्रं मन्वानो मनः" इति। अपि च यादृशमिदमद्यत्वे नामरूपाभ्यां व्याक्रियमाणं जगत् साध्यक्षं व्याक्रियते एवमादिसर्गेऽपीति गम्यते, दृष्टविपरीतकल्पनानुपपत्तेः। श्रुत्यन्तरमप्यनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति साध्यक्षामेव जगतो व्याक्रियां दर्शयति। व्याक्रियत इत्यपि कर्मकर्तरि लकारः सत्येव परमेश्वरे कर्त्तरि सौकर्यमपेक्ष्य द्रष्टव्यः। यथा लूयते केदारः स्वयमेवेति सत्येव पूर्णके लवितरि। यद्वा कर्मण्येवैष लकारः अर्थाच्चिन्नं कर्त्रन्तरमपेक्ष्य द्रष्टव्यः, यथा गम्यते ग्राम इति॥

अध्यक्षः कर्त्ता। ननु कर्त्रभाव एव परामृश्यते इत्यत आह। चेतनस्य चायमिति। चक्षुर्द्रष्टा श्रोत्रं श्रोता मनो मन्तेत्युच्यते इत्यर्थः। आद्यकार्यं सकर्तृकं कार्यत्वात् घटवदित्याह। अपि चेति। अद्यत्वे इदानीं। ननु कर्म्मकारकादन्यस्य कर्त्तुः सत्त्वे कर्म्मण एव कर्तृवाचिलकारो विरुद्ध इत्यत आह। व्याक्रियते इति। अनायासेन सिद्धिमपेक्ष्य कर्म्मणः कर्तृत्वमुपचर्यत इत्यर्थः। व्याक्रियते जगत् स्वयमेव निष्पन्नमिति व्याख्याय केनचिद्व्याकृतमिति व्याचष्टे। यद्वेति। अतः श्रुतीनामविरोधात् कारणद्वारा समन्वय इति सिद्धं॥

जगद्वाचित्वात् ॥ १९ ॥

कौषीतकिब्राह्मणे बालाक्यजातशत्रुसंवादे श्रूयते, "यो वै बालाक एतेषां पुरुषाणां कर्ता यस्य वै तत् कर्म स वै वेदितव्यः" इति [कौ०ब्रा०अ०४।क०१९]। तत्र किं जीवो वेदितव्यत्वेनोपदिश्यते उत मुख्यः प्राण उत परमात्मेति विषयः, किं तावत् प्राप्तं प्राण इति कुतः यस्य वै तत् कर्मेति श्रवणात्, परिस्पन्दलक्षणस्य च कर्मणः प्राणाश्रयत्वात्, वाक्यशेषे चाथास्मिन् प्राण एवैकधा भवतीति प्राणशब्दश्रवणात् प्राणशब्दस्य च मुख्ये प्राणे प्रसिद्धत्वात्, ये चैते पुरस्ताद्बालाकिनाऽऽदित्ये पुरुषश्चन्द्रमसि पुरुष इत्येवमादयः पुरुषा निर्दिष्टाः तेषामपि भवति प्राणः कर्ता प्राणावस्थाविशेषत्वादादित्यादिदेवतात्मनां कतम एको देव इति

जगद्वाचित्वात् विषयमाह। कौषीतकीति। बलाकाया अपत्यं बालाकिर्ब्राह्मणस्तं प्रति राजोवाच। यो वा इति। न केवलमादित्यादीनां कर्त्ता किन्तु सर्वस्य जगत इत्याह। यस्येति। एतच्छब्दस्य कर्म क्रियते इति व्युत्पत्त्या कार्यमित्यर्थः। कर्मेतिशब्दस्य योगरूढिभ्यां संशयमाह। तत्रेति। पूर्वत्रैकवाक्यस्थसदादिशब्दबलादसच्छब्दो नीतः, इह तु वाक्यभेदात् ब्रह्म ते ब्रवाणीति बालाकिवाक्यस्थब्रह्मशब्देन प्राणादिशब्दो ब्रह्मपरत्वेन नेतुमशक्य इति प्रत्युदाहरणेन पूर्वपक्षमाह। किं तावदिति। पूर्वपक्षे वाक्यस्य प्राणाद्युपास्तिपरत्वाद्ब्रह्मणि समन्वयासिद्धिः सिद्धान्ते ज्ञेये समन्वयसिद्धिरिति फलं। अथ सुषुप्तौ द्रष्टेति शेषः। श्रुतं पुरुषकर्तृत्वं प्राणस्य कथमित्यत आह। ये चैत इति। सूत्रात्मकप्राणस्य विकाराः सूर्यादय इत्यत्र मानमाह। कतम इति। यस्य महिमानः सर्वे देवा इति पूर्ववाक्ये दर्शितं

प्राण इति स ब्रह्मेत्याचक्षते इति श्रुत्यन्तरप्रसिद्धेः, जीवो वा-यमिह वेदितव्यतयोपदिश्यते तस्यापि धर्माधर्मलक्षणं कर्म शक्यते आवयितुं, यस्य वै तत् कर्मेति सोऽपि भोक्तृत्वाद्भोगोपकरणभूतानामेतेषां पुरुषाणां कर्तोपपद्यते, वाक्यशेषे च जीवलिङ्गमवगम्यते। यत्कारणं वेदितव्यतयोपन्यस्तस्य पुरुषाणां कर्तृत्वं वेदनायोपेतं बालाकिं प्रतिबुबोधयिषुरजातशत्रुः सुप्तं पुरुषमामन्त्र्यामन्त्रणशब्दाश्रवणात् प्राणादीनामभोक्तृत्वं प्रतिबोध्य यष्टिघातोत्थापनात् प्राणादिव्यतिरिक्तं जीवं भोक्तारं प्रतिबोधयति, तथा परस्तादपि जीवलिङ्गमवगम्यते। तद्यथा "श्रेष्ठी स्वैर्भुङ्क्ते यथावा स्वाः श्रेष्ठिनं भुञ्जन्त्येवमेवैष प्रज्ञात्मैतैरात्मभिर्भुङ्क्ते एवमेवैते आत्मान एतमात्मानं भुञ्जन्ति" इति [कौ०ब्रा०

अतः सर्वदेवात्मकत्वात् स प्राणो ब्रह्म यत्परोक्षं शास्त्रैकवेद्यत्वादित्यर्थः। पूर्वपक्षान्तरमाह। जीवो वेति। यत्कारणं यस्माज्जीवं बोधयति तस्मादस्ति सुप्तोत्थापनं जीवलिङ्गमिति योजना। तौ ह पुरुषं सुप्तमाजग्मतुः तं राजाह दृहत्यागुरवासः सोम राजन्नित्यामन्त्र्य सम्बोध्य सम्बोधनानभिज्ञत्वात् प्राणादेरनात्मत्वमुक्त्वा यष्ट्याघातेनोत्थाप्य जीवं बोधितवान् इत्यर्थः। श्रेष्ठी प्रधानः स्वैर्भृत्यैर्ज्ञातिभिरुपहृतं भुङ्क्ते स्वाः ज्ञातयश्च तमुपजीवन्ति। एवं जीवोऽपि आदित्यादिभिः प्रज्ञात्मादिना भोगोपकरणैर्भुङ्क्ते ते च, हविर्ग्रहणादिना जीवमुपजीवन्तीत्युक्तं भोक्तृत्वं जीवलिङ्गं। ननु प्राण एवैकधा भवतीति श्रुतेः प्राणशब्दो जीवे कथमित्यत आह। प्राणभृत्त्वाच्चेति। सूत्रादहिरेव सिद्धान्तयति। एवमिति। स च बालाकिर्ब्रह्मत्वभ्रान्त्या यष्टिलिङ्गरूपान् पुरुषानुक्त्वा राज्ञा निरस्ततूष्णीं स्थितः, त्वदुक्तं ब्रह्म मयेत्युक्त्वा राज्ञोच्यमानं ब्रह्मेति वक्तव्यमन्यथा राज्ञोऽपि मृषावादित्वप्रसङ्गादि-

अ०४।क०१०।] प्राणभृत्वाच्च जीवस्योपपन्नं प्राणशब्दत्वं। तस्माज्जीवमुख्यप्राणयोरन्यतर इह ग्रहणीयो न परमेश्वरः, तस्मिन्ज्ञानवगमादिति, एवं प्राप्ते ब्रूमः। परमेश्वर एवायमेतेषां पुरुषाणां कर्ता स्यात्, कस्मात्, उपक्रमसामर्थ्यात्, इह हि बाष्किरजातशत्रुणा सह ब्रह्म ते ब्रवाणि इति संवदितुमुपचक्रमे, स च कतिचिदादित्याद्यधिकरणान् पुरुषान् मुख्यब्रह्मदृष्टिभाज उक्त्वा तूष्णीं बभुव, तमजातशत्रुर्मृषा वै खलु मा संवदिष्ठा ब्रह्म ते प्रब्रवाणीत्यमुख्यब्रह्मवादितयापोद्य तत्कर्तारमन्यं वेदितव्यतयोपचिक्षेप। यदि सोऽप्यमुख्यब्रह्मदृष्टिभाक् स्यादुपक्रमो बाध्येत, तस्मात् परमेश्वर एवायं भवितुमर्हति। कर्तृत्वञ्चैतेषां पुरुषाणां न परमेश्वरादन्यस्य स्वातन्त्र्येणावकल्पते। यस्य वै तत् कर्मेत्यपिनायं परिस्पन्दलक्षणस्य धर्माधर्मलक्षणस्य वा

त्याह। यदि सोऽपीति। वेदितव्योऽपीत्यर्थः। मुख्यं पुरुषकर्तृत्वं ब्रह्मण एव लिङ्गं प्राणजीवयोस्तन्नियम्यत्वेनास्वातन्त्र्यादित्याह। कर्तृत्वञ्चेति। यदुक्तं चलनादृश्योर्वाचकः कर्मशब्दः प्राणजीवयोरुपस्थापक इति तन्नेत्याह। यस्येति। अनेकार्थकाच्छब्दादन्यतरार्थस्य प्रकरणादुपपदाद्वा ग्रहणं न्याय्यं। अत्र *प्रकरणोपपदयोरसत्त्वात् कस्य ग्रहणमिति संशये पुरुषकर्तृपदसान्निध्यात् क्रियत इति यौगाच्चलद्रूपमित्यर्थः। एतत्कर्मेतिप्रकृतपरामर्शात् पुरुषाः पूर्वोक्ताः कर्मशब्देन निर्दिश्यन्तामित्यत आह। नापीति। पौनरुक्त्यापातात् पुरुषाणां नपुंसकैकवचनेन परामर्शायोगाच्चेत्यर्थः। ननु पुरुषेत्यादकस्य कर्तुर्व्यापारः करोत्यर्थ उत्पादनं तस्य फलं पुरुषजन्म तदन्यतरवाची कर्मशब्दोऽस्त्वित्यत आह। नापीति। कर्तृशब्देनेति क्रियाफलाभ्यां

---

* प्रकरणोपपदशब्दयोरिति सो० पु० टी०।

कर्मणो निर्देशः तयोरन्यतरस्याप्यप्रकृतत्वात् असंशब्दितत्वाच्च। नापि पुरुषाणां अयं निर्देशः, एतेषां पुरुषाणां कर्तेत्येवं तेषां निर्दिष्टत्वात्, लिङ्गवचनविगानाच्च। नापि पुरुषविषयस्य करोत्यर्थस्य क्रियाफलस्य वायं निर्देशः, कर्तृशब्देनैव तयोरुपात्तत्वात्, परिशेषात् प्रत्यक्षसन्निहितं जगत् सर्वनाम्नैतच्छब्देन निर्दिश्यते, क्रियत इति च तदेव जगत्कर्म। ननु जगदप्यप्रकृतमसंशब्दितञ्च, सत्यमेतत्, तथाप्यसति विशेषोपादाने साधारणेनार्थेन सन्निधानेन सन्निहितवस्तुमात्रस्यायं निर्देश इति गम्यते न विशिष्टस्य कस्यचित्, विशेषसन्निधानाभावात्। पूर्वत्र च जगदेकदेशभूतानां पुरुषाणां विशेषोपादानादविशेषितं जगदेवेहोपादीयत इति गम्यते। एतदुक्तं भवति, य एतेषां पुरुषाणां जगदेकदेशभूतानां कर्ता किमनेन विशेषेण यस्य कृत्यमेव जगदविशेषितं कर्मेति। वाशब्द एकदेशावच्छिन्नकर्तृत्वव्यावृत्त्यर्थः। ये बालाकिना ब्रह्मत्वाभिमताः

विना कर्तृत्वायोगात् कर्तृशब्देनैव तयोर्ग्रहणमित्यर्थः। जगतोऽपि प्रकरणोपपदे *स्त इत्युक्तमङ्गीकरोति। सत्यमिति। प्रकरणादिकं हि सर्वनाम्नः सङ्कोचकं तस्मिन्नसति सामान्येन बुद्धिस्थं सर्वमेव गृह्यते, अत्र च सङ्कोचकासत्त्वात् सर्वार्थकेन सर्वनाम्ना बुद्धिस्थस्य कार्यमात्रस्य कर्मशब्दो वाचक इत्याह। तथापीति। किञ्च जगदेकदेशोक्त्या जगत् प्रकृतमित्याह। पूर्वत्रेति। जगदूहे पुरुषाणामपि ग्रहात् प्रथमुक्तिरर्थेत्यत आह। एतदुक्तमिति। स वेदितव्य इति सम्बन्धः। पुरुषमात्रनिरूपितं कर्तृत्वमिति भ्रान्तिनिरासार्थो वाशब्दः। ब्राह्मणा

---

* न स्त इति सो० २ टी०।

पुरुषाः कीर्तितास्तेषामब्रह्मत्वख्यापनाय विशेषोपादानं, एवं ब्राह्मणपरिव्राजकन्यायेन सामान्यविशेषाभ्यां जगतः कर्ता वेदितव्यतयोपदिश्यते, परमेश्वरश्च सर्वजगतः कर्ता सर्ववेदान्तेष्ववधारितः॥

जीवमुख्यप्राणलिङ्गान्नेति चेत्तद्व्याख्यातं॥ १७॥

अथ यदुक्तं वाक्यशेषगतात् जीवलिङ्गात् मुख्यप्राणलिङ्गाच्च तयोरेवान्यतरस्येह ग्रहणं न्याय्यं न परमेश्वरस्येति तत्परिहर्तव्यं। अत्रोच्यते, परिहृतं तन्नोपासाचैविध्यादाश्रितत्वादिह तद्योगादित्यत्र। त्रिविधं ह्युपासनमेवं सति प्रसज्येत, जीवोपासनं मुख्यप्राणोपासनं ब्रह्मोपासनं चेति। न चैतत् न्याय्यं, उपक्रमोपसंहाराभ्यां हि ब्रह्मविषयत्वमस्य वाक्यस्यावगम्यते। तत्रोपक्रमस्य तावत् ब्रह्मविषयत्वं दर्शितं। उपसंहारस्यापि निरतिशयफलश्रवणात् ब्रह्मविषयत्वं दृश्यते "सर्वान् पाप्मनोऽपहत्य सर्वेषाञ्च भूतानां श्रैष्ठ्यं स्वाराज्यमाधिपत्यं

भोजयितव्याः परिव्राजकास्त्वित्यत्र यथा ब्राह्मणशब्दः परिव्राजकान्यविषयः तथात्र कर्मशब्दः पुरुषान्यजगद्वाचीत्याह। एवमिति। अस्तु जगत्कर्त्ता वेदितव्यः परमेश्वरस्य किमायातमित्यत आह। परमेश्वरेति॥

सिद्धान्तमुक्त्वा पूर्वपक्षबीजमनूद्य दूषयति। जीवमुख्यप्राणलिङ्गान्नेति चेत्तद्व्याख्यातमिति। उक्तमेव स्मारयति। त्रिविधमिति। श्रैष्ठ्यं गुणाधिक्यं, आधिपत्यं नियन्तृत्वं, स्वाराज्यमनियम्यत्वमिति भेदः सम्भवति। एकवाक्यत्वे वाक्यभेदो हि नेष्यत इत्युक्तं चेत्

पर्येति य एवं वेद" इति। नन्वेवं सति प्रतर्दनवाक्यनिर्णयेऽपि वेदमपि वाक्यं निर्णीयेत, न निर्णीयते यस्य वैतत् कर्मेत्यस्य ब्रह्मविषयत्वेन तत्रानिर्धारितत्वात्, तस्मादत्र जीवमुख्यप्राणशङ्का पुनरुत्पद्यमाना निवर्त्तते। प्राणशब्दोऽपि ब्रह्मविषयो दृष्टः "प्राणबन्धनं हि सोम्य मनः" इत्यत्र, जीवलिङ्गमप्युपक्रमोपसंहारयोर्ब्रह्मविषयत्वादभेदाभिप्रायेण योजयितव्यं॥

अन्यार्थन्तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके॥ १८॥

अपि च नैवात्र विवदितव्यं, जीवप्रधानं वा इदं वाक्यं स्यात् ब्रह्मप्रधानं वेति, यतोऽन्यार्थं जीवपरामर्शं ब्रह्मप्रतिपत्त्यर्थं अस्मिन् वाक्ये जैमिनिराचार्यो मन्यते, कस्मात्, प्रश्नव्याख्यानाभ्यां, प्रश्नस्तावत् सुषुप्तपुरुषबोधनेन प्राणादिव्यतिरिक्ते जीवे प्रतिबोधिते पुनर्जीवव्यतिरिक्तविषयो दृश्यते, "क्वैष एतद्बालाके पुरुषोऽशयिष्ट क्व वा एतदभूत् कुत एतदागादिति। [कौ० ब्रा०अ० ४।क०१९] प्रतिवचनमपि यदा सुप्तः स्वप्नं न कञ्चन

पुनरुक्तिः स्यादिति प्रङ्क्ते। नन्वेवमिति। कर्मशब्दस्य रूढ्या पूर्वपक्षप्राप्तो तन्निरासार्थमस्यारम्भो युक्त इत्याह। नेत्यादिना। प्राणशब्द जीवलिङ्गयोर्गतिमाह। प्राणशब्दोऽपीति।

मनो जीवः जीवलिङ्गेन ब्रह्मैव लक्ष्यते इत्युक्तं, इदानीं तल्लिङ्गेन जीवोक्तिद्वारा ब्रह्म ग्राह्यमित्याह। अन्यार्थमिति। जीवपरामर्शस्य जीवाधिकरणब्रह्मज्ञानार्थत्वे प्रश्नमाह। क्वैष इति। हे बालाके एतच्छयनं विशेषज्ञानाभावरूपं यथा स्यात्तथैष पुरुषः क्वाशयिष्ट कस्मिन्नधिकरणे शयनं कृतवानित्यर्थः। एकीभावाश्रयज्ञानार्थं पृच्छति। क्व वा इति। एतद्भवनमेकीभावरूपं यथा

पश्यत्यत्रास्मिन् प्राण एवैकधा भवतीत्यादि, एतस्मादात्मनः सर्वे प्राणा यथायतनं विप्रतिष्ठन्ते प्राणेभ्यो देवा देवेभ्यो लोका इति च [कौ०ब्रा०अ०४क०१८।१०] सुषुप्तिकाले च परेण ब्रह्मणा जीव एकतां गच्छति, परस्माच्च ब्रह्मणः प्राणादिकं जगज्जायत इति वेदान्तमर्यादा। तस्माच्चास्य जीवस्य निःसम्बोध-स्वच्छतारूपः स्वापः उपाधिजनितविशेषविज्ञानरहितं स्वरूपं यत्सङ्गंशरूपमागमनं सोऽत्र परमात्मा वेदितव्यतया श्रावित इति गम्यते। अपि चैवमेके शाखिनो वाजसनेयिनोऽस्मिन्नेव बालाक्यजातशत्रुसंवादे स्पष्टं विज्ञानमयशब्देन जीवमाम्नाय तद्व्यतिरिक्तं परमात्मानमामनन्ति, य एष विज्ञानमयः पुरुषः, क्व वै तदभूत् कुत एत-

---

स्यात्तथा एष पुरुषः क्वाभूत्सुप्तः, केनैक्यं प्राप्नोतीति यावत्। उत्थानापादानं पृच्छति। कुत इति। एतदागमनमैक्यभंशरूपं यथा स्यात्तथा पुरुषः कुत आगत इत्यर्थः। प्रश्नमुक्त्वा व्याख्यानमाह। प्रतिवचनमिति। शयनभवनयोराधारः उत्थानापादानञ्च प्राणशब्दितं ब्रह्मैवेत्यर्थः। उत्तरे प्राणोक्तेः प्रश्नोऽपि प्राणविषय *इत्यत आह। सुषुप्तिकाले चेति। जगद्धेतुत्वजीवैक्याभ्यां प्राणोऽत्र ब्रह्मेत्यर्थः। जीवोक्तेरन्यार्थत्वमुपसंहरति। तस्मादिति। निःसम्बोधता विशेषधीशून्यता, स्वच्छता विक्षेपमलशून्यता। भेदभ्रान्तिशून्यतास्वरूपमैक्यमाह। उपाधेति। प्रश्नव्याख्यानयोर्ब्रह्मविषयत्वे शाखान्तरसंवादमाह। अपि चैवमेके शाखिन इति। ननु तत्राकाशः सुषुप्तिस्थानमुक्तं न ब्रह्मेत्यत आह। आकाशेति। उपाधिद्वारा प्रमात्मजन्महेतुत्वाच्चाकाशो ब्रह्मेत्याह। सर्व इति। एवं जीवनिरासार्थकत्वेन सूत्रं व्याख्याय प्राणनिरासपरत्वेनापि व्याचष्टे। प्राणेति। अस्मिन् वाक्ये प्राणोप-

---

* इत्येवाहेति सो० २ पु० टी०।

दागादिति प्रश्ने प्रतिवचनेऽपि य एषोऽन्तर्हृदय आकाश-स्तस्मिन् शेत इति, आकाशशब्दस्य परमात्मनि प्रयुक्तो दह-रोऽस्मिन्नन्तराकाश इति, अत्र सर्व एत आत्मानो व्युच्चरन्तीति चोपाधिमतामात्मनामन्यतो व्युच्चरणमामनन्तः परमात्मान-मेव कारणत्वेनामनन्तीति गम्यते। प्राणनिराकरणस्यापि सुषु-प्तपुरुषोत्थापनेन प्राणादिव्यतिरिक्तोपदेशोऽभ्युच्चयः ॥

वाक्यान्वयात् ॥ १९ ॥

बृहदारण्यके मैत्रेयीब्राह्मणेऽभिधीयते "न वा अरे पत्युः काम-माय" इत्युपक्रम्य "न वा अरे सर्वस्य कामाय सर्वं प्रियम्भवत्यात्म-नस्तु कामाय सर्वं प्रियं भवति आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेय्यात्मनो वा अरे दर्शनेन श्रव-णेन मत्या विज्ञानेनेदं सर्वं विदितं" इति। तत्रैतद्विचिकित्स्यते किं विज्ञानात्मैवायं द्रष्टव्यश्रोतव्यत्वादिरूपेणोपदिश्यते आ-होस्वित् परमात्मेति। कुतः पुनरेषा विचिकित्सा, प्रियसंसूचि-

---

देशं ब्रह्मज्ञानार्थं मन्यत जैमिनिः, उक्तप्रश्नव्याख्यानाभ्यां वाक्यस्य ब्रह्म-परत्वात्। अपि चैके शाखिनः एवमेव प्राणातिरिक्तं जीवात्मानमाम-नन्तः प्राणस्य वाक्यार्थत्वं वारयन्तीति सूचयोजना। अतिरिक्तजी-वोपदेशः प्राणनिराकरणस्याप्यभ्युच्चयो हेत्वन्तरमिति भाष्यार्थः, तस्मादिदं वाक्यं ब्रह्मणि समन्वितमिति सिद्धं॥

वाक्यान्वयात्। विषयवाक्यमाह। बृहदिति। पत्यादेरात्मशेषत्वेन प्रियत्वादात्मैव सर्वशेषी प्रियतमः, अतोऽन्यत्परित्यज्यात्मैव द्रष्टव्यः, दर्शनार्थं श्रवणादिकं कार्यमित्यर्थः। प्रियसंसूचितेनेति प्रतिज्ञाया-

तेनात्मना भोक्तोपक्रमादिज्ञानात्मोपदेश इति प्रतिभाति, तथात्मविज्ञानेन सर्वविज्ञानोपदेशात् परमात्मोपदेश इति, किं तावत् प्राप्तं विज्ञानात्मोपदेश इति। कस्मात्, उपक्रमसामर्थ्यात्। पतिजायापुत्रवित्तादिकं हि भोग्यभूतं सर्वं जगदात्मार्थतया प्रियं भवतीति प्रियसंसूचितं भोक्तारमात्मानमुपक्रम्यानन्तरमिदमात्मनो दर्शनादुपदिश्यमानं कस्यान्यस्यात्मनः स्यात्। मध्येऽपीदं महद्भूतमनन्तमपारं विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञास्तीति प्रकृतस्यैव महतो भूतस्य द्रष्टव्यस्य भूतेभ्यः समुत्थानं विज्ञानात्मभावेन ब्रुवन् विज्ञानात्मन एवेदं द्रष्टव्यत्वं दर्शयति। तथा "विज्ञातारमरे केन विजानीयात्" इति कर्तृवचनेन शब्देनोपसंहरणविज्ञानात्मानमेवेहोपदिष्टं दर्शयति, तस्मादात्मविज्ञानेन सर्वविज्ञानवचनं भोक्तार्थत्वात् भोग्यजातस्यौपचारिकं द्रष्टव्यमिति, एवं प्राप्ते ब्रूमः। परमात्मोपदेश एवायं, कस्मात् वाक्यान्वयात्। वाक्यं हीदं पौर्वापर्येणावेक्ष्य-

---

दिभिः प्रियैर्भोग्यैर्जीवतयानुमितेनेत्यर्थः। यथा ब्रह्म ते ब्रवाणीत्युपक्रमबलाद्वाक्यस्य ब्रह्मपरत्वं तथाच जीवोपक्रमादस्य वाक्यस्य जीवपरत्वमिति दृष्टान्तेन पूर्वपक्षयति। किं तावदिति। पूर्वपक्षे वाक्यस्य जीवोपास्तिपरत्वं सिद्धान्ते ज्ञेये प्रत्यग्ब्रह्मणि समन्वय इति फलं। इदं प्रत्यक् महदपरिच्छिन्नं भूतं सत्यमनन्तं नित्यमपारं सर्वगतश्चिदेकरसं एतेभ्यः कार्यकारणात्मना जायमानेभ्यो भूतेभ्यः सामान्येनोत्थाय भूतोपाधिकं जन्मानुभूय तान्येव भूतानि नीयमानान्यनुरुध्य विनश्यति।

माणं परमात्मानं प्रत्यन्वितावयवं लक्ष्यते कथमिति तदुपपाद्यते, "अमृतत्वस्य तु नाशास्ति वित्तेन" इति याज्ञवल्क्यादुपश्रुत्य "येनाहं नामृता स्यां किमहन्तेन कुर्यां यदेव भगवान् वेद तदेव मे ब्रूहि" इति अमृतत्वमाशासानायै मैत्रेय्यै याज्ञवल्क्य आत्मविज्ञानमुपदिशति, न चान्यत्र परमात्मविज्ञानादमृतत्वमस्तीति श्रुतिस्मृतिवादा वदन्ति। तथा चात्मविज्ञानेन सर्वविज्ञानमुच्यमानं नान्यत्र परमकारणविज्ञानान्मुख्यमवकल्पते, न चैतदौपचारिकमाश्रयितुं शक्यं, यत्कारणमात्मविज्ञानेन सर्वविज्ञानं प्रतिज्ञायानन्तरेण ग्रन्थेन तदेवोपपादयति "ब्रह्म तं परादाद्योऽन्यत्रात्मनो ब्रह्म वेद" इत्यादिना, यो हि ब्रह्मक्षत्रादिकं जगदात्मनोऽन्यत्र स्वातन्त्र्येण लब्धसद्भावं पश्यति तं मिथ्यादर्शिनं तदेव मिथ्यादृष्टं ब्रह्मक्षत्रादिकं जगत् पराकरोति इति भेददृष्टिमपोद्येदं सर्वं यदयमात्मेति सर्वस्य वस्तुजातस्यात्मात्यतिरेकमवतारयति। दुन्दुभ्यादिदृष्टान्तैश्च तमेवात्यतिरेकं द्रढयति। "अस्य महतो भूतस्य निःश्वसितमेत-

---

औपाधिकमरणानन्तरं विशेषधीर्नास्तीति श्रुत्यर्थः। विज्ञातारं विज्ञानकर्तारं, भोक्तरि ज्ञाते भोग्यं ज्ञातमित्युपचारः। मोक्षसाधनज्ञानगम्यत्वादिलिङ्गैर्वाक्यस्यान्वयाद्ब्रह्मण्येव तात्पर्यावगमात् ब्रह्मप्रमापकत्वमिति सिद्धान्तयति। एवमिति। वित्तेन तत्साध्येन कर्मणेत्यर्थः। भेदनिन्दापूर्वकमभेदसाधनेनैकविज्ञानात् सर्वविज्ञानस्य समर्थनादौपचारिकत्वं न युक्तमित्याह। न चैतदौपचारिकमित्यादिना। पराकरोति श्रेयोमार्गाद् भ्रंशयति। यथा दुन्दुभिशङ्खवीणाशब्दसामान्यग्रहणेनैव गृह्यमाणास्तदवान्तरविशेषाः शुक्ति-

दृग्वेदः" इत्यादिना च प्रकृतस्यात्मनो नामरूपकर्मप्रपञ्चकारणतां व्याचक्षाणः परमात्मानमेवैनं गमयति। तथैवैकायनप्रक्रियायामपि सविषयस्य सेन्द्रियस्य सान्तःकरणस्य प्रपञ्चस्यैकायनमनन्तरमबाह्यं कृत्स्नं प्रज्ञानघनं व्याचक्षाणः परमात्मानमेवैनं गमयति, तस्मात् परमात्मन एवायं दर्शनाद्युपदेश इति गम्यते। यत्पुनरुक्तं *प्रियमंसूचनोपक्रमाद्विज्ञानात्मन एवायं दर्शनाद्युपदेश इत्यत्र ब्रूमः॥

प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः॥ २०॥

अस्यत्र प्रतिज्ञा "आत्मनि विज्ञाते सर्वमिदं विज्ञातं भवतीदं सर्वं यदयमात्मा" इति च तस्याः प्रतिज्ञायाः सिद्धिं सूचयत्येतल्लिङ्गं यत्प्रियमंसूचितस्यात्मनो द्रष्टव्यत्वादिसङ्कीर्तनं। यदि हि विज्ञानात्मा परमात्मनोऽन्यः स्यात्, ततः परमात्मविज्ञानेऽपि विज्ञानात्मा न विज्ञात इत्येकविज्ञानेन सर्वविज्ञानं यत्प्रतिज्ञातं तद्धीयेत, तस्मात् प्रतिज्ञासिद्ध्यर्थं विज्ञानात्मपरमात्मनोरभेदांशेनोपक्रमणमित्याश्मरथ्य आचार्यो मन्यते॥

ग्रहणग्राह्यरजतवत् सामान्ये कल्पितास्ततो न भिद्यन्ते, एवमात्मभानभास्यं सर्वमात्ममात्रमिति निश्चितमित्याह। दुन्दुभ्यादीति। एवमेकविज्ञानेन सर्वविज्ञानप्रतिज्ञाया मुख्यत्वाद्ब्रह्मनिश्चयः। सर्वसृष्टित्वलिङ्गादपीत्याह। अस्य महत इति। ऋग्वेदादिकं नाम, इष्टं हुतमिति कर्म्म, अयञ्च लोकः परञ्च लोक इति रूपं। किञ्च स यथा सर्वासामपां समुद्र एकायनमिति कणिडकया सर्वप्रपञ्चस्य मुख्यतयाधारत्वमात्मनो ब्रह्मत्वे लिङ्गमित्याह। तथैवैकायनेति॥

जीवब्रह्मणोर्भेदाभेदसत्त्वादभेदांशेनेदं जीवोपक्रमणं प्रतिज्ञासाधकमित्याश्मरथ्यमतं॥

---

* प्रियमंसूचिनोपक्रमादिति वर्ध० का० पु० पाठः।

उत्क्रमिष्यत एवम्भावादित्यौडुलोमिः ॥ २१ ॥

विज्ञानात्मन एव देहेन्द्रियमनोबुद्धिसङ्घातोपाधिसम्पर्कात् कलुषीभूतस्य ज्ञानध्यानादिसाधनानुष्ठानात् सम्प्रसन्नस्य देहादिसङ्घातादुत्क्रमिष्यतः परमात्मनैक्योपपत्तेरिदमभेदेनोपक्रमणमित्यौडुलोमिराचार्यो मन्यते। श्रुतिश्चैवं भवति "एष सम्प्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते" इति। क्वचिच्च जीवाश्रयमपि नामरूपं नदीनिदर्शनेन *ज्ञायते,

"यथा नद्यः स्यन्दमानाः समुद्रे-
ऽस्तं गच्छन्ति नामरूपे विहाय।
तथा विद्वान्नामरूपाद्विमुक्तः
परात्परं पुरुषमुपैति दिव्यं" ॥ इति ॥

यथा लोके नद्यः स्वाश्रयमेव नामरूपं विहाय समुद्रमुपयन्ति एवं जीवोऽपि स्वाश्रयमेव नामरूपं विहाय परं पुरुषमुपैति इति हि तत्रार्थः प्रतीयते दृष्टान्तदार्ष्टान्तिकयोस्तुल्यतायै ॥

सत्यसंसारदशायां भेद एव मुक्तावेवाभेद इत्यौडुलोमिमतं। तत्र मानमाह। श्रुतिश्चेति। समुत्थानमुत्क्रान्तिः। ननु संसारस्यौपाधिकत्वात् सर्वदैवाभेद इत्याशङ्क्य दृष्टान्तबलेन संसारस्य स्वाभाविकत्वमित्याह। क्वचिच्चेति। यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहायेति नदीनिदर्शनं व्याचष्टे। यथालोक इति ॥

---

* ज्ञापयतीति वर्ध० का० पु० पाठः।

अवस्थितेरिति काशकृत्स्नः ॥ २२ ॥

अस्यैव परमात्मनोऽनेनापि विज्ञानात्मभावेनावस्थानादुपपन्नमिदमभेदेनोपक्रमणमिति काशकृत्स्न आचार्यो मन्यते। तथा च ब्राह्मणं अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्यकरवाणीत्येवंजातीयकं परस्यैवात्मनो जीवभावेनावस्थानं दर्शयति। मन्त्रवर्णश्च "सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाभिवदन् यदास्ते" इत्येवंजातीयकः। न च तेजःप्रभृतीनां सृष्टौ जीवस्य पृथक् सृष्टिः श्रुता येन परस्मादात्मनोऽन्यस्तद्विकारो जीवः स्यात्। काशकृत्स्नस्याचार्यस्याविकृतः परमेश्वरो जीवो नान्य इति मतं। आश्मरथ्यस्य तु यद्यपि जीवस्य परस्मादनन्यत्वमभिप्रेतं तथापि प्रतिज्ञासिद्धेरिति स्वापेक्षत्वाभिधानात् कार्यकारणभावः कियानप्यभिप्रेत इति गम्यते। औडुलोमिपक्षे पुनः स्वरूपमेवावस्थान्तरापेक्षौ भेदाभेदौ गम्येते। तच्च काशकृत्स्नीयं मतं श्रुत्यनुसारीति गम्यते प्रतिपिपादयिषितार्थानुसारात् तत्त्वमसीत्यादिश्रुतिभ्यः, एवञ्च सति तज्ज्ञानादमृतत्वमवकल्पते, विकारात्मकत्वे हि जीवस्याभ्युपगम्यमाने विका-

---

सिद्धान्तमाह। अवस्थितेरिति। अत्यन्ताभेदज्ञापनार्थं जीवमुपक्रम्य द्रष्टव्यत्वादयो ब्रह्मधर्मा उक्ता इत्यर्थः। एतेन जीवलिङ्गानां ब्रह्मपरत्वकथनार्थमिदमधिकरणं न भवति, प्रतर्दनाधिकरणे कथितत्वान्नापि जीवानुवादेन ब्रह्मप्रतिपादनार्थं सुषुप्त्युत्क्रान्त्योरित्यत्र गतत्वात्, अतो व्यर्थमिदमधिकरणमिति निरस्तं जीवोद्देशेन ब्रह्मत्वप्रतिपादने भेदोऽप्यावश्यक इति भेदाभेदश्रुतिप्राप्तौ कल्पितभेदेनोद्देश्यत्वादिकं स्वतोऽत्यन्ताभेद इति ज्ञापनार्थं अस्यारम्भात्, ज्ञायते चात्र लिङ्गं आत्मशब्देनोपक्रान्तस्य जीवस्य धर्मिणो ब्रह्मणो धर्म्यन्तरस्य ग्रहणं वि-

रस्य प्रकृतिसम्बन्धे प्रलयप्रसङ्गान्न तज्ज्ञानादमृतत्वमवकल्पेत, अ-तश्च स्वाश्रयस्य नामरूपस्यासम्भवात् उपाध्याश्रयनामरूपं जीवं उपचर्यते, अत एवोत्पत्तिरपि जीवस्य क्वचिदग्निविस्फुलिङ्गोदाहरणेन *श्रूयमाणोपाध्याश्रयैव वेदितव्या। यदप्युक्तं प्रकृतस्यैव महतो भूतस्य द्रष्टव्यस्य भूतेभ्यः समुत्थानं विज्ञानात्मभावेन दर्शयन् विज्ञानात्मन एवेदं द्रष्टव्यत्वं दर्शयतीति, तत्रापीयमेव चिन्ता योजयितव्या। 'प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः'। इदमत्र प्रतिज्ञातं "आत्मनि वेदिते सर्वमिदं विदितं भवतीदं सर्वं यदयमात्मा" इति च, उपपादितञ्च सर्वस्य नामरूपकर्मप्रपञ्चस्यैकप्रभवत्वादेकप्रलयत्वाच्च दुन्दुभ्यादिदृष्टान्तैश्च कार्यकारणयोरव्यतिरेकप्रतिपादनात् तस्या एव प्रतिज्ञायाः सिद्धिं सूचयत्येतल्लिङ्गं यन्महतो भूतस्य भूतेभ्यः समुत्थानं विज्ञानात्मभावेन कथितमित्याश्मरथ्य आचार्यो मन्यते। अभेदे हि सत्येकविज्ञानेन सर्वविज्ञानं प्रतिज्ञातमवकल्पत इति। 'उत्क्रमिष्यत एवम्भावादित्यौडुलोमिः'। उत्क्रमिष्यतो विज्ञानात्मनो

नैव ब्रह्मधर्मकथनं भेदाभेदे धर्मिद्वयग्रहः स्यादिति मन्तव्यं। धीरः सर्वज्ञः। सर्वाणि रूपाणि कार्याणि विचित्य सृष्ट्वा तेषां नामानि च कृत्वा तेषु बुद्ध्यादिषु प्रविश्याभिवदनादिकं कुर्वन् यो वर्तते तं विद्वानिहैवामृतो भवतीति मन्त्रोऽपि जीवपरयोरैक्यं दर्शयतीत्याह। मन्त्रेति। जीवस्य ब्रह्मविकारत्वान्नैक्यमित्यत आह। न च तेज इति। मतत्रयं विभज्य दर्शयति। काश्येत्यादिना। कियानयीति। अभेदवद्भेदोऽपीत्यर्थः। तत्रान्यस्य मतस्योपादेयत्वमाह। तत्र काश्येति। सोऽयं

---

* श्रूयमाणेति सर्व० का० पु० पाठः।

ज्ञानध्यानादिसामर्थ्यात् सम्प्रसन्नस्य परेणात्मनैक्यसम्भवादि-दमभेदाभिधानमित्यौडुलोमिराचार्यो मन्यते। 'अवस्थितेरिति काशकृत्स्नः'। अस्यैव परमात्मनोऽनेनापि विज्ञानात्मभावेना-वस्थानादुपपन्नमिदमभेदाभिधानमिति काशकृत्स्न आचार्यो मन्यते। ननूच्छेदाभिधानमेतत् 'एतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञास्ति' इति कथमेतदभेदा-भिधानं। नैष दोषः, विशेषविज्ञानविनाशाभिप्रायमेतद्विना-शाभिधानं नात्मोच्छेदाभिप्रायं, अत्रैव मा भगवान् मुमुहन्न प्रेत्य संज्ञास्तीति पर्यनुयुज्य स्वयमेव श्रुत्याऽर्थान्तरस्य दर्शित-त्वात् "न वा अरेऽहं मोहं ब्रवीम्यविनाशी वा अरेऽयमात्मा-नुच्छित्तिधर्मा मात्रासंसर्गस्त्वस्य भवति" इति। एतदुक्तं भवति कूटस्थनित्य एवायं विज्ञानघन आत्मा नास्योच्छेदप्रसङ्गोऽस्ति, मात्राभिस्त्वस्य भूतेन्द्रियलक्षणाभिरविद्याकृताभिरसंसर्गो वि-द्यया भवति, संसर्गाभावे च तत्कृतस्य विशेषविज्ञानस्याभा-वान्न प्रेत्य संज्ञास्तीत्युक्तमिति। यदप्युक्तं "विज्ञातारमरे केन वि-

---

देवदत्त इतिवत्तत्त्वमस्यादिवाक्येभ्यः परापरयोरत्यन्ताभेदः प्रति-पादयितुमिष्टोऽर्थः, तदनुसारित्वादित्यर्थः। ज्ञानान्मुक्तिश्रुत्यन्यथा-नुपपत्त्याप्ययमेव पक्ष आदेय इत्याह। एवञ्चेति। अत्यन्ताभेदे सतीत्यर्थः। कल्पितस्य भेदस्य ज्ञानान्निवृत्तिः सम्भवति न सत्यस्ये-त्यपि द्रष्टव्यं। यदुक्तं नदीदृष्टान्तात् संसारः स्वाभाविक इति तन्नेत्याह। अतश्चेति। अनामरूपब्रह्मत्वाज्जीवस्येत्यर्थः। उत्पत्ति-श्रुत्या जीवस्य ब्रह्मणा भेदाभेदावित्यत आह। अत एवेति। उत्पत्तेः स्वाभाविकत्वे मुक्त्ययोगादेवेत्यर्थः। अत्र पूर्वपक्षे बीजत्रयमुक्तं जीवे-नोपक्रमः परस्यैव समुत्थानश्रुत्या जीवाभेदाभिधानं विज्ञाटशब्दश्चेति।

जानीयात्" इति कर्त्तृवचनेन शब्देनोपसंहारादिज्ञानात्मन एवेदं द्रष्टव्यत्वमिति, तदपि काण्वक्लृप्तीयेनैव दर्शनेन परिहरणीयं। अपि च "यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति" इत्यारभ्याविद्याविषये *तस्यैव दर्शनादिलक्षणं विशेषविज्ञानं प्रपञ्च्य "यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्येत्" इत्यादिनाविद्याविषये तस्यैव दर्शनादिलक्षणस्य विशेषविज्ञानस्याभावमभिदधाति। पुनश्च विषयाभावेऽप्यात्मानं विजानीयादित्याशङ्क्य "विज्ञातारमरे केन विजानीयात्" इत्याह। ततश्च विशेषविज्ञानाभावोपपादनपरत्वाद्वाक्यस्य विज्ञानधातुरेव केवलः सन् भूतपूर्वगत्या कर्त्तृवचनेन त्वचा निर्दिष्ट इति गम्यते। दर्शितन्तु पुरस्तात् काण्वक्लृप्तीयस्य† मतस्य श्रुतिमत्त्वं, अतश्च विज्ञाना-

---

तत्राद्यं बीजं चिरूत्या निरस्तं, सम्प्रति द्वितीयमनूद्य तयैव निराचष्टे। यदप्युक्तमित्यादिना। आत्मज्ञानात् सर्वज्ञानं यत्प्रतिज्ञातं तच्च हेतुरिदं सर्वं यदयमात्मेत्यव्यतिरेक उक्तस्तस्य प्रतिपादनात्तदेव प्रतिज्ञातमुपपादितमिति योजना। एकस्मात् प्रसवो यस्य एकस्मिन् प्रलयो यस्य तद्भावादित्यर्थः। समुत्थानमभेदाभिधानमिति यावत्। जन्मनाशावुक्तौ नाभेद इत्याक्षिप्य परिहरति। ननु इत्यादिना। मतस्य संज्ञा नास्तीति वाक्येऽनेव मां मोहितवानसि ज्ञानरूपस्यात्मनो ज्ञानाभावे नाशप्रसङ्गादिति मैत्रेय्योक्तो मुनिराह। न वा अरे इति। मोहं मोहकरं वाक्यं, अविनाशी नाशहेतुशून्यः, अत उच्छित्तिधर्मा नाशवान्न भवतीति अनुच्छित्तिधर्मेत्यर्थः। हतोयं बीजं हतीयेन मतेनैव निरसनीयमित्याह। यदपीत्यादिना। आद्यमतद्वये सत्यभेदाङ्गीकारात् केनेत्याद्योऽयं न युक्तः काण्वक्लृप्तस्य मते त्वत्यन्ताभेदादिज्ञानस्य कारकाभावात् स युक्त इति श्रुत्यनुसारित्वात्तन्मते

---

* तस्यैवेति वर्ध० का० पु० नास्ति। † पञ्चस्येति वर्ध० का० पु० पाठः।

त्मपरमात्मनोरविद्याप्रत्युपस्थापितनामरूपरचितदेहाद्युपाधि-निमित्तो भेदो न पारमार्थिक इत्येषोऽर्थः सर्वैर्वेदान्तवादिभिरभ्युपगन्तव्यः, सदेव सोम्येदमग्र आसीत्, एकमेवाद्वितीयं, आत्मैवेदं सर्वं, ब्रह्मैवेदं सर्वं, इदं सर्वं यदयमात्मा, नान्योऽतोऽस्ति द्रष्टा नान्योऽतोऽस्ति द्रष्टृ इत्येवंरूपाभ्यः श्रुतिभ्यः, स्मृतिभ्यश्च "वासुदेवः सर्वमिदं" "क्षेत्रज्ञञ्चापि मां विद्धि सर्वक्षेत्रेषु भारत। समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम्"। इत्येवंरूपाभ्यः। भेददर्शनापवादाच्च "अन्योऽसावन्योऽहमस्मीति *न स वेद मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति" इत्येवंजातीयकात्। "स वा एष महानज आत्माऽजरोऽमरो-

---

मनःकल्पितं विज्ञाढत्वं मुक्ते ब्रह्मात्मनि भूतपूर्वगत्योक्तमिति परिहरणीयमित्यर्थः। किञ्च पूर्वापरपर्यालोचनया वाक्यस्य मुक्तात्मपरत्वावगमात् विज्ञाढत्वं कल्पितमेवानूद्यते इति †न तल्लिङ्गेन जीवपरत्वमित्याह। अपि चेति। आर्षेषु पक्षेषु काण्वक्षत्स्वपक्षस्यैवादेयत्वे किं बीजं तदाह। दर्शितमिति। अतश्च, श्रुतिमत्त्वाच्च। पुनरपि श्रुतिस्मृतिमत्त्वमाह। सदेवेत्यादिना। हेतूनां भेदो न पारमार्थिक इति प्रतिज्ञया सम्बन्धः। भेदाभेदपक्षे जीवस्य जन्मादिविकारवत्त्वात्तन्निषेधो न स्यादित्याह। स वा एष इति। भेदस्य सत्यत्वे तत्प्रमया बाधादहं ब्रह्मेति निर्बाधं ज्ञानं न स्यादित्याह। अन्यथा चेति। अभेदस्यापि सत्त्वात् प्रमेयाग्रह्य भेदाभेदयोर्विरोधात् संशयः स्यादित्याह। सुनिश्चितेति। मास्तु निर्बाधज्ञानमित्यत आह। निरूपबादमिति। अहं ब्रह्मेत्यबाधितनिश्चयस्यैव शोकादिनिवर्तकत्वमित्यत्र स्मृतिमप्याह। स्थिते आत्यन्तिकैकत्वे हि प्रज्ञा प्रतिष्ठिता भवति न

---

*न स वेद यथा पशुरिति वर्ध० का० पु० पाठः। †नेति सो० २ पु० नास्ति।

स्मृतेऽभयो ब्रह्मेति चात्मनि सर्वविक्रियाप्रतिषेधात्, अन्यथा च मुमुक्षूणां निरपवादविज्ञानानुपपत्तेः, सुनिश्चितार्थानुपपत्तेश्च। निरपवादं हि विज्ञानं सर्वाकाङ्क्षानिवर्तकमात्मविषयं दृश्यते, "वेदान्तविज्ञानसुनिश्चितार्था" इति च *श्रुतेः, "तत्र को मोहः कः शोक एकत्वमनुपश्यतः" इति च स्थितप्रज्ञलक्षणस्मृतेश्च। स्थिते च क्षेत्रज्ञपरमात्मैकत्वविषये सम्यग्दर्शने क्षेत्रज्ञः परमात्मेति नाममात्रभेदात् क्षेत्रज्ञोऽयं परमात्मनो भिन्नः परमात्मायं क्षेत्रज्ञाद्भिन्न इत्येवंजातीयक आत्मभेदविषयो†ऽयं निर्बन्धो निरर्थकः। एको ह्ययमात्मा नाममात्रभेदेन बहुधाभिधीयत इति, न हि सत्यं ज्ञानमनन्तं ब्रह्म यो वेद-

---

भेदाभेदशैरिति भावः। ननु जीवपरमात्मानौ स्वतो भिन्नौ अपर्यायनामवत्त्वात् स्तम्भकुम्भवदित्यत आह। स्थिते चेति। कथं तर्ह्यपर्यायनामभेद इत्याशङ्क्य जीवत्वेश्वरत्वादिनिमित्तभेदादित्याह। एको ह्येति। किञ्च विद्यातच्छबुद्धिरूपायां गुहायां स्थितो जीवो भवति तस्यामेव ब्रह्म निहितमितिश्रुतेः। स्यानैक्याज्जीव एव ब्रह्मेत्याह। न ह्येति। काश्चिदेवैकामिति जीवस्यानादन्यामित्यर्थः। नन्वेकस्यां गुहायां द्वौ किं न स्यातामित्यत आह। न चेति। स्रष्टुरेव प्रवेशेन जीवत्वान्न भेदः। नन्वत्यन्ताभेदे जीवस्य स्रष्टभानात् ब्रह्मापि स्रष्टं स्यादतः स्रष्टत्वास्रष्टत्वाभ्यां तयोर्भेद इति चेन्न दर्पणे प्रतिबिम्बस्य स्फुटत्वेऽपि बिम्बस्यास्फुटत्ववत् कल्पितभेदेन विरुद्धधर्मव्यवस्थोपपत्तेः। सत्यभेदे येषामाग्रहस्तेषां दोषमाह। ये त्विति। सोऽयमिति वत्तत्त्वमस्यादिवाक्यैकार्थ्यानुपपत्तेः। अत्यन्ताभेदे वेदान्तार्थस्तद्बोध एव निःश्रेयससाधनं तस्य बाधो न युक्त इत्यर्थः। किञ्च भेदाभेदवादिनो ज्ञानकर्मभ्यां कृतकं मोक्षं कल्पयन्ति, तत्रानित्यत्वं दोषः। यत्तु कृत-

---

* श्रुतिरिति वर्ध० का० पु० पाठः। † अयमिति का० वर्ध० पु० नास्ति।

निहितं गुहायामिति काश्चिदेवैकां गुहामधिकृत्यैतदुक्तं, न च ब्रह्मणोऽन्यो गुहायां निहितोऽस्ति "तत्सृष्ट्वा तदेवानुप्राविशत्" इति स्रष्टुरेव प्रवेशश्रवणात्, ये तु निर्बन्धं कुर्वन्ति ते वेदान्तार्थं बाधमानाः श्रेयोद्वारं सम्यग्दर्शनमेव बाधन्ते कृतकमनित्यञ्च मोक्षं कल्पयन्ति न्यायेन च न सङ्गच्छन्त इति॥

प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्॥ २३॥

यथाभ्युदयहेतुत्वात् धर्मो जिज्ञास्य एवं निःश्रेयसहेतुत्वाद्ब्रह्मापि जिज्ञास्यमित्युक्तं, ब्रह्म च जन्माद्यस्य यत इति लक्षितं। तच्च लक्षणं घटरुचकादीनां मृत्सुवर्णादिवत् प्रकृतित्वे कुलालसुवर्णकारादिवन्निमित्तत्वे च समानं इत्यतो

कमपि नित्यमिति तच्च यत् क्रियासाध्यं तदनित्यमिति न्यायबाधितं। अस्माकन्त्वनर्घध्वंसस्य ज्ञानसाध्यत्वान्नित्यमुक्तात्मसाच्चत्वाच्च नानित्यत्वदोष इति भावः, तस्मान्नैचेयीब्राह्मणं प्रत्यग्ब्रह्मणि समन्वितमिति सिद्धं॥

प्रकृतिश्च प्रतिज्ञा। लक्षणसूत्रेणास्य सङ्गतिं वक्तुं वृत्तं स्मारयति। यथेति। तच्च हि ब्रह्मणो बुद्धिस्थत्वार्थं सामान्यतो जगत्कारणत्वं लक्षणमुक्तं तेन बुद्धिस्थे ब्रह्मणि कृत्स्नवेदान्तसमन्वयं प्रतिपाद्य तत्कारणत्वं किं कर्तृत्वमात्रमुत प्रकृतित्वकर्तृत्वोभयरूपमिति विशेषजिज्ञासायामिदमारभ्यते, तथा च सामान्यज्ञानस्य विशेषचिन्ताहेतुत्वात्तेनास्य सम्पत्तिः। यद्यपि तदानन्तर्यमस्य युक्तं तथापि निश्चितत्वात्पूर्ववेदान्तैः कर्तृमात्रेश्वरमतनिरासः सुकर इति समन्वयान्ते इदं लिखितं। लक्षणसूत्रस्याध्यायादिसङ्गतत्वादस्याप्यध्यायादिसङ्गतिः। पूर्वत्र सर्वविज्ञानप्रतिज्ञाया मुख्यत्वादाद्यस्य जीवपरत्वं निरस्तं तदयुक्तं

भवति विमर्शः किमात्मकं पुनर्ब्रह्मणः कारणत्वं स्यादिति। तत्र निमित्तकारणमेव तावत् केवलं स्यादिति प्रतिभाति, कस्मात्, ईक्षापूर्वककर्तृत्वश्रवणात्। ईक्षापूर्वकं हि ब्रह्मणः कर्तृत्वमवगम्यते "स ईक्षाञ्चक्रे," "स प्राणमसृजत" इत्यादिश्रुतिभ्यः। ईक्षापूर्वकञ्च कर्तृत्वं निमित्तकारणेष्वेव कुलालादिषु दृष्टं, अनेककारकपूर्विका च क्रियाफलसिद्धिर्लोके दृष्टा। स च न्याय आदिकर्तर्यपि युक्तः संक्रामयितुं। ईश्वरत्वप्रसिद्धेश्च ईश्वराणां हि राजवैद्यखतादीनां निमित्तकारणत्वमेव केवलं प्रतीयते तद्वत् परमेश्वरस्यापि निमित्तकारणत्वमेव युक्तं प्रतिपत्तुं। कार्यञ्चेदं जगत्सावयवमचेतनमशुद्धञ्च दृश्यते, कारणेनापि तस्य तादृशेनैव भवितव्यं। कार्यकारणयोः सारूप्यदर्शनात् ब्रह्म चानेवंलक्षणमवगम्यते। "निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनं" इत्यादिश्रुतिभ्यः। पारिशेष्याद्ब्रह्म-

---

कर्त्रुपादानयोर्भेदेन प्रतिज्ञाया गौणत्वादित्याक्षिपति। तत्र निमित्तेत्यादिना। पूर्वोत्तरपक्षयोर्द्वैताद्वैतसिद्धिः फलं। ईक्षापूर्वकेति ईक्षणाश्रुत्या कर्तृत्वं निश्चितं, तथा च ब्रह्म न प्रकृतिः कर्तृत्वात्, यो यत्कर्ता स तत्प्रकृतिर्न यथा घटकर्ता कुलाल इत्यर्थः। जगत् भिन्नकर्त्रुपादानकं कार्यत्वात् घटवदित्याह। अनेकेति। ब्रह्म नोपादानमीश्वरत्वात् राजादिवदित्याह। ईश्वरत्वेति। जगन्न ब्रह्मप्रकृतिकं तद्विलक्षणत्वात्, यदित्थं तत्तथा कुलालविलक्षणघटवदित्याह। कार्यञ्चेति। निष्कलं निरवयवं, निष्क्रियमचलं, शान्तमपरिणामि, निरवद्यं निरस्तसमस्तदोषं, तच्च हेतुः निरञ्जनमिति।

णोऽन्यदुपादानकारणमशुङ्घादिगुणकं स्मृतिप्रसिद्धमभ्युपगन्तव्यं ब्रह्मकारणत्वश्रुतेर्निमित्तत्वमात्रे पर्यवसानादिति, एवं प्राप्ते ब्रूमः। प्रकृतिश्च उपादानकारणञ्च ब्रह्माभ्युपगन्तव्यं निमित्तकारणञ्च न केवलं निमित्तकारणमेव, कस्मात्, प्रतिज्ञादृष्टान्तानुपरोधात्, एवं हि प्रतिज्ञादृष्टान्तौ श्रौतौ नोपरुध्येते। प्रतिज्ञा तावत् "उत तमादेशमप्राक्षो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातं" इति, तत्र चैकेन विज्ञातेन सर्वमन्यदविज्ञातमपि विज्ञातं भवतीति प्रतीयते, तच्चोपादानकारणविज्ञाने सर्वविज्ञानं सम्भवति उपादानकारणाव्यतिरेकात् कार्यस्य, निमित्तकारणादव्यतिरेकस्तु कार्यस्य नास्ति, लोके तक्षणः प्रासादव्यतिरेकदर्शनात्। दृष्टान्तोऽपि "यथा सोम्येकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यं" इत्युपादानकारणगोचर एवाम्नायते, तथैकेन लोहमणिना सर्वं लोहमयं विज्ञातं स्या-

---

अञ्जनतुल्यतमःशब्दमित्यर्थः, तर्हि जगतः सदृशोपादानं किमित्यत आह। परिशेषेत्यादिति। ब्रह्मनिषेधे प्रधानं परिशिष्यत इत्यभिमन्यमानः सिद्धान्तयति। प्रकृतिश्चेति। चकारान्निमित्तत्वग्रहः। एवमुभयरूपे कारणत्वे तयोरबाधो भवतीत्याह। एवमिति। कर्तृज्ञानादपि सर्वकार्यज्ञानं किं न स्यादित्यत आह। निमित्तकारणादव्यतिरेकस्त्विति। मृदादीनामुपादानानां दृष्टान्तत्वाद्दार्ष्टान्तिकस्य ब्रह्मण उपादानत्वं वाच्यमित्याह। दृष्टान्तोऽपीति। वाचारभ्भं नाममात्रं विकारो न वस्तुतोऽस्तीति सत्यकारणज्ञानादिकारणज्ञानं युक्तमि-

देकेन नखनिकृन्तनेन सर्वं कार्ष्णायसं विज्ञातं स्यादिति च। तथान्यत्रापि "कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवति" इति प्रतिज्ञा, यथा पृथिव्यामोषधयः सम्भवन्तीति दृष्टान्तः, तथा "आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञाते इदं सर्वं विदितं" इति प्रतिज्ञा, स यथा दुन्दुभेर्हन्यमानस्य न वाह्यान् शब्दान् शक्नुयात् ग्रहणाय दुन्दुभेस्तु ग्रहणेन दुन्दुभ्याघातस्य वा शब्दो गृहीत इति दृष्टान्तः। एवं यथासम्भवं प्रतिवेदान्तं प्रतिज्ञादृष्टान्तौ प्रकृतित्वसाधनौ प्रत्येतव्यौ। यत इतीयमपि पञ्चमी "यतो वा इमानि भूतानि जायन्ते" इत्यत्र जनिकर्तुः प्रकृतिरिति विशेषस्मरणात् प्रकृतिलक्षण एवापादाने द्रष्टव्या, निमित्तत्वन्त्वधिष्ठात्रन्तराभावादधिगन्तव्यं। यथा हि लोके मृत्सुवर्णादिकमुपादानकारणं कुलाल-

---

त्यर्थः। गतिसामान्यार्थं मुण्डकेऽपि प्रतिज्ञादृष्टान्तावाह। तथान्यत्रापीति। बृहदारण्यकेऽपि तावाह। तथात्मनीति। घटः क्षुरतीत्यनुगतक्षुरणं प्रकृतिस्तदतिरेकेण विकारा न सन्तीति सोऽयमर्थो यथा क्षुटः स्यात् तथा दृष्टान्तः स उच्यते। हन्यमानदुन्दुभिजन्याच्छब्दसामान्यादाह्यान् विशेषशब्दान् सामान्यग्रहणातिरेकेण पृथक् ग्रहीतुं श्रोता न शक्नुयात्, सामान्यस्य तु ग्रहणेन दुन्दुभ्याघातः शब्दविशेषो गृहीतो भवति, तस्य वा ग्रहणेन तदवान्तरविशेषशब्दो गृहीतो भवति, अतः शब्दसामान्यग्रहणाद्वा विशेषाः सामान्ये कल्पिताः तद्वदात्मभानभास्यघटादय आत्मनि कल्पिता इत्यर्थः। प्रतिज्ञादृष्टान्तानुरोधाल्लिङ्गाद्ब्रह्मणः प्रकृतित्वमुक्त्वा पञ्चमीश्रुत्याप्याह। यत इति। यतो वा इत्यत्र श्रुतौ यत इति पञ्चमी प्रकृतौ द्रष्टव्येत्य-

सुवर्णकारादीनधिष्ठातॄनपेक्ष्य प्रवर्तते, नैवं ब्रह्मण उपादानकारणस्य स्वतोऽन्योऽधिष्ठातापेक्ष्योऽस्ति, प्रागुत्पत्तेरेकमेवाद्वितीयमित्यवधारणात्, अधिष्ठाचन्तराभावोऽपि प्रतिज्ञादृष्टान्तानुपरोधादेवादितो वेदितव्यः। अधिष्ठातरि ह्युपादानादन्यस्मिन्नभ्युपगम्यमाने पुनरप्येकविज्ञानेन सर्वविज्ञानस्यासम्भवात् प्रतिज्ञादृष्टान्तोपरोध एव स्यात्, तस्मादधिष्ठाचन्तराभावादात्मनः कर्तृत्वमुपादानान्तराभावाच्च प्रकृतित्वं। कुतस्त्वात्मनः कर्तृत्वप्रकृतित्वे॥

अभिध्योपदेशाच्च ॥ २४ ॥

अभिध्योपदेशस्त्वात्मनः कर्तृत्वप्रकृतित्वे गमयति "सोऽकामयत बहु स्यां प्रजायेय" इति "तदैक्षत बहु स्यां प्रजायेय" इति च। तत्राभिध्यानपूर्विकायाः स्वातन्त्र्यप्रवृत्तेः कर्तेति गम्यते। बहुस्यामिति प्रत्यगात्मविषयत्वात् बहुभवनाभिध्यानस्य प्रकृतिरित्यपि गम्यते॥

न्वयः। जनिकर्त्तुर्न जायमानस्य कार्यस्य प्रकृतिरपादानसंज्ञिका भवतीति सूत्रार्थः। संज्ञायाः फलं "अपादाने पञ्चमी" [पा०२।३।२८]इति सूत्रात् प्रकृतौ पञ्चमीलाभः। एवं ब्रह्मणः प्रकृतित्वं प्रसाध्य कर्तृत्वं साधयति। निमित्तत्वमिति। ब्रह्म खातिरिक्तकर्त्रधिष्ठेयं प्रकृतित्वान्मृदादिवदित्याद्यनुमानानामागमबाधमाह। प्रागुत्पत्तेरिति। जगत्कर्तृ ब्रह्मैवेत्यपि सूत्रं योजयति। अधिष्ठाचन्तरेति॥

एकस्योभयरूपकरणत्वमविरुद्धमिति सूत्रचतुष्टयेन साधयति। कुतस्त्वेत्यादिना। अभिध्या सृष्टिसङ्कल्पः॥

साक्षाच्चोभयाम्नानात् ॥ २५ ॥

प्रकृतित्वस्यायमभ्युच्चयः इतश्च प्रकृतिर्ब्रह्म यत्कारणं साक्षाद्ब्रह्मैव कारणमुपादायोभौ प्रलयप्रभवावाम्नायेते "सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते आकाशं प्रत्यस्तं यन्ति" इति। यद्धि यस्मात् प्रभवति यस्मिंश्च प्रलीयते तत् तस्योपादानं प्रसिद्धं, यथा व्रीहियवादीनां पृथिवी। साच्चादिति चोपादानान्तरानुपादानं सूचयत्याकाशादेवेति। प्रत्यस्तमयश्च नोपादानादन्यत्र कार्यस्य दृष्टः ॥

आत्मकृतेः परिणामात् ॥ २६ ॥

इतश्च प्रकृतिर्ब्रह्म यत्कारणं ब्रह्मप्रक्रियायां "तदात्मानं स्वयमकुरुत" इति आत्मनः कर्मत्वं कर्तृत्वं च दर्शयति, आत्मानमिति कर्मत्वं स्वयमकुरुतेति कर्तृत्वं। कथं पुनः पूर्वसिद्धस्य सतः कर्तृत्वेन व्यवस्थितस्य क्रियमानत्वं शक्यं सम्पादयितुं,

---

अभ्युच्चयो हेत्वन्तरं। आकाशादेवेत्येवकारसूचितमुपादानान्तरानुपादानग्रहणं साच्चादितियदेन सूत्रकारो दर्शयतीति योजना ॥

आत्मसम्बन्धिनी कृतिः आत्मकृतिः, सम्बन्धस्यात्मनः कृतिं प्रति विषयत्वमाश्रयत्वञ्च। ननु कृतेराश्रयः सिद्धो भवति विषयस्तु साध्यः। एकस्योभयं विरुद्धमित्याशङ्कते। कथं पुनरिति। यथा मृदः साध्यपरिणामाभेदेन कृतिविषयत्वं तद्वदात्मन इत्याह। परिणामादिति। आत्मा नमित्यविरोध इति शेषः। सिद्धस्यापि साध्यत्वे दृष्टान्तमाह। विकारात्मनेति। ननु ब्रह्मण आत्मानमिति द्वितीयया कार्यात्मना साध्यत्वश्रुत्याऽस्तु प्रकृतित्वं कर्तृ त्वन्त्वेऽस्त्वित्यत आह। स्वय-

परिणामादिति ब्रूमः, पूर्वसिद्धोऽपि हि सदात्मा विशेषेण विकारात्मना परिणमयामासात्मानमिति। विकारात्मना च परिणामो मृदाद्यासु प्रकृतिषूपलब्धः, स्वयमिति च विशेषणात् निमित्तान्तरानपेक्षत्वमपि प्रतीयते। परिणामादिति वा पृथक्सूत्रं, तस्चैषोऽर्थः। इतश्च प्रकृतिर्ब्रह्म यत्कारणं ब्रह्मण एव विकारात्मनायं परिणामः सामानाधिकरण्येनाम्नायते "सच्च त्यच्चाभवन्निरुक्तञ्चानिरुक्तं च" इत्यादिनेति॥

योनिश्च हि गीयते॥ २७॥

इतश्च प्रकृतिर्ब्रह्म यत्कारणं ब्रह्मयोनिरित्यपि पठ्यते, वेदान्तेषु "कर्तारमीशं पुरुषं ब्रह्म योनिं" इति "यद्भूतयोनिं परिपश्यन्ति धीराः" इति च। योनिशब्दश्च प्रकृतिवचनः समधिगतो लोके पृथिवी योनिरोषधिवनस्पतीनामिति। स्त्रीयोनेर-

---

मिति चेति। ब्रह्मणः कृतिकर्मत्वोपपादनार्थं परिणामादिति पदं व्याख्यान्यथापि व्याचष्टे। पृथक् सूत्रमिति। मृद्घट इति वद्ब्रह्म सच्च त्यच्चेति परिणामसामानाधिकरण्यश्रुतेः ब्रह्मणः प्रकृतित्वमित्यर्थः। सत्यत्वात् भूतत्वयं, त्यत्परोक्षं भूतत्रयं, निरुक्तं वक्तुं शक्यं घटादि, अनिरुक्तं वक्तुमशक्यं कपोतरूपादिकं च ब्रह्मैवाभवदित्यर्थः॥

अत्र सूत्रे परिणामशब्दः कार्यमात्रपरः न तु सत्यकार्यात्मपरिणामपरः तदनन्यत्वमिति विवर्तवादस्य वक्ष्यमाणत्वात् योनिशब्दाच्च प्रकृतित्वमित्याह। योनिश्चेति। कर्तारं क्रियाशक्तिमन्तं, ईशं नियन्तारं, पुरुषं प्रत्यक्षं,ब्रह्म पूर्णं, योनिं प्रकृतिं,धीरा ध्यानेन पश्यन्तीत्यर्थः। नन्वनुपादानेऽपि स्त्रीयोनौ योनिशब्दो दृष्ट इत्यत आह। स्त्रीयोनेरिति। श्रोणितमवयवशब्दार्थः। योनिशब्दस्य स्थानमप्यर्थो भवति

यस्येवावयवद्वारेण गर्भं प्रत्युपादानकारणत्वं। क्वचित् स्थानवचनोऽपि योनिशब्दो दृष्टः, योनिष्ट इन्द्र निषदे अकारीति वाक्यशेषात्, तच्च प्रकृतिवचनता परिगृह्यते "यथोर्णनाभिः सृजते गृह्णते च" इत्येवंजातीयकात्। तदेवं प्रकृतित्वं ब्रह्मणः प्रसिद्धं। यत्पुनरिदमुक्तं ईक्षापूर्वकं कर्तृत्वं निमित्तकारणेष्वेव कुलालादिषु लोके दृष्टं नोपादानेष्वित्यादि तत्प्रत्युच्यते, न लोकवदिह भवितव्यं, न ह्ययमनुमानगम्योऽर्थः *शब्दगम्यत्वात्तस्यार्थस्य यथाशब्दमिह भवितव्यं, शब्दश्चेक्षितुरीश्वरस्य प्रकृतित्वं प्रतिपादयतीत्यवोचाम, पुनश्चैतत्सर्वं विस्तरेण †प्रतिवक्ष्यामः॥

एतेन सर्वे व्याख्याता व्याख्याताः॥ २८॥

ईक्षतेर्नाशब्दमित्यारभ्य प्रधानकारणवादः सूत्रैरेव पुनः

सोऽत्र भूतयोन्यादिशब्दैर्न ग्राह्यः, ऊर्णनाभ्यादिप्रकृतदृष्टान्तवाक्यशेषविरोधादित्याह। क्वचिदिति। हे इन्द्र ते तव निषदे उपवेशनाय योनिः स्थानं मया अकारि कृतमित्यर्थः। पूर्वपक्षाक्षानुमानान्न श्रुत्यागमबाधमाह। यत्पुनरित्यादिना। नन्वनुमानस्य श्रुत्यनपेक्षत्वान्न तया बाध इत्यत आह। न हीति। जगत्कर्तृ पक्षे श्रुत्यैव सिद्धति, या श्रुतिः सा शरीरजन्येति व्याप्तिविरोधेन नित्यश्रुतिमतोऽनुमानासम्भवादतः औतमीश्वरं पक्षीकृत्यानुपादानत्वसाधने भवत्येवोपजीव्यया प्रकृतित्वबोधकश्रुत्या बाध इत्यर्थः। यदुक्तं विलक्षणत्वाद्ब्रह्मणो न जगदुपादानत्वमिति तत्राह। पुनश्चेति। न विलक्षणत्वादित्यारभ्येत्यर्थः। अत उभयरूपं कारणत्वं ब्रह्मणो लक्षणमिति सिद्धं॥

एतेन सर्वे व्याख्याताः। अस्याधिकरणस्य तात्पर्यं वक्तुं वृत्तमनु-

---

* शब्दगम्यत्वात्तस्येति वर्ध० का० पु० पाठः। †प्रतिपादयिष्याम इति वर्ध०:

पुनराग्रह्य निराक्रियते, तस्य हि पक्षस्योपोद्बलकानि कानिचि-
ल्लिङ्गाभासानि वेदान्तेष्वापातेन मन्दमतीन् प्रतिभान्तीति ।
स च कार्यकारणानन्यत्वाभ्युपगमात् प्रत्यासन्नो वेदान्तवादस्य
देवलप्रभृतिभिश्च कैश्चिद्धर्मसूचकारैः स्वग्रन्थेष्वाश्रितः तेन तन्म-
तिषेधे एव यत्नोऽतीव कृतो नाण्वादिकारणवादप्रतिषेधे । तेऽपि
तु ब्रह्मकारणवादपक्षस्य प्रतिपक्षत्वात् प्रतिषेद्धव्याः, तेषामणुपो-
द्बलकं वैदिकं किञ्चिल्लिङ्गमापातेन मन्दमतीन् प्रतिभायादि-
ति, अतः प्रधानमल्लनिबर्हणन्यायेनातिदिशति, एतेन प्रधानका-
रणवादप्रतिषेधन्यायकलापेन सर्वेऽण्वादिकारणवादा अपि प्र-
तिषिद्धतया व्याख्याता वेदितव्याः । तेषामपि प्रधानवदशब्द-

वदति । ईक्षतेरिति । प्रधानवादस्य प्राधान्येन निराकरणे हेतूनाह ।
तस्य हीत्यादिना । तर्ह्यण्वादिवादा उपेक्षणीया दुर्बलत्वादित्यत आह ।
तेऽपि लिति । निर्मूलास्ते कथं प्रतिपक्षा इत्यत आह । तेषामिति ।
तथा हि छान्दोग्ये जगत्कारणत्वज्ञापनार्थं पिता पुत्रमुवाच । आसां
वटधानानां मध्ये एकां भिन्धीति भिन्ना भगव इत्युवाच पुत्रः, पुनः
पित्रा किमत्र पश्यसीत्युक्ते न किञ्चन भगव इत्याह । तत्र पित्राऽणि-
मानं न पश्यसीत्युक्तं, तथा च न किञ्चनशब्दाच्छून्यस्वभाववादो प्रती-
येते, अणुशब्दात् परमाणुवाद इति, एवमसदेवेदमग्र आसीदणो-
रणीयानित्यादि लिङ्गं द्रष्टव्यं । अत्राण्वादिवादाः श्रौता न वेति सं-
शये सत्यपद एवादिशब्दबलाच्छ्रौता इति प्राप्तेऽतिदिशति । एतेनेति ।
अस्यातिदेशत्वान्न पृथक् सङ्गत्याद्यपेक्षा न किञ्चनासच्छब्दयोः प्रत्य-
क्षायोग्यवस्तुपरत्वादणुशब्दस्य सूक्ष्माभिप्रायत्वादशब्दत्वं, तेषां वा-